
B.18.

पंचदशी

३३

न्यात्मशे
रूपत्यादि
त्तिः स्यपत्तृइ
नी स्यपिपदो

श्रप्यके
भक्तिः
तुवर्तिना प्राप्तेन स्वापसन्ध्याबोधेच्छातानात्मानात्मस्वपत्त ॥ २३ ॥

त्तिरेवर्तुनी
जात्मनिश्री
ार्थश्च तु
ादिषुश्च

कर्मणि
ात्रा

वाचेष्टा गादिष्वेव स्यान्नव ध्यादिषु भक्तिश्चेत् ऊर्ध्वादिष्वेव स्यान्न तु तेरेषु इच्छा चेद प्राप्त वस्तु विषया एव
स्यान्ने तर विषया अतो न सर्वविषयत्वं प्रीतेरित्यर्थः २१ उक्तप्रकारस्य तु व्याप्तिरिक्तं पक्षे मानरूपो तर
माह नहीति नहि प्रीतेरागादि रूपस्यासंभवे सति सुखमात्रानुवर्तिनी सुखमेव वस्तु सुखमात्रं सुखमात्रमनु
र्थ्येयते नहि इति सुखमात्रानुवर्तिनी सुखैकगोचरेत्यर्थः सात्त्विकी सत्त्वगुणपरिणामरूपा वृत्तिरन्तःकरण
वृत्तिः प्रीतिरस्तु ॥०

४

श्री.

पंचदशी

३३

न्यात्मशेषत्वे

रूपत्यादित्वभि

तिःश्रूय

ती च्यपिपद

र्यमत्कं मनपपन्तें ति

ानिरेवतुनि

ाजात्मनिश्री

ार्थम्नात

ादिवृम्न

श्रप

भक्ति

त्वा

ादिकर्मसि

ावमात्रा

त्वचेघाग

स्यान्नेनरा

माह नहीं

र न्येवतेतड

ायाएव

तं मात्रपोन्नर

…सुखमवस्तुखमात्रंसुखमात्रमत्र

…व्यक्तावरत्यथः साक्षिकीसन्धयत्रापरित्तामरूपादनिरंतः करण

वृत्तिःश्रीतिरस्तु ॥०

४

श्री

pp 1–149

los pp 68-69

न्त्यात्मशेषत्वेन सर्वस्यापि विषयस्योक्तेरात्मनः प्रियतमत्वमुक्तमनुपपन्नं विकल्पोक्तिप्रमाणात्प्रीतेरेव दुर्नि
रूपत्वादित्यभिप्रायेण प्रीतिस्वरूपं पृच्छति कीदृशेयमिति कीदृक्शब्दः प्रश्नार्थः यानिजात्मनि प्री
तिः श्रूयते इतीयं प्रीतिः का किं रागरूपा किं वा श्रद्धारूपा उत भक्तिरूपा यद्वेच्छारूपेति किंशब्दार्थः नन्वेतु
तौ द्युपपत्तौ तु प्रीतेः सर्वविषयत्वेन संभवेत्याह रागइति रागश्चेद्वस्त्रादिष्वेव स्यान्न यागादिषु श्र

कीदृशेयं भवेत्प्रीतिः श्रूयते या निजात्मनि रागो वस्त्रादिविषये श्रद्धा यागादिकर्मणि
भक्तिः स्याद्गुरुदेवादाविच्छा त्वप्राप्तवस्तुनि २१ तर्ह्यस्तु सात्त्विकी वृत्तिः सुखमात्रा
नुवर्तिनी प्राप्ते नष्टेपि सद्भावादिच्छातो व्यतिरिच्यते ॥ २३ ॥

द्धा चेद्यागादिष्वेव स्यान्न वस्त्रादिषु भक्तिश्चेद्गुर्वादिष्वेव स्यान्नेतरेषु इच्छा चेदप्राप्तवस्तुविषयैव
स्यान्नेतरविषया अतो न सर्वविषयत्वं प्रीतेरित्यर्थः २१ उक्तप्रकारचतुष्टयातिरिक्तं पक्षमादायोत्तर
माह तर्हीति तर्हि प्रीते रागादिरूपत्वासंभवे सति सुखमात्रानुवर्तिनी सुखमेव सुखमात्रं सुखमात्रमनु
सृत्यैव वर्तत इति सुखमात्रानुवर्तिनी सुखैकगोचरेत्यर्थः सात्त्विकी सत्त्वगुणपरिणामरूपा वृत्तिरन्तःकरण
वृत्तिः प्रीतिरस्तु ॥ ०

किंच भूम्यादीति सर्वप्राणिनोवस्थानप्रदानतृषिनिवारणपाककरणाद्युच्छोषणावकाशप्रदानाख्यैर्हेतु
भिः निमित्तैः पृथिव्यादीनि पंचभूतानि वांछन्ति अपेक्षंते एवं पृथिव्यादीनां तु हेतवः अवस्थानवांछनादीनि
निमित्तानि न संति अतो स्वयमाकांक्षं तद् इत्यर्थः १७ इदानीं नवाक्षरे सर्वस्य कामाप्येतस्य स्यावयस्य तात्पर्य
माह स्वामिभृत्यादीति भृत्यादिः सर्वो जनः स्वाम्यादिकं सर्वं सोपस्कारायस्वप्रयोजनाय वांछति एवं स्वाम्या

भूम्यादिपंचभूतानि स्थानतृष्पाकशोषणैः हेतुभिश्चावकाशेन वांछंत्येषां न हेतवः १७
स्वामिभृत्यादिकं सर्वं सोपस्काराय वांछति नैतावतोपकारस्तु तस्य तस्य न विद्यते १८
सर्वव्यवहतिप्रेमानुसंधानमीदृशम् उदाहरणं बाहुल्येनेन स्वांचास्य यन्मतम् १९

दिरपि १८ ननु श्रुतावेवं बहूदाहरणादर्शनं किमर्थं कृतमित्याशंक्याह सर्वेति इच्छापूर्वके च सर्वव्यपि
भोजनादिव्यवहारे च एवमात्मनः सुखमात्मनः सर्वं प्रियं भवतीत्युक्तेन प्रकारेण अनुसंधानं अनुसंधायेदृशं पति
जायादि च प्रीतिदर्शनरूपं उदाहरणबाहुल्यं कृतमिति शेषः तेन प्रकारेण स्वांशस्य संबंधिनी स्मृतिं च प्रियवासय
सर्वस्यापि स्वशेषत्वावगमेन स्वात्मनः प्रियतमत्वानुसंधानवतीं कुर्यादित्यर्थः ॥ १९ ॥

नवाम्रेरित्यत्रस्येत्यादिवाक्यस्य तात्पर्यमाह क्षत्रियइति राज्योपभोगनिमित्तं सुखं क्षत्रियत्वजातिमत्त
एव न क्षत्रियत्वजातेरित्यर्थः इदं क्षत्रियोऽहमित्येतद्वैश्याद्युपलक्षणार्थमित्याह वैश्येति १३ नवाम्रे
लोकानां कामायेत्यादिवाक्यस्य तात्पर्यमाह स्वर्गेति लोकद्वयोपादानं कर्मोपासनालक्षणसाधनद्व

गी२

क्षत्रियोऽहं तेन राज्यं करोमीत्यत्र राजता न जातेर्वैश्यजात्यादेर्योजनायेदमीरितम् १३
स्वर्लोकब्रह्मलोकौ स्तां ममेत्याभिवांछनम् लोकयोर्नोपकाराय स्वभोगायैव केवल
म् १४ ईशाविष्ण्वादयो देवाः पूज्यन्ते पापनष्टये न तन्निःपापदेवार्थं स्वार्थं तेन तु पूज्य
ते १५ ऋगादयोऽप्यधीयन्ते दुर्ब्राह्मण्यानवाप्तये न तत्प्रसक्तं वेदेषु मनुष्येष्वप्रसज्यते १६

यं संपाद्यसकललोकोपलक्षणार्थं १४ किंच ईशेति पापनष्टये पापनिवृत्तये इत्यर्थः तत्पूजनं
न निष्पापदेवार्थं स्वतः पापरहितानां न देवानां प्रयोजनाय किंतु स्वार्थं पूजा कर्तुः प्रयोजनाय १५ किंच
ऋगादय इति दुर्ब्राह्मण्यं ब्राह्मणसंस्कारहीनत्वं तच्च दुर्ब्राह्मण्यं मनुष्याध्यायान्तरजातिरूपं तद्रहिते
ष्वेदेषु न प्रसज्यत इत्यर्थः १६ ॥

चेतने भूपतिजायापुत्रेषु क्रियमाणायाः प्रीतेः स्वार्थत्वपरार्थत्वसंदेहसंभवादचेतनत्वेनेच्छामात्ररहि
तस्य वित्तविषयस्य तच्छंकैव नास्तीत्यभिप्रेत्य नवाऽरे वित्तस्य कामायेत्यादिवाक्यस्य तात्पर्यमाह निरिच्छम
पीति १० चेतनत्वेऽपि वहनादीच्छारहितपशुविषयस्य नवाऽरे पशूनामित्यस्य वाक्यस्य तात्पर्यमाह अ श्र२

निरिच्छमपि रत्नादि वित्तं यत्नेन पालयन् प्रीतिं करोति सा स्वार्था वित्तार्थत्वं न शंकितम् १०
अनिच्छन्तं बलीवर्दं विवाहयिषते बलात् प्रीतिः सा वणिगर्थैव बलिवर्दार्थता कुतः ११
ब्राह्मण्यं मेऽस्ति पूज्योऽहमिति तुष्यति पूजया अचेतनाया जातेर्नो संतुष्टिः पुंस एव सा १२

निच्छन्तीति बलीवर्देऽत्र तु हि अनिच्छति भारं वोढुमिच्छामकुर्वत्यपि बलाद्विवाहयिष्यते वाहयितुं का
मयते तत्र वाहनादिविषयायाः प्रीतेर्वणिगर्थत्वेन न बलिवर्दार्थत्वमित्यर्थः ११ नवाऽरे ब्रह्मणः कामायेति
वाक्यस्य तात्पर्यमाह ब्राह्मण्यमिति ब्राह्मण्यनिमित्तया पूजया ब्राह्मणोऽहमस्मीत्यभिमानवानेव तु
ष्यति न जडा जातिरित्यर्थः १२

एवंचसतिकिंफलितमित्यतआह नपत्युरिति जाययाक्रियमाणा या। प्रीतिःसानपत्युरर्थेपत्युःप्रयोजना
यकिंतुजायातांपत्यौप्रीतिंस्वार्थएवस्वप्रयोजनायैवकरोति नवाअरेजायायैकामायजायाप्रियाभवति आत्म
नस्तुकामायजायाप्रियाभवतीत्यादि नवाअरेसर्वस्यकामायसर्वंप्रियंभवतीत्यंतानांवाक्यानांतात्पर्यंक्रमे
णविभज्यदर्शयति पतिश्चेत्यादिना पतिश्चभर्तापिस्वप्रयोजनायैवजायायांप्रीतिंकरोति नजायाप्रीतयइ

नपत्युरर्थेसाप्रीतिःस्वार्थएवकरोतिताम् पतिश्चात्मनएवार्थेनजा
यार्थेकरुतेचेत् ८ अन्योन्यप्रेरणेप्येवंस्वेच्छयैवप्रवर्तनम् श्मश्रुकंट
कवेधेनबालेरुदतितत्पिता चुंबत्येवनसाप्रीतिर्बालार्थेस्वार्थएवसा ९

त्यर्थः ८ नन्वेकैककामनयाप्रवृत्तौप्रीतिःस्वार्थाभवतुउभयेच्छयाप्रवृत्तौतुप्रीतेरुभयार्थतास्या
दित्याशंक्याह अन्योन्येति एवमुक्तेनप्रकारेणस्वेच्छयैवस्वस्वप्रकामनानुसारेणेच्छयैवप्रवर्तनमुभयोरप्रीति
श्म२ शेषः स्वेच्छयाप्रवर्तमानत्वमेवदर्शयति श्रुकंटकेति पित्राक्रियमाणांपुत्रादिमुखचुंबनेनपुत्रप्रीत्यर्थेनस्व
श्मश्रुकंटकवेधेनरोदनेकर्तृत्वादतःनपितुःस्वतुष्ट्यर्थमेवेत्यवगंतव्यमेवेत्यर्थः ॥ ९ ॥

उत्तरत्र प्रेमास्पदत्वेन परमानंदरूपतामिति वाक्येन परप्रेमास्पदत्वहेतुनात्मनः परमानंदरूपतां सिसाधयि
६२ षुस्तत्र परप्रेमास्पदत्वहेतुसमर्थनाय तावदृष्टांतवाक्यस्योपलक्षणपरतामभिप्रेत्य तत्प्रकरणस्य सकलपर्याय
वाक्यतात्पर्यमाह पतिरिति पतिजायादिकं भोग्यजातं भोक्तृशेषत्वाद्भोक्तृसंबंधेनैव प्रियं न स्वरूपेणेत्यभि

पतिर्जायापुत्रवित्ते पशुब्राह्मणबाहुजाः लोकादेवावेदभूतेस
र्वं चात्मार्थतः प्रियम् ॥ पत्याविच्छा यदा पत्न्यास्तदा प्रीतिं
करोति सा क्षुद्रुग्ध्यानरोगाद्यैस्तदा नेच्छति तत्पतिः ॥ १

प्रायः ॥ इदानीं पूर्वोदाहृतस्य न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यात्मनस्तु कामाय पतिः प्रियः भव
तीत्यस्य वाक्यस्य तात्पर्यार्थं विभज्य दर्शयति पत्याविति यदा यस्मिन्काले पत्न्याः जायायाः पत्यौ भर्तरि इच्छा कामो
६३ भवति तदा पत्यौ प्रीतिं स्नेहं करोति यदा तु पतिः क्षुदादिनेच्छाभावहेतुना युक्तो भवति चेत् तदा तं नेच्छति
न कामयते ॥ १ श्रीरामः

रागीचेत्तद्रागानुसारेणकर्मवोपासनंवावक्ष्यामितिप्रपंचे परिहारमाह उपास्तिमिति विमुख्यायतत्त्वज्ञान विमुख्याय बहिर्मुख्यायेत्यर्थः यथोचितंयथायोग्यंब्रह्मलोकादिकामश्चेदुपास्तिंभूपालस्वर्गादिकामश्चेत्कर्मैवब्रूयादित्यर्थः जिज्ञासुत्वेऽपिसोऽतिविवेकीमंदप्रज्ञोवेतिविकल्प्यातिविवेकिनःपूर्वाध्यायोक्तप्रकारेणयोगेनब्रह्मसाक्षात्कारमभिप्रेत्यमंदप्रज्ञस्यतद्दर्शनोपायमाह मन्दप्रज्ञंत्विति योमंदप्रज्ञःमंदाजडाप्रज्ञाबुद्धिर्यस्यस

उपास्तिंकर्मवाब्रूयाद्विमुख्याययथोचितम् मंदप्रज्ञंतुजिज्ञासुमात्मानंदेनबोधयेत् ४
बोधयामासमैत्रेयींयाज्ञवल्क्योनिजप्रियाम् नवाअरेपत्युरर्थेपतिःप्रियइतीरयन् ५

प्रज्ञस्तंजिज्ञासुंज्ञातुमिच्छुर्जिज्ञासुस्तंआत्मानंदेनआत्मानंदविवेचनमुखेनबोधयेत् ४ एवंकेनकोबोधितइत्यतआह बोधयेति याज्ञवल्क्यएतन्नामकोयजुःशाखाविशेषप्रवर्तकःकश्चिदृषिः मैत्रेयीमेतन्नामिकांनिजप्रियांस्वभार्यां नवाअरेपत्युरर्थेपतिःप्रियइति नवाअरेपत्युःकामायपतिःप्रियोभवतीत्यादिप्रकारेणेरयन्ब्रुवन्बोधयामासबोधितवानित्यर्थः ॥ ५ ॥ श्रीः ॥ श्रीः ॥

श्रीगुरवे नमः तदेवं प्रपमाध्याये विवेकिनो योगेन निजानंदानुभवप्रकारं प्रदर्श्य मूढस्य जिज्ञासोरात्मानंदशाद्याप्यनात्मपदार्थविवेचनमुखेन आत्मानंदानुभवप्रकारप्रदर्शनाय शिष्यप्रश्नमवतारयति नन्वेवमिति १ शिष्येणोक्तं योगरहितमूढस्य विद्याधिकार एव नास्तीत्याह धर्मेति एषामिति मूढानां संसारेऽतीतजन्मस्वनुष्ठितसुकृतदुष्कृतवशान्नानाविधदेहस्वीकारेण पुनः पुनर्जायतां म्रियताम् चेत्यर्थः २ सर्वानुग्राहकाद्दया

नन्वेवं वासनानंदाद्ब्रह्मानंदादपीतरम् वेत्तु योगी निजानंदं मूढस्यात्रास्ति का गतिः १
धर्माधर्मवशादेष जायतां म्रियतामपि पुनः पुनर्देहलक्षैः किं नो दाक्षिण्यतो वद २
अस्ति वोऽनुजिघृक्षुत्वाद्दाक्षिण्येन प्रयोजनम् तर्हि ब्रूहि स मूढः किं जिज्ञासुर्वा पराङ्मुखः ३

र्थः तस्यापि काचन गतिर्वक्तव्येति शिष्य आह अस्तीति वो युष्माकमनुजिघृक्षुत्वादनुग्रहीतुमिच्छन्तोऽनुजिघृक्षवस्तेषां भावस्तत्त्वं तस्माच्छिष्योद्धरणेच्छायुक्तत्वाद्दाक्षिण्यतस्तदुद्धरणं प्रयोजनमस्तीत्यर्थः एवं च शिष्यवचनमाकर्ण्य गुरुस्तं विकल्प्य पृच्छति तर्हीति यदि मूढस्यापि काचन गतिर्वक्तव्या तर्हि स मूढः किं रागी विरक्तो वा वदेति ३ श्रीः

२२

प्रतिज्ञातमेवस्थानं दावगमोपायं दर्शयि[illegible]तु पा[illegible]तत्वेन स[illegible]

यत्रानन्दमयति सुषुप्तिकाले विलीनस्य: आनं[illegible]राद्येन[illegible]

नाभिधेयप्रकृत्याधिमात्येनोच्यमानम[illegible]स्या[illegible] नेदंतोव[illegible]प्रमाणं

यस्मान्नरस्य: सुप्तोसौ विज्ञानमयात्मनाम् गत्वा स्वच्छंप्रबोधं वा प्राप्नोति स्थानभेदतः ११

नेत्रे जागरं कंठे स्वप्नः सुषुप्तिर्हृदंबुजे आपादमस्तकं देहं व्याप्य जागर्ति चेतनः १२

देहतादात्म्यमापन्नस्तथायः पिंडवर्त्तिनः अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते १३

तां वा कर्मानुसारेण गच्छति ११ इदानीं जाग्रदाद्यवस्थोपयोगीनि स्थानानि दर्शयति नेत्रे इति नेत्रशब्द

स्पष्ठं स्थूलदेहोपलक्षणपरं तामभिप्रेत्य नेत्रे जागरमित्याशंक्यार्थमाह आपादेति देहं व्याप्येत्यनेन विव प्र २२

क्षितमर्थं दृष्टान्तप्रदर्शनस्वरूपमिति देहतादात्म्यमिति तत्र प्रमाणमाह अहमिति एतेन मनुष्यत्वादिजा

तिमता देहेन तादात्म्यप्राप्तस्ततः अहं मनुष्य इत्येवं निश्चित्य संश[illegible]रहितज्ञानेन गृहीत्वेवावतिष्ठते १३ श्रीः

चेतनो जीवः १२ अरि: ३

र्त्याभिधानेनब्रह्मानंदस्यसमाप्तत्वमवगम्यते मोपस्य ज[illegible]कारस्याचानुपपत्तेर्निजानंदनिरूपण
कालेयावघावरहंकारइत्यादिनासुकारस्यास्याहंकारस्यविलयप्रतिपादनान्निजानंदरूपनिर्मोपत्यमितिस
र्वमनवद्यं ८८ नन्वस्मिन्नध्यायेब्रह्मानंदविषयेनस्यैवप्रस्तुतत्वादितरानंदद्वयप्रतिपादनंप्रकृतासंगत
मित्याशंक्य। योर्ब्रह्मानंदजन्यत्वेनतद्बोधोपायो योगिनांप्रकृतासंगतमित्यभिप्रायेणाह तथेति तथा
ऽपरमानंदश्चैविषयसंगियः स्वप्रकाश आनंदोविषयानंदवासनानन्दोजनयन्निसब्रह्मानंदोवेदितव्यइ

तथाविषयानंदोवासनानंदइत्यमू आनंदौजनयन्नास्तेब्रह्मानंदःस्वयंप्रभः ८८
श्रुतियुक्त्यनुभूतिभ्यःस्वप्रकाशचिदात्मके ब्रह्मानन्देसुप्तिकालेसिद्धेस[illegible]पद्यताम् ८९

त्वर्थः ८९ ध्यानेसंकीर्तितपूर्वकं[illegible]मवगतापति श्रुतीति श्रु
तमोभिभूतःसुखरूपमेतीत्यादिभिः[illegible]तामि[illegible]नुखमह[illegible]स्वाप्सम्
मिरनुभूतस्यापिचार्थापत्तिकल्पितेनसौषुप्तानुभवेनच सु[illegible]प्तिकालेस्य[illegible]
दाजागरणावस्थायामपियोब्रह्मानंदावगमोपायो[illegible]पनेतंभासित[illegible]

पंचदशी

७७

भेदकोपाधिवर्जनादित्युक्तं तानेव भेदकोपाधीनाह शांतघोरा इति एतेषां परिहारः केनोपायेनेत्याशं
क्याह योगाद्विवेकत इति ३२ फलितमाह निरुपाधीति त्रिपुटीभानाभावाद्भूमानंदोयमित्युच्यत इ
त्यर्थः ३३ ग्रंथमुपसंहरति ब्रह्मानंदेति ३४ इदानीं ग्रंथसमाप्तौ अभेदेन हरिं स्मरन्प्रार्थयति ॥

शांतघोराःशिलाद्याश्चभेदकोपाधयोमताः योगाद्विवेकतोवैषामुपाधीनाम
पाकृतिः ३२ निरुपाधिब्रह्मतत्वेभासमानेस्वयंप्रभे अद्वैतेत्रिपुटीनास्तिभू
मानंदोपमुच्यते ३३ ब्रह्मानंदाभिधेग्रंथेपंचमोध्यायईरितः विषयानंदए
तेनद्वारेणांतःप्रविश्यताम् ३४ प्रीयाद्धरिहरोनेनब्रह्मानंदेनसर्वदा पाया
च्चप्राणिनःसर्वान्स्वाश्रितान्शुद्धमानसान् ३५ इतिविषयानंदःसमाप्तः ॥

प्रीयादिति ३५ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणश्रीराम
कृष्णाख्यविदुषाविरचितेब्रह्मानंदेविषयानन्दोनामपंचमोध्यायः १५ इतिपंचदशोत्तमप्रकरणीसंपूर्णा

११

श्रीः

इदानीं निर्गुणब्रह्मध्यानेऽनधिकारिणोऽनुग्रहाय मिश्रब्रह्मध्यानेऽधिकार इत्यभिप्रायेणाह मंद
स्येति २८ एवं सवृत्तिकं ध्यानत्रयमुक्त्वावृत्तिकं ध्यानमाह औदासीन्येत्विति उत्तमोत्तममिति
एभ्यो ध्यानेभ्योऽधिकमित्यर्थः उक्तं निगमयति ध्यानमिति २९ अयं ध्यानावांतरभेदः किं नेत्या

मंदस्य व्यवहारेऽपि मिश्रब्रह्मणि चिंतनम् उत्कृष्टं चक्रमेवात्र विषयानंदईरितः २८
औदासीन्येतु धीवृत्तेःशैथिल्यादुत्तमोत्तमम् चिंतने वासनानंदे ध्यानमुक्तं चतुर्विधम् २९
न ध्यानं ज्ञानयोगाभ्यां ब्रह्मविद्यैव सा खलु ध्याने नैकाग्र्यमापन्ने चित्ते विद्या स्थिरीभवेत् ३०
विद्यायां सच्चिदानंदा अखंडैकरसात्मताम् प्राप्याभांति न भेदेन भेदकोपाधिवर्जनात् ३१

ह न ध्यानमिति तर्हि किमेतदित्याशंक्याह ब्रह्मविद्यैवेति इयं ब्रह्मविद्या कथं उत्पन्नेत्याशं
क्याह ध्यानेनेति ३० अस्याविद्यात्वेहेतुमाह विद्यायामिति ३१ श्रीहरयेनमः ॥

एतदभिधानं किमर्थमित्याशंक्य ब्रह्मध्यानार्थमित्याह एवंस्थितेऽइति नभ्रंगारादिमुपेक्ष्यान्यत्र ब्रह्म
ध्यानं कर्तव्यमित्याह नभ्रंगारऽइति २५ अन्यत्रेत्युक्तं कुत्र कथं ध्येयमित्यत्राह शिलादाविति धो

एवंस्थितेत्र यो ब्रह्मध्यानमिच्छेत्सुमानसो नभ्रंगादिमुपेक्ष्यैतच्छिलाद्यं ध्या
येघपापघम् २५ शिलादौ नामरूपे हित्वा त्यक्त्वा सन्मात्रचिंतनम् त्यक्त्वा
दुःखंघोरमृच्छधियोः सच्चिद्विचिंतनम् २६ शांतासुसच्चिदानंदेस्त्रीन
प्येवं विचिंतयेत् कनिष्ठमध्यमोत्कृष्टास्तिस्रश्चिंताः क्रमादिमाः २७

रमृच्छद्धिषु दुःखं परित्यज्य सच्चिद्रूपयोः चिंतनं कर्तव्यमित्याह त्यक्त्वा दुःखमिति २६ सात्त्विकव्य
त्रिषु सच्चिदानंदस्त्रयोपि ध्येयाऽइत्याह शांतेति एषां ध्यानानां साम्यं किं नेत्याह कनिष्ठमध्यमऽइति २७

अभिमुख्यं केनोत्पाद्यत इत्याशंक्याह अभिमुख्यमिति तौ च ज्ञानयोगौ पूर्वोक्तावित्यर्थः कुत्रोक्तावित्याशंक्य
योगः प्रथमाध्याय उक्त इत्याह आद्य इति समनंतराध्याययोर्ज्ञानमुक्तमित्याह ज्ञानमिति २२ ननु सच्चिदा
नंदानां ब्रह्मरूपत्वे मायायाः किंरूपमित्याशंक्याह असत्तेति नृशृंगादावसत्वं मृच्छिलादिषु जाड्यमिति विवे

अभिमुख्यं ज्ञानयोगाभ्यां तौ च पूर्वमुदीरितौ आद्येध्याये योगचिंता ज्ञानमध्याययोर्द्वयोः २२
असत्ताजाड्यदुःखे द्वे मायारूपं त्रयं त्विदं असत्ता नरशृंगादौ जाड्यं काष्ठशिलादिषु २३
घोरमूढधियोर्दुःखमेवं माया विजृंभिता शांतासु जडधीष्वास्यान्मिश्रं ब्रह्मेति कीर्तितम् २४

कः २३ दुःखं कुत्रेत्याशंक्याह घोरेति एवं सर्वत्र माया प्रतिभासत इत्याह एवमिति शांतादिबुवृ
त्तिषु ब्रह्मणो मिश्रत्वे किं कारणमित्यत आह शांतेति २४ ॥ श्रीः श्रीरामः श्रीः श्रीः

क्रोधादिच्छित्त्यादयः स्वधार्याः एवं क्षान्त्यादीनां सिद्धमित्याह वृत्तिष्विति १९ इदानीं सर्वत्र ब्रह्मस्वरूपानु

काम्यलाभे हर्षवृत्तिः शांता तत्र महत्सुखम् भोगे महत्तरं लाभप्रसक्तावीषदेव हि १७
महत्तमं विरक्तौ तु विद्यानंदे तदीरितम् एवं क्षांतौ तथौदार्ये क्रोधलोभनिवारणात् १८
यद्यत्सुखं भवेत्तद्ब्रह्मैव प्रतिबिंबनात् वृत्तिष्वंतर्मुखास्वस्य निर्विघ्नं प्रतिबिंबनम् १९
सत्ता चितिः सुखं चेति स्वभावा ब्रह्मणस्त्रयः मृच्छिलादिषु सत्तैव व्यज्यते नेतरद्द्वयम् २०
सत्ता चिति द्वयं व्यक्तं धीवृत्त्योर्घोरमूढयोः शांतवृत्तौ त्रयं व्यक्तं मिश्रं ब्रह्मेत्थमीरितम् २१

ऽतिप्रदर्शनाय तत्स्वरूपं स्मारयति सत्तेति २० मृच्छिलादिषु सन्मात्रमित्यर्थः घोरमूढयोर्द्वयोः सत्ता
चितिद्वे शांतावृत्तौ सच्चिदानंदास्त्रयोपि व्यक्ताः एवं सप्रपंचब्रह्माभिहितमित्याह मिश्रमिति २१

पूर्वोक्तघोरमूढवृत्तिषुसुखाभावमेवाभिनीयदर्शयति शांतास्वपि आनंदप्रकाशोस्तिसोपिक्वचि
त्कश्चिन्नवेतितत्रप्रतिकूलदुःखस्यसत्वादित्यर्थः सुखासिद्धौदुःखंवर्धते सुखस्यप्रतिबंधेतुक्रोधोभवति

गृहक्षेत्रादिविषयेयदाकामोभवेत्तदा राजसस्यास्यकामस्यघोरत्वात्तत्रनो
सुखम् १४ सिद्धौनवेत्यस्तिदुःखमसिद्धौतद्विवर्धते प्रतिबंधेभवेत्क्रोधो
द्वेषोवाप्रतिबंधकः १५ अशक्यश्चेत्प्रतीकारोविषादःस्यात्सतामसः
क्रोधादिषुमहादुःखंसुखशंकापिदूरतः १६ ॥ श्रीरामः ॥

२

॥ १४ सुखाभावेकारणांतरमाह द्वेषइति १५ परिहारस्याशक्यत्वेविषादोभवति न
स्यापितामसत्वान्नतत्रसुखमित्याह अशक्यइति १६ ॥ श्रीरामः श्रीः

श्रीः

ननु चंद्रोपाधेरप्यस्यद्वैविध्यादाभासानुपपन्नं प्रकृतेतूपाधिभूतस्यांतःकरणस्यैकत्वादेकाभासान
मनुपपन्नमित्याशंक्य दृष्टांतांतरमाह यथेति १० इदानीं शांतासु वृत्तिषु चिदानंदयोः प्रतीतौ दृष्टांतांतर
माह काष्ठइति ११ नन्वेवं व्यवस्था कुतः कृतेत्याशंक्याह वस्तुस्वरूपमिति तत्र किं नियामकमित्याशंक्या

वि
यथा निर्मले नीरे वह्नेरौष्ण्यस्य संक्रमः न प्रकाशस्य तद्वत्स्याच्चिन्मात्रोद्भूतिस्तत्र च १०
काष्ठे त्वौष्ण्यप्रकाशौ द्वावुद्भवं गच्छतो यथा शांतासु सुखचैतन्ये तथैवोद्भूतमागतः ११
वस्तुस्वरूपमाश्रित्य व्यवस्था तूभयोः समा अनुभूत्यनुसारेण कल्प्यते हि नियामकम् १२
न घोरासु न मूढासु सुखानुभव ईक्ष्यते शांतास्वपि क्वचित्कश्चित्सुखातिशय ईक्ष्यताम् १३

ह अनुभूत्यनुसारेति १२ अनुभूतिमेव दर्शयति नघोरेति शांतास्वप्यानंदप्रकाशोस्ति सोपि क्वचित्कश्चि
त्सुखातिशयो भवतीत्याह शांतेति १३ ॥ श्रीराम कृष्ण गोपाल हरे श्रीकेशव माधव कंसारे

उदाहृतासुत्रिविधास्वपिवृत्तिषुब्रह्मणश्चिद्रूपत्वंप्रतिभातीत्याह वृत्तिष्विति शांतासु विशेषमाह शांते
ति चशब्दउक्तद्वयसमुच्चयार्थः ५ उक्तार्थेश्रुतिवाक्यमर्थतः पठति रूपमिति [illegible]

वृत्तिष्वेतासुसर्वासुब्रह्मणश्चित्स्वभावता प्रतिबिंबतिशांतासुसुखंचप्रतिबिंबति ५
रूपंरूपंबभूवासौप्रतिरूपइतिश्रुतिः उपमासूर्यकेत्यादिसूत्रयामाससूत्रकृत् ६
एकएवतुभूतात्माभूतेभूतेव्यवस्थितः एकधाबहुधाचैवदृश्यतेजलचंद्रवत् ७ ॥
जलेप्रविष्टश्चंद्रोयमस्पष्टःकलुषेजले विस्पष्टोनिर्मलेतद्वद्द्वेधाब्रह्मापिवृत्तिषु ८
घोरमूढासुमालिन्यात्सुखांशस्यातिरस्कृतिः ईषन्नैर्मल्यतस्तत्रचिदंशप्रतिबिंबनम् ९

तत्रैवव्याससूत्रैकदेशंपठति उपमेति अतएवचेतिसूत्रस्यपूर्वभागः ६ स्वरूपेणैकस्योपाधिसंपर्कान्ना
नात्वेश्रुतिंपठति एकइति ननुनिरवयवस्यब्रह्मणः क्वचिन्मात्रभानमितरत्रचिदानंदभानमित्येवंविभागकरणम
वीतिकेपोजपतितदृ

उपपन्नमित्याशंक्यचंद्रदृष्टांतेनपरि
हरति जलचंद्रवदिति ७ दृष्टांतंवि-
वृणोति जलेप्रविष्टइति उक्तमर्थंद
र्शयति ८ घोरमूढास्विति ९

श्रीगुरवेनमः पंचमाध्यायप्रतिपाद्यमर्थमाह अथेति ननुविषयानंदस्यलौकिकत्वान्मोक्षशास्त्रेनिरूपणम
नुपपन्नमित्याशंक्यतस्यलोकेप्रसिद्धत्वेपिब्रह्मानंदैकदेशत्वेनब्रह्मज्ञानोपयोगित्वाद्युक्तमित्याह द्वारभूतेति ब्र

अथात्रविषयानंदोब्रह्मानंदांशरूपभाक् निरूप्यतेद्वारभूतस्तदंशत्वंश्रुतिर्जगौ १
एषोस्यपरमानन्दोयोऽखंडैकरसात्मकः अन्यानिभूतान्येतस्यमात्रामेवोपभुंजते २
शांताघोरास्तथामूढामनसोवृत्तयस्त्रिधा वैराग्यंक्षांतिरौदार्यमित्याद्याःशांतवृत्तयः ३
तृष्णाद्वेषोरागलोभावित्याद्याघोरवृत्तयः संमोहोभयमित्याद्याःकथितामूढवृत्तयः ४

ह्मानंदैकदेशत्वेकिंप्रमाणमित्याशंक्याह तदंशत्वमिति १ तामेवश्रुतिमर्थःपठति एषइति २ इदानींवि
षयानंदस्यब्रह्मानंदलेशत्वप्रदर्शनायतदुपाधिभूतांतःकरणवृत्तिंविभजते शांतेति शांताःसात्विक्योवृत्तयः
घोराराजस्याःमूढाःतामस्यः ताएवशांतादिवृत्तीर्दर्शयति वैराग्यमित्यादिना ३ ॥ ४ श्रीमा

क्षत्यध्याम्नायमस्तकं ५६ विलुंध्यायनिधीर्यद्वा ब्रह्मानंदे विलीयताम् साक्ष्यहं किंचिदप्यत्र
नकुर्वेनापिकारये ५७ कृतकृत्यतयातृप्तः प्राप्तप्राप्यतयापुनः तृप्यन्नेवं स्वमनसामन्यतेसौ
निरंतरम् ५८ धन्योहंधन्योहंनित्यंस्वात्मानमंजसावेद्मि धन्योहंधन्योहंब्रह्मानंदोविभातिमे
स्पष्टम् ५९ धन्योहंधन्योहंदुःखंसांसारिकंनवेक्ष्यद्य धन्योहंधन्योहंस्वस्याज्ञानंप
लायितंक्वापि ६० धन्योहंधन्योहंकर्तव्यंमेनविद्यतेकिंचित् धन्योहंधन्योहंप्राप्तव्यंसर्वमद्य
सम्पन्नम् ६१ धन्योहंधन्योहंतृप्तेर्मेकोपमाभवेल्लोके धन्योहंधन्योहंधन्योहंधन्योधन्यःपुनः
पुनर्धन्यः ६२ अहोपुण्यमहोपुण्यंफलितंफलितंदृढम् अस्यपुण्यस्यसंपत्तेरहोवयमहोव
यम् ६३ अहोशास्त्रमहोशास्त्रमहोगुरुरहोगुरुः अहोज्ञानमहोज्ञानमहोसुखमहोसुखम्
६४ इममध्यायार्थमुपसंहरति ब्रह्मानन्दाभिधेग्रन्थेचतुर्थोध्यायईरितः विद्यानंदस्तदुत्पत्ति
पर्यंतोभ्यासइष्यताम् ६५ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्य ६
मुनिवर्यकिंकरेणश्रीरामकृष्णाख्यविदुषाविरचितब्रह्मानंदेविद्यानंदोनामचतुर्थोध्यायः १४ श्रीः
श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

व्याचक्षतांतेशास्त्राणिवेदानध्यापयंतुवा येत्राधिकारिणोमेतुनाधिकारोक्रियत्वतः ४४
निद्राभिक्षेस्नानशौचेनेच्छामिनकरोमिच द्रष्टारश्चेत्कल्पयंतिकिंमेस्यादन्यकल्पनात् ४५ गुं
जापुंजादिदह्येतनान्यारोपितवन्हिना नान्यारोपितसंसारधर्मानेवमहंभजे ४६ एवंत्यज्ञाततेत
त्वांस्तेजानन्नकस्माच्छृणोम्यहम् मन्यंतांसंशयापन्नानमन्येहमसंशयः ४७ विपर्यस्तोनि
दिध्यासेत्किंध्यानमविपर्यये देहात्मत्वविपर्यासंनकदाचिद्भजाम्यहम् ४८ अहंमनुष्यइत्यादि
व्यवहारोविनाप्यमुम् विपर्यासंचिराभ्यस्तवासनातोवकल्पते ४९ आरब्धकर्मणिक्षीणेव्य
वहारोनिवर्त्तते कर्माक्षयेत्वसौनैवशाम्येद्ध्यानसहस्रतः ५० विरलत्वंव्यवहृतेरिष्टंचेद्ध्या
नमस्तुते अबाधिकांव्यवहृतिंपश्यन्ध्यायाम्यहंकुतः ५१ विक्षेपोनास्तियस्मान्मेनसमाधि
स्ततोमम विक्षेपोवासमाधिर्वामनसस्स्याद्विकारिणः ५२ नित्यानुभवरूपस्यकोमेवानुभवः पृ
थक् कृतंकृत्यंप्रापणीयंप्राप्तमित्येवनिश्चयः ५३ व्यवहारोलौकिकोवाशास्त्रीयोवान्यथापिवा
ममाकर्तुरलेपस्ययथारब्धंप्रवर्त्तताम् ५४ अथवाकृतकृत्योपिलोकानुग्रहकाम्यया शास्त्री
येणैवमार्गेणवर्त्तेहंकाममक्षतिः ५५ देवार्चनस्नानशौचभिक्षादौवर्त्ततांवपुः तारंजपतुवाक्

पंचदशी

७१

अतीतग्रंथेनसिद्धमर्थंसंक्षिप्याह दुःखेति ३८ अवशिष्टंकृतकृत्यत्वंप्राप्तप्राप्यत्वमित्युभयं

दुःखाभावश्चकामाप्तिरुभेह्येवंनिरूपिते कृतकृत्यत्वमन्यच्चप्राप्तप्राप्यत्वमीरितम् ३८
उभयंतृप्तिदीपेहिसम्यगस्माभिरीरितम् तएवात्रानुसंधेयाःश्लोकाबुद्धिविशुद्धये ३९
ऐहिकामुष्मिकव्रातसिद्ध्यैमुक्तेश्चसिद्धये बहुकृत्यंपुरास्याभूत्तत्सर्वमधुनाकृतम् ४०
तदेतत्कृतकृत्यत्वंप्रतियोगिपुरःसरम् अनुसंदधदेवायमेवंतृप्यतिनित्यशः ४१
दुःखिनोज्ञाःसंसरंतुकामंपुत्राद्यपेक्षया परमानंदपूर्णोहंसंसरामिकिमिच्छया ४२
अनुतिष्ठंतुकर्माणिपरलोकयियासवः सर्वलोकात्मकःकस्मादनुतिष्ठामिकिंकथम् ४३

तृप्तिदीपेद्रष्टव्यमित्याह अतएवेति ३९ श्रीः ॥ श्रीरामकृष्णगोपालहरे श्रीरामः

५

श्री

इदानीं सर्वेषामानंदाः श्रोत्रिये विद्यंते तस्य तेषु निस्पृहत्वादित्याह तैस्तैरिति ३४ उपपादितमर्थमुपसंहरति
सर्वकामेति इदानीं पक्षांतरमाह स्वदेहवदिति यथा स्वदेहे आनंदाकारबुद्धिसाक्षित्वेनानंदित्वमितरेष्वपि देहे
षु तद्वदित्यर्थः ३५ ननूक्तप्रकारेणाज्ञस्यापि सर्वानंदप्राप्तिरस्तीत्याशंक्य सर्वेषु सर्वबुद्धिसाक्षित्वेऽहमितिज्ञाना

तैस्तैः काम्येषु सर्वेषु सुखेषु श्रोत्रियो यतः निस्पृहस्तेन सर्वेषामानंदाः संति तस्य ते ३४
सर्वकामाप्तिरेषोक्ता यद्वा साक्षिचिदात्मना स्वदेहवत्सर्वदेहेष्वपि भोगानवेक्षते ३५
अज्ञस्याप्येतदस्त्येव न तु तृप्तिरबोधतः यो वेद सोऽश्नुते सर्वान्कामानित्यब्रवीच्छ्रुतिः ३६
यद्वा सर्वात्मतां स्वस्य साम्ना गायति सर्ववित् अहमन्नं तथान्नाद इति सामस्वधीयते ३७

भावान्नैवमित्याह अज्ञस्येति उक्तार्थे तैत्तिरीयश्रुतिं प्रमाणयति यो वेदेति गुहायां निहितं ब्रह्म यो वेद सोऽश्नु
ते इति योजना ३६ इदानीं तृतीयं प्रकारमाह यद्वेति इमाल्लोकान्कामान्नीकामरूप्यनुसंचरन्नित्यादिनेत्यर्थः ३७

इदानीं गंधर्वानंदद्वैविध्यं दर्शयितुं श्लोकद्वयेन गंधर्वभेदमाह अस्मिन्निति २८ । २९ चिरलोकपित्रानंदप्र
दप्रदर्शनाय चिरलोकपितॄनाह अग्निष्वात्तेति देवानंदत्रैविध्यख्यापनाय देवभेदमाह कल्पेति ३० ॥ ३१ इं

अस्मिन्कल्पे मनुष्यः सन्पुण्यपाकविशेषतः गंधर्वत्वं समापन्नो मर्त्यगंधर्व उच्यते २८
पूर्वकल्पे कृतात्पुण्यात्कल्पादावेव चेद्भवेत् गंधर्वत्वं तादृशोऽत्र देवगंधर्व उच्यते २९ ॥
अग्निष्वात्तादयो लोके पितरश्चिरवासिनः कल्पादावेव देवत्वं गता आजानदेवताः ३०
अस्मिन्कल्पेऽश्वमेधादिकर्म कृत्वा महत्पदम् अवाप्याजानदेवैर्याः पूज्यास्ताः कर्मदेवताः ३१
यमाग्निमुख्या देवाः स्युर्ज्ञाताविंद्रबृहस्पती प्रजापतिर्विराट् प्रोक्तो ब्रह्मा सूत्रात्मनामकः ३२
सार्वभौमादिसत्वांता उत्तरोत्तरकामिनः अवाङ्मनसगम्योऽयमात्मानंदस्ततः परः ३३

बृहस्पती प्रसिद्धावित्यर्थः ३२ सार्वभौमादिसत्वांतानां श्रोत्रियान्न्यूनत्वद्योतनयाह सार्वभौमादीति एभ्यः स
र्वेभ्योऽधिकमानंदमाह अवाङ्मनसेति यतोऽयमात्मानंदः अवाङ्मनसगम्यः अत एभ्यः सर्वेभ्योऽधिक इत्यर्थः ३३

ननुसार्वभौमश्रोत्रिययोर्विषयप्राप्तिसाम्याभावात्कथमानंदसाम्यमित्याशंक्यनैरपेक्ष्यसाम्यात्तृप्तिसाम्यमित्या
ह मर्त्येत्तृप्तिसाम्येहेतुमाह भोगादिति २३ विवेकतइत्युक्तमर्थं विवृणोति श्रोत्रियेति विषयदोषाज्ञानसंभवा
त्वायांनोक्तमित्याशंक्य बृहद्रथेनमैत्रायणीयशाखायांगाथाभिरुक्तमित्याह राजाबृहद्रथइति २४

मर्त्यभोगे द्वयोर्नास्ति कामस्तृप्तिरतः समा भोगान्निष्कामतैकस्य परस्यापि विवेकतः २३
श्रोत्रियत्वाद्वेदशास्त्रैर्भोगदोषानवेक्षते राजाबृहद्रथो दोषांस्तान् गाथाभिरुदाहरत् २४ ॥
देहदोषाश्चित्तदोषा भोग्यदोषा अनेकशः शुनावांते पायसे नो कामस्तद्वद्विवेकिनः २५ ॥
निष्कामत्वे समेप्यत्र राज्ञः साधनसंचये दुःखमासीद्भाविनाशादतिभीरनुवर्तते २६
नोभयं श्रोत्रियस्यातस्तदानंदोधिकोन्यतः गंधर्वानंदआशास्ति राज्ञो नास्ति विवेकिनः २७

विवेकिनः कामानुदयेदृष्टांतमाह शुनेति २५ सार्वभौमाच्छ्रोत्रियत्रयस्याधिक्यमाह निष्कामत्वेइति २६
सार्वभौमत्वेसाधनसाध्यंपश्चाच्चतन्नाशभीतिश्चेतिदोषद्वयसत्वात् श्रोत्रियेतुतदुभयाभावादाधिक्यमित्यर्थः
श्रोत्रियस्याधिक्यांतरमाह गंधर्वेति २७ ॥ श्रीः ॥ श्रीः ॥

उक्तचातुर्विध्यमध्ये द्वितीयप्रकारमाह दुःखेति ईरिताश्रुत्येतिशेषः अस्मिन्नर्थे ऐतरेयश्रुतिवाक्यमर्थतः पठति सर्वान्कामानिति १८ जक्षत्क्रीडन्रममाणः स्त्रीभिर्वायानैर्वाज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरमिति छांदोग्यश्रुतिवाक्यमर्थतः पठति जक्षदिति १९ तत्रैतैत्तिरीयश्रुतिवाक्यमर्थतः पठति सर्वान्कामान्सहाप्नोती

दुःखाभावश्चवदेवास्य सर्वकामाप्तिरीरिता सर्वान्कामानसोप्राप्यह्यमृतोभवदित्यतः १८
जक्षन्क्रीडन्रतिंप्राप्तःस्त्रीभिर्यानैस्तथेतरैः शरीरं न स्मरेत्प्राणः कर्मणाजीवयेदिदम् १९
सर्वान्कामान्सहाप्नोतिनान्यवज्जन्मकर्मभिः वर्तंतेश्रोत्रियेभोगायुगपत्क्रमवर्जिताः २०
युवारूपी च विद्यावान्निरोगोदृढचित्तवान् सैन्योपेतःसर्वपृथ्वींवित्तपूर्णांप्रपालयन् २१
सर्वैर्मानुष्यकैर्भोगैः संपन्नस्तृप्तभूमिपः यमानंदमवाप्नोतिब्रह्मविच्चतमश्नुते २२

तिं ननु कर्मफलभोगांगीकारे जन्मापि प्रसज्येतेत्याशंक्याह नान्यवदिति ज्ञानिनः संचितकर्मणाम् दग्धत्वा दन्यवज्जन्मनास्तीत्यर्थः २० इदानीं तैत्तिरीयक बृहदारण्यकवाक्यं संक्षिप्यार्थं पठति २१ ननु सार्वभौमादि हिरण्यगर्भांतानां जीवनिष्ठानामानंदानां कथं ज्ञानिनि संभव इत्याशंक्य सर्वेषामानंदानां ज्ञानिनावगतब्रह्मानंदांशत्वात्संभव इत्याह यमानंदमिति २२

न तु ज्ञानिन आरब्धकर्मविषया चिंता मा भूत् आगामिकर्मविषया चिंता भवत्येवेत्याशंक्यात यथा पुष्करपर्णे इत्यादिश्रुत्या ज्ञानिनः आगामिकर्मसंबंधनिराकरणात्तद्विषयापि चिंता नास्तीत्याह यथेति १३ तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुत्यावष्टंभेन संचितकर्मविषयापि चिंता ज्ञानिनो नास्ती

यथा पुष्करपर्णेस्मिन्नपामश्लेषणं तथा वेदनादूर्ध्वमागामिकर्मणोऽश्लेषणं बुधे १३
इषीकातूलस्य वन्हिदाहः क्षणाद्यथा तथा संचितकर्मास्य दग्धं भवति वेदनात् १४
यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा १५
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमाँल्लोकान्न हंति न निबध्यते १६
मातापित्रोर्वधस्तेयभ्रूणहत्यान्यदीदृशम् न मुक्तिं नाशयेत्पापं मुखकांतिर्न नश्यति १७

त्याह इषीकेति १४ उक्तार्थे भगवद्वाक्यं प्रमाणयति यथैधांसि १५ ॥ १६ अस्मिन्नेवार्थे न मातृवधेन पितृवधेन न स्तेयेन न भ्रूणहत्यया नास्य पापं न चकृशो मुखं नीलं चेतीति कौषीतकीश्रुतिवाक्यमर्थतः पठति मातापित्रोरिति नवेत्येकं पदं नीलमिति कांतिरित्यर्थः १७ ॥ श्रीः श्रीः श्रीः ॥

पंचदशी
६८

इदानीमुदाहृतश्रुतितात्पर्यकथनव्याजेन पूर्वोक्तमेवार्थं विशदयति अद्वैतानंदेति तृतीयाध्यायोक्तप्रकारेण मायाकार्यनामरूपाभ्यां सच्चिदानंदपरमात्मनि विवेचिते भेदेन ज्ञाते सति सर्वं प्रपंचं मिथ्येति जानन् किं नाम भोग्यमिच्छति १० ततः द्वितीयाध्यायोक्तरीत्या जीवात्मस्वरूपेऽसंगकूटस्थचैतन्यरूपेण निश्चिते सति कामयितुर

अद्वैतानंदमार्गेण परात्मनि विवेचिते अपश्यन्वास्तवं भोग्यं किन्नामेच्छेत्परात्मवित् १०
आत्मानंदोक्तरीत्यास्मिञ्जीवात्मन्यवधारिते भोक्ता नैवास्ति कोप्यत्र शरीरानुज्वरः कुतः ११
पुण्यपापद्वये चिंता दुःखमामुष्मिकं भवेत् प्रथमाध्याय एवोक्तंश्चिंता नैनं तपेदिति १२

भावाज्ज्वरादिसंबंधो नास्तीत्याह आनंदइति ११ इदानीमामुष्मिकं ज्वरं प्रदर्शयति पुण्यपापेति संतापाभा २
वः प्रथमाध्यायेन निरूपित इत्याह प्रथमेति १२ ॥ श्रीरामकृष्णगोपालहरे श्रीरामः श्रीः

आत्मनि शोकसंबंधं दर्शयितुं तद्भेदमाह जीवात्मेति आत्मनो जीवत्वे निमित्तमाह चित्तादात्म्यादिति चैतन्यस्य स्थूलसूक्ष्मकारणरूपैस्त्रिभिः शरीरैस्तादात्म्यभ्रमे सति चित्तो भोक्तृत्वं भवति स भोक्ता जीव इत्युच्यते ६ इदानीं परमात्मनः स्वरूपमाह परमात्मेति तस्य भोग्यस्वरूपत्वापत्तिप्रकारमाह तादात्म्यमिति नामरूपकल्पनाधिष्ठान

जीवात्मा परमात्मा चेत्यात्मा द्विविध ईरितः चित्तादात्म्यात्त्रिभिर्देहैर्जीवः सन्भोक्तृतां व्रजेत् ६
परमात्मा सच्चिदानंदस्तादात्म्यं नामरूपयोः गत्वा भोग्यत्वमापन्नस्तद्विवेके तु नो भयम् ७
भोग्यमिच्छन्भोक्तुरर्थे शरीरमनुसंचरेत् ज्वरास्त्रिषु शरीरेषु स्थिता न त्वात्मनो ज्वराः ८
व्याधयो धातुवैषम्ये स्थूलदेहे स्थिता ज्वराः कामक्रोधादयः सूक्ष्मे द्वयोर्बीजं तु कारणे ९

त्वेन तत्तादात्म्यं प्राप्य भोग्यमित्युच्यत इत्यर्थः भोक्तृत्वाद्यभावे कारणमाह तद्विवेके इति ताभ्यां शरीरत्रयजगद्भ्यां विवेके भेदज्ञाने नो भयं भोक्तृभोग्यरूपं नास्तीत्यर्थः ७ उक्तमर्थं विवृणोति भोग्यमिच्छन्निति ८ एकस्मिन् शरीरे को ज्वर इत्याशंक्य स्थूलदेहे विद्यमानान्ज्वरान्दर्शयति व्याधय इति लिंगदेहगतान्ज्वरानाह कामक्रोधे

पंचदशी
६७

श्रीगुरवेनमः इदानींवृत्तवर्तिष्यमाणयोःउभयोर्ग्रंथयोःसंबंधमाह योगेनेति १ विद्यानंदस्वरूपमाह
विषयेति तस्यावांतरभेदमाह दुःखेति २ चातुर्विध्यमेवदर्शयति दुःखाभावश्चेति ३ निवर्तनीयंदुः

योगेनात्मविवेकेनद्वैतमिथ्यात्वचिंतया ब्रह्मानंदंपश्यतोथविद्यानंदंनिरूप्यते १
विषयानंदवद्विद्यानंदोधीवृत्तिरूपकः दुःखाभावादिरूपेणप्रोक्तएषचतुर्विधः २
दुःखाभावश्चकामाप्तिःकृतकृत्योहमित्यसौ प्राप्तप्राप्योहमित्येवंचातुर्विध्यमुदाहृतम् ३
ऐहिकंचामुष्मिकंचेत्येवंदुःखंद्विधेरितम् निवृत्तिमैहिकस्याहबृहदारण्यकंवचः ४
आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत् ५

खंविभजते ऐहिकमिति ऐहिकस्यनिवृत्तिर्बृहदारण्यवाक्येनोच्यतइत्याह निवृत्तीति ४ तच्छ्रुतिवाक्यंप १
ठति आत्मानंचेदिति ५ ॥ श्रीः ॥ श्रीः ॥ श्रीरामः श्रीकृष्णः श्रीः

५५८·११

पंचदशी

वेदांत

ातेषदांनिर्विषयत्वेनाप्रामाण्प्रसंगइत्याशं॰
ब्रिदानंदरूपंपरंब्रह्मतत्पदार्थस्तयोस्त्वंपदा
र्थैतेऽतो न वेदांतानांनिर्विषत्वमित्यर्थः २० ५

तेषदां निर्विषयत्वेनाप्रामाण्यप्रसंग इत्याशं
च्चिदानंदरूपं परं ब्रह्म तत्पदार्थस्तयोस्तत्त्वपदा
र्थैक्यं तेन वेदांतानां निर्विषत्वमित्यर्थः १० ८

श्रीगणेशायनमः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ प्रत्यक्तत्त्वइत्यादिनाज्ञानस्यनित्यत्वंप्रसाध्यतस्यैवेयमात्मे
त्यैक्येनंपरिसमाप्तिप्रचयगमनाभ्यांशिष्टाचारपरिप्राप्तमिष्टदेवतागुरुरूपत्वंसमर्थितमतः आत्मामहावाक्ये त्वंपदा
लक्षार्थंश्लोकेनोनिबध्नाति अर्थाद्विषयप्रयोजनेचसूचयति नम
ः परमात्माएषह्येवानंदयतीतिश्रुतेः आनंदः निरतिशयप्रेमास्पदत्व
स्त

नमः श्रीशंकरानंदगुरुपादांबुजन्मने सविलासमहामोहग्राहग्रासैककर्मणे १

दस्येतिशंकरानंदः प्रत्यगभिन्नः परमात्मा स एव गुरुः परिपक्वमलायेताज्ञानोत्पादनहेतुशक्तिपातेनयोजयतिपरेतत्त्वेसदीक्ष्य
याचार्यमूर्तिस्थइत्यागमात श्रीमांश्चासौशंकरानंदस्यगुरुश्चेतिगंधद्विपइत्यादिवत्समासः अनेनश्रीगुरोरणिमाद्यैश्वर्य
संपन्नत्वंसूचितंयद्वाश्रियासत्याशंकरोतीतिशंकरः एतेदीनः परायणं इतिश्रुते अनेनश्रीगुरोर्भक्तेष्टसंपादकेसामर्थ्यंसू
चितंभवति तस्यगुरोः पादावेवांबुजन्मकमलंतस्मैनमः प्रह्वीभावोस्तु ॥ १ ॥ श्रीगुरुभ्योनमः रामचंद्रायनमः

एतैः सप्तभिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति इत्थमिति शास्त्रस्थांगादय इत्यादिना ज्ञानस्य नित्यत्वं प्रसाध्य तस्यैवेयमात्मे
त्यात्वप्रसाधनेनात्मनः सच्चिद्रूपत्वं साधितं परमानंद इत्यादिना च परमानंदरूपत्वं समर्थितं अतः आत्मा महावाक्ये त्वंपदा

इत्थं सच्चित्परानंद आत्मा युक्त्या तथाविधं परं ब्रह्म
तयोश्चैक्यं श्रुत्यंतेषूपदिश्यते १० ८ ८८

र्थः सच्चिदानंदरूपः सिद्धः ननूक्तलक्षणस्यात्मनो युक्त्यैवावगतत्वादुपनिषदां निर्विषयत्वेनाप्रामाण्यप्रसंग इत्याशं
क्याह तथाविधमिति तथा तादृग्विधा प्रकारा यस्य तत्तथाविधं सच्चिदानंदरूपं परं ब्रह्म तत्पदार्थस्तयोस्त्वंपदा
र्थयोरैक्यमखंडैकरसत्वं च श्रुत्यंतेषु वेदांतेषु उपदिश्यते प्रतिपाद्यते अतो न वेदांतानां निर्विषयत्वमित्यर्थः १० ८

पंचदशी०

६

अात्मनः परमानंदरूपत्वमाक्षिपति अमानइति परमानंदरूपत्वं नभासते भासते वा अमानेऽप्रतीतौ न परं प्रेम आत्मनि निरति
शयस्नेहोऽस्याद्विषयभोगादौ अज्ञानजन्यत्वात्स्नेहस्य भाने प्रतीतौ तु विषये स्पृहा साधनेषु रागो न जन्येत सुखे वा स्पृहा इच्छा न
स्यात्फलप्राप्तौ सत्यां साधने छानुपपत्तेः नित्यनिरतिशयानंदलाभे सति क्षणिकसाधनपारतंत्र्यादिदोषदुष्टे तैवषयिके

अमाने न परं प्रेम भाने न विषये स्पृहा अतो भानेप्यभातासौ परमानंदतात्मनः ११

स्यैवस्पृहाऽयोगाच्च तस्मान्नानंदरूपतात्मन उपपन्नेति प्रकारांतरस्यात्र संभवान्मैवमिति परिहरति अतइति यतो
मानाभानपक्षयोरुभयोरपि दोषोऽस्त्यतः कारणादात्मनोऽसौ परमानंदताभानेपि प्रतीतौ सत्यामपि अभाता न प्रतीता
भवति ११

राम

६

कोऽसौ प्रतिवंध इत्यत आह प्रतिवंध इति अस्ति भातीति व्यवहारार्हवस्तुनि अस्ति विद्यते भाति प्रकाशत इत्येवं प्रकारं व्यवहा
रमर्हतीत्यस्ति भातीति व्यवहारार्हं तच्च तद्वस्तु चेति तथा तस्मिन् तं पूर्वोक्तं व्यवहारं निरस्य निराकृत्य विरुद्धस्य नास्ति न भातीत्ये
वंरूपस्य तस्य व्यवहारस्योत्पादनं जननं प्रतिवंध इत्युच्यते २३ उक्तलक्षणस्य प्रतिवंधस्य कारणं दृष्टांतदार्ष्टांतिकनि

प्रतिवंधोऽस्ति भातीति व्यवहारार्हवस्तुनि तन्निरस्य विरुद्धस्य तस्योत्पाद
नमुच्यते २३ तस्य हेतुः समानाभिहारः पुत्रध्वनिश्रुतौ इहानादिर
विद्यैव व्यामोहैकनिवंधनं २४

योः क्रमेण दर्शयति तस्येति पुत्रध्वनिश्रुतौ पुत्रध्वनिश्रवणलक्षणदृष्टांते तस्य प्रतिवंधस्य हेतुः कारणं समानाभिहारः
वहुभिः सह पठनं इह दार्ष्टांतिके व्यामोहैकनिवंधनं व्यामोहानां विपरीतज्ञानानामेकनिवंधनं मुख्यं कारणमनादि
रुत्पत्तिरहिताऽविद्या वक्ष्यमाणप्रतिवंधस्य हेतुरित्यर्थः २४

नन्वेकस्ययुगपज्ज्ञानाभानेनयुज्यतेऽत्याशंक्याक्किमिदयुक्तत्वंअहृच्चरत्वमुपपादयितुंनिरहितत्वेवानाघडत्याह अभिधेयत्व
वर्गेति अभिधेयत्वं वेदपाठकानां वर्गः समूहस्तस्य मध्येतिष्ठतीत्यभिधेयत्ववर्गमध्यस्थः तच्चासौपुरुषश्चेति तथा तस्याध्यय
नंतत्कर्तृकंपठनंतस्यशब्दोध्वनिर्यथाबहिःस्थस्यापितन्नीसमानोपिसामान्यतोनभासते विशेषतोऽयमस्यपुरुषध्वनिरिति

अभिधेयत्ववर्गमध्यस्थपदाध्ययनशब्दवत् मा
नेऽप्यमानंमानस्यप्रतिबंधेनयुज्यते ११ ॥ ॥

तथानंतरस्यापिमानेऽप्यमानंभवतीत्यर्थः द्वितीयंप्रत्याह मानस्येति मानेऽप्यमानमित्यत्र तदत्राप्यनुषंजनीयंमानस्य
स्मरणस्यप्रतिबंधेनबंधेनवक्ष्यमाणलक्षणेनमानेऽप्यमानंसामान्यतःप्रतीतावपिविशेषाकारेणप्रतीतिर्युज्य
ते उपपद्यतेऽत्यर्थः १२ ॥ ॥ ॥ ॥

राम
८

पंचदशी॰
८

अविद्यावशगोऽविद्यायां प्रतिबिंबत्वेन तत्परतंत्रस्तु चिदात्माऽन्यो जीवः स्यात् स च तद्वैचित्र्यात् अविद्याया उपाधिभूताया वै॰ विशुद्धितारतम्यादनेकधाऽनेकप्रकारो देवतिर्यगादिभेदेन विविधो भवतीत्यर्थः यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः शरीरत्रितयाद्धीरैः ब्रह्मैव जायत इत्युत्तरत्र शरीरत्रितयाद्विवेचितस्य परब्रह्मत्वं वक्ष्यति तत्र तानि कानि त्रीणि शरीराणि

अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा साकारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान् १७

तदुपाधिको वा जीवः किंरूपो भवतीत्याकांक्षायां तत्सर्वं क्रमेण व्युत्पादयति सा कारणशरीरमित्यादिना साऽविद्या कारणशरीरं स्थूलसूक्ष्मशरीरादिकारणभूतं प्रकृत्यवस्थाविशेषत्वात्कारणमुपचाराच्छीर्यते तत्त्वज्ञानाद्विनश्यति चेति शरीरं स्यात्तत्र कारणशरीरेऽभिमानवान् तादात्म्याध्यासेनाहमित्यभिमानवान् वा प्राज्ञः प्रज्ञाविनाशिस्वरूपाऽनुभवरूपा यस्य स प्रज्ञः प्रज्ञ एतन्नामकः स्यादित्यर्थः १७

जीं

राम
८

इदानीं प्रात्ते वंधहेत्तभूत्तामविद्यां व्युत्पादयितुं तन्मूलभूत्तां प्रकृत्तिं व्युत्पादयत्ति चिदानंदेत्ति यच्चिदानंदरूपं ब्रह्मत्तस्य प्रतिविंवेन
प्रतिछायया समन्विता युक्ता तमोरजःसत्वगुणा सत्वरजस्तमोगुणानां साम्यावस्था या सा प्रकृतिरित्युच्यते सा च द्विविधा द्विःप्रकारा
वक्ष्यमाणप्रकारांतरं सूचयत्ति १५ सहेत्तकं द्वैविध्यमेव दर्शयत्ति सत्वेत्ति सत्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिः गुणांत्तरेणाकलु

चिदानंदमयब्रह्मप्रतिविंवसमन्विता तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च सा १५
सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते मायाविंवो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः १६

षीकृतत्वं ताभ्यां सत्वशुद्ध्यविशुद्धिभ्यां ते च द्विविधे माया विद्ये मायेत्यविद्येति च मत्ते विशुद्धसत्वप्रधाना माया मलिनसत्वप्रधानाऽ
यैँ विद्येत्यर्थः द्वैध्यं मायाविद्ययोर्भेद उक्तस्तदिदानीं दर्शयत्ति मायाविंव इत्ति मायाविंवः मायायां प्रतिफलित्तश्चिदात्मा तां मायां व
शीकृत्य स्वाधिनीकृत्य वर्त्तमानः सर्वज्ञः सर्वज्ञत्वादिगुणकः ईश्वरस्यात् १६

सत्वांशानां प्रत्येकमसाधारणकार्याण्यभिधाय सर्वेषां साधारणं कार्यमाह तैः सह संभूय वर्त्तमानैः सत्वांशैः सर्वैरंतःकरणं स्वोव
स्तूपादानं तद्द्रव्यमुपजायत इत्यनुषंगः तस्यावांतरभेदं सन्निमित्तमाह वृत्तीति तदंतःकरणं वृत्तिभेदेन परिणामभेदेन द्विधा
द्विप्रकारं भवति वृत्तिभेदमेव दर्शयति मन इति विमर्शरूपं विमर्शः संशयात्मिका वृत्तिः सा स्वरूपं यस्य तत्तथा तन्मनः स्यान्नि

तैरंतःकरणं सर्वैर्वृत्तिभेदेन तद्द्विधा मनो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका २०
रजोंशैः पंचभिस्तेषां क्रमात्कर्मेंद्रियाणि तु वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे २१

श्चयो ध्यवसायः स आत्मा स्वरूपं यस्याः सा निश्चयात्मिका सा वृत्तिर्बुद्धिः स्यात् २० क्रमप्राप्तानां रजोंशानां प्रत्येकमसाधा
रणकार्याण्याह रजोंशैरिति तेषां वियदादीनामेव पंचभी रजोंशै रजोभागैरुपादानभूतैर्वाक्पाणिपादपायूपस्था
भिधानानि तन्नामकानि कर्मेंद्रियाणि क्रियाजनकानींद्रियाणि जज्ञिरे २१ ॥ ॥ ॥॥

क्रमप्राप्तं सूक्ष्मशरीरं तदुपाधिकं जीवं व्युत्पादयितुं तत्कारणाकाशादिसृष्टिमाह तमःप्रधानेति तद्भोगाय तेषां प्राज्ञानां भोगाय सुखदुःखसाक्षात्कारसिद्धये तमःप्रधानप्रकृतेः तमोगुणप्रधानायाः प्रकृतेः पूर्वोक्तायाः उपादानकारणभूतायाः सकाशादीश्वराज्ञया ईश्वरानादिभ्रांतियुक्तस्य जगदधिष्ठातुराज्ञया ईक्षापूर्वकसंकल्परूपया निमित्तकारणभूतया वियदादिपृथि

तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया वियत्पवनतेजोंबुभुवो भूतानि जज्ञिरे १८

सत्वांशैः पंचभिस्तेषां क्रमाद्धींद्रियपंचकं श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते १९

व्यंतानि पंचभूतानि जज्ञिरे प्रादुर्भूतानि उत्पन्नानीत्यर्थः १८ भूतसृष्टिमभिधाय भौतिकसृष्टिमभिदधान आदौ ज्ञानेंद्रियसृष्टिमाह सत्वांशैरिति तेषां वियदादीनां पंचभिः सत्वांशैः सत्वांशैः सत्वगुणभागैः उपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यं धींद्रियेजौयंचकं धींद्रियाणि तेषां पंचकं क्रमादुपजायते एकैकभूतसत्वांशादेकैकमिंद्रियं जायत इत्यर्थः १९ ॥ ॥

एवं सूक्ष्मशरीरमभिधाय तदभिमानित्वप्रयुक्तं प्राज्ञेश्वरयोरवस्थान्तरं दर्शयति प्राज्ञ इति प्राज्ञो मलिनसत्त्वप्रधानाऽविद्योपाधिको जीवस्तत्र तेजःशब्दवाच्यांतःकरणोपाध्युपलक्षितलिंगशरीरेऽभिमानेन तादात्म्याभिमानेन तैजसत्वं तैजसनामकत्वं प्रपद्यते प्राप्नोति ईशः विशुद्धसत्त्वप्रधानमायोपाधिकः परमेश्वरस्तत्रशरीरेऽहमभिमानेन हिरण्यगर्भतां हिरण्यगर्भ-

प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता २४
समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात् तदभावात्ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया २५

संज्ञकत्वं प्रपद्यत इत्यनुषंगः तैजसहिरण्यगर्भयोर्लिंगशरीराभिमानित्वे समाने सति तयोः परस्परभेदः किंनिबंधनः इत्यत्राह तयोरिति तयोस्तैजसहिरण्यगर्भयोर्व्यष्टित्वं च समष्टित्वं भवति अत एव भेद इत्यर्थः २४ ईश्वरस्य समष्टिरूपत्वे च कारणमाह समष्टिरिति ईश्वरो हिरण्यगर्भः सर्वेषां लिंगशरीरोपाधिकानां तैजसानां स्वात्मतादात्म्यवेदनात्स्वात्मतादात्म्यस्यैकत्वसंवेदनाज्ञानात्समष्टिर्भवति तत ईश्वरादन्यो जीवस्तदभावात्तस्य तादात्म्यवेदनस्याभावाद्व्यष्टिसं-

तत्त्वविवेकप्रकरणे २४

पम
१०

रजोंशानामेकं साधारणं कार्यमाह तैः सर्वैरिति सहितैः संभूय कारणतां गतैः प्राणो जायत इति शेषः तस्यावांतरभेदमाह वृत्तिभेदादिति स प्राणो वृत्तिभेदात्प्राणापानादिव्यापारभेदात्पंचधा पंचप्रकारो भवति वृत्तिभेदानेव दर्शयति प्राण इति ते पुनस्ते तद्भेदाः प्राणादिशब्दवाच्या इत्यर्थः २२ यदर्थमाकाशादिप्राणांतानां सृष्टिस्तत्तदिदानीं दर्शयति बुद्धीति बुद्धयो ज्ञानानि कर्माणि

तैः सर्वैः सहितैः प्राणो वृत्तिभेदात्स पंचधा प्राणोपानः समानश्चोदानव्यानौ च

ते पुनः २२ बुद्धिकर्मेंद्रियप्राणपंचकैर्मनसा धिया शरीरं सप्तदशभिः सूक्ष्मं तल्लिंगमुच्यते २३

व्यापारास्तज्जनकानींद्रियाणि बुद्धींद्रियाणि कर्मेंद्रियाणि चेत्यर्थः बुद्धिकर्मेंद्रियाणि च प्राणाश्च बुद्धिकर्मेंद्रियप्राणाः तेषां पंचकानि तैर्मनसा विमर्शात्मकेन धिया निश्चयरूपया बुद्ध्या च सह सप्तदशभिः सप्तदशसंख्याकैः सूक्ष्मं शरीरं भवति तस्यैव संज्ञांतरमाह तल्लिंगमिति उच्यते वेदांतेष्वित्यर्थः २३ ॥ रामचंद्राय नमः ॥ ॥

एवं पंचीकरणमभिधाय तैर्भूतैस्तत्कार्यवर्गं दर्शयति तैरंड इति तैः पंचीकृतैर्भूतैरुपादानकारणभूतैरंडो ब्रह्मांडः उत्पद्यते तत्र ब्रह्मांडांतर्भुवनान्युपरि उपरिभागे वर्त्तमानानां भूरादयः सप्तलोकास्तान्यभूमेरधः स्थितान्यतलादीनि सप्तपातालानि तेषु च तद्देशभुवनेषु तैः तैः प्राणिभिर्भोक्तुं योग्यान्यन्नादीनि तत्तल्लोको

तैरंडस्तत्र भुवनभोग्यभोगाश्रयोद्भवः हिरण्यगर्भः स्थूलेस्मिं

तैजसा विश्वतां याता देवतिर्यङ्नरादय

॰वो

र्भूतेभ्यो विश्वसंज्ञा जायंते एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु स्थूलशरीरेषु अभिमानवंते श्वानरसंज्ञकस्तेषां केके का स्थूलशरीराभिमानवतां व्यष्टिरूपाणां तैजसानां विश्वसंज्ञा मेऽस्मिन्निति अस्मिन्स्थूलदेहे वर्त्तमानो हिरण्यगर्भो वैश्वानरो भवेत् १८ तत्रैव वर्त्तमाना णापश्वाभवात्त तेषाम

kp/26-22

Adhyâyas
1 and 2

एवंपंचीकरणमभिधाय तैर्भूतैरुत्पाद्यं कार्यवर्गं दर्शयति तैरंडइति तैः पंचीकृतैर्भूतैरुपादानकारणभूतैरंडो ब्रह्मांडः उत्पद्यते तत्र ब्रह्मांडांतर्भुवनान्युपरि उपरिभागे वर्त्तमानानां भूम्यादयः सप्तलोकान्ताश्चमेरधः स्थितान्यतलादीनि सप्तपातालानि तेषु च तत्तद्देशभुवनेषु तैः तैः प्राणिभिर्भोक्तुं योग्यान्यन्नादीनि तत्तल्लोकोचितशरीराणि च तैरेव पंचीकृतै

तैरंडस्तत्र भुवनभोग्यभोगाश्रयोद्भवः हिरण्यगर्भः स्थूलेस्मिन् देहे वैश्वानरो भवेत् २८
तैजसा विश्वतां याता देवतिर्यङ्नरादय

ᐟवांतरभेदमाह देवतिर्यङ्गिति

र्भूतैरेव [illegible] जायंते एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु स्थूलशरीरेषु अभिमानवतो हिरण्यगर्भस्य समष्टिरूपस्य वैश्वानरसंज्ञकत्वं एकैकस्थूलशरीराभिमानवतां व्यष्टिरूपाणां तैजसानां विश्वसंज्ञत्वं च भवतीत्याह हिरण्यगर्भ इति अस्मिन् स्थूलदेहे वर्त्तमानो हिरण्यगर्भो वैश्वानरो भवेत् २८ तत्रैव वर्त्तमानास्तैजसा विश्वा भवंति तेषामᐟ

राम
११

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव
षण्णां भगईयिते इति २

एवं लिंगशरीरं तदुपाधिकौ तैजसहिरण्यगर्भौ च दर्शयित्वा स्थूलशरीरोत्पत्तिसिद्धये पंचीकरणं निरूपयितुमा-
ह तद्भोगायेति भगवान् ऐश्वर्यादिगुणषट्कसंपन्नः परमेश्वरः पुनः पुनरपि तद्भोगाय तेषां जीवानां भोगायैव भोग्यभोगायत-
नजन्मने भोग्यस्यान्नपानादेर्भोगायतनस्य जरायुजादिचतुर्विधशरीरजातस्य च जन्मने उत्पत्तये वियदादिकं आकाशादि-
भूतपंचकं प्रत्येकमेकैकं पंचीकरोति अपंचात्मकं पंचात्मकं सम्पद्यमानं करोति २६ कथमेकैकस्य पंचपंचात्मकत्व-

तद्भोगाय पुनर्भोग्यभोगायतनजन्मने पंचीकरोति भगवान्प्रत्येकं वियदादिकं २६

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते २७

मित्यत आह द्विधेति वियदादिकमेकैकं द्विधा द्विधा तत्रैकोच्चरितो द्विधाशब्दः विधाय कृत्वा भागद्वयोपेतं कृत्वे-
त्यर्थः पुनश्च पुनरपि प्रथमं भागं चतुर्धा भागचतुष्टयोपेतं विधायेत्यनुषज्यते स्वस्वेतरद्वितीयांशैः स्वस्मात्स्व-
स्मादितरेषां चतुर्णां चतुर्णां भूतानां योयो द्वितीयो भागः स्वस्वो भागस्तेन तेन सह प्रथमप्रथमभागांशानां चतुर्णां च-
तुर्णां मध्ये एकैकस्य योजनात्ते वियदादयः प्रत्येकं पंचपंचात्मका भवंति ॥ २७

एवंसंसारापत्तिमभिधायतन्निवृत्त्युपायंदर्शयितुंदृष्टांतंतावदाह सत्कर्मेति तेकीटाःसत्कर्मपरिपाकात्पूर्वोपार्जित
पुण्यकर्मपरिपाकात्कृपालुनाकेनचित्पुरुषविशेषेणोद्धृताःनदीप्रवाहाद्बहिर्निःसारिताःसंतस्तीरतरुच्छायांप्राप्य
सुखंयथाभवतितथायद्विश्राम्यंति ३१ इदानींदृष्टांतसिद्धमर्थंदार्ष्टांतिकेयोजयति उपदेशमिति एवमनेनप्र

सत्कर्मपरिपाकात्तेकरुणानिधिनोद्धृताः ३१ प्राप्यतीरतरुच्छायांविश्राम्यंतियथा
सुखं उपदेशमवाप्यैवमाचार्यात्तत्त्वदर्शिनः ३२ पंचकोशविवेकेनलभंतेनिर्वृ
तिंपरां ॥

कारेणपूर्वोपार्जितपुण्यकर्मपरिपाकवशादेवतत्त्वदर्शिनःप्रत्यगभिन्नब्रह्मसाक्षात्कारवतःआचार्याद्गुरोःसकाशादु
पदेशंतत्त्वमस्यादिवाक्यार्थज्ञानसाधनंश्रवणंवक्ष्यमाणमवाप्यसंपाद्यपंचकोशविवेकेनान्नादीनांपंचानांको
शानांविवेकेनवक्ष्यमाणविवेचनेनपरांनिर्वृतिंमोक्षसुखंलभंतेप्राप्नुवंति ॥

इदानीं तेषां विश्वसंज्ञार्णुप्राणां जीवानां तत्वज्ञानरहितत्वेन संसारापत्तिप्रकारं स्पष्टं तच्छ्लोकद्वयेनाह तेपरागिति ते
देवादयः पराग्दृष्टिभिः बाह्यानेव शब्दादीनेव पश्यंतो न तु प्रत्यगात्मानं परांचि खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यं
ति नांतरात्मन्निति श्रुतेः ननु तार्किकादयो देहव्यतिरिक्तमात्मानं जानंतीत्याशंक्य यद्यप्यात्मानं ते जानंति तथापि श्रु
तिसिद्धं तत्वं न जानंतीत्याशयेनोक्तमित्याह प्रत्यगिति २९ अत एव भोगाय सुखाद्यनुभवाय मनुष्यादिशरीराण्यधि

ते पराग्दृष्टयः सर्वे प्रत्यग्बोधविवर्जिताः २९ कुर्वंते कर्म भोगाय कर्म कर्तुं च भुंजते
नद्यां कीटा इवावर्तादावर्तांतरमाशु ते ३० व्रजंतो जन्मनो जन्म लभंते नैव निर्वृतिं ।

ष्ठाय कर्म तत्तच्छरीरोचितानि कर्माणि कुर्वंते जातावेकवचनं पुनश्च कर्मकर्तृदेवादिशरीरैस्तत्तत्फलं भुंजते च
फलानुभवाभावे तत्तत्सजातीयेच्छानुपपत्त्या तत्तत्साधनानुष्ठानानुपपत्तेः एवं वर्तमानास्ते जीवाः नदीप्रवाह
पतिताः कीटाश्चावर्तादावर्तांतरमाशु ३० व्रजंति यथा निर्वृतिं सुखं न लभंते एवमाशु जन्म व्रजंतः सुखं नैव ल
भंत इति ॥ ५

प्राणस्तु प्राणमयकोशस्तु लिंगशरीरे वर्त्तमाने राजसे रजोगुणकार्यं तैः प्राणैः प्राणापानादिभिर्वायुभिः पंचभिर्वागादिभिः कर्मेंद्रियैः सह दशभिः स्याद्विमर्शात्मा संशयात्मकं पंचमहत्तत्त्वकार्यं यन्मन उक्तं तत्सात्विकैः प्रत्येकं महत्तत्त्वकार्यैर्ज्ञैर्धींद्रियैः श्रोत्रादिभिः पंचभिर्ज्ञानेंद्रियैः साकं सहितं मनोमयः कोशः स्यादिति पूर्वेण संबंधः ३५ लिंग

लिंगे तु राजसैः प्राणैः प्राणः कर्मेंद्रियैः सह सात्विकैर्धींद्रियैः साकं विमर्शात्म
मनोमयः ३५ तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका कारणे सत्त्वमानंद
मयो मोदादिवृत्तिभिः ३६

यात्मिका धीस्तेषामेव सत्त्वकार्यरूपा बुद्धिस्तैरेव पूर्वोक्तैर्ज्ञानेंद्रियैरेव साकं सहिता सती विज्ञानमयः विज्ञानमयाख्यः कोशः स्यात्कोशः कारणे कारणशरीरस्थायामविद्यायां यन्मलिनसत्त्वमस्ति तन्मोदादिवृत्तिभिः प्रियमोदाप्रमोदाख्यैरिष्टदर्शनलाभभोगजन्यैः सुखविशेषैः सहितमानंदमयाख्यं कोशः स्यादिति ३६

राम
१३

केतेऽन्नादयः पंच कोशा इत्याकांक्षायां तानुद्दिशति अन्नं प्राण इति अन्नं प्राणो मनो बुद्धिरानंदश्चेति पंच कोशाः बुद्धिर्विज्ञानं ३३ तेषामन्नादीनां कोशशब्दाभिधेयत्वे कारणमाह तैरिति तैः कोशैरावृतः आच्छादितः स्वात्मा स्वस्वरूपस्थ तत्रात्मा विस्मृत्या स्वस्वरूपविस्मरणेन संसृतिं जननादिप्राप्तिरूपं संसारं व्रजेत् स्य ३ कोशो यथा को

अन्नं प्राणो मनो बुद्धिरानंदश्चेति पंच ते ३३ कोशास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत्
स्यात्पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः ३४

शकारस्य क्रमेणावरकत्वेन क्लेशहेतुरेवमन्नादयो ह्यानंदान्ता ह्यावरकत्वेनात्मनः क्लेशहेतुत्वात्कोशा इत्युच्यंते इत्यर्थः तेषां कोशानां स्वरूपाणि क्रमेण व्युत्पादयति स्यात्पंचीकृतेत्यादि वासोसादिवज्ञिभिरित्यंतेन सार्द्धश्लोकद्वयेन पंचीकृतेभ्यो भूतेभ्यो भूतेभ्य उत्पन्नः स्थूलो देहोऽन्नसंज्ञकः अन्नमयशब्दितः कोशः स्यात् ३४ ॥ ॥

इदानीं विवक्षितावन्वयव्यतिरेकौ दर्शयति अभान इति स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्याभाने ऽप्रतीतौ सत्यां आत्मनः प्रतीत्या यज्ज्ञानं स्वप्नसाक्षित्वेन यत्स्फुरणमस्ति सः आत्मनो ऽन्वयः तस्यामेव स्वप्नावस्थायां तज्ज्ञानेन तस्यात्मनः स्फुरणेन सति अन्यानवभासनमन्यस्य स्थूलदेहस्यानवभासनमप्रतीतिः व्यतिरेकः स्थूलदेहस्येति शेषः अस्मिन्प्रकरणे ऽन्वयव्यतिरेक

अभाने स्थूलदेहस्य स्वप्ने यज्ज्ञानमात्मनः ३७ सोन्वयव्यतिरेकस्तज्ज्ञाने ऽन्यानवभासनं
लिंगाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः ३८ व्यतिरेकस्तु तज्ज्ञाने लिंगस्याभानमुच्यते ।

शब्दाभ्यां अनुवृत्तिव्यावृत्ती उच्येते एवं स्थूलदेहस्यानात्मत्वावबोधकावन्वयव्यतिरेकौ दर्शयित्वा लिंगदेहस्य तथात्वावगमकौ तौ दर्शयति लिंगेति सुषुप्तौ सुषुप्त्यवस्थायां लिंगस्य सूक्ष्मदेहस्याभाने ऽप्रतीतौ आत्मनो भानं तदवस्थासाक्षित्वेन स्फुरणमात्मनो ऽन्वयः स्यात्तज्ज्ञाने आत्मनः भाने लिंगस्याभानं लिंगदेहस्यास्फुरणं व्यतिरेक इत्युच्यते ३८ । ।। । ।।।।

ननु स्थूलशरीरादीनामन्नमयादिशब्दवाच्यत्वे स वा एष पुरुषोऽन्नरसमय इत्युपक्रम्य तस्माद्वा एतस्मादन्नरसमयादन्योंतर आ
त्मा प्राणमयो ऽन्योंतर आत्मा मनोमय इत्यादिश्रुति ष्वात्मनोऽन्नमयादिशब्दवाच्यत्वं कथमुच्यते ऽत्याशंक्य देहादीनामन्ना
दिविकारत्वेनान्नमयादिशब्दवाच्यत्वे आत्मन ऽप्यात्मनस्तेन तेन कोशेन सह तादात्म्याभिमानादित्याह तत्तदिति ऽप्यात्मा प्रत्य
गात्मा तत्तत्कोशैस्तेन तेन कोशेन सह तादात्म्यात् तादात्म्याभिमानात् तत्तन्मयस्तत्तत्कोशमयः स्याद्व्यवहारकालेऽन्नमयादिको

तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् ऽअन्वयव्यतिरेकाभ्यां पंचकोशविवे
कतः ३७ स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते

शोपाधानात् अन्नमयादिशब्दवाच्य इत्यर्थः तुशब्दस्त्वात्मनः कोशेभ्यो वैलक्षण्यद्योतनार्थः कथं तर्ह्येवंविधस्यात्मनो ब्र
ह्मत्वं भवतीत्याशंक्य कोशविवेचनाद्भवतीत्याह अन्वयेति ऽअन्वयव्यतिरेकाभ्यां वक्ष्यमाणाभ्यां पंचकोशविवेकतः पंचा
नां कोशानामन्नमयादीनां आत्मनो विवेचनेन पृथक्करणेन यः पंचकोशेभ्योऽन्नमयादिभ्यः ऽआत्मनः पृथक्करणेन स्वात्मा
नं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्य उद्धृत्य बुद्ध्या निष्कृष्य चिदानंदस्वरूपं निश्चित्य परं ब्रह्म पूर्वोक्तलक्षणं प्रपद्यते प्राप्नो
ति ब्रह्मैव भवतीत्यर्थः

ऽनात्मभाने ऽनात्मनः स्फूर्त्तौ सत्यां सुषुप्त्यनवभासनं सुषुप्त्युपलक्षितस्याज्ञानस्याप्रतीतिरेव व्यतिरेकस्तस्येति ऽत्रायं प्रयोगः प्रत्यगात्मा ऽन्नमयादिभ्यो भिद्यते तेषु तेषु परस्परं व्यावर्त्तमानेष्वपि स्वयमव्यावृत्तत्वात् यद्येषु व्यावर्त्तमानेष्वपि न व्यावर्त्तते तत्तेभ्यो भिद्यते यथा कुसुमेभ्यः सूत्रं यथा वा खंडादिव्यक्तिभ्यो गोत्वमित्यन्वयव्यति-

व्यतिरेकस्त्वात्मभाने सुषुप्त्यनवभासनं
यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः ४२

रेकाभ्यां कोशपंचकाद्विविक्तस्यात्मनो ब्रह्मप्राप्तिर्भवतीत्युक्तं तत्प्रतिपादिकामंगुष्ठमात्रः पुरुषोंतरात्मेत्यादिकां तं विद्याच्छुक्रममृतमिति पर्यंतां कठश्रुतिमर्थतः पठति यथेति यथा येन प्रकारेण मुंजादेस्तन्नामकात्तृणविशेषादिषीकां गर्भस्थं कोमलतंतुं युक्त्या बहिरावरकत्वेन स्थितानां स्थूलपत्राणां विभजनलक्षणोपायेन समुद्ध्रियते ४२

राम
१५

ननुपंचकोशविवेचनमपक्रम्यलिंगदेहविवेचनंप्रकृतासंगतमित्याशंक्यप्राणमयादिकोशानांतस्यतत्रैवांतर्भावान्नप्र-
कृतासंगतिरित्याह तद्धिवेकादिति तस्यलिंगशरीरस्यविवेकाद्विवेचनात्प्राणमनोधियस्तन्नामकाःकोशाविविक्ताःपृ-
थक्कृताःस्युः ४० कुतइत्यतआह तेहीति हियस्मात्कारणात्तेप्राणमयादयः तत्रतस्मिन्लिंगशरीरेगुणा-

तद्धिवेकाद्विविक्ताःस्युःकोशाःप्राणमनोधियः ४० तेहितत्रगुणावस्थाभेदमात्रात्पृ-
थक्कृताः सुषुप्त्यभानंतुसमाधावात्मनोन्वयः ४१

वस्थाभेदमात्राद्गुणयोःसत्वरजसोरवस्थाभेदमात्राद्गुणप्रधानभावेनावस्थानविशेषादेवपृथक्कृताः भेदेननिर्दिष्टाइत्यर्थः
इदानीमानंदमयकोशत्वेनविवक्षितस्यकारणशरीरस्यविवेचनोपायमाह सुषुप्तीति समाधौवक्ष्यमाणलक्षणायांस-
माध्यवस्थायांसुषुप्त्यभानेसुषुप्तिशब्दोपलक्षितस्यकारणदेहस्यअज्ञानस्याप्रतीतौआत्मनस्तुशब्दोऽवधारणेआ-

तानंदमयभानंसुषुप्त्यांयदस्तिसमात्मनोन्वय ४१

जगत इति यत्सच्चिदानंदलक्षणं ब्रह्म तामसीं तमोगुणप्रधानां मायामादाय उपाधित्वेन स्वीकृत्य जगतश्चराचरात्मकस्य कार्यवर्गस्य उपादानमध्यासाधिष्ठानं शुद्धसत्त्वां विशुद्धसत्त्वप्रधानां तामुपाधित्वेन स्वीकृत्य निमित्तमुपादानाद्यभिन्नञ्च कर्तृ भवति तद्ब्रह्म निमित्तोपादानोभयरूपं ब्रह्म तद्गिरा तत्त्वमसिवाक्यस्थेन तत्पदेनोच्यते त्वंपदवाच्यार्थमाह य

जगतो यदुपादानं मायामादाय तामसीं ४४ निमित्तं शुद्धसत्त्वां तामुच्यते ब्रह्म
तद्गिरा यदा मलिनसत्त्वां तां कामकर्मादिदूषितां ४५ आदत्ते तत्परं ब्रह्म त्वं
पदेन तदोच्यते त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीं ४६ ॥ ॥

देव ब्रह्म यदा पश्चामवस्थायां मलिनसत्त्वां ईषद्रजस्तमोमिश्रणान्मलिनसत्त्वप्रधानां अत एव कामकर्मादिदूषितां तामविद्याशब्दवाच्यां मायामादत्ते उपाधित्वेन स्वीकरोति तदा त्वंपदेनोच्यते एवं तत्त्वंपदार्थावभिधाय वाक्यार्थमाह त्रितयीमिति त्रितयीमपि त्रिप्रकारामपि तमःप्रधानविशुद्धसत्त्वप्रधानमलिनसत्त्वप्रधानत्वभेदेन तामत एव परस्परविरोधिनीं तां मायां मुक्त्वा परित्यज्य अखंडभेदरहितं सच्चिदानंदं ब्रह्म महावाक्येन लक्ष्यते ४६ ॥ ।।।

राम
२६

एवमात्मापि युक्त्याऽन्वयव्यतिरेकलक्षणोपायेन शरीरत्रितयात्पूर्वोक्ताच्छरीरत्रितयाद्धीरैः ब्रह्मचर्यादिसाधनसंपन्नैरधि-
कारिभिः समुद्धृतः पृथक्कृतश्चेत्तस्य परं ब्रह्मैव जायते चिदानंदरूपत्वस्य लक्षणस्योभयोरविशिष्टत्वादित्यभिप्रायः ॥
एतावता ग्रंथसंदर्भेण सफलस्य तत्त्वज्ञानस्य निरूपितत्वादुत्तरग्रंथभागस्यानारंभप्रसंग इत्याशंक्य तदारंभसिद्धये वक्ता ॥

शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते ॥ परापरात्मनोरेवं युक्त्या सं-
भावितैकता ॥ ४३ ॥ तत्त्वमस्यादिवाक्यैः स्वाभासत्यागेन लक्ष्यते

उक्तार्थेन पूर्वेकमुत्तरग्रंथस्य तात्पर्यमाह परापरेति । एवमुक्तेन प्रकारेण परापरात्मनोस्तत्त्वंपदार्थयोः परमा-
त्मजीवात्मनोरेकताऽभिन्नता युक्त्या लक्षणसाम्यदर्शनाद्युपायेन संभाविताऽङ्गीकारिता सा एकता तत्त्वमस्यादिवाक्यैः
स्वस्वभागत्यागेन विरुद्धांशपरित्यागेन लक्ष्यते लक्षणया वृत्त्या बोध्यते ॥ ४३ ॥ तत्त्वमसीति वाक्यार्थज्ञानस्य तदादिपदा-
र्थज्ञानपूर्वकत्वात्तत्पदस्य वाच्यार्थं तावदाह ॥ ५ ॥

द्वितीये दोषमाह निर्विकल्पस्येति निर्विकल्पस्य नामजात्यादिना रहितस्य लक्ष्यत्वं न दृष्टं लोके न क्वापि दृष्टं न
पंचदशी॰ च संभवि उपपद्यमानमपि न भवति लक्ष्यत्वधर्मवत्तो निर्विकल्पत्वव्याघातादिति यावत् सिद्धांती जात्युत्तरत्वाच्चेदं
१७ चोद्यमिति विकल्पपूर्वकं दोषमाह विकल्प इति
स्वापेक्षकापेक्षकापेक्षत्वं चक्रकत्वं स्वस्याद्यस्य तृतीयस्तदपेक्षकः द्वितीयस्तदपेक्षकः प्रथमांत
स्तदपेक्षा पुनस्तृतीयस्येति निष्कर्षार्थः

निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च संभवि विकल्पो निर्विकल्पस्य
स्याद्वा भवेत् ५०

सविकल्पस्य वा निर्विकल्पस्य वा लक्ष्यत्वमिति यो विकल्पस्त्वया कृतः सविकल्पनिर्विकल्पस्य उक्तसवि॰ राम
कल्पस्याद्वा भवेत् ५० १७

नन्वेवं लक्षणया वाक्यार्थबोधनं क्व दृष्टमित्याशंक्याह सोयमिति सोयं देवदत्त इत्यादि वाक्येषु तदिदंतयोस्तदेतद्देशका
लवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधादैक्यानुपपत्तेर्भागयोर्विरुद्धांशयोस्त्यागेनैकआश्रयो देवदत्तस्वरूपमेकमेव यथाल
क्ष्यते एवं दृष्टान्तमभिधाय दार्ष्टान्तिकमाह मायाविद्य इति एवं सोयं देवदत्त इत्यादि वाक्ये यथा तत्त्वंपदजीवयोरुपाधी उपाधि

अखंडं सच्चिदानंदं महावाक्येन लक्ष्यते सोयमित्यादि वाक्येषु विरोधात्तदिदंतयोः ४७
त्यागेन भागयोरेकआश्रयो लक्ष्यते यथा मायाविद्ये विहायैवमुपाधीपरजीवयोः ४८
अखंखंडं सच्चिदानंदं परं ब्रह्मैव लक्ष्यते सविकल्पस्य लक्ष्यत्वे लक्ष्यस्य स्याधींपूंदवस्तुता ४९

भूते मायाविद्ये पूर्वोक्ते विहायाखंडमेदरहितं सच्चिदानंदपरं ब्रह्मैव महावाक्येन लक्ष्यते ४८ ननु महावाक्येन लक्ष्यं सविकल्प
मुत निर्विकल्पमिति विकल्प्य प्रथमपक्षे दोषमाह पूर्वार्द्धे सविकल्पस्येति सविकल्पस्य विकल्प्येन विपरितत्वेन क
ल्पितेन नामजात्यादिना रूपेण सह वर्त्तत इति सविकल्पं तस्य लक्ष्यत्वे वाक्येन बोध्यत्वे लक्ष्यस्य वाक्यार्थं तया ल
क्ष्यस्यावस्तुता स्यात् मिथ्यात्वं स्यात् ४७ ४८ ४९ ८ ८८८८८८

पंचदशी नकेवलमद्वैतेवेदंदूषणमपितुसर्वद्वैतेविविधविकल्पपूर्वकंदूषणंप्रसरतीत्याह इदमिति इदंविकल्पदूषणजातंगुण
१८ क्रियाजातिद्रव्यसंबंधवस्तुषुगुणादिसंबंधांतेषुपंचस्ववस्तुषुसमं तथाहि गुणः किंनिर्गुणेवर्त्तते ऽथवागुणवति
क्रियापिक्रियारहितेवर्त्तते क्रियावतिवा किंमाद्येव्याघातताऽन्योन्याश्रयादयइतिसर्वत्रचैवमूह्यं ५१ ॥५

इदंगुणक्रियाजातिद्रव्यसंबंधवस्तुषु ५१ समंतेन
स्वरूपस्यसर्वमेतदितीष्यतां

नन्विदमसदुत्तरंचेत्किंसदुत्तरमित्याशंक्याह तेनेति तेनैवंविकल्पाक्षमासंगतत्वेनेतद्गुणादिकंसर्वंस्वरूपस्ये राम
तीष्यतांगुणादयः सर्वेवस्तुस्वरूपेवर्त्तंतइत्यभिप्रायः ५१ १८

ाद्ये प्रथमे पक्षे व्याहतिस्तयोरेकोव्याघात एव अन्यत्र द्वितीये पक्षेऽनवस्थादयः तथाहि सविकल्पस्य विकल्पइत्यइत्यत्र विकल्पेन सहवर्त्तत इत्यत्र तृतीयांतविकल्पपदेन प्रथमांतविकल्पपदेन चैक एव विकल्पोभिधीयते द्वौ वा एकः एतच्चेत्स्वयमेकोव विकल्पाश्रयविशेषणतयाऽऽश्रयस्तदाश्रितो विकल्पश्चेत्तदात्माश्रयता द्वौ चेत्तदा तृतीयो नश

आद्ये व्याहतिरन्यत्रानवस्थात्माश्रयादयः

ष्टानिर्दिष्टस्यापि विकल्पस्य सविकल्परूपत्वात्तदाश्रयस्यापि सविकल्पत्वात्तद्विशेषणीभूतो विकल्पः किं प्रथमांतशब्दनिर्दिष्ट एव विकल्पस्तु तताभ्यामन्यः आद्ये अन्योन्याश्रयता द्वितीयेपि धर्मीविशेषणीभूतो विकल्पः किं प्रथमांतशब्दनिर्दिष्टस्तु ततोऽन्यः आद्ये चक्रकापत्तिर्द्वितीये तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्थापात इति ॥ ॥ ॥

पंचदशी

१८

युक्त्याशब्दस्पर्शादयोवेद्याइत्यादिनापरापरात्मनोरेवंयुक्त्यासंभावितैकत्वेस्यतेनग्रंथसंदर्भेणोक्तप्रकारेणसंभावितत्वानुसंधा
नंकृतस्यार्थस्योपपद्यमानत्वज्ञानंयदस्तितन्मननमुच्यते इदानींनिदिध्यासनमाह ताभ्यांश्रवणमननाभ्यांनिर्विचिकि-
त्सेर्थेनिर्गताविचिकित्सासंशयोयस्मात्तदसौनिर्विचिकित्सः तस्मिन्नर्थेविषयेस्थापितस्यधारणावतश्चेतसः देशासंबंधश्चि-
त्तस्यधारणेतिपतंजलिनोक्तत्वाद्यदेकतानत्वमेकाकारवृत्तिप्रवाहरूपत्वमेतन्निदिध्यासनमुच्यतेहिप्रसिद्धंयोगशास्त्रेत

युक्त्यासंभावितत्वानुसंधानंमननंतुतत् ताभ्यांनिर्विचिकित्सेर्थेचेतसःस्थापितस्ययत् ५४
एकतानत्वमेतद्धिनिदिध्यासनमुच्यते ध्यातृध्यानेपरित्यज्यक्रमाद्ध्येयैकगोचरं ५५

त्रप्रत्यगोचरं ५५ यैकतानताध्यानमिति तस्यैवनिदिध्यासनस्यपरिपाकदशारूपंसमाधिमाह ध्यातृध्यानेइति निदिध्या
सनेतावद्ध्याताध्यानंध्येयंचेतित्रितयंभासते तत्रयदाचित्तमभ्यासवशेनध्यातृध्यानेध्यातारंध्यानंचक्रमात्परित्यज्य
ध्येयैकगोचरंध्येयमेकमेवगोचरोविषयोयस्यतत्तथाविधंभवतितदासमाधिरित्युच्यते तत्रदृष्टांतः निवातेति वायुरहि
तेप्रदेशेवर्तमानोदीपोयथानिश्चलोभवति तद्वदित्यर्थः ५५

राम

१८

भवत्वेवमन्यत्राप्रकृते किमायातमित्यत आह विकल्पेति विकल्पतदभावाभ्यांविकल्पेनविकल्पाभावेनवासंस्पृष्टात्मव५
स्तुनिसंस्पर्शरहितेपरमात्मवस्तुनिविकल्पितत्वलक्षत्वसंबंधाभावस्तत्र तत्रैविकल्पितत्वंनामसविकल्पस्यवानिर्विकल्पस्यवे
तिपूर्वोक्तेनविषयीकृतत्वंलक्ष्यत्वंलक्षणत्वस्याज्ञाप्यत्वंसंबंधः संयोगाद्विभागाद्विश्लेषेनद्रव्यादयोनहंतेतत्रशब्दोवधारणेतत्र
द्रव्यंनामगुणानामाश्रयोद्रव्यंसमवायिकारणंद्रव्यमितिवातार्किकैर्लक्षितंकर्मव्यतिरिक्तत्वेसतिजातिमात्राश्रयोगुणःनित्य

विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि ५२ विकल्पितत्वलक्ष्यत्वसं
बंधाद्यास्तुकल्पिताः इत्थंवाक्यैस्तदर्थानुसंधानंश्रवणंभवेत ५३

मेकमनेकवृत्तिसामान्यमितिलक्षिताजातिः संयोगविभागयोरसमवायिकारणंजातीयंकर्मेतिलक्षिताक्रियाएतेसर्वेस्वरूपेक
ल्पिताएवेत्यर्थः एतावताग्रंथसंदर्भेणकिमुक्तंभवतीत्याकांक्षायांफलितमाह इत्थमिति इत्थंजगतोयदुपादानमित्यादिनं
धजातोक्तप्रकारेणवाक्यैस्तत्त्वमस्यादिवाक्यैस्तदर्थानुसंधानंतेषांवाक्यानामर्थस्यजीवब्रह्मणोरेकत्वलक्षणस्यानुसंधानं

श्रवणंभवेत ५३

पंचदशी०
२०

ननु तदानीं वृत्त्युत्पादकप्रयत्नाभावात्कथं वृत्त्यनुवृत्तिरित्याशंक्य तात्कालिकप्रयत्नाभावेपि प्राथमिकादेव प्रयत्नाददृष्टादि
सहकारिसहिताद्भवतीत्याह वृत्तीनामिति ध्येयैकगोचराणां वृत्तीनामनुवृत्तिस्तु प्रवाहरूपेणानुगतिस्तु प्रथमादपि प्र
यत्नात्समाधिपूर्वकालीनादपि अदृष्टमशुक्लाकृष्णकर्माख्यो यः पुण्यविशेषः कर्माशुक्लाकृष्णं योगिनस्त्रिविधमि
तरेषामिति पतंजलिनासूत्रितत्वात् यश्चासकृदभ्याससंस्कारः पुनःपुनःसमाध्यभ्यासेन जनितो भावनाख्यः संस्का

वृत्तीनामनुवृत्तिस्तु प्रयत्नात्प्रथमादपि अदृष्टासकृदभ्याससंस्कारसचिवाद्भवेत् ५७

यथा दीपो निवातस्थ इत्यादिभिरनेकधा भगवानिममेवार्थमर्जुनाय न्यरूपयत् ५८

रविशेषस्ताभ्यां सहकारिकारणाभ्यां सहवर्त्तमानाद्भवति ५७ नन्वयं समाधिः पूर्वाचार्यैर्न निरूपितो दृष्ट इत्याशंक्य
सर्वज्ञमणाश्रीपुरुषोत्तमेन निरूपितत्वान्मैवमित्याह यथेति यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेत्यादिभिः श्लोकैर
नेकधा नानाप्रकारेण भगवान् ज्ञानैश्वर्यादिसंपन्नः इममेव निर्विकल्पकसमाधिरूपमर्थमर्जुनाय शिष्याय निरूपय
न्निरूपितवान् ५८

राम
२०

ननुसमाधौवृत्तीनामनुपलब्धेर्ध्येयैकगोचरमपिनिश्चेतुंनशक्यतइत्याशंक्यवृत्तिसद्भावस्यानुमानगम्यत्वान्नैव
मित्याह वर्त्तयस्त्विति आत्मगोचरा आत्मा गोचरो विषयो यासां ता वर्त्तयस्तु

निवातदीपवच्चित्तंसमाधिरभिधीयते वर्त्तयस्तुतदा
नीमज्ञाताअप्यात्मगोचराः स्मरणादनुमीयंते व्युत्थि
तस्यसमुत्थितात् ५६

तदानींसमाधिकालेऽज्ञाता अपिव्युत्थितस्यसमाधेरुत्थितस्यसमुत्थितादुत्पन्नात्स्मरणादेतावंतंका
लंसमाहितोऽभवमित्येवंरूपादनुमीयंतेयद्यत्स्मर्यतेतत्तदनुभूतमितिव्याप्तेर्लोकसिद्धत्वादित्यर्थः ५६५

इदानीं समाधेः परमप्रयोजनमाह अमुनेति अमुना समाधिना वासनाजालेऽहंकारममकारकर्तृत्वाद्यभिमानहेतुभूते ज्ञानविरुद्धसंस्कारसमूहे निःशेषं यथा भवति तथा प्रविलापिते विनाशिते पुण्यपापाख्ये कर्मसंचये समूलोन्मूलिते मूलसहितं यथा भवति तथोन्मूलिते उद्धृते विनाशित इति यावत् ६१ फलितमाह वाक्यमिति वाक्यं तत्त्वमस्यादिवाक्यं अप्रतिबद्धं सत्कामी वासनाभ्यां प्रतिबंधरहितं सत् प्राक्परोक्षावभासिते पूर्वं परोक्षं तथा प्रकाशिते तत्त्वे क-

अमुना वासनाजाले [illegible]शेषं प्रविलापिते समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ६१
वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासिते करामलकवद्बोधमपरोक्षं प्रसूयते ६२ परो-
क्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ६३ ॥

रामलकवत्करस्थितामलकगोचरमिवापरोक्षमपरोक्षं तथा तत्त्वावभासनसमर्थं बोधं ज्ञानं प्रसूयते जनयति ६२ इदानीं परोक्षज्ञानस्य फलमाह परोक्षमिति देशिकपूर्वकं सद्गुरुमुखाल्लब्धं तत्त्वमस्याद्यागमजन्यं परोक्षं ब्रह्मविज्ञानं बुद्धिपूर्वकृतं ज्ञानपूर्वकं यथा भवति तथा कृत्स्नं समस्तं पापं वह्निवद्दहति ६३ श्रीराधाकृष्णाय नमः

अस्य समाधेर्वांतरफलमाह अनादाविति अनादौ स्रष्टेः इहास्मिन् संसारे संचिताः संपादिताः कर्मकोटयः कर्मणां पुण्या-
पुण्यलक्षणानां कोटय इत्युपलक्षणं अपरिमितानि कर्माणीत्यर्थः अनेन समाधिना विलयं यांति विनश्यंति क्षी-
यंते चास्य कर्माणि ज्ञानाग्निः सर्वकर्माणीति श्रुतेः स्मृतेश्च शुद्धो धर्मः सविलासाविद्यानिवर्त्तकतत्त्वसाक्षात्कारसाधनम्

अनादाविह संसारे संचिताः कर्मकोटयः अनेन विलयं यांति शुद्धो धर्मो विवर्द्धते ५९
धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः वर्षत्येष यतो धर्मामृतधाराः सहस्रशः ६०

तो धर्मो विवर्द्धते स्पष्टं ५९ तत्र किं प्रमाणमित्यत आह धर्मेति योगवित्तमाः अतिशयेन योगज्ञाः ब्रह्मसाक्षात्कारवं-
त इति यावत् इमं निर्विकल्पसमाधिं धर्ममेघं प्राहुः स्पष्टं तदुपपादयति वर्षतीति यतः कारणादेष समाधिर्धर्मामृ-
तधाराः धर्मलक्षणा अमृतधाराः सहस्रशो वर्षति क्षणमेकं क्रतुशतस्यापतिस्मृतेरतो धर्ममेघं प्राहुरिति पूर्वेणान्वयः ६०

अपरोक्षज्ञानफलमाह अपरोक्षेति शाब्दंदेशिकपूर्वकंव्याख्यातं अपरोक्षात्मविज्ञानमपरोक्षस्यात्मनोविज्ञानंसंशयविपर्ययरहितंयत् ज्ञानंतत्संसारकारणाज्ञानतमसः संसारकारणंयदज्ञानमस्तितदेवतमःतस्यचंडभास्करः मध्याह्नकालीनसूर्यः वाह्यतमसश्चंडभास्करइवाज्ञानमसौनिवर्तकमित्यर्थः ६४ ग्रंथाभ्यासफलमाह इत्थमिति नरइत्थमुक्तेनप्रकारेणतत्त्वविवेकंतत्त्वस्यात्मब्रह्मात्मैक्यलक्षणस्यविवेकं कोशपंचकादिविवेचनंविधायकृत्वातस्मिंस्तत्त्वेविधिवच्छास्त्रोक्तप्र

अपरोक्षात्मविज्ञानंशाब्दंदेशिकपूर्वकं संसारकारणाज्ञानतमसश्चंडभास्करः ६४ इत्थंतत्त्वविवेकं
विधायविधिवन्मनःसमाधाय विगलितसंसृतिबंधः प्राप्नोतिपरंपदंनरोनचिरात् ॥ ६५ ॥
इतितत्त्वविवेकः

कारेणमनःसमाधायस्थिरीकृत्यविगलितसंसृतिबंधोऽपरोक्षज्ञानेननिवृत्तसंसारबंधःसन्परंपदंनिरतिशयानंदरूपंमोक्षंनचिरादविलंबेनप्राप्नोति सत्यज्ञानानंदलक्षणब्रह्मैवभवतीत्यर्थः ६५ इतिश्रीमत्परमहंसपरिव्राजकाचार्य
श्रीमद्भारतीतीर्थविद्यारण्यमुनिकिंकरेणविरचितातत्त्वविवेकव्याख्यासमाप्ता १ ॥

श्रीगुरवेनमः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ पंचभूतविवेकस्यव्याख्यानंक्रियतेमया १ स
देवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिश्रुत्याजगदुत्पत्तेः पुरायज्जगत्कारणंसद्रूपमद्वितीयंब्रह्मश्रु
तंतस्यावाग्मनसगोचरत्वेनस्वतोवगंतुमशक्यत्वात् तत्कार्यत्वेनतदुपाधिभूतस्यभूतपंचकस्यविवेकद्वा
रातदवबोधनायोपोद्घातत्वेनभूतपञ्चकविवेकंप्रतिजानीते सदद्वैतमिति १ तत्रतावदाकाशादीनांप

सदद्वैतंश्रुतंयत्तत्पंचभूतविवेकतः बोद्धुंशक्यंततोभूतपंचकंप्रविविच्यते १ ॥
शब्दस्पर्शौरूपरसौगंधोभूतगुणाइमे एकद्वित्रिचतुःपंचगुणाव्योमादिषुक्रमात् २
प्रतिध्वनिर्वियच्छब्दोवायौवीसीतिशब्दनम् अनुष्णाशीतसंस्पर्शोवह्नौभुगभुगध्वनिः ३

उष्णःस्पर्शः

चानांभूतानांगुणतोभेदस्तानायतद्गुणानाह शब्दस्पर्शाविति ननुएतेगुणाःकिंसर्वेषामुतएकैकस्यैकैक
गुणाइतिविमर्शयन्नोभयथापिकिंतुप्रकारांतरमस्तीत्यभिप्रायेणाह एकेति २ तदेवप्रकारांतरंविशद
यति प्रतिध्वनिरिति आकाशेतावच्छब्दएवगुणःसचप्रतिध्वनिरूपः वायौशब्दस्पर्शौतत्रवायोशब्दम
नुकारेणादर्शयति विसीशब्दनमिति एवमुत्तरत्राप्यनुकरणशब्देनद्रष्टव्ये तस्यस्पर्शमाह अनुष्णाशीते

१

पं॰
२श्री
२४

गुणाइति एवंपंचगुणतोभेदमभिधायकार्यतोभेदज्ञानायतत्कार्याणिज्ञानेंद्रियाणितावदाह श्रो
त्रमिति तेषांस्थानानिव्यापारांश्च दर्शयति कर्णादिगोलकस्थमिति इंद्रियसद्भावेकिंप्रमाणमि

सुरभीतरगंधौद्वौगुणाःसम्यग्विवेचिताः श्रोत्रंत्वक्चक्षुषीजि
ह्वाघ्राणंचेंद्रियपंचकम् ६ कर्णादिगोलकस्थंतच्छब्दादिग्रा
हकंक्रमात् सौक्ष्म्यात्कार्यानुमेयंतत्प्रायोधावेद्बहिर्मुखम् ७

त्याकांक्षायांकार्यलिंगकानुमानमित्याह सौक्ष्म्यादिति तत्स्वरूपोपलब्धिःकरणजन्याक्रियात्वात्
छिदिक्रियावदित्यादिद्रष्टव्यं सौक्ष्म्यादपंचीकृतकार्यत्वेनदुर्लक्ष्यत्वादित्यर्थः एतेषांस्वभावमाह
प्रायइति परांचिखानिव्यतृणत्स्वयंभूरितिश्रुतेरित्यर्थः ॥ ७ ॥ श्रीः

२
श्रीः

उष्णःस्पर्शःप्रभारूपमिति जलेशब्दादयोरसांताःचत्वारोगुणास्तानाह जलेचुलुचुलुध्वनिः
शीतःस्पर्शःशुक्लंरूपंरसोमाधुर्यमीरितमिति ४ भूमौशब्दादिगंधांताःपंचगुणाः तानाह

उष्णःस्पर्शःप्रभारूपंजलेचुलुचुलुध्वनिः शीतस्पर्शःशुक्ल
रूपंरसोमाधुर्यमीरितम् ४ भूमौकडकडाशब्दःकाठिन्यंस्प
र्शइष्यते नीलादिकंचित्ररूपंमधुराम्लादिकोरसः ५ ॥

इति भूमौकडकडाशब्दइत्यादिनासुरभीतरगंधोद्वावित्यंतेनउत्क्रमपर्यंउपसंहरति ५ ॥
श्रीरामः ॥ श्रीकृष्णः ॥ श्रीरामः ॥ श्रीकृष्णः ॥ श्रीरामः

टी
पंचदशी
२५

कानि तानि क्रियाजनकानींद्रियाणीत्यत आह वाक्पाणीति वागादिभिरक्षैस्तत्क्रियाजनिस्तासां क्रियाणाम् उत्पत्तिर्भवतीति शेषः अत्रापि उक्तिकरणपूर्विका क्रियात्वादिकार्यलिंगकमनुमानं द्रष्टव्यं तस्य कर्मेन्द्रियपंचकस्य स्थानमाह मुखादीति आदिशब्देन करचरणौ गुदशिश्नच्छिद्रे च गृह्येते ११

वाक्पाणिपादपायूपस्थैरक्षैस्तत्क्रियाजनिः मुखादिगोलकेष्वास्ते तत्कर्मेन्द्रियपंच
कम् ११ मनोदशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम् तच्चांतःकरणं बाह्येष्व
स्वातंत्र्याद्विनेन्द्रियैः १२ अक्षेष्वर्थार्पितेष्वेतद्गुणदोषविचारकम् ॥

इदानीमुक्तदशेंद्रियप्रेरकत्वेन प्रस्तुतस्य मनसः स्वरूपं स्थानं च दर्शयति मन इति तस्यांतरिंद्रियत्वं सनिमित्तकम् तच्चेति १२ दशेन्द्रियाध्यक्षत्वमेव विशदयति अक्षेष्विति अक्षेष्विंद्रियेष्वर्थार्पितेषु विषयेषु स्थापितेषु सत्सु एतन्मनो गुणदोषविचारकं समीचीनमित्यादिविचारकारीत्यर्थः ॥

३
श्रीः

प्रायःशब्देनसूचितंक्वचित्करणानामांतरविषयग्राहकत्वंदर्शयति कदाचिदितिद्वाभ्याम् कदाचित्कर्णस्यपिधानेकृतेसति प्राणवायौजाठराग्नौचविद्यमानेआन्तरःशब्दःश्रूयते जलपानेऽन्नभक्षणेचांतरस्पर्शाअभिव्यज्यंतेअभिव्यक्ताभवंति नेत्रेनिमीलनेकृतेआंतरंतमउपलभ्यतेउद्गारेजातेरसगंधौद्वौगृह्येतेइत्यनेनप्रकारेणक्षाणामांतरग्रहोऽक्षाणामितिकर्तरिषष्ठी आंतरस्यावि

कदाचित्पिहितेकर्णेश्रूयतेशब्दआंतरः प्राणवायौजाठराग्नौजलपानेऽन्नभक्षणे ८
व्यज्यंतेह्यांतरस्पर्शामीलनेचांतरंतमः उद्गारेरसगंधौचेत्पक्षाणामांतरग्रहः ९
पंचोत्पादानगमनविसर्गानंदकाःक्रियाः कृषिवाणिज्यसेवाद्याःपंचस्वंतर्भवंतिहि १०

षयस्यग्रहोग्रहणमिंद्रियकर्तृकमांतरविषयग्रहणंभवतीत्यर्थः ८।।९ एवंज्ञानेंद्रियव्यापारानभिधायकर्मेन्द्रियासत्त्ववादिनंप्रतितज्ञावसमर्थनायतल्लिंगभूतांस्तद्व्यापारानाह पंचेति उक्तिश्चादानंचगमनंचविसर्गश्चआनंदश्चेतिद्वंद्वसमासः उत्पादानगमनविसर्गानंदाख्याःपंचक्रियाःप्रसिद्धाइतिशेषः ननुकृष्यादीनांक्रियांतराणामपिसत्त्वात्कथंपंचेत्युक्तमित्याशंक्याह कृषीति १०

पं.दशी

२४

एवं जगतः स्थितिमभिधायेदानीं तस्य भौतिकत्वज्ञानोपायमाह स्पष्टेति स्पष्टशब्दादियुक्तेषु स्पष्टैः शब्दस्पर्शादिगुणैः सहितेषु घटादिषु वस्तुषु भूतकार्यत्वं स्पष्टमेवावगम्यते ननु इंद्रियादिषु कथं भूतकार्यत्वनिश्चयः इत्याशंक्यागमानुमानाभ्यामित्याह अक्षादावपीति अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागित्यादिशास्त्रेः अनुमानेन च विमतानि श्रोत्रादीनि भूतकार्याणि भवितुमर्हन्ति भूतान्वयव्यतिरेकानुविधायित्वात् यद्यन्वयव्यतिरेकानुविधायि तत्तत्कार्यं दृष्टं यथा मृदन्वयव्यतिरेकानुवि

स्पष्टशब्दादियुक्तेषु भौतिकत्वमपि स्फुटम् अक्षादावपि तच्छास्त्रयुक्तिभ्यामवधार्यताम् १७
एकादशेन्द्रियैर्युक्त्या शास्त्रेणाप्यवगम्यते यावत्किंचिद्भवेदेतदिदंशब्दोदितं जगत् १८

धायि घटो मृत्कार्यो दृष्टस्तथा चैमानि तस्मात्तथेति तदन्वयव्यतिरेकानुविधायित्वं च षोडशकलः सोम्य पुरुषः इत्यादिना छांदोग्यश्रुतौ मनसः श्रुतं तद्वदन्यत्रापि द्रष्टव्यं १७ एवं भूतानि भौतिकानि च विविच्य दर्शयित्वा प्रकृतां सदेव सोम्येदमग्र आसीदित्याद्यद्वितीयब्रह्मप्रतिपादिकां श्रुतिं व्याचक्षाणस्तत्रत्यस्येदंपदस्यार्थमाह एकादशेति प्रत्यक्षादिभिः सर्वैः प्रमाणैः अपिशब्दादर्थापत्तिप्रमाणेन च यावत्किंचिज्जगदवगम्यते तत्सर्वं सदेवेत्यादिवाक्यस्थेनेदंपदेनाभिहितमित्यर्थः ॥ १८ ॥

४

श्रीः

अयंभावः आत्मनःप्रमातृत्वेनसर्वज्ञानसाधारणा चक्षुरादीनांचरूपादिज्ञानजननमात्रेचरितार्थत्वात्कु
रागद्वेषविचारस्योपलभ्यमानस्यान्यथानुपपत्त्यान्तःकरणत्वेनमनोभ्युपगंतव्यमिति मनसोवैराग्यकामा
घनेकविधवृत्तिमत्त्वदर्शनायसत्त्वादिगुणवत्त्वंदर्शयति सत्त्वमिति तेषांनकुणान्येकारणमाह विक्रि

॥सत्त्वंरजस्तमश्चास्यगुणाविक्रियतेहितैः १३ वैराग्यंक्षांतिरौदार्यमित्याद्या
स्सत्त्वसम्भवाः कामक्रोधौलोभयत्नावित्याद्याराजसोत्थिताः १४ आलस्य
भ्रांतितंद्राद्याविकारास्तमसोत्थिताः सात्त्विकैःपुण्यनिष्पत्तिःपापोत्पत्तिश्चराज
सैः १५ तामसैर्नोभयंकिंतुव्यर्थायुःक्षपणंभवेत् अत्राहंप्रत्ययीकर्तेत्येवंलोकव्य
वस्थितिः १६

यतइति हियतः तैर्गुणैर्विक्रियतेविकारंप्राप्नोतीत्यर्थः १३ गुणैस्तस्य
विक्रियमाणत्वमेवप्रपंचयति वैराग्येति स्पष्टत्वान्नव्याख्यायंते १४ वैराग्यादीनांकार्याणिविभज्य
दर्शयति सात्त्विकैरिति १५ एतेषांबुद्धिस्थान्तादंतःकरणादीनांसर्वेषांस्वामिनमाह अत्रेति अत्राहं
इतिप्रत्ययवान्कर्ताप्रभुरित्यर्थः लोकेपिकार्यकारीप्रभुरित्येवमुपदिश्यते ॥ १६ ॥

कुतो नामरूपयोरभाव इत्याशंक्याह नामरूपेति फलितमाह तस्मादिति अत्रायं प्रयोगः सद्वस्तु स्वगत
भेदशून्यं भवितुभवितुमर्हति निरवयवत्वात् गगनवदिति २३ माभूत्स्वगतभेदः सजातीयभेदः किं न स्यादि
त्याशंक्य तत्सजातीयं सदंतरमिति यत्कथ्यं न तन्निरूपयितुं शक्यते सतो वैलक्षण्याभावादित्याह सदंतर
मिति ननु धरसत्तापरसत्तेति सतो भेदः प्रतिभासत इत्याशंक्य घटाकाशमठाकाशवदौपाधिको भेदो न

नामरूपोद्भवस्यैव सृष्टित्वात्सृष्टितः पुरा न तयोरुद्भवस्तस्मान्निरंशं सद्यथा वियत् २३
सदंतरं सजातीयं न वैलक्षण्यवर्जनात् नामरूपोपाधिभेदं विना नैव सतो भिदा २४
विजातीयमसत्तत्तु न खल्वस्तीति गम्यते नास्यातः प्रतियोगित्वं विजातीयाद्भिदा कुतः २५

स्वतो भातीत्याह नामरूपइति अत्रायं प्रयोगः सद्वस्तु सजातीयभेदरहितं भवितुमर्हति उपाधिपरामर्श
मंतरेणाविभाव्यमानभेदत्वात् गगनवदिति २४ भवतु तर्हि विजातीयाद्भेद इत्याशंक्यासतो विजा
तीयमसत्तस्यासत्त्वेनैव प्रतियोगित्वासंभवेन तत्प्रतियोगिकोऽपि भेदो नास्तीत्याह विजातीयेति २५

चदंशद

२८

एवं सच्छब्दस्यार्थमभिधायेदानीं तां श्रुतिं स्वयमेवोद्धृत्य पठति इदमिति आरुणस्यापत्यमारुणिरुद्दालकस्तस्य शाब्दवचनमित्यर्थः १९ एकमेवाद्वितीयमिति पदत्रयेण सद्वस्तुनि स्वगतादिभेदत्रयं प्रसक्तं निवारयितुं लोके स्वगतादिभेदत्रयं तावद्दर्शयति वृक्षस्येति २० एवमनात्मनि भेदत्रयं प्रदर्श्य सद्वस्तुन्यपि प्रसक्तं तद्भेदत्रयं श्रुतिः पदत्रयेण निवारयतीत्याह तथेति वस्तुत्वसामान्यादनात्मनीव सद्रूपात्मन्यपि प्रसक्तं स्वग

इदं सर्वं पुरा सृष्टेरेकमेवाद्वितीयकम् सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः १९
वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः वृक्षांतरात्सजातीयो विजातीयः शिलादितः २०
तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ऐक्यावधारणाद्वैतप्रतिषेधैस्त्रिभिः क्रमात् २१
सतो नावयवाः शंक्यास्तदंशस्यानिरूपणात् नामरूपे न तस्यांशौ तयोरद्याप्यनुद्भवात् २२

तादिभेदत्रयमैक्यावधारणाद्वैतप्रतिषेधापकैरेकमेवाद्वितीयमिति त्रिभिः पदैः क्रमेण निवार्यत इत्यर्थः २१ सद्वस्तुनस्तावन्न स्वगतभेदः शंकितुं शक्यते अस्य निरवयवत्वादित्याह सत इति नामरूपयोः सदवयवत्वं किन्न स्यादित्याशंक्य सृष्टेः पूर्वं तयोरभावान्न तदंशत्वमित्याह नामेति ॥ २२ ॥

वृ॰टी॰मा॰

२६

केनवाक्येनोक्तंवेतः इत्याकांक्षायांतदीयंवार्तिकमेवपठति अस्पर्शेति योयमस्पर्शयोगाख्योनिर्विकल्पः
समाधिरेषसर्वयोगिभिःसाकारध्याननिष्ठैर्दुर्दर्शः दुःखेनद्रष्टुंयोग्यःदुःप्रापइत्यर्थः तत्रोपपत्तिमाह
योगिनइति हियस्मात्कारणात्योगिनःपूर्वोक्ताद्वैतदर्शिनः अभयेभयपश्यन्त्येसमाधौनिर्जनेदेशेवा

अस्पर्शयोगोनामैषदुर्दर्शःसर्वयोगिभिः योगिनोबिभ्यतिह्यस्मादभयेभयदर्शिनः २९
भगवत्पूज्यपादाश्चअभ्यधुःतर्कपटूनःअत्र आऽत्मार्थ्यमिकान्त्रात्मानचिंतेऽस्मिन्सदात्मनि
३० अनादृत्यश्रुतिंमौर्ख्यादिमेबौद्धास्तमस्विनः आपेदिरेनिरात्मत्वमनुमानैकचक्षुषः ३१
शून्यमासीदितिब्रूषेसद्योगंवासदात्मताम् ॥

त्याइवभयदर्शिनोभयहेतुत्वंकल्पयंतस्त
स्माद्योगाद्भीतिंप्राप्नुवंति २९ श्रीमदाचार्यैरप्येतदभिहितमित्याह भगवदिति ३० तद्वार्तिकंपठति अ
नादृत्येति ३१ इदानींमसद्वादंविकल्प्यदूषयति शून्येति शून्यमासीदित्यनेनवाक्येनशून्यस्यसत्तायोगंवासद्रूपतांवाब्रूषेइतिविकल्पार्थः ॥

६

श्रीः

फलितमाह एकमेवेति एकमेवाद्वितीयं सत्तत्सिद्धमिति इदानीं स्थूणानिखननन्यायेन सदद्वैतमेव द्रढयितुं पूर्वपक्षमाह अत्रापीति २६ विह्वलत्वे दृष्टांतमाह मग्नस्येति दार्ष्टांतिके योजयति तथेति

एकमेवाद्वितीयंसत्सिद्धमत्रतुकेचन विह्वलाअसदेवेदंपुरासीदित्यवर्णयन् २६
मग्नस्याब्धौयथाक्षाणिविह्वलानितथास्यधीः अखंडैकरसंश्रुत्वानिःप्रचाराविभेत्यतः २७
गौडाचार्यानिर्विकल्पेसमाधावन्ययोगिनाम् साकारब्रह्मनिष्ठानामत्यंतंभयमूचिरे २८

अस्यासद्वादिनोजातावेकवचनंधीरंतःकरणमखंडैकरसंवस्तुश्रुत्वानिःप्रचारासाकारवस्तुनीवाखंडैकरसेवस्तुनिप्रचाररहितासतीअतोस्माद्वस्तुनोविभेति २७ उक्तार्थेआचार्यसंमतिंदर्शयति गौडाचार्येति २८ ॥

पंचदशी
२९

ननु सदेवेदमग्र आसीदित्यत्र यथा व्याघात उक्तः तथा सदेव सोम्येदमग्र आसीदित्यत्रापि दोषोस्तीति शंकते सदासीदिति तथाहि सदासीदितिशब्दयोरर्थभेदोस्ति न वास्ति चेद्द्वैतहानिर्नास्ति चेत्पुनरुक्तिः स्यात् अतः सदासीदित्यनुपपन्नमिति द्वितीयं पक्षमादाय परिहरति मैवमिति पुनरुक्तिदोषस्य

सदासीदितिशब्दार्थभेदे वैगुण्यमापतेत् अभेदे पुनरुक्तिः स्यान्मैवं लोके तथेक्षणात् ३६
कर्तव्यं कुरुते वाक्यं ब्रूते धार्यस्य धारणम् इत्यादिवासनाविष्टं प्रत्यासीत्सदितीरितम् ३७
कालाभावे पुरेत्युक्तिः कालवासनया युतम् शिष्यं प्रत्येव तेनात्र द्वितीयं न हि शंकते ३८

कः परिहार इत्याशंक्याह लोक इति ३६ लोके एवंविधेषु प्रयोगेषु पुनरुक्त्यभावः कुत्र दृष्ट इत्याशंक्याह कर्तव्यमिति भवत्वेवं लोके श्रुतौ किमायातमित्यत आह इत्यादीति ३७ नन्वद्वितीयवस्तुनि भूतकालाभावादग्र आसीदित्युक्तिरनुपपन्नेत्याशंक्याह कालेति ननु जगदुत्पत्तेः पुरा जगदभावेन सद्वितीयत्वं ब्रह्मण इत्याशंक्य श्रुतिप्रवृत्तेर्द्वैतवासनाविष्टश्रोतृप्रतिबोधनार्थत्वान्नातिशंकनीयमित्याह तेनेति ३८

७
श्रीः

तदुभयं सत्तासंबंधं सद्रूपलक्षणां शून्यस्य व्याहतेत्यभ्रमोनुपपत इत्यर्थः ३२ व्याहतत्वमेव दर्शयन्नपूर्वं
कंदृष्टयति नपुंसकइति ३३ ननुभवन्मतेपि विद्यादीनां निर्विकल्पे ब्रह्मणि सत्त्वं व्याहतमित्याशंक्याह
विद्यादेरिति तर्हि शून्यस्यापि नामरूपे सद्वस्तुनि विकल्पिते इति वदतो बौद्धस्यापसिद्धान्त इत्यभिप्रा
येणाह शून्यस्येति ३४ ननु शून्यस्येव सद्वस्तुनोपि नामरूपे द्वे कल्पिते एवांगीकर्त्तव्ये भगवन्मते

शून्यस्य नतु तद्युक्तमुभयं व्याहतत्वतः ३२ नपुंसकस्तमसा सूर्यो नापि चासौ तमोमयः
सच्छून्ययोर्विरोधित्वाच्छून्यमासीत्कथं वद ३३ विद्यादेर्नामरूपे मायया सुविक
ल्पिते शून्यस्य नामरूपे च तथा चेज्जीव्यतां चिरम् ३४ सतोपि नामरूपे द्वे कल्पिते चे
त्तदा वद कुत्रेति निरधिष्ठानो न भ्रमः क्वचिदीक्ष्यते ३५

वास्तवयोर्नामरूपयोरभावादिति
शंकते सतोपीति विकल्पासहत्वादयं पक्ष एवानुपपन्न इत्यभिप्रायेण परिहरति तदावदेति अयमभि
प्रायः सतो नामरूपे किं सति कल्पिते उतासति अथवा जगति नाद्यः अन्यस्य रजतादेः नामरूपयोरन्य
त्र शुक्तिकादावारोपदर्शनात् सतो नामरूपयोः सत्येव कल्पनायोगात् न द्वितीयः असतो निरात्मकस्य
चाधिष्ठानत्वायोगात् न तृतीयः सत उत्पन्नस्य जगतः सन्नामरूपं कल्पनाधिष्ठानत्वानुपपत्तेः इति

माभूदधिष्ठानमनयोः कल्पना किं न स्यादित्या
शंक्याह निरधिष्ठानेति ३५

पंचदशी

३०

दृष्टांतावष्टंभेन परिहरति अत्यंतमिति अत्यंतं निर्जगज्जगन्मात्ररहितमित्यर्थः ४२ नहि दृष्टेरनुप
पन्नमिति न्यायमाश्रित्य चोदयति निर्जगदिति दर्शनमेवासिद्धमिति परिहरति प्रकाशेति अपसि

अत्यंतं निर्जगद्व्योम यथा तेबुद्धिमाश्रितम् तथैव सन्निराकाशं कुतो नाश्रयते मतिम् ४२
निर्जगद्व्योम दृष्टं चेत्प्रकाशतमसी विना क्व दृष्टं किंच ते पक्षे न प्रत्यक्षं वियत्खलु ४३
सद्वस्तु शुद्धं त्वस्माभिर्निश्चितैरनुभूयते तूष्णींस्थितो न शून्यत्वं शून्यबुद्ध्या च वर्जनात् ४४

द्धांतोपीत्याह किंच ते पक्षे प्रत्यक्षमिति ४३ ननु दर्शनाभावस्सद्वस्तुन्यपि समान इत्याशंक्य सतः सर्वा ८
नुभवसिद्धत्वान्नैवमित्याह सद्वस्त्विति ननु तूष्णींभावे शून्यमेव इतरस्य कस्यापि प्रतीत्यभावादित्याशं
क्य शून्यप्रतीत्यभावाच्छून्यमपि न सम्भवतीत्याह न शून्यत्वमिति ॥ ४४ ॥ श्रीः

इदानीं सिद्धांतरहस्यमाह चोद्यमिति व्यवहारदशायां चोद्यादिकं कर्तव्यम् परमार्थतस्त्वद्वैतमेव तत्त्वमित्यर्थः
३९ परमार्थतोद्वैताभावे स्फूर्तिं प्रमाणयति तदेति स्तिमितं निश्चलं गंभीरं दुरवगाहं मनसाविषयीकर्तुमश
क्यं न तेजस्तेजस्त्वानधिकरणं न तमस्तमोविलक्षणं अनावरणस्वभावं ततं व्याप्तं अनाख्यं आख्यातुमशक्य

चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम् ३९
तदा स्तिमितं गम्भीरं न तेजो न तमस्ततम् अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ४०
ननु भूम्यादिकं मा भूत् परमाण्वन्तनाशतः कथं नेवियतोसत्त्वं बुद्धिमारोहतीति चेत् ४१

मनभिव्यक्तं चक्षुरादिभिरप्यविषयीकृतम् सच्छून्यविलक्षणमत एव किंचिदिदं तयानिर्देष्टुमशक्यमव
शिष्यते द्वैतनिषेधावधित्वेनावतिष्ठत इत्यर्थः ४० ननु जनिमत्त्वेनानित्यस्य भूम्यादेरसत्त्वमस्तु नित्या
काशस्यासत्त्वं कथमंगीक्रियत इति शंकते नन्विति ४१ ॥ श्रीरामः ॥ श्रीकृष्णः

एवंशक्तेःकार्यलिंगगम्यत्वमुपपाद्यनिस्तत्त्वरूपतामुपपादयति नसद्वस्त्विति अयमभिप्रायः
सद्वस्तुनःशक्तिःकिंसतीउतासतीनतावत्सती तथात्वेसतोभिन्नत्वेनतच्छक्तित्वायोगात् उक्तार्थे
दृष्टान्तमाह नहिवह्नेरिति द्वितीयेपिकिंनरविषाणतुल्याउतसद्विलक्षणेति विकल्पाभिप्रायेणपृ
च्छति सद्विलक्षणेति ४८ तत्राद्यंपक्षमनूद्यदूषयति शून्येति शून्यस्यनामरूपेतथाचे

नसद्वस्तुसतःशक्तिर्नहिवह्नेःस्वशक्तिता सद्विलक्षणतायांतुशक्तेःकिंतत्त्वमुच्यताम् ४८
शून्यत्वमितिचेच्छून्यंमायाकार्यमितीरितम् नशून्यंनापिसद्यादृक्तादृक्तत्त्वमिहेष्यताम् ४९
नासदासीन्नोसदासीत्तदानींकिंत्वभूत्तमः सद्योगात्तमसःसत्त्वंनस्वतस्तन्निषेधनात् ५०

ज्जीव्यतांचिरमित्यत्रेत्यर्थः तस्माद्द्वितीयपक्षःपरिशिष्यइत्याह नशून्यमिति मायासरूपंसत्यास
त्त्वाभ्यांनिर्वचनानर्हमित्यभिप्रायः ४९ अस्मिन्नर्थेश्रुतिंप्रमाणयति नासदिति तमआसीत्तमसा
गूढमग्रइत्यादिश्रुतिःप्रमाणमित्यर्थः तर्हितमआसीदितिकथंसत्त्वमुच्यतत्राह सद्योगादिति
क्तइत्यत्राह तन्निषेधनादिति ॥ ५० ॥ श्रीरामः ॥ श्रीकृष्णः

ननुतर्हिसद्बुद्ध्यभावात्सत्वमपिनघटतइतिशंक्यते सद्बुद्धिरिति तस्यस्वप्रकाशत्वान्नतद्बुद्ध्यभावोनि
हइतिपरिहरति मास्त्वस्येति ननुस्वगोचरबुद्ध्यभावेकथंसद्वस्त्ववगंतुंशक्यतइत्यतआह निर्मनस्क
त्वेति ४५ एवंनिःप्रपंचस्यसाक्षिणस्तस्मीस्थितो भानंप्रदर्श्यतद्दृष्टांतावलंबेनसृष्टेःपुरापिसद्वस्तुन
पावगंतुंशक्यतइत्याह मनइति ४६ मायायाःकिंलक्षणमित्यतआह निस्तत्वाकार्यगम्यास्येति

सद्बुद्धिरपिचेन्नास्तिमास्त्वस्यस्वप्रभत्वतः निर्मनस्कत्वसाक्षित्वात्सन्मात्रंसुगमंनृणाम् ४५
मनोजृंभणराहित्येयथासाक्षीनिराकुलः मायाजृंभणतःपूर्वंसत्तथैवनिराकुलम् ४६
निस्तत्वाकार्यगम्यास्यशक्तिर्मायाग्निशक्तिवत् नहिशक्तिःक्वचित्कैश्चिद्बुध्यतेकार्यतःपुरा ४७

निस्तत्वाजगत्कारणभूतात्सद्वस्तुनःपृथक्सत्वरहिताकार्यगम्यावियदादिकार्यलिंगगम्यात्रस्यस
द्वस्तुनःशक्तिःवियदादिकार्यजननसामर्थ्यमायेत्युच्यते वस्तुस्वरूपातिरिक्तशक्तिसद्भावेदृष्टांतमाह
अग्नीति यथाग्न्यादिस्वरूपातिरिक्तंस्फोटादिकार्यलिंगगम्यंवन्ह्यादिनिष्ठंसामर्थ्यमस्तितद्वदित्य
र्थः शक्तेःकार्यलिंगम्यत्वंव्यतिरेकमुखेनदर्शयति नहिशक्तिमिति ॥ ४७ ॥

ननुसच्छक्तिःसतिसर्वत्रवर्ततेउतैकदेशेनाद्यः मुक्तैःप्राप्यब्रह्माभावप्रसंगातन्नद्वितीयःनिरंशत्वविरो
धादित्याशंक्याद्यानंगीकाराद्द्वितीयेपरिहारोवक्ष्यतइत्यभिप्रायेणाह नकृत्स्नेति एकदेशवृत्तौदृष्टांतमाह
घटेति ५४ शक्तेरेकदेशवृत्तित्वेप्रमाणमाह पादोस्येति ५५ नकेवलंश्रुतिरेवास्मृतिरप्यस्तीत्याह

नकृत्स्नब्रह्मवृत्तिःसाशक्तिःकिंत्वेकदेशभाक् घटशक्तिर्यथाभूमौस्निग्धमृद्येववर्तते ५४
पादोस्यसर्वाभूतानित्रिपादस्यास्वयंप्रभः इत्येकदेशवृत्तित्वंमायायावदतिश्रुतिः ५५
विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् इतिकृष्णोर्जुनायाहजगतस्त्वेकदेशताम् ५६
सभूमिंविश्वतोवृत्वात्यत्यतिष्ठद्दशांगुलम् विकारावर्तिचात्रास्तिश्रुतिसूत्रकृतोर्वचः ५७
निरंशेप्यंशमारोप्यकृत्स्नेंशेवेतिपृच्छतः तद्भाषयोत्तरंब्रूतेश्रुतिःश्रोतृहितैषिणी ५८

विष्टभ्येति ५६ इदानींनिर्मायस्वरूपसद्भावेप्रमाणमाह सभूमिमिति विकारावर्तिचतथाहिस्थितमा
हेतिसूत्रकारवचनमित्यर्थः ५७ तर्हिनिरंशत्वेविरोधस्तस्यकःपरिहारःइत्याशंक्यवास्तवनिरंशत्वा
भ्युपगमान्नविरोधइत्यभिप्रायेणोदाहृतश्रुत्यभिप्रायमाह निरंशेपीति ॥ ५८ ॥

फलितमाह अतएवेति यतःस्वतःसत्त्वंमायानास्तिअतःअन्यस्येवमायायाअपिद्वितीयत्वंनगण्यते
हिनैवाद्वियत्तइत्यर्थः अनंतस्यद्वितीयत्वानंगीकारेदृष्टांतमाह नलोकेति ५१ ननुशक्त्याधिक्येजीवि
ताधिक्यंदृश्यते अतःशक्तेरपिपृथक्जीवितत्वमस्तीतिशंकते शक्त्येति नशक्तिर्जीवितवर्द्धनेकारणं

अतएवद्वितीयत्वंअन्यवन्नहिगण्यते नलोकेचैत्रतच्छायोर्जीवितंलिख्यतेपृथक् ५१
शक्त्याधिक्येजीवितंचेद्वर्धतेतत्रवृद्धिकृत् नशक्तिःकिंतुतत्कार्यंयुद्धकृष्यादिकंतथा ५२
सर्वथाशक्तिमात्रस्यनपृथग्गणनाक्वचित् शक्तिकार्यंतुनैवास्तिद्वितीयंशंक्यतेकथम् ५३

मपितुतत्कार्यंयुद्धकृष्यादीतिपरिहरति तत्रेति दृष्टांतसिद्धमर्थंदार्ष्टांतिकेयोजयति तथेति ५२
माभूच्छक्त्यास्तुद्वितीयत्वंसतोपितुतत्कार्येणतद्वत्त्वमेवेत्याशंक्यतस्यतदानीमसत्त्वात्तेनापिनसद्विती
यत्वमित्याह शक्तिकार्यंत्विति ५३ ॥ श्रीरामः ॥ श्रीरामः ॥

सताकाशयोरेकद्विस्वभावत्वंप्रकारांतरेणाप्युत्पादयति यद्वेति प्रतिध्वनिर्व्योम्नोगुणइत्युपपादितम
धस्तात् असौप्रतिध्वनिःसद्वस्तुनिनेक्ष्यतेनोपलभ्यते व्योम्नितुसद्ध्वनीसद्वौउभावप्युपलभ्येतेते
नकारेणनसदेकस्वभावंवियद्गुणंद्विस्वभावकमित्यर्थः ६२ नन्वाकाशस्यसद्वस्तुकार्यत्वेआकाश

यद्वाप्रतिध्वनिर्व्योम्नोगुणोनासौसमीक्ष्यते व्योम्निद्वौसद्ध्वनीते
नसदेकंद्विगुणंवियत् ६२ याशक्तिःकल्पयेद्व्योमसासद्व्योम्नो
रभिन्नताम् आधाराधेयधर्मधर्मित्वंव्यत्ययेनावकल्पयेत् ६३

स्यसत्तेतिसत्तआकाशधर्मताकुतःप्रतिभातीत्याशंक्याह याशक्तिरिति यामायासद्वस्तुनिआकाशं
कल्पयति साप्रथमतःसद्व्योम्नोरभेदंकल्पयति पश्चाद्धर्मधर्मिभावंवैपरीत्येनकल्पयति अतआका
शस्यसत्तेतिभानमुपपद्यतइत्यर्थः ॥ ६३ ॥ श्रीरामः ॥ श्रीकृष्णः ॥

यदर्थं ब्रह्मणि मायासमर्पितात्तदितीमाह सत्तत्वमिति विक्रियाविविधत्वेन कल्प्यंत इति वि[illegible]क्रियाः
कार्यविशेषा इत्यर्थः तत्र दृष्टांतमाह वर्णेति वर्णा रक्तपीतादयो धातुविशेषाः ५९ अत्र प्रथमं कार्यवि
शेषं दर्शयति आद्येति तत्स्वरूपमाह सोवकाश इति आकाशस्य ब्रह्मकार्यत्वे हेतुमाह आकाश इति

सत्तत्वमाश्रिताशक्तिः कल्पयेत्सति विक्रियाः वर्णाभित्तिगता भित्तौ चित्रं नानाविधं यथा ५९
आद्यो विकार आकाशः सोवकाशस्वरूपवान् आकाशोस्तीति सत्तत्वमाकाशेप्यनुगच्छति ६०
एकस्वभावं सत्तत्वमाकाशो द्विस्वभावकः नोवकाशः सति व्योम्नि सचैवापि द्वयं स्थितम् ६१

६० ततः किमित्यत आह एकेति उक्तमर्थं विशदयति नावकाश इति सति सद्वस्तुन्यवकाशो नास्ति किं
तु सत्स्वभाव एक एव आकाशे तु सच्च सत्स्वभावश्च एकोप्यवकाशस्वभावोपीति द्वयं स्थितं विद्यत इत्यर्थः
॥ ६१ ॥ श्रीः ॥ ६१ श्रीः ॥ श्रीरामः ॥ श्रीः

एवं भ्रांत्याविपरीतप्रतिभानं दर्शयित्वा तन्निवृत्त्युपायमाह एवमिति एवमुक्तेन प्रकारेण श्रुतिविचारात्प्राक् श्रुत्यर्थविचारात्पूर्वं यद्वस्तु सद्रूपं ब्रह्म भ्रांत्या यथा यथा येन गगनादिरूपेणावर्तते तत् श्रुत्यर्थपर्यालोचनेन विपर्येति गगनादिभावं परित्यज्य सद्रूपं ब्रह्मैव भवति ततः श्रुतिविचारेण वस्तुयथात्म्यदर्शनसंभवात् तद्वियच्चिंत्यतां विचार्यतामित्यर्थः ६६ विचारस्वरूपमेव दर्शयति भिन्नेति भिन्न इति प्रतिज्ञातार्थे हेतुमाह शब्देति विय

एवं श्रुतिविचारात्प्राग्यथा यथा वस्तु भासते विचारेण विपर्येति ततस्तच्चिंत्यतां वियत् ६६
भिन्ने वियत्सती शब्दभेदाद्बुद्धेश्च भेदतः वाय्वादिष्वनुवृत्तं सन्न तु मेतु भेदधीः ६७ ॥

त्सच्छब्दयोरपर्यायत्वादित्यर्थः हेत्वंतरमाह बुद्धेश्चेति तमेव हेतुं विशदयति वाय्वादिष्विति सद्वाय्वादिषु भवत्तेषु सन्वायुः सत्तेजः इत्येवं प्रकारेणानुवृत्तं भासते इति यज्ज्ञानं सा भेदधीः भेदबुद्धिरित्यर्थः ६७ एवं सदाकाशयोर्भेदं प्रसाध्य व्योम्नः सत्तेति भ्रांत्या प्रतीतस्य धर्मिधर्मभावस्य विचारेण व्यत्ययं दर्शयति ॥

व्योमतु नेवं भासते २

माययावैपरीत्यंकथंकृतमित्याशंक्याह सतइति वस्तुतत्वविचारेक्रियमाणेव्योम्नःसद्रूपत्वमिवसतोव्यो
मत्वमापन्नंसद्वस्तुनआकाशरूपत्वंप्राप्तंलौकिकाःप्राणिनःशास्त्रीयेषुमध्येतार्किकाश्चतद्वैपरीत्येनव्योम्नो
गगनस्यधर्मिणःसत्तांसद्रूपत्वंधर्मंजातिंचावगच्छंतिजानंति ननुअन्यस्यान्यथाप्रतीतिरनुपपन्नेत्या

सतोव्योमत्वमापन्नंव्योम्नःसत्तांतुलौकिकाः तार्किकाश्चावगच्छंतिमायायाउचितंहितत् ६४
तद्यथावर्ततेतस्यतथात्वंभातिमानतः अन्यथात्वंभ्रमेणेतिन्यायोयंसार्वलौकिकः ६५ ॥

शंक्याह मायायाइति तद्विपरीतदर्शनहेतुत्वंमायायायुक्तमित्यर्थः ६४ मायायाविपरीतप्रतीतिहेतुत्वं
लौकिकन्यायप्रदर्शनेनस्पष्टीकरोति यद्यथेति यच्छुक्त्यादियथायेनशुक्तिकादिरूपेणवर्ततेतस्यतथा
त्वंशुक्त्यादिरूपत्वंप्रमाणतःस्फुरति अन्यथात्वंरजतादिरूपत्वंतद्भ्रमेणाभ्रांत्याप्रतिभातीत्ययंन्यायस्स
र्वलोकप्रसिद्धइत्यर्थः ६५ ॥ श्रीः ॥ श्रीरामः ॥ श्रीकृष्णः श्रीः

ननुनियमेनसहोपलभ्यमानयोर्भेदोनदृश्यतइत्याशंक्याह जातीति ७१ भेदोयद्यपिबुध्यतेतथापिनि
श्चितोनभवतीतिशंकते बुद्धोपीति तस्यपरिहारंवक्तुंनिश्चयाभावेकारणंपृच्छति अनैकाग्र्यादिति ते
तवअस्यभेदस्यरूढ्यभावः बुद्धोभेदस्यारोहाभावइत्यर्थः सभेदअनैकाग्र्यात्संशयाद्वानभवतीत्यर्थः ७२
आद्यपरिहारमाह अप्रमत्तइति आद्येप्रथमेविकल्पेध्यानात्तत्रप्रत्ययैकतानताध्यानमित्युक्तलक्षणाद

जातिव्यक्तीदेहिदेहौगुणद्रव्येयथापृथक् वियत्सतोस्तथैवास्तुपार्थक्यंकोत्रविस्मयः ७१
बुद्धोपिभेदोनोचित्तेनिरूढिंयातिचेत्तदा अनैकाग्र्यात्संशयाद्वारूढ्यभावोस्यतेवद ७२
अप्रमत्तोभवध्यानादाद्येन्यस्मिन्विवेचनम् कुरुप्रमाणयुक्तिभ्यांततोरूढतमोभवेत् ७३
ध्यानान्मानाद्युक्तितोपिरूढेभेदेवियत्सतोः नकदाचिद्वियत्सत्यंसद्वस्तुछिद्रवन्नच ७४

प्रमत्तोभवसावधानमनाभवेतियावत् द्वितीयेपरिहारमाह अन्यस्मिन्निति ततःकिमित्यतआह त
तइति ७३ ततोपिकिमित्यतआह ध्यानादिति ध्यानेपूर्वोक्तलक्षणंमानेभिन्नेवियत्सतोशब्दभेदादु
देश्चभेदतःइत्यत्रोक्तंयुक्तिस्तुसद्वस्त्वधिकवृत्तित्वादित्यादिरुक्ता एतैर्ध्यानादिभिर्वियत्सतोर्भेदेचित्तेनि
रूढिंयातेसतिवियत्कदाचिन्नसत्यंकिंतुसर्वदामिथ्यैवावभासतेसद्वस्त्वपिछिद्रवदवकाशवन्नचनैवभातीतिशेषः ७४

सद्वस्त्वेति रूपरसादिष्वनुवृत्तस्य द्रव्यस्येव आकाशवाय्वादिष्वनुवृत्तस्य सतो धर्मित्वं रसादिभ्यो व्यावृत्तस्य
रूपस्येव वाय्वादिभ्यो व्यावृत्तस्य नभसो धर्मत्वमित्यर्थः ननु घटादिभिन्नस्य रूपस्य यथा वास्तवत्वं तथा सतो भि
न्नस्य नभसोपि स्यादित्याशंक्य सद्व्यतिरिक्तस्य नभसो दुर्निरूपत्वान्नैवमित्याह धियेति ६८ दुर्निरूपत्व
मसिद्धमिति शंकते अवकाशेति तर्हि सतो विलक्षणत्वादसदेव स्यादिति परिहरति असत्तदिति सतो वि

सद्वस्त्वधिकवृत्तित्वाद्धर्मि व्योम्नस्तु धर्मता धियासतः पृथक्कारे ब्रूहि व्योम किमात्मकम् ६८
अवकाशात्मकं तच्चेदसत्तदिति चिंत्यताम् भिन्नं सतोऽसच्च नेति वक्षि चेद्व्याहतिस्तव ६९
भातीति चेद्भातु नाम भूषणं मायिकस्य तत् यदसद्भासमानं तन्मिथ्या स्वप्नगजादिवत् ७०

लक्षणस्यासत्त्वं नास्तीति वदतो दोषमाह भिन्नमिति ६९ असत्त्वे भानं न स्यादित्याशंक्य तुच्छविलक्ष
णत्वात् भानं न विरुध्यत इत्याह भातीति चेदिति तं अविरोधं दर्शयितुं मिथ्यावस्तुनो लक्षणं सदृष्टांतमाह
यदसदिति यद्वस्तु स्वरूपेणाविद्यमानमपि भासते तत्स्वप्नगजादिवन्मिथ्येत्यर्थः ॥ ७० ॥

एवंप्राप्तिस्वकीयान्यधर्माननभिधायकारणतःप्राप्तांस्तानाह त्रयइति सन्मायाव्योम्नांयेत्रयःस्वभावाःशीलविशेषाःधर्मास्तेपिवायुगाःवायौविद्यंतइत्यर्थः ७९ केतेधर्माइत्यतआह वायुरिति वायुरस्तीतिव्यवहारहेतुभूतसद्रूपत्वंसद्वस्तुनोधर्मएकःवायौसद्वस्तुनोविवेचितेसतियन्निस्तत्त्वरूपत्वंसमायाधर्मोद्वितीयःशब्दोव्योम्नःसकाशादागतोधर्मस्तृतीयइत्यर्थः ननुव्योमविवेचनप्रस्तावेवाय्वादिष्वनुवृत्तंसन्ननुव्योमे

त्रयःस्वभावाःसन्मायाव्योम्नांतेतेपिवायुगाः ७९ वायुरस्तीतिसद्भावःसतोवायोःपृ
थक्कृते निस्तत्त्वरूपतामायास्वभावोव्योमगोध्वनिः ८० सतोनुवृत्तिःसर्वत्रव्योम्नोनेति
पुरेरितं ॥ व्योमानुवृत्तिरधुनाकथंनव्याहतंवचः ८१ छिद्रानुवृत्तिर्नेतीतिपूर्वो
क्तिरधुनात्वियम् शब्दानुवृत्तिरेवोक्तावचसोव्याहतिःकुतः ८२ ॥ श्रीः

तिभेदधीरित्यत्रवाय्वादावाकाशानुवृत्तिर्निवारिताइदानींव्योमानुवृत्तिरभिधीयते अतःपूर्वोत्तरविरोधइतिशंकते सतइति व्योमानुवृत्तिरधुनोच्यतइतिशेषः ८१ पूर्वमवकाशलक्षणस्वरूपानुवृत्तिर्निवारिता इदानींधर्मानुवृत्तिरेवाभिधीयते नस्वरूपानुवृत्तिरतोनव्याहतिरितिपरिहरति छिद्रेति ८२

ज्ञस्यसत्यविवेचनफलमाह ज्ञस्यभातीति ७५ वियन्मिथ्यात्वं सतो वस्तुत्वं च सदा चिंतयतः किं भवतीत्यत आह वासनायामिति बुधो वियत्सतोवस्तुत्ववेत्ता गगनस्यासत्यत्वं बुध्वा खांनिःस्वप्रकाशसद्वस्तुबोधरहितं चेद्दृष्ट्वा विस्मयं प्राप्नोतीत्यर्थः ७६ उक्तन्यायमन्यत्राप्यतिदिशति एवमिति ७७ नन्वाकाशकार्यस्य

ज्ञस्य भाति सदा व्योम निस्तत्त्वोल्लेखपूर्वकम् सद्वस्त्वपि विभात्यस्य निश्छिद्रं त्वपरं सरम् ७५
वासना ~ यां प्रलीनायां वियत्सत्यत्वबाधिनम् सन्मात्राबोधयुक्तं चेद्दृष्ट्वा विस्मयते बुधः ७६
एवमाकाशमिथ्यात्वे सत्सत्यत्वे च वासिते न्यायेनानेन वाय्वादेः सद्वस्तु प्रविविच्यताम् ७७
सद्वस्तुन्येकदेशस्था माया तत्रैकदेशगम् वियत्तत्राप्येकदेशगतो वायुः प्रकल्पितः ७८
शोषस्पर्शौ गतिर्वेगो वायुधर्मा इमे मताः ॥

वायोरकारणभूतेन सद्वस्तुना तादात्म्यप्रतीत्ययोगात्सतो विवेचनमप्रयोजकमित्याशंक्य साक्षात्संबंधाभावेऽपि परंपरयासंबंधोऽस्तीत्याह सद्वस्तुनीति ७८ एवं सद्वाय्वोः संबंधं प्रदर्श्य तयोर्धर्मतो भेदज्ञानाय वायोः प्रतीयमानान्धर्मानाह शोषस्पर्शाविति ॥

फलितमाह सद्वस्त्विति वायोर्यः सदंशः तद्ब्रह्मरूपं शिष्टोंशो निस्तत्त्वाद्वितीयोः स्वरूपं स च वायुर्निस्तत्वरूपत्वादेव आकाशन्मिथ्या इत्येवं वायोर्मिथ्यात्वं चिरं वासयित्वा मरुतं त्यजेत् तु मरुत्सत्य इति बुद्धिं त्यजेदित्यर्थः ८६ वायावुक्तं विचारं तेजस्यप्यतिदिशति चिंतयेदिति ननु सद्वस्तुन्येकदेशस्था माया

सद्वस्तु ब्रह्मशिष्टोंशो वायुर्मिथ्या यथा वियत् वासयित्वा चिरं वायोर्मिथ्यात्वं मरुतं त्यजेत् ८६
चिंतयेद्वह्निमप्येवं मरुतो न्यूनवर्तिनम् ब्रह्मांडावरणेष्वेषा न्यूनाधिकविचारणा ८७
वायोर्दशांशतो न्यूनो वह्निर्वायौ प्रकल्पितः पुराणोक्तं तारतम्यं दशांशैर्भूतपंचके ८८
वह्निरुष्णप्रकाशात्मा पूर्वानुगतिरत्र च अस्ति वह्निः स निस्तत्वः शब्दवान्स्पर्शवानपि ८९

तत्रेत्यादिना वियदादीनां न्यूनाधिकभाव उक्तः स लोकेन क्वापि दृश्यत इत्याशंक्याह ब्रह्मांडेति ८७ वायोः कियतांशेन न्यूनो वह्निरित्यत आह वायोरिति तस्य वास्तवत्वशंकां वारयति वायाविति नन्वयं न्यूनाधिकभावः स्वकपोलकल्पित इत्याशंक्याह पुराणोक्तमिति ८८ वह्नेः स्वरूपमाह वह्निरिति अत्रापि वायाविव कारणधर्मा अनुगता इत्याह पूर्वेति केते धर्मा इत्याकांक्षायामाह अस्तीति ८९

नत्वयोः सद्रूपविलक्षणत्वादसत्वंलक्षणंमायामयत्वंयदुच्यतर्ह्यव्यक्तस्वरूपमायायांलक्षणाभावादमाया
मयत्वमपिकिंनस्यादितिचोदयति नन्विति ८३ मायाव्यक्तत्वममायामयत्वेप्रयोजकंकिंतुनिस्तत्वरूपंतत्तुमा
यायामिथ्यावाधादवश्यमस्तीतिनमायामयत्वहानिरितिपरिहरति निस्तत्वेति ८४ ननुशक्तिकार्ययोरस्

ननुसद्वस्तुपार्थक्यादसत्वंचेत्तदाकथम् अव्यक्तमायावैषम्यादमायामयतापिनो
॥ ८३ निस्तत्वरूपतैवात्रमायात्वस्यप्रयोजिका साशक्तिकार्ययोस्तुल्याव्यक्ताव्य
क्तत्वभेदिनोः ८४ सदसत्वविवेकस्यप्रस्तुतत्वात्सचिंत्यताम् असतोवां
तरोभेदआस्तांतच्चिन्तयात्रकिम् ८५ ॥ श्रीरामेश्वरायनमः ॥

योरपिनिस्तत्वरूपतायामविशिष्टयोर्व्यक्ताव्यक्तत्वलक्षणोभेदः कुतइत्याशंक्यतद्विचारःप्रकृतानु
पयुक्तइतिपरिहरति सदसत्वेति असतोमायातत्कार्यरूपस्यावांतरभेदोव्यक्ताव्यक्तौइत्यर्थः ८५

त्वरूप१

पंचदशी

३६

सत्तोपेक्षणस्य फलमाह उपेक्षितेति इदानीं भौतिकेभ्यो ब्रह्मांडादिभ्यः सत्तो विवेचनाय तदवस्थानप्रकारं दर्शयति भूमेरिति ९५ तेषु सद्विवेचने फलमाह ब्रह्मांडेति ९६ ॥ ९७ तज्ज्ञाने का क्षतीति

उपेक्षितायां सत्तायां भूमिर्मिथ्यावशिष्यते भूमेर्दशांशतो न्यूनं ब्रह्मांडं भूमिमध्यगम् ९५
ब्रह्मांडमध्ये तिष्ठन्ति भुवनानि चतुर्दश भुवनेषु वसन्त्येषु प्राणिदेहा यथायथम् ९६
ब्रह्मांडलोकदेहेभ्यः सद्वस्तुनि उपेक्षिते असतोऽरयो भान्तु तज्ज्ञानेपीह का क्षतिः ९७
भूतभौतिकमायानामसत्वेऽत्यन्तवासिते सद्वस्त्वद्वैतमित्येषा धीर्विपर्येति न क्वचित् ९८
सदद्वैतात्पृथग्भूते द्वैते भूम्यादिरूपिणि तत्तदर्थक्रिया लोके यथादृष्टा तथैव सा ९९

इत्युक्तमेवार्थं स्पष्टीकरोति भूतानामाकाशादीनां भौतिकानां ब्रह्मांडादीनां मायायाश्च तत्कारणभूतायाः मिथ्यात्वविवेकध्यानाभ्यां चित्ते दृढं वासिते सति सद्वस्तुनोऽद्वैतत्वबुद्धिः कदाचिन्न विहन्यत इत्यर्थः ९८ ननु भूम्यादीनामसत्त्वे विदुषो व्यवहारलोपः प्रसज्येतेत्याशंक्य विवेकेन मिथ्यात्वनिश्चयेपि भूम्यादेः स्वरूपोपमर्दनाभावान्न व्यापारो लुप्यत इत्याह सदद्वैतादिति ९९

३६
श्रीः

एवमग्नौ कारणधर्माननुगत्यनुवादपूर्वकं स्वकीयं धर्मं दर्शयति सन्मायेति इत्यंसविशेषणावन्हिस्वरूपं
उक्त्वायेदानीं सद्वस्तुनो वन्हिं विविनक्ति तत्रेति तत्र तेषु मध्ये सतः सद्वस्तुनोन्यत्सर्वं धर्मजातं मिथ्येति बु
द्ध्या विविच्यतां पृथक्क्रियतामित्यर्थः ९० एवं वन्हेर्मिथ्यात्वनिश्चयानंतरमपां मिथ्यात्वं चिंतयेदि
त्याह सत इति ९१ अप्स्वपि कारणधर्मान्स्वधर्मांश्च विभज्य दर्शयति संत्याप इति शब्देन सह वर्त

सन्मायाव्योमवाय्वंशैर्युक्तस्याग्नेर्निजो गुणः रूपं तत्र सतः सर्वमन्यद्बुद्ध्या विविच्यताम् ९०
सतो विवेचिते वन्हौ मिथ्यात्वे सति भासिते आपो दशांशतो न्यूनाः कल्पिता इति चिंतयेत् ९१
संत्यापोऽमूः शून्यतत्वाः सशब्दस्पर्शसंयुताः रूपवत्योन्यधर्मानुवृत्त्या स्वीयो रसो गुणः ९२
सतो विवेचितास्वप्सु तन्मिथ्यात्वे च भासिते भूमिर्दशांशतो न्यूना कल्पिताप्स्विति चिंतयेत् ९३
अस्ति भूस्तत्वशून्यासा शब्दस्पर्शौ स्वरूपकौ रसश्च परतो गंधो नैजः सत्ता विविच्यताम् ९४

त इति सशब्दः शब्दश्चासौ स्पर्शश्च सशब्दस्पर्शस्तेन युक्ता इत्यर्थः ९२ विवेकध्यानाभ्यामपां मिथ्यात्वनि
श्चयानंतरं भूमौ मिथ्यात्वं चिंतनीयमित्याह सत इति ९३ तस्या मिथ्यात्वचिंतनाय तद्धर्मान्विभजते
अस्ति भूरिति तेभ्यः सत्तामात्रं पृथक्कर्तव्यमित्याह ९४ ॥ श्रीरामः ॥ श्रीकृष्णः

अंतकालशब्देनवर्त्तमानदेहपातोभिधीयतइत्याशंकांवारयितुंविवक्षितमर्थमाह सदद्वैतेइति स
द्रूपेद्वैतेऽनृतरूपेद्वैतेचयदन्योन्याध्यासलक्षणमैक्यज्ञानमस्ति तस्यैक्यभ्रमस्यांतकालोनामतयो
र्द्वैतद्वैतयोःसत्यानृतरूपेणभेदबुद्धिरेव नापरोवर्त्तमानदेहपातइत्यर्थः ४ इदानींलोकप्रसि
द्धार्थस्वीकारेपिनदोषइत्यभिप्रायेणाह यद्वेति ५ उक्तमेवार्थंप्रपंचयति नीरोगइति ६

सदद्वैतेऽनृतद्वैते यदन्योन्यैक्यवीक्षणम् तस्यांतकालस्तद्भेदबुद्धिरेव न चेतरः ४
यद्वांतकालः प्राणस्य वियोगोस्तु प्रसिद्धितः तस्मिन्कालेपि न भ्रांतेर्गतायाः पुनरागमः ५
नीरोग उपविष्टो वा विलुठन्भुवि मूर्छितो वा त्यजत्वेष प्राणान्भ्रांतिर्न सर्वथा ६
दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेप्ययम् परेद्युर्नानधीतः स्यात्तद्वद्विद्या न नश्यति ७

ननुप्राणवियोगकालेमूर्छादिनाज्ञाननाशेभ्रांतिःस्यादेवेत्याशंक्यज्ञाननाशाभावेदृष्टांतमाह
दिनेइति यथाप्रत्यहमधीतेवेदेस्वप्नसुषुप्त्याद्यवस्थायांविस्मृतेपिपरेद्युरनधीतवेदत्वंनास्ति
तथांमतिकालेपितत्त्वानुसंधानाभावेपिज्ञाननाशाभावइत्यर्थः ॥ ७ ॥ श्रीः

ननु सत्यस्याद्वैतरूपत्वे सांख्यादिभिरभिधीयमानस्य भेदस्य कुतो न निरासः क्रियत इत्याशंक्य व्यवहा
रिकभेदस्यास्माभिरभ्युपगतत्वान्न निरासाय प्रयतन्ति अत इत्याह सांख्येति १०० ननु प्रमाणसिद्धस
त्यभेदस्यावज्ञानुपपन्नेत्याशंक्याह अवज्ञातमिति यथान्यवादिभिः सांख्यादिभिः निःशंकैः श्रुत्यादि

सांख्यकाणादबौद्धाद्यैर्जगद्भेदो यथा यथा उत्प्रेक्ष्यते नैकयुक्त्या भवत्वेष तथा तथा १००
अवज्ञातं सदद्वैतं निःशंकैरन्यवादिभिः एवं का क्षतिरस्माकं तद्द्वैतमवजानताम् १०१
द्वैतावज्ञा सुस्थिता चेदद्वैते धीः स्थिरा भवेत् स्थैर्ये तस्याः पुमानेष जीवन्मुक्त इतीर्यते २
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति ३

सिद्धस्यापि सदद्वैतस्यावज्ञा क्रियते तया श्रुतियुक्त्यनुभवावष्टंभेनास्माकं तदीयद्वैतानादरणे किं हीय
त इत्यर्थः १ ननु निःप्रयोजनेयं द्वैतावज्ञेत्याशंक्य जीवन्मुक्तिलक्षणप्रयोजनसद्भावान्मैवमित्याह द्वैते
ति २ न केवलं जीवन्मुक्तिरेव प्रयोजनमपि तु विदेहमुक्तिरित्यभिप्रायेण कृष्णवाक्यमुदाहरति एषेति ३

ज्ञाननाशाभावमेवोपपादयति प्रमाणइति ८ उपपादितमर्थमुपसंहरति १०९ इतिश्रीमत्प

प्रमाणोत्पादिताविद्याप्रमाणंप्रवलंविना ननश्यतिनवेदांतात्प्रवलंमानमी
क्ष्यते १०८ तस्माद्वेदांतसंसिद्धंसदद्वैतंनवाध्यते अंतकालेप्यतोभू
तविवेकान्निर्वृतिःस्थिता १०९ इतिपंचभूतविवेकःसमाप्तः ॥

रमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणश्रीरामकृष्णाख्येनविदुषाविर
चितामहाभूतविवेकस्यतात्पर्यदीपिकासमाप्ता ॥ श्रीरामायनमः ॥ श्रीः ॥

ननु केयं गुहा यस्यां निहितं ब्रह्म कोशपञ्चकविवेकेनावबुध्यत इत्याशंक्य श्रुत्युक्तगुहाशब्देन विवक्षितमर्थमाह देहा दिति देहादन्नमयादात्मनः प्राणमयः अभ्यंतरः आंतरः प्राणात्प्राणमयात्मनः मनोमयः अभ्यंतरः आंतरः ततो मनोमयात्कर्ता विज्ञानमय आंतरः इत्यनुषज्यते ततो विज्ञानमयाद्भोक्ता आनंदमयः सोऽपि पूर्ववदांतर इत्यर्थः सेयमन्नमयाद्यानंदमयांतानां परंपरा गुहाशब्देनोच्यत इत्यर्थः २ इदानीमन्नमयस्य स्वरूपं

देहादभ्यंतरः प्राणः प्राणादभ्यंतरं मनः ततः कर्ता ततो भोक्ता गुहा सेयं परंपरा ॥ २ ॥
पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्धते देहः सोऽन्नमयो नात्मा प्राक्चोर्ध्वं तदभावतः ॥ ३ ॥

तदनात्मत्वं च दर्शयति पितृभुक्तेति पितृभुक्तान्नजान्मातापितृभ्यां भुक्ताद्यवव्रीह्यादिलक्षणादन्नाज्जायमानं यद्वीर्यमस्ति तस्माद्यो देहो जातः पश्चाज्जननानंतरं क्षीराद्यन्नेनैव वर्धते स देहोऽन्नमयोऽन्नस्य विकारः स आत्मा न भवति कुत इत्यत आह प्रागिति जन्मनः प्राक् मरणादूर्ध्वं च तदभाववत्त्वात्तस्य देहस्याभावतः इत्यर्थः विवादाध्यासितो देह आत्मा न भवति कार्यत्वात् घटादिवदिति भावः ३ श्रीरामः ॥

श्रीगुरवे नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ पंचकोशविवेकस्य कुर्वे व्याख्यां समासतः १
तैत्तिरीयोपनिषत्तात्पर्यव्याख्यानरूपं पंचकोशविवेकाख्यं प्रकरणमारभमाणः आचार्यस्तत्र श्रोतृप्रवृत्ति
सिद्धये सप्रयोजनमभिधेयं सूचयन्मुखतश्चिकीर्षितं ग्रंथं प्रतिजानीते गुहाहितमिति योवेदनिहितं

गुहाहितं ब्रह्म यत्तत्पंचकोशविवेकतः बोद्धुं शक्यं
ततः कोशपंचकं प्रविविच्यते १ रामकृष्णगो

परमे व्योमन्निति श्रुत्या गुहानिहितत्वेनाभिहितं यद्ब्रह्मास्ति तद्गुहाशब्दवाच्यान्नमयादिकोशपंचकवि
वेकेन ज्ञातुं शक्यते यतस्तेषां कोशानां पंचकं प्रकर्षेण प्रत्यगात्मनः सकाशाद्विभज्य प्रदर्श्यत इत्यर्थः १

पंचदशी
४२

इदानीं मनोमयस्य स्वरूपदर्शनपूर्वकं तस्याप्यनात्मत्वमाह अहंतामिति देहे अहंतामहंभावं गेहादौ ममतां
मदीयत्वाभिमानं च यः करोति असौ मनोमय इति आत्मा न भवति कुत इत्यत आह कामाद्यवस्थया भ्रां-
त इति हेतुगर्भविशेषणम् कामक्रोधादिवृत्तिमत्त्वेनानियतस्वभावत्वादित्यर्थः तथा च मनोमयश्चा-
त्मा न भवति विकारित्वाद्देहवदिति भावः ६ तदनंतरं कर्तृशब्दवाच्यस्य विज्ञानमयस्य स्वरूपप्रदर्श-

अहंतां ममतां देहे गेहादौ च करोति यः कामाद्यवस्थया भ्रांतो नासावात्मा मनोमयः ६
लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ७

यं तस्यानात्मत्वं दर्शयति लीनेति या चिच्छायोपेता धीश्चिदाभाससहिता बुद्धिः सुषुप्तौ स्वापकाले लीना
विलीना सती बोधे जागरणकाले आनखाग्रगा नखाग्रपर्यंतं वर्तमाना सती वपुः शरीरं व्याप्नुयात् संव्या-
प्य वर्तते सा विज्ञानमयशब्दभाक् विज्ञानमयशब्देनोच्यमाना नात्मा सावप्यात्मा न भवति विलयाद्यव-
स्थावत्त्वात् घटादिवदित्यर्थः ७ ॥ श्रीरामः श्रीः श्रीकृष्णः

२
श्रीः

ननु हेतुरस्तु साध्यं माभूद्विपक्षे बाधकाभावादप्रयोजकोयं हेतुरित्याशंक्याऽकृताभ्यागमकृतविप्रणाशरूप
बाधकसद्भावान्मैवमिति परिहरति पूर्वजन्मनीति एतद्देहरूपस्यात्मनः पूर्वस्मिन्न जन्मन्यसत्वादेतज्जन्महे
त्वदृष्टासंभवेप्यस्य जन्मनोऽङ्गीक्रियमाणत्वादकृताभ्यागमः प्रसज्येत तथा भाविजन्मन्यप्यस्य देहरू
पस्यात्मनोऽसत्वाभावादिहानुष्ठितयोः पुण्यपापयोः फलभोक्तुरभावेन भोगमन्तरेणापि कर्मक्षयः प्रसज्ये

पूर्वजन्मन्यसत्वेत्तज्जन्मसंपादयेत्कथम् भाविजन्मन्यसत्कर्म न भुंजीतेह संचितम् ४
पूर्णो देहबलं यच्छन्नक्षाणां यः प्रवर्त्तकः वायुः प्राणमयो नासावात्मा चैतन्यवर्जनात् ५

बाधक
तायं कृतविप्रणाशः एवं कृतविप्रणाशाकृताभ्यागमरूपनाशकसद्भावादात्मनः कार्यत्वं नांगीकर्त्तव्यमिति
भावः ४ एवमन्नमयकोशस्यानात्मत्वं प्रदर्श्य प्राणमयकोशस्वरूपं तदनात्मत्वं च दर्शयति पूर्ण इति
वायुर्देहे पूर्णः पादादिमस्तकपर्यंतं व्याप्तः सन् व्यानरूपेण सामर्थ्यं प्रयच्छन् अक्षाणां च चक्षुरादीनां इंद्रि
याणां प्रवर्त्तकः प्रेरको वर्त्तते स वायुः प्राणमय इत्युच्यतेऽसावप्यात्मा न भवति तत्र हेतुमा चैतन्यमिति व
र्जनात् इति विकारधर्माश्रितः प्राणश्चात्मा न भवति जडत्वाद्घटादिवदिति भावः ५ ॥ श्रीः

तस्यानात्मत्वमाह कदाचिदिति अयमानंदमयोपि कदाचित्कत्वादात्मा न स्यात्स्रगादिपदार्थवदित्यर्थः
ननु विद्यमानानामानंदमयादीनां सर्वेषामात्मत्वनिरासे नैरात्म्यं प्रसज्येतेत्याशंक्याह विंवभूतइति बुद्ध्या
दौ प्रतिबिंबतयावस्थितस्य प्रियादिशब्दवाच्यस्य आनंदमयस्य बिंवभूतः कारणभूतो य आनंदोऽसावेवा

कदाचित्कत्वतो नात्मा स्यादानंदमयोप्ययम् विंवभूतोय आनंद आत्मासौ सर्वदा स्थितेः १०
ननु देहमुपक्रम्य निद्रानंदांतवस्तुषु मा भूदात्मत्वमन्यस्तु न कश्चिदनुभूयते ११ ॥

त्मा भवति कुत इत्यत आह सर्वदेति नित्यत्वादित्यर्थः विवादाध्यासित आनंद आत्मा भवितुमर्हति नित्य
त्वाद्यश्चात्मा न भवति नासौ नित्यो यथा देहादिः गगनादेरनात्मत्वेनानित्यत्वान्नानैकांतिकतेति भावः
१० चोदयति नन्विति अन्नमयाद्यानंदमयांतानां कोशानामुक्तैर्हेतुभिरात्मत्वं न घटते चेन्मा घटिष्ठा
न्यस्त्वात्मानुलभ्यमानत्वान्नैव संभवतीति ११ ॥ श्रीः ॥ श्रीरामः श्रीः

श्रीः

मनो ननूभयोरंतःकरणत्वाविशेषान्मनोमयविज्ञानमयरूपेण कोशद्वयकल्पनानुपपन्नेत्याशंक्य कर्तृत्व
करणत्वाभ्यांभेदसद्भावाद्युक्तएवमनोमयत्वादिभेदइत्याह कर्तृत्वेति अंतरिंद्रियमंतःकरणं कर्तृत्व
परिणामत३ करणत्वाभ्यांकर्तृरूपेणकारणरूपेणचविक्रियेतेइत्यर्थः एतेकर्तृकरणेविज्ञानमनसीविज्ञानमनःशब्द
वाच्येभवतः एतेपरस्परमंतर्बहिर्भावेनवर्तेते अतःकोशद्वयत्वमुपपाद्यतइत्यर्थः ८ इदानींभोक्तृ

कर्तृत्वकरणत्वाभ्यांविक्रियेतांतरिंद्रियम् विज्ञानमनसीअंतर्बहिष्ठेतेपरस्परम् ८
काचिदंतर्मुखावृत्तिरानंदप्रतिबिंबभाक् पुण्यभोगेभोगशांतौनिद्रारूपेणलीयते ९

शब्दवाच्यस्यानंदमयस्यानात्मत्वंदर्शयितुंतस्यचस्वरूपमाह काचिदिति पुण्यभोगेपुण्यकर्मफलानु
भवकालेकाचिद्धीवृत्तिरंतर्मुखासतीआनन्दप्रतिबिंबभाक् आत्मस्वरूपस्यानंदस्यप्रतिबिंबंभजतेसैव
भोगशांतौपुण्यकर्मफलभोगोपरमेसतिनिद्रारूपेणलीयतेविलीनाभवति सावृत्तिरानंदमयइत्यभि
प्रायः ९ श्रीराम:

पंचदशी
४४

अनुरूपस्यात्मनोनुभाव्यत्वाभावेदृष्टांतमाह माधुर्यादीति आदिशब्देनाम्लादयोगृह्यंते माधुर्यादयः स्वभावाः सहजाधर्मविशेषायेषांते माधुर्यादिस्वभावागुडादयः तेषामन्यत्रस्वसंसृष्टपदार्थेषुचणकादिषुस्वगुणान्माधुर्यादीनर्पयंतीतिस्वगुणार्पिणः तेषांस्वस्मिन्स्वस्वरूपेगुडादिलक्षणेतदर्पणापेक्षातेषांमाधुर्यादीनामर्पणेसंपादनेअपेक्षाआकांक्षामाधुर्यादिकंकेनचित्पदार्थेनसंपादनीयमित्येवंरूपानोनैवविद्यतेकिं

माधुर्यादिस्वभावानामन्यत्रस्वगुणार्पिणाम् स्वस्मिंस्तदर्पणापेक्षानोनचास्त्यन्यदर्पकम् १४
अर्पकांतरराहित्येप्यस्त्येषांतत्स्वभावता माभूत्तथानुभाव्यत्वंबोधात्मातुनहीयते १५
स्वयंज्योतिर्भवत्येषपुरोस्माद्भासतेखिलात् तमेवभांतमन्वेतितद्भासाभासतेजगत् १६

चान्यदर्पकंनास्ति गुडादीनांमाधुर्यादिप्रदंवस्त्वंतरंनास्तीत्यर्थः १४ सदृष्टांतं अर्पकांतरेति माधुर्यादिसमर्पकवस्त्वंतराभावेपियेषांगुडादीनांमाधुर्यादिस्वभावतायथाविद्यते एवमात्मनोप्यनुभवविषयत्वेमाभूदनुभवरूपतातुभवत्येवेत्यर्थः १५ उक्तार्थेप्रमाणमाह स्वयमिति अत्रस्वप्नावस्थायांअयंपुरुषः स्वयंज्योतिर्भवति अस्मात्सर्वस्मात्पुरतःसुविभांतंतमेवभांतंअनुभातिसर्वंतस्यभासासर्वमिदंविभातीत्यादिश्रुतयः आत्मनःस्वप्रकाशत्वंबोधयंतीत्यर्थः १६ ॥ श्रीः ॥ श्रीः

फलितमाह १

४

श्रीः

परिहरति बाढमिति अत्र निद्राशब्देन निद्रानंदो लक्ष्यते निद्रादयो देहांता उपलभ्यंते ऽन्यो नानुभूयत इति यदुक्तं तत्सत्यम् कथं तर्हि तद्व्यतिरिक्तस्यात्मनोंगीकार इत्यत आह तथापीति. अन्यस्यानुपलभ्यमानत्वेपि पंचकोशादितेषामानंदमयांतानां उपलभ्यमानता भवति सोऽनुभवः कथं नांगीक्रियत इत्यर्थः १२ ननूक्तेभ्यो कोशेभ्योऽन्य आत्मा यदि विद्यते तर्हि उपलभ्येत यतो नोपलभ्यते अतो नास्तीत्याशंक्याह स्वयमिति आनंदमया

बाढं निद्रादयः सर्वेऽनुभूयंते न चेतरः तथाप्येतेऽनुभूयंते येन तं को निवारयेत् १२ ॥
स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यता ज्ञातृज्ञानांतराभावादज्ञेयो न त्वसत्तया १३ ॥

दीनां साक्षिणोऽनुभवरूपत्वादेवानुभाव्यत्वं नास्तीति ननु अनुभवरूपत्वेप्यनुभाव्यत्वं कुतो न स्यादित्याशंक्याह ज्ञात्रिति ज्ञाता च ज्ञानं च ज्ञातृज्ञाने अन्ये ज्ञातृज्ञाने ज्ञातृज्ञानांतरे तयोरभावः तस्मादज्ञेयो ज्ञानविषयो न भवतीति ज्ञात्राद्यभावाद्वा न ज्ञायते स्वस्यैवासत्वाद्वा किमत्र विनिगमने कारणमित्यत आह न त्वसत्तयेति निद्रानंदादिसाक्षित्वेनासत्वस्य पूर्वमेव निराकृतत्वादिति भावः १३ ॥ श्रीरामः श्रीः श्रीः

ननुविदिताविदितातिरिक्तोबोधोनानुभूयते इत्याशंक्य विदितविशेषणस्यावेदनस्यैवबोधस्यरूपत्वान्न
दनुभावाभावेविदितस्याप्यनुभवाभावप्रसंगाद्बोधानुभवोऽवश्यमंगीकर्त्तव्यइतिसोपहासमाह बोधेपी
ति यस्यमंदस्यबोधेपिघटादिस्फुरणरूपेप्यनुभवःसाक्षात्कारःकथंचनकथमपिनजायते नोत्पद्यते
तंनरसमाकृतिंनरसमाकारंलोष्ठंलोष्ठवज्जडंमनुष्यंशास्त्रंकथंबोधयेत्नकथमपिबोधयेदित्यर्थः १९

बोधेप्यनुभवोयस्यनकथंचनजायते ।तंकथंबोधयेच्छास्त्रंलोष्ठंनरसमाकृतिम् १९
जिह्वामेस्तिनवेत्युक्तिर्लज्जायैकेवलंयथा नबुध्यतेमयाबोधोबोद्धव्यइतितादृशी २०

बोधोनबुध्यतइत्युक्तिरेवव्याहतेतिसदृष्टांतमाह जिह्वेति मेजिह्वास्तिनवेत्युक्तिर्भाषणंयथाल
ज्जायैकेवलंलज्जाजननायैवभवति नबुद्धिमत्त्वस्थापनाय जिह्वयाविनाभाषणानुपपत्तेः एवंम
याबोधोनबुध्यते इतःपरंबोद्धव्यइत्युक्तिरपितादृशीलज्जाहेतुरेवबोधेनविनातद्व्यवहारासिद्धेरि
त्यर्थः २० श्रीरामः

येनेदंसर्वंविजानातितंकेनविजानीयात्‌विज्ञातारमरेकेनविजानीयादितिवाक्यमर्थतःपठति येनेदमिति येनसाक्षिचैतन्यरूपेणात्मनेदंसर्वंदृश्यजातंजानन्तिप्राणिनस्तंसाक्षिणमात्मानमन्येनकेनसाक्ष्यभूतेनजडेनजानन्तामवगच्छेयुः प्रमांस इतिशेषः अस्यैववाक्यस्यतात्पर्यमाह विज्ञातारमिति दृश्यजातस्यविज्ञातारंकेनदृश्यभूतेनविद्याद्विजानीयान्नकेनापिजानातीत्यर्थः ननुमनसाज्ञास्यतीत्याशंक्याह शक्तमिति साधनंतुज्ञानसाधनंतुमनोवेद्येज्ञातव्येविषयेशक्तंसमर्थंनतुज्ञातर्यात्मनिनैववाचानमनसेत्यादिश्रुतेः स्वस्यापिज्ञेयत्वेकर्मकर्तृत्वविरोधाच्चेतिभावः

येनेदंजानतेसर्वंतंकेनान्येनजानताम् विज्ञातारंकेनविद्याच्छक्तंवेद्येतुसाधनम् १७
सवेत्तिवेद्यंतत्सर्वंनान्यस्तस्यास्तिवेदिता विदिताविदिताभ्यांतत्पृथग्बोधस्वरूपम् १८ ॥

दिश्रुतेः स्वस्यापिज्ञेयत्वेकर्मकर्तृत्वविरोधाच्चेतिभावः १७ आत्मनःस्वप्रकाशत्वाच्चएवसवेत्तिवेद्यंनचतस्यास्तिवेत्ता अन्यदेवतद्विदितादथोऽविदितादधीतिवाक्यद्वयमपिप्रमाणमितिमन्वानस्तद्वाक्यद्वयमर्थतः पठति सवेत्तीति सआत्मायद्वेद्यंतत्तत्सर्वंवेत्तितस्यात्मनोवेदिताज्ञातान्योनास्ति तद्बोधस्वरूपकंप्रलविदिताविदिताभ्यांविदितंज्ञातंज्ञानेनविषयीकृतंअविदितमज्ञानेनावृतंताभ्यांपृथग्विलक्षणंबोधस्वरूपत्वादेवेत्यर्थः १८ श्रीः

पंचदशी

४६

दुर्घटत्वमेवोपपादयति अस्तीति स्वयंशब्दवाच्यस्य स्वरूपं लौकिकानां वैदिकानां च मते तावदस्त्येव कु
त इत्यत आह विवादेति स्वस्वरूपस्य विप्रतिपत्तिविषयत्वाभावादित्यर्थः विपक्षे बाधकमाह स्वस्मि
न्निति स्वात्मन्यपि विप्रतिपत्तौ सत्यामत्रास्यां विप्रतिपत्तौ कः प्रतिवादी स्यान्न कोपीत्यर्थः २३ ननु

अस्ति तावत्स्वयं नाम विवादाविषयत्वतः स्वस्मिन्नपि विवादश्चेत्प्रतिवाद्यत्र को भवेत् २३
स्वासत्त्वं तु न कस्मैचिद्रोचते विभ्रमं विना अत एव श्रुतिर्बाधं ब्रूते चासत्त्ववादिनः २४
असद्ब्रह्मेति चेद्वेद स्वयमेव भवेदसत् अतोऽस्य मा भूद्वेद्यत्वं स्वसत्त्वं त्वभ्युपेयताम् २५

स्वासत्त्ववाद्येव प्रतिवादी भविष्यतीत्याशंक्य तथाविधः कोपि नास्तीत्याह स्वासत्त्वमिति भ्रान्तिमेकां
विहायान्यस्यां दशायां स्वस्याभावः केनापि नांगीक्रियत इत्यर्थः कुत एवं निश्चीयत इत्याशंक्याह अ
त इति पुनः कस्मैचिन्न रोचते अत एव श्रुतिरपि असत्त्ववादिनो बाधं ब्रूते २४ केयं श्रुतिरित्याकांक्षायां
असन्नेवेति आदिकां तां श्रुतिमर्थतः पठति असदिति यदि ब्रह्मासदिति जानीयात्तर्हि स्वयमेव ब्रह्मत्वेनास
न्स्यात्तस्यासद्भवेत्स्वस्यैव ब्रह्मरूपत्वादित्यर्थः
फलितमाह अत इति २५ ॥०

६

श्रीः

भवत्वेवंविधः सबोधः तथापि प्रकृते ब्रह्मावबोधे किमायातमित्याशंक्याह यस्मिन्निति लोके जगति य
स्मिन्यस्मिन्घटादिलक्षणे विषये बोधो ज्ञानमस्ति तत्तदुपेक्षणे तस्य तस्य घटादिविषयस्योपेक्षणेनादरणे
कृते सति यद्बोधमात्रं घटादिषु सर्वत्रानुस्यूतं यत्स्फुरणमस्ति तदेव ब्रह्मेत्येवंरूपा धीः बुद्धिः ब्रह्मनिश्चयो ब्र
ह्मावगतिरित्यर्थः २१ ननु घटादिविषयोपेक्षया तद्रूपानुभवरूपं ब्रह्मावगम्यते चेत्तर्हि कोशपंचक

यस्मिन्यस्मिन्नस्ति लोके बोधस्तत्तदुपेक्षणे यद्बोधमात्रं तद्ब्रह्मेत्येवंधीर्ब्रह्मनिश्चयः २१
पंचकोशपरित्यागे साक्षिबोधावशेषतः स्वस्वरूपं स एव स्याच्छून्यत्वं तस्य दुर्घटम् २२

विवेकोयं निःप्रयोजनः स्यादित्याशंक्य ब्रह्मणः प्रत्यग्रूपताज्ञानेन विना संसारानिवृत्तेस्तथात्वावबोधोप
योगित्वान्न तस्यापि वैयर्थ्यमित्याह पंचकोशेति पंचानां कोशानामन्नमयादीनां परित्यागेऽनात्मत्व
निश्चये कृते तत्साक्षिरूपस्य बोधस्यावशेषणात्स साक्षिरूपो बोध एव स्वस्वरूपं स्वनिजं रूपं ब्रह्मैव स्यात्त
न्नन्वन्नमयादीनामनुभवसिद्धानां त्यागे शून्यपरिशेषः स्यादित्याशंक्याह शून्यत्वमिति तस्य साक्षिबो
धस्य शून्यत्वं दुर्घटं दुःसंपादमित्यर्थः २२ ॥ श्रीः ॥ श्रीः ॥ श्रीः

नहिशिल्पमितिद्वितीयंपक्षंफलप्रदर्शनव्याजेनपरिहरति अवेद्यइति इंद्रियजन्यज्ञानविषयत्वाभावेप्यप
रोक्षत्वात्स्वप्रकाशइत्यर्थः अत्रायंप्रयोगः आत्मास्वप्रकाशःसंवित्कर्मत्वामंतरेणापरोक्षत्वात्संवेदनवदि
ति नचविशेषणासिद्धोहेतुः आत्मनःसंवित्कर्मत्वेकर्मकर्तृभावविरोधप्रसंगात्स्वस्वरूपेणकर्तृत्वेवि
शिष्टरूपेणकर्मत्वमित्यविरोधइतिचेन्न गमनक्रियायामपिएकस्यैवस्वरूपेणकर्तृत्वेविशिष्टरूपे
णकर्मत्वमित्यतिप्रसंगात् नचविकल्पोदृष्टांतःसंवेदनस्यसंवेदनांतरापेक्षायांअनवस्थानादिति तर्के

अवेद्योप्यपरोक्षोतःस्वप्रकाशोभवत्ययम् सत्यंज्ञानमनंतंचेत्यस्तीहब्रह्मलक्षणम् २८

मते घटोघटज्ञानेनभासतेघटज्ञानंअनुव्यवसायेनेतिसंवेदनवत्स्वप्रकाशेदृष्टांतःविकलइतिचेन्नज्ञानस्य
ज्ञानांतरेणभासनाभावात्नसाधनविकलः नन्वात्मनःस्वप्रकाशत्वेसिद्धेपिब्रह्मणोलक्षणाभावात्न
ब्रह्मत्वसिद्धिरित्याशंक्यतल्लक्षणंतत्रयोजयति सत्यमिति सत्यंज्ञानंअनंतंचेतिश्रुत्यापब्रह्मणोल
क्षणमुक्तंतदिहात्मनिविद्यतइत्यर्थः २८ श्रीः ॥ श्रीः ॥ श्रीः ॥

इदानीमात्मनःस्वप्रकाशत्वंवक्तुकामस्तस्यवेद्यत्वाभावेकीदृक्स्वरूपमितिप्रश्नमुत्थापयति कीदृगिति अयमभिप्रायः आत्मनईदृक्तादिनाकेनचिद्रूपेणवैशिष्ट्यांगीकारे तेनैवरूपेणवेद्यत्वंस्यात् तदनंगीकारेशून्यत्वमिति सत्यमीदृक्ताद्यंगीकारेतस्यैववेद्यत्वंतत्तुनांगीक्रियतामित्याह ईदृक्तेति उपलक्षणमेतत्तादृक्त्कस्यापि उभयाभावमेवाह यदनीदृगिति २६ नहिप्रतिज्ञामात्रेणार्थसिद्धिरित्याशंक्यईदृक्तादृक्शब्दयोरर्थमभिदधानःतदवाच्यत्वमुपपादयति अक्षाणामिति प्रत्यक्षस्यैवघटादेरीदृक्शब्दवाच्यत्वंदृष्टं परोक्षस्यैवधर्मादेस्तादृक्शब्दवाच्यत्वंद्रष्टुरात्मनस्तुइंद्रियजन्यज्ञानविषयत्वाभावान्नेदृक्त्वंस्वत्वेनैवपरोक्षत्वाभावान्नतादृक्त्वमित्यर्थः २७ ॥ श्रीरामः ॥ श्रीरामः श्रीः

कीदृक्तर्हीतिचेत्स्वच्छेदीदृक्तानास्तितत्रहि यदनीदृगतादृक्चतत्स्वरूपंविनिश्चिनु २६
अक्षाणांविषयस्त्वीदृक्परोक्षस्तादृगुच्यते विषयीनाक्षविषयःस्वत्वान्नास्यपरोक्षता २७

ननु प्रतीयमानस्य सर्वस्यापि निषेधे किंचिन्नावशिष्यते अतः कथं शिष्यते यत्तदेव तदित्यवशिष्टस्यात्मनश्चेदुच्यत इति शंकते सर्वबाधेनेति नकिंचिदवशिष्यत इति यदत्रापि तत्प्रयोगसिद्धये सर्वाभावविषयंज्ञानमवश्यमभ्युपेतव्यं अतस्तदेवास्मदभिमतात्मस्वरूपमित्यभिप्रायेण परिहरति यन्नेति नकिंचिदितिशब्देन यच्चैतन्यमुच्यते तदेव ब्रह्मेत्यर्थः ननु नकिंचिदित्यभाववाचकेन नकिंचिच्छब्देन कथं चैतन्यमुच्यत इत्याशंक्य बाधसाक्षिणोऽवश्यमभ्युपेयत्वादभिधायकशब्दाभावेऽपि प्रतिपत्तिर्नाभिधेय इति परि

सर्वबाधे न किंचिच्चेद्यन्न किंचित्तदेव तत् भाषा एवात्र भिद्यंते निर्बाधं तावदस्ति हि ३१
अत एव श्रुतिर्बाध्यं बाधित्वा शेषयत्यदः स एष नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः ३२

हरति भावेति अत्र बाधसाक्षिणि प्रत्यगात्मनि भाषा एव न किंचित्साक्षीत्यादिशब्दा एव भिद्यंते निर्बाधं बाधरहितं साक्षिचैतन्यं तु न भिद्यत एवेत्यर्थः ३१ उक्तमर्थं श्रुत्यारूढं करोति अत एवेति यतः साक्षिचैतन्यमबाध्यमत एव स एष नेति नेत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपतोऽनात्मपदार्थनिराकरणद्वारेण बाध्यं निराकरणयोग्यं सर्वमनात्मवस्तुजातं बाधित्वा निराकर्तुमशक्यं प्रत्यक्स्वरूपं शेषयत्यवशेषयति ३२

आत्मनः सत्यत्वोपपादनाय तावत्सत्यत्वस्य लक्षणमाह सत्यत्वमिति बाधकशून्यत्वं सत्यत्वं सत्यमबाध्यं
बाध्यं मिथ्येति तद्विवेक इति पूर्वाचार्यैरुक्तत्वात् अस्तु प्रकृते किमायातमित्यत आह जगदिति जगतः स्थूल
सूक्ष्मशरीरादिलक्षणस्य यो बाधः सुप्तिमूर्छासमाधिषु अविद्यमानतानत्साक्षित्वेनैव वर्तमानस्यात्मनो बा
कः ४ धः किंसाक्षिकः साक्षी यस्य बाधस्य सो किंसाक्षिकन्न कोपि साक्षी विद्यत इत्यर्थः असाक्षिकोप्यात्मबाधः किं

सत्यत्वं बाधराहित्यं जगद्बाधैकसाक्षिणः बाधः किंसाक्षिको ब्रूहि नत्वसाक्षिक इष्यते २९
अपनीतेषु मूर्तेषु ह्यमूर्तं शिष्यते वियत् शक्येषु बाधितेष्वन्ते शिष्यते यत्तदेव तत् ३०

न स्यादित्याशंक्याह नत्विति साक्षिरहितो बाधो नाभ्युपगन्तव्यो ऽन्यथातिप्रसंगादिति भावः २९ उक्तम
र्थं दृष्टान्तेन स्पष्टयति अपनीतेष्विति मूर्तेषु गृहादिगतेषु घटादिष्वपनीतेषु गृहादिभ्यो निःसारितेषु सत्सु य
थापनेतुमशक्यं नभ एवावशिष्यते एवं स्वव्यतिरिक्तेषु मूर्तामूर्तेषु देहेन्द्रियादिषु निराकर्तुं शक्येषु नेतिनेतीत्यु
त्या निराकृतेषु सत्सु अन्ते अवसाने सर्वनिराकरणसाक्षित्वेन यो बोधो ऽवशिष्यते स एव बाधरहित आत्मेत्यर्थः ३०

पंचदशी

४९

[illegible] नतुसत्यत्वज्ञानत्वयोरात्मनि सिद्धत्वेप्यानंत्यंनघटते ब्रह्मणापि तस्यास्तिद्वैरित्याशंक्य ब्रह्मणि ता
वत्तत्साधयति व्यापित्वादिति नित्यंविभुंसर्वगतंसुसूक्ष्मं आकाशवत्सर्वगतश्चनित्यः नित्योनित्यानां
चेतनश्चेतनानां इदंसर्वंयदयमात्मा सर्वंह्येतद्ब्रह्म ब्रह्मैवेदंसर्वमित्यादिश्रुतिभ्यः व्यापित्वनित्यत्वसर्वात्मत्व
प्रतिपादनात् ब्रह्मणस्त्रिविधमप्यानंत्यंदेशकालवस्तुकृतपरिच्छेदराहित्यमभ्युपेतव्यमित्यर्थः ३५
नकेवलंश्रुतितः किंतु युक्तितोपीत्याह देशकालेति परिच्छेदहेतूनांदेशकालान्यवस्तूनां माययाकल्पि

व्यापित्वाद्देशतोंतोनित्यत्वान्नापिकालतः नवस्तुतोपिसर्वात्म्यादानंत्यंब्रह्मणित्रिधा ३५
देशकालान्यवस्तूनांकल्पितत्वाच्चमायया नदेशादिकृतोंतोस्तिब्रह्मानंत्यंस्फुटंततः ३६

तत्वाच्च गंधर्वनगरादिभिर्गगनस्येव नदेशादिभिःकृतः पारमार्थिकः परिच्छेदो ब्रह्मणः संभवतियतो ततो
ब्रह्मणआनंत्यंतावत्स्फुटमेव तदेतत्सत्यमात्मा ब्रह्मैवब्रह्मात्मैवात्र ह्येषंनविचिकित्स्यमित्यों सत्यमात्मैवत्स्सिं
होब्रह्मभवतिश्चयमात्माब्रह्मेत्यादिश्रुतिभिरात्मनोब्रह्माभेदप्रतिपादनात्तस्याप्यानंत्यंसिद्धमितितात्पर्य
म् ॥ ३६ ॥ श्रीः ॥ ३६ श्रीः ३६ श्रीः ॥

९

श्रीः

नेतिनेतीतिश्रुतिर्बोधयोग्यंबाधित्वाबाधितुमशक्यंअवशेषयतीत्युक्तंतत्रकीदृशंबाधितुंशक्यंकीदृशमशक्यमिति
विवक्षायांतदुभयंविभज्यदर्शयति इदंरूपमिति इदमित्येवंरूपंदृश्यत्वेनानुभूयमानंरूपंस्वरूपंयस्यदेहादेस्तदि
दंरूपंतुशब्दोवधारणे यद्यावदितिपदद्वयंसर्वदृश्योपसंग्रहार्थं एवंचसतियद्दृश्यंतदखिलंत्यक्तुंशक्यतएवेत्यर्थः
संपद्यते अनिदंरूपे प्रत्यक्त्वेनेदंतयावगंतुमयोग्यःसाक्षीतुअशक्यःत्यक्तुमित्यर्थः हिनिपातेनप्रसिद्धिद्योतकेनत्य इति४

इदंरूपंतुयद्यावत्तत्त्यक्तुंशक्यतेखिलम् अशक्योह्यनिदंरूपःसआत्माबाध्यवर्जितः ३३
सिद्धंब्रह्मणिसत्यत्वंज्ञानत्वंतुपुरोदितम् स्वयमेवानुभूतित्वादित्यादिवचनैःस्फुटम् ३४

क्तःस्वरूपत्वेनत्यागायोग्यतांसूचयति फलितमाह सआत्मेति योबाधरहितःसाक्षीसएवात्मानाहंकारादिदृश्य
इत्यर्थः ३३ भवत्वात्मनोऽबाध्यत्वंप्रकृतेकिमायातमित्यतआह सिद्धमिति ब्रह्मणिब्रह्मलक्षणेयत्सत्यत्वमभि
हितंतदात्मनिसिद्धं भवतुसत्यत्वंज्ञानत्वंकथमित्याकांक्षायांतत्पूर्वमेवोपपादितमित्याह ज्ञानत्वमिति स्वय
मेवानुभूतित्वाद्विद्यतेनानुभाव्यताइत्यादिभिर्वचनैःज्ञानरूपत्वंपूर्वमेवसम्यगभिहितमित्यर्थः ३४

नियमेनानुपलभ्यमानापास्तस्याः असत्यमेव किं न स्यादित्याशंक्य जगन्नियमनान्यथानुपपत्त्या साव-
श्यमभ्युपेयेत्याह वस्तुधर्मेति वस्तूनां पृथिव्यादीनां काठिन्यद्रव्यत्वादयो यद्वशात्तया न व्यवस्थाप्यंते तद-
तेषां धर्माणां सांकर्यादिभिश्रणेनैकत्रावस्थानाज्जगद्विप्लवेन अनियतव्यवहारविषयतां प्राप्नुया-
दित्यर्थः खल्विति प्रसिद्धिं द्योतयति ३९ ननु जडाया अस्या जगन्नियामकत्वेन पुजपत्त इत्याशं-

वस्तुधर्मा नियम्येरन् शक्त्या नैव यदा तदा अन्योन्यधर्मसांकर्याद्विप्लवेत जगत्खलु ३९
चिच्छायावेशतः शक्तिश्चेतनेव विभाति सा तच्छक्त्युपाधिसंयोगाद्ब्रह्मैवेश्वरतां व्रजेत् ४०

क्याह चिच्छायेति साशक्तिश्चिच्छायावेशतः चिदाभासप्रवेशाच्चेतनेव चेतनत्वमापन्नेव विभा-
ति प्रतीयते अतोऽस्या नियामकत्वं घटत इति भावः अस्तु प्रकृते किमायातमित्याह तच्छक्तीति सा
या सा शक्तिश्चेति कर्मधारयः सैवोपाधिस्तेन संयोगः संबन्धस्तस्मात् ब्रह्मैव सत्यादिलक्षणमीश्वर-
तां सर्वज्ञत्वादिधर्मयोगितां व्रजेत् प्राप्नुयात् ४० ॥ श्रीः ॥ श्रीः

ननु जडस्य जगतो ब्रह्मण्यारोपितत्वेन ब्रह्मणः परिच्छेदकत्वाभावेपि चेतनयोर्जीवेश्वरयोस्तत्संभवात्तत्कृत परिच्छेदकत्वेनानंत्यं ब्रह्मणो न संगच्छत इत्याशंक्य तयोरप्यौपाधिकरूपत्वेन पारमार्थिकत्वाभावान्न तयोरपि वास्तवपरिच्छेदहेतुत्वमित्यभिप्रायेणाह सत्यमिति यत्सत्यादिरूपं ब्रह्म तद्वस्तु तदेव पारमार्थिकं तस्य ब्रह्मणो यल्लोकप्रसिद्धमीश्वरत्वं जीवत्वं च तद्द्वयमारोपाधिद्वयेन कल्पितं अतः कल्पितत्वादेव जडवत् जीवेश्वरयोरपि तत्परिच्छेदकत्वाभाव इति भावः ३७ किं तदुपाधिद्वयमित्याकांक्षायां तदुभयं क्रमेणाह

सत्यं ज्ञानमनंतं यद्ब्रह्म तद्वस्तु तस्य तत् ईश्वरत्वं च जीवत्वमुपाधिद्वयकल्पितम् ३७
शक्तिरस्त्यैश्वरी काचित्सर्ववस्तुनियामिका आनंदमयमारभ्य गूढा सर्वेषु वस्तुषु ३८

दर्शयितुमादावीश्वरोपाधिभूतां शक्तिं निरूपयति शक्तिरिति ऐश्वरी ईश्वरोपाधितया ईश्वरसंबंधिनी काचित्सदसत्त्वादिभी रूपैरनिर्वक्तुमशक्या सर्ववस्तुनियामिका सर्वेषामंतर्यामिब्रह्मणोऽकानां पृथिव्यादीनां नियम्यवस्तूनां नियामिका नियमनकर्त्री शक्तिरस्ति साऽकुत्र तिष्ठति कुतो वा नोपलभ्यत इत्याशंक्याह आनंदेति आनंदमयादिष्वन्नांतेषु वस्तुषु गूढा वर्तते नोपलभ्यत इत्यर्थः ३८ श्रीः श्रीः ॥

इदानीमुक्तज्ञानस्यफलमाह यएवमिति यःसाधनचतुष्टयसंपन्नएवमुक्तेनप्रकारेणपंचकोशविवेकपुरःसरंब्रह्मप्रत्यगभिन्नंसत्यादिलक्षणंवेदसाक्षात्करोतिएषस्वयंब्रह्मैवभवति सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवति ब्रह्मविदाप्नोतिपरमित्यादिश्रुतिभ्यः ततोपिकिमित्यतआह ब्रह्मणइति नजाय

यएवंब्रह्मवेदैषब्रह्मैवभवतिस्वयम् ब्रह्मणोनास्तिजन्मातः
पुनरेषनजायते ४३ इतिपंचकोशविवेकःसमाप्तः ॥

तेम्रियतेवाविपश्चिदित्यादिश्रुतेर्ब्रह्मणः तावज्जन्मनास्तिअतएवविद्वानपिस्वात्मनस्तद्रूपत्वावगमनान्नैवजायते नचपुनरावर्ततइतिश्रुतेः ४३ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणरामकृष्णाख्यविदुषाविरचितापंचकोशविवेकव्याख्यासमाप्ता

जीवत्वोपाधिभूतानां कोशानां प्रागेवाभिहितत्वात्तन्निमित्तकं जीवमिदानीमाह कोशोपाधीति कोशा
एव उपाधिः कोशोपाधिः तद्विवक्षायां पर्यालोचनायां क्रियमाणायां ब्रह्मैव सत्यादिलक्षणमेव जीवतां
जीवव्यवहारविषयतां गच्छति नन्वेकस्यैव विरुद्धधर्मद्वययोगित्वं युगपन्नेकापि दृष्टचरमित्याशंक्या

कोशोपाधिविवक्षायां याति ब्रह्मैव जीवताम् पितापितामह
श्चैकः पुत्रपौत्रौ यथा प्रति ४१ पुत्रादेरविवक्षायां न पिता न पि
तामहः तद्वन्नेशो नापि जीवः शक्तिकोशाविवक्षया ४२ ॥

ह पितेति यथैक एव देवदत्त एकं देवपुत्रं प्रति पिता भवति पौत्रं प्रति तु पितामहः एवं ब्रह्मापि कोशोपाधिवि
वक्षायां जीवो भवति शक्त्युपाधिविवक्षायामीश्वरश्च भवतीत्यर्थः ४१ वस्तुतस्तु जीवत्वमीश्वरत्वं च ब्रह्म
णो नास्तीत्येतत्सदृष्टान्तमाह पुत्रादेरिति ४२ ॥ श्रीः श्रीः श्रीः

नन्वदृष्टद्वारा जीवानामेव जगद्धेतुत्वं वादिनो वर्णयंति अतः कथमीश्वरस्य स्रष्टृत्वमुच्यते जगत इत्याशंक्य वहुश्रुतिविरोधान्नेदं चोद्यमुत्थापयितुमर्हतीत्यभिप्रेत्य श्वेताश्वतरशाखीयं तावदर्थतः पठति मायां त्विति मायोपाधिकमीश्वरं प्रस्तुत्यास्मान्मायी सृजते विश्वमेतदिति तस्यैवेश्वरस्य जगत्स्रष्टृत्वं श्वेताश्वतरशाखिनो वर्णयंतीत्यर्थः २ एतयोरेवोपनिषद्वाक्यमर्थतोनुसंक्रामति आत्मेति आत्मावा

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् स मायी सृजतीत्याहुः श्वेताश्वतरशाखिनः २
आत्मा वा इदमग्रेभूत्स ऐक्षत तत सृजा इति संकल्पेनासृजल्लोकान्स एतानिति वह्वृचः ३
खं वाय्वग्निजलोर्व्योषध्यन्नदेहाः क्रमादमी संभूता ब्रह्मणस्तस्मादेतस्मादात्मनोखिलाः ४

इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति स इमाल्लोकानसृजतेत्यनेन वाक्येनाद्वितीयपरमात्मन एव जगत्स्रष्टृत्वं वह्वृचः ऋक्शाखाध्यायिन आहुः इत्यर्थः ३ ईश्वरस्य जगत्कारणत्वे तैत्तिरीयश्रुतिरपि प्रमाणमित्यभिप्रेत्य तद्वाक्यमर्थतः पठति खमिति ४ श्रीः ॥

१

श्रीः

श्रीगुरवेनमः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ मयाद्वैतविवेकस्यक्रियतेपदयोजना १ चिकीर्षितस्यग्रंथस्यनिष्प्रत्यूहपरिपूरणायाभिलषितदेवतानत्यानुस्मरणंलक्षणंमंगलमाचरन्नत्रास्यवेदांतप्रकरणत्वाच्छास्त्रीयमेवानुबंधचतुष्टयंसिद्धवत्कृत्यग्रंथारंभंप्रतिजानीते ईश्वरेणेति ईश्वरेण

ईश्वरेणापिजीवेनसृष्टंद्वैतंविविच्यते विवेके
सतिजीवेनहेयोबंधःस्फुटीभवेत् १ श्रीः

कारणोपाधिकेनांतर्यामिणाजीवेनापिकार्योपाधिनाहंप्रत्ययिनाचसृष्टमुत्पादितंद्वैतंजगद्विविच्यते विभज्यप्रदर्श्यते अस्यद्वैतविवेचनस्यकाकदंतपरीक्षावन्निःप्रयोजनत्वंवारयति विवेकइति विवेके जीवेश्वरसृष्टयोर्द्वैतयोर्विवेचनेकृतेसतिजीवेनपूर्वोक्तेनहेयःपरित्याज्योबंधोबंधहेतुर्द्वैतंस्फुटीभवेत् स्पष्टतांगच्छेत् एतावज्जीवेनहेयमितिनिश्चीयतइत्यर्थः ॥ १ ॥ श्रीः ॥

पंचदशी

५३

मुंडकोपनिषद्यपि तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवंते सरूपाः तथाऽक्षराद्विवि
धाः सोम्यभावाः प्रजायंते तत्र चैवापियंतीत्यक्षरशब्दवाच्याद्ब्रह्मणो जगदुत्पत्तिः श्रूयत इत्याह विस्फु
लिंगेति ७ एवं बृहदारण्यकेऽप्यव्याकृतशब्दवाच्याद्ब्रह्मणो नामरूपात्मकं जगदुत्पन्नमिति श्रुतमि
त्याह जगदिति द्वाभ्याम् तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदंरू

विस्फुलिंगा यथा वह्नेर्जायंतेऽक्षरतस्तथा विविधाश्चिज्जडा भावा इत्याथर्वणिकी श्रुतिः ७
जगदव्याकृतं पूर्वमासीद्व्याक्रियताधुना दृश्याभ्यां नामरूपाभ्यां विराडादिषु ते स्फुटे ८
विराण्मनुर्नरो गावः खराश्वाजावयस्तथा पिपीलिकावधि द्वंद्वमिति वाजसनेयिनः ९

पमिति वाक्येन सृष्टेः पूर्वं स्वस्य नामरूपत्वेनाव्याकृतशब्दवाच्यान्मायोपाधिकाद्ब्रह्मणो नामरूपस्य व्या
करणलक्षणा सृष्टिरुक्ता तयोर्नामरूपयोर्विराडादिषु स्थूलकार्येषु स्पष्टता च तदिदमप्येतर्हि नामरू
पाभ्यामेव व्याक्रियतेऽसौ नामायमिदंरूप इति वाक्येनाभिहिता ८ ते च विराडादय आत्मैवेदमग्र
आसीत्पुरुषविध इत्यादिना एवमेव यदिदं किंचन मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजतेत्यंतेन दर्शिता इत्यर्थः

२

श्रीः

सत्यं ज्ञानमनंतं ब्रह्मेत्युपक्रम्य तस्माद्वा एतस्मादात्मनः आकाशः संभूतः इत्यादिनान्नात्पुरुष इत्युक्तेन वा
क्येन गुहाहितत्वेन प्रत्यगभिन्नब्रह्मण आकाशादिदेहपर्यंतजगदुत्पन्नमित्यभिधायोपरिष्टादपि सोकाम
यत बहु स्यां प्रजायेयेति स तपोतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किंचनेति वाक्येन तस्यैव ब्रह्म
णो जगत्सर्जनेच्छापूर्वकपर्यालोचनेन जगत्स्रष्टृत्वं तित्तिरिरँहेत्यर्थः ५ छांदोग्येपि ब्रह्मण एव जग

श्रा४

बहु स्यामहमेवातः प्रजायेयेति कामतः तपस्तप्त्वासृजत्सर्वं जगदित्याह तित्तिरिः ५
इदमग्ने सदेवासीद्बहुत्वायतदैक्षत तेजोबन्नोंडजादीनि ससर्जेति च सामगाः ६

त्स्रष्टृत्वं श्रुतमित्याह इदमिति सदेव सोम्येदमग्ने आसीदेकमेवाद्वितीयमिति सद्रूपमद्वितीयं ब्रह्मोप
क्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोसृजतेत्यादिना तस्यैवेक्षणपूर्वकं तेजोबन्नस्रष्टृत्वमभिधाय
खल्वेषां भूतानां त्रीण्येव बीजानि भवंत्यंडजं जरायुजमुद्भिज्जमित्यादिना अंडजादिशरीरनिर्मातृत्वं
च सामगा वर्णयंतीत्यर्थः ॥ ६ ॥ श्रीः ॥ श्रीः ॥ श्रीः

पंचदशी

५४

ततोपि किमित्यतआह मोहादिति मोहात्पूर्वोक्तादनीशतामिष्टानिष्टप्राप्तिपरिहारयोरसामर्थ्यं प्रा
प्य वपुषि निमग्नः शरीरे तादात्म्याभिमानं गतः शोचति दुःखित्वाद्यभिमानं करोति समाने वृक्षे पु
रुषो निमग्नोऽनीशया शोचति मुह्यमान इति श्रुतेरित्यर्थः वक्ष्यमाणश्लोकार्धपरिहारायउक्तं नि

मोहादनीशतां प्राप्य मग्नो वपुषि शोचति ईशसृष्टमिदं द्वैतं
सर्वमुक्तं समासतः १३ सप्तान्नब्राह्मणे द्वैतं जीवसृष्टं प्रपंचि
तम् अन्नानि सप्त ज्ञानेन कर्मणाजनयत्पिता १४

गमयति ईशेति समासतः संक्षेपेणेत्यर्थः १३ ननु जीवस्य द्वैतस्रष्टृत्वे किं मानमित्याशंक्याह
सप्तान्नेति कथं तत्र प्रपंचितमित्याशंक्य सप्तान्नशब्दवाच्यद्वैतसृष्टिप्रतिपादकं यत्सप्तान्नानि मेधया
तपसाजनयत्पितेति वाक्यमर्थतः संगृह्णाति अन्नीति पिता स्वादृष्टद्वारा जगदुत्पादनेन सर्वलोक
पालको जीव इत्यर्थः १४

श्रीः

उदाहृताभिःश्रुतिभिःद्वैतस्यस्वाभिधानानंतरंब्रह्मणोजीवरूपेणतत्रप्रवेशोप्यभिन्नइत्याह कृत्वेति श्रुतयः जैवं जीवसंबंधिरूपांतरमविक्रियाद्ब्रह्मणोविलक्षणविकारिरूपमित्यर्थः देहेदेहजातेजीवत्वंकुतइत्यतआह जीवत्वमिति प्राणादीनांस्वामित्वेनप्रेरकत्वंप्राणधारणंतस्माज्जैवंरूपंकृत्वाप्राविशदित्युक्तंकिंतदित्यपेक्षायामाह चैतन्यमिति अधिष्ठानंलिंगदेहकल्पनाधारभूतंयच्चैतन्यमस्तियश्चतत्रकल्पितोलिंगदेहोयःपुनश्चिच्छायालिंगदेहस्यायश्चतस्मिंल्लिंगदेहेवर्तमानश्चिदाभासस्तत्संघस्तेषांत्रयाणां।

कृत्वारूपांतरंजैवंदेहेप्राविशदीश्वरः इतिताःश्रुतयःप्राहुर्जीवित्वंप्राणधारणात् १०
चैतन्यंयदधिष्ठानंलिंगदेहश्चयःपुनः चिच्छायालिंगदेहस्थातत्संघोजीवउच्यते ११
माहेश्वरीतुमायायातस्यानिर्माणशक्तिवत् विद्यतेमोहशक्तिश्चतंजीवंमोहयत्यसौ १२

समूहोजीवशब्देनोच्यइत्यर्थः ११ नन्वीश्वरस्यैवजीवरूपेणप्रविष्टत्वेतस्यासत्वदुःखित्वादिविरुद्धधर्मवत्त्वंकुतइत्याशंक्याह माहेश्वरीत्विति माहेश्वरीमायिनंतुमहेश्वरमितिश्रुत्युक्तामहेश्वरसंबंधिनीयामायास्तितस्यानिर्माणशक्तिवज्जगत्सर्जनसामर्थ्यवन्मोहशक्तिश्चमोहनसामर्थ्यमप्यस्तितदेतज्जडमोहात्मकमितिश्रुतेः तंजीवमिति असौमोहशक्तिस्तंपूर्वोक्तंजीवंमोहयतिचिदानंदादिस्वरूपज्ञानरहितंकरोति

किमुक्तं भवतीति तत्राह ईशकार्यमिति जगत्सप्तान्नत्वेनोक्तं व्रीह्यादिरूपं ईशकार्यत्वेन च जीवभोग्यत्वेन च द्वाभ्यां संबद्धमित्यर्थः एकस्योभयसंबंधे दृष्टान्तमाह पितृजन्येति १८ ईशजीवयोर्जगत्सर्जने किं साधनमित्यत आह मायेति १९ नन्वीश्वरसृष्टं वस्तु स्वरूपातिरिक्तो भोग्यत्वाकार एव नास्ति को जीवेन सृज्यत इत्याशंक्याह ईशनिर्मितेति एकस्मिन्नेव विषये बहुविधो भोगउपलभ्यमानस्तत्र योजकं भो

ईशकार्यं जीवभोग्यं जगद्द्वाभ्यां समन्वितम् पितृजन्या भर्तृभोग्या यथा योषित्तथेष्यताम् १८
मायावृत्त्यात्मको हीशसंकल्पः साधनं जनौ मनोवृत्त्यात्मको जीवसंकल्पो भोगसाधनम् १९
ईशनिर्मितमण्यादौ वस्तुन्येकविधे स्थिते भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यते २०
हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः पश्यत्येव विरक्तोत्र न हृष्यति न कुप्यति २१

ग्याकारभेदं गमयतीत्यर्थः २० ननु सति भोगभेदे भोग्यभेदः कल्प्येत सएव नास्तीत्याशंक्य दृश्यत्वान्मैवमित्याह हृष्यतीति एको मण्यपर्यंतं लब्ध्वा हृष्यति अन्यस्तथाविधस्तदलाभात्क्रुध्यति अत्र मणौ विषये विरक्तस्तु मणिं पश्यत्येव लाभालाभनिमित्तौ हर्षक्रोधौ न प्राप्नोतीत्यर्थः ॥ २१ ॥ श्रीः ॥

नन्वन्नसप्तकसर्जनं किमर्थमित्याशंक्य तद्विनियोगोऽप्येकमस्य साधारणं द्वे देवानभाजयत् त्रीण्यात्म
नेऽकुरुत पशुभ्य एकं प्रायच्छदिति वाक्येनोक्त इत्याह मर्त्यान्तमिति विनियोजनमिति शेषः १५ तानि च स
प्तान्नान्येकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यत इत्यादिनायमात्मा वाङ्मयो मनो
मयः प्राणमयः इत्यन्तेन वाक्यसंदर्भेणोषतन्त्रकण्डिकाद्वयरूपेण दर्शितानीत्याह श्रीस्वादिकमिति १६

मर्त्यान्तमेकं देवान्ते द्वे पश्वन्ते चतुर्थकम् अन्त्रत्रितयमात्मार्थमन्नानां विनियोजनम् १५
श्रीस्वादिकं दर्शपूर्णमासौ क्षीरं तथा मनः वाक्प्राणश्चेति सप्तत्वमन्नानामवगम्यताम् १६
ईशेन यद्यप्येतानि निर्मितानि स्वरूपतः तथापि ज्ञानकर्मभ्यां जीवोऽकार्षीत्तदन्नताम् १७

ननूक्तसप्तान्नानां जगदन्तःपातित्वेनेश्वरनिर्मितत्वाज्जीवनिर्मितत्वाभिधानमयुक्तमित्याशंक्य तत्स्वरू
पस्येश्वरनिर्मितत्वेऽपि भोग्यत्वाकारस्य जीवनिर्मितत्वान्मैवमित्याह ईशेनेति ज्ञानकर्मभ्यां ज्ञानं विहितं प्रति
षिद्धं च देवतापरयोषिदादिविषयं ज्ञानं कर्म च विहितं यज्ञादिरूपं प्रतिषिद्धं हिंसादिरूपं ताभ्यां इत्यर्थः
तदन्नतां तेषां श्रीस्वादिसप्तान्नानां [illegible] स्वभोगोपकरणत्वमित्यर्थः १७ श्रीः

पंचदशी
५६

ज्ञानवैलक्षण्यस्य ज्ञेयवैलक्षण्याविनाभूतत्वात् ज्ञेयाकारभेदोऽङ्गीकर्त्तव्य एवेत्याशयेन परिहरति मैवमिति २५ ननु भ्रान्त्यादिरूपे बाह्यविषयाभावात्तत्र वस्तु मनोमयं वस्तु प्रमितिरूपे तु तदनुपपन्नं बाह्यवस्तुनः सत्त्वादिति शंकते भ्रान्तीति मानेन प्रत्यक्षादिप्रमाणेन मेयस्य प्रमेयस्येत्यर्थः २६ प्रमितिरूपे बाह्यविषयसत्त्वमंगीकरोति बाढमिति कथं तर्हि तद्विषयस्य मनोमयत्वमुच्यत इत्यत आह मानेनेति

मैवं मांसमयी योषित्काचिदन्या मनोमयी मांसमय्या अभेदेऽपि भिद्यते हि मनोमयी २५
भ्रान्तिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयम् जाग्रन्मानेन मेयस्य न मनोमयतेति चेत् २६
बाढं मानेन मेयेन योगात्स्याद्विषयाकृतिः भाष्यवार्त्तिककाराभ्यामयमर्थ उदीरितः २७
मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् २८

ति [illegible]नें विषयाकृतिस्तु तस्य मेयेन योगात्संबंधात्स्यात् नन्विदं स्वकपोलकल्पितमित्याशंक्याह भाष्येति २७
र्का [illegible] भाष्यकारवचनमुदाहरति मूषेति यथा द्रुतं ताम्रं मूषायां सिक्तं सत्तन्निभं जायते तत्समानाकारं भव-
तत [illegible]था तथा रूपादीन्विषयान्व्याप्नुवद्विषयीकुर्वच्चित्तं ध्रुवमवश्यं तन्निभं दृश्यते उपलभ्यत इत्यर्थः २८

५
श्रीः

नेन भोगभेदोपरक्तो जीवसृष्टाश्चाकारभेद इत्यत आह प्रिय इति मणिनिष्ठाः प्रियत्वाप्रियत्वोपेक्ष्यत्वलक्षणा
[illegible] भेदा जीवैः सृष्टास्त्रिष्वपि साधारणमनुस्यूतं यन्मणिरूपं तदीश्वरनिर्मितमित्यर्थः २२ उक्तं जीवसृ
[illegible]कारभेदमुदाहरणान्तरेणास्पष्टयति भार्येति ननान्दा भर्तृभगिनी याता देवरपत्नी प्रतियोगिधिया भर्तृश्व
रं।

प्रियोप्रिय उपेक्ष्यश्चेत्याकारमणिगास्त्रयः सृष्टाजीवैरीशसृष्टं रूपं साधारणं त्रिषु २२
भार्यास्नुषाननान्दाचयातामातेत्यनेकधा प्रतियोगिधियायोषिद्भिद्यते न स्वरूपतः २३
ननुज्ञानानिभिद्यन्तामाकारस्तु न भिद्यते योषिद्वपुष्यतिशयो न दृष्टो जीवनिर्मितः २४

सुरादिलक्षणप्रतियोगिगोचरया बुद्ध्या न तु स्वरूपेणेत्यर्थः २३ ननु योषिद्विषयाणि भार्यास्नुषेत्यादिज्ञा
नान्येव भिन्नान्युपलभ्यन्ते न तु तद्विषयभूताया योषितः स्वरूपभेदो दृश्यते अतः प्रतियोगिधिया योषिद्भि
द्यत इत्युक्तमयुक्तमिति शंकते नन्विति ॥ २४ ॥ श्रीः ॥ २४ ॥ ०

भवत्वेवं प्रकृते किमायातमित्यत आह सत्येवमिति ननु मृन्मयघटस्येव मनोमयघटस्यान्तेनैव मनसा ग्रही-
तुमशक्यत्वात् ग्राहकान्तराभावाच्चासिद्धिरेवेत्याशंक्य ग्राहकान्तराभावो सिद्ध इत्याह मृन्मय इति यथा मृ-
न्मयो मानमेयः तथा धीमयः साक्षिभास्य इत्यर्थः ३१ भवत्वेवं द्विविधं द्वैतं अत्र कस्य हेयत्वं कस्य वा ने-

सत्येवं विषयौ द्वौ स्तो घटौ मृन्मयधीमयौ मृन्मयो मानमेयः स्यात्
साक्षिभास्यस्तु धीमयः ३१ अन्वयव्यतिरेकाभ्यां धीमयो जीव
बंधकृत् सत्यस्मिन्सुखदुःखे स्तस्तस्मिन्नसति न द्वयम् ३२

तिन स्यात इत्याशंक्य जीवसृष्टस्यैव हेयत्वमित्यभिप्रेत्य तस्य बंधहेतुत्वं दर्शयति अन्वयेति अन्वयव्यति-
रेकावेव दर्शयति सत्यस्मिन्निति अस्मिञ्जीवसृष्टे मानसप्रपंचे सति विद्यमाने सुखदुःखे स्तो भवतः असति
तु तस्मिन्न द्वयं सुखं दुःखं च नास्तीत्यर्थः ॥ ३२ ॥ श्रीः ॥ श्रीरामः ॥

ननुताम्रादेरग्निसंपर्काद्द्रुतस्यमूषानिषिक्तस्यकठिनमूषाभिघातेनशैत्यापत्तौमूषाकारापत्तावपिकुन्द्रेरमृती

पंच पास्ताम्रादिविलक्षणायाविषयव्याप्तावपिकृतस्वाकारापत्तिरित्याशंक्यदृष्टांतांतरमाह व्यंजइति यथायं

१२० व्यंजकः प्रकाशकः आलोकआतपादिर्व्यंग्यस्यप्रकाश्यस्यघटादेराकारतामाकारवत्तामियात्प्राप्नुयादेवंधीरपि

सर्वार्थस्यव्यंजकत्वात्सकलपदार्थप्रकाशत्वाद्दर्थाकाराअर्थस्याकारइवाकारोयस्याःसातथाप्रदृश्यतेप्रकर्षेणो

व्यंजकोवायथालोकोव्यंग्यस्याकारतामियात् सर्वार्थव्यंजकत्वाद्धीरर्थाकाराप्रदृश्यते २९

मातुर्मानाभिनिष्पत्तिर्निष्पन्नंमेयमेतितत् मेयाभिसंगतंतच्चमेयाभत्वंप्रपद्यते ३०

पलभ्यतइत्यर्थः २९ इदानींवार्तिककारवचनमाह मातुरिति मातुःसाधिष्ठानबुद्धिस्थचिदाभासरूपात्प्र

मातुर्मानाभिनिष्पत्तिर्मानस्यसाभासांतःकरणवृत्तिरूपस्याभिनिष्पत्तिरुत्पत्तिर्भवतीतिशेषः निष्पन्नमुत्पन्नंत

न्मानंमेयंप्रमेयंघटादिरूपमेतिप्राप्नोति किंचतन्मानंमेयाभिसंगतंप्रमेयेणसंबद्धंसन्मेयाभत्वंमेयस्याभेवा

भायस्यतन्मेयाभंतस्यभावस्तत्त्वंमेयसमानाकारतांप्रपद्यतेप्राप्नोतीत्यर्थः ३० ॥ श्रीः ॥

पंचदशी
५८

धीमयस्यैव जगतो बंधहेतुत्वांगीकारे वाह्यार्थापलापादपसिद्धांतापातः स्यादिति शंकते विज्ञानेति परिहरति नहृदीति यद्यपि मानसप्रपंचस्यैव बंधहेतुत्वं तथापि तद्धेतुत्वेन वाह्यार्थस्यापि स्वीकारान्न विज्ञानवादप्रसंग इति भावः ३६ ननु हृद्याकारसमर्पणाय वाह्यार्थापेक्षणे पूर्वं पूर्वमानसप्रपंचसंस्कारस्यैवोत्तरमानसप्रपंचहेतुत्वोपपत्तेरित्याशंक्य प्रौढवादेन तदंगीकरोति वैयर्थ्यमिति नहि विज्ञानवादात्को भेद इत्यत आह

विज्ञानवादे वाह्यार्थवैयर्थ्यात्स्यादिहेति चेत् न हृद्याकारमाधातुं वाह्यस्यापेक्षितत्वतः ३६
वैयर्थ्यमस्तु वा वाह्यं न वारयितुमीश्महे प्रयोजनमपेक्षंते न मानानीति हि स्थितिः ३७
बंधश्चेन्मानसं द्वैतं तन्निरोधेन शाम्यति अभ्यसेद्योगमेवातो ब्रह्मज्ञानेन किं वद ३८

वाह्यमिति विज्ञानवादिनो वाह्यार्थमेवापलपंति वयं न तथेत्ययमेव भेद इत्यर्थः प्रयोजनशून्यत्वात्कथमुपगमो ऽप्युक्तमेवाशंक्याह प्रयोजनमिति मानाधीना वस्तुसिद्धिर्न प्रयोजनाधीना मानसिद्धस्य प्रयोजनशून्यत्वमात्रेणासत्वस्य लौकिकैर्वादिभिर्वानभ्युपगमादिति भावः ३७ मानसद्वैतस्यैव बंधहेतुत्वे तस्य मनोनिरोधात्मकयोगेनैव निवृत्तिसंभवाद्ब्रह्मज्ञानस्य बंधनिवर्तकत्वाभ्युपगमो विरुध्येतेति शंकते बंधश्चे

५
७
श्रीः

ननुक्वान्वयव्यतिरेकौ वाह्यार्थविषयौ किंनस्यातामित्यतआह असत्येति नरोमनुष्यएतदुपलक्षणमन्येषा
मपिस्वप्नादौस्वप्नसमाध्यादिकालेवाह्यार्थेनुकूलेयोषिदादौप्रतिकूलेव्याघ्रादौचपारमार्थिकेविषयेऽसत्यपि
अविद्यमानेवध्यतेसुखदुःखाभ्यांयुज्यते समाध्यादिषुतुअस्मिन्वाह्यार्थेसत्यपिनवध्यतेनसुखदुःखा

असत्यपिचवाह्यार्थेस्वप्नादौवध्यतेनरः समाधिसुप्तिमूर्छासुसत्यप्यस्मिन्नवध्यते ३३
दूरदेशंगतेपुत्रेजीवत्येवात्रतत्पिता विप्रलंभकवाक्येनमृतंमत्वाप्ररोदिति ३४ ॥
मृतेपितस्मिन्वार्तायामश्रुतायांनरोदिति अतःसर्वस्यजीवस्यवंधकृन्मानसेजगत् ३५

दिभाग्भवति अतस्तद्विषयावन्वयव्यतिरेकौनस्तइत्यर्थः ३३ मनोमयप्रपंचस्यवंधकत्वेनान्वयव्यतिरे
कावुदाहरणेनस्पष्टयति दूरदेशमिति देशांतरंप्राप्तेपुत्रेतत्रजीवत्येवसत्यत्रस्वगृहेस्थितःतस्यपिताप्रलंभ
कस्यमिथ्यावचनैःपरवंचकस्यात्वत्पुत्रोमृतइत्येवंरूपेणवाक्येनस्वपुत्रंमृतंकल्पयित्वाप्रकर्षेणरोदनंकरो
ति फलितमाह अतइति ३४ ॥ ३५

पंचदशी

५९

तथापि सति द्वैते कथमद्वैतज्ञानमित्याशंक्याह ईश्वरनिर्मितं द्वैतमबाधकं तन्मृषात्वज्ञानेनैवाद्वैतज्ञानोत्प
त्तेरक्षत्या साधकं च गुरुशास्त्रादिरूपस्य तस्य ज्ञानसाधनत्वात् आकाशादिरूपं द्वैतमस्माभिरपनेतुमशक्यं चे
ति हेतोस्तद्द्वैतमास्तां कुतः कारणाद्द्विष्यत इत्यर्थः ४२ इदानीं जीवसृष्टं द्वैतं विभजते जीवेति किं तद्द्विविधम
ने४ पिसद्धेयमेवेत्याह उपाददीतेति आतत्त्वस्यावबोधनात् तत्त्वस्यावबोधपर्यंतमित्यर्थः ४३ किं तच्छास्त्री

अबाधकं साधकं च द्वैतमीश्वरनिर्मितम् अपनेतुमशक्यं चेत्यास्तां तद्द्विष्यते कुतः ४२
जीवद्वैतं तु शास्त्रीयमशास्त्रीयमिति द्विधा उपाददीत शास्त्रीयमातत्त्वस्यावबोधनात् ४३
आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् बुद्धे तत्त्वे तच्च हेयमिति श्रुत्यनुशासनम् ४४

यं द्वैतमित्याकांक्षायामाह आत्मेति प्रत्यग्रूपस्य ब्रह्मणो विचाराख्यं पञ्चश्रवणादिकं तच्छास्त्रीयं मानसं
जगदित्यर्थः नन्वातत्त्वस्यावबोधनादित्युक्तमनुपपन्नं आसुप्तेरामृतेः कालं नयेद्वेदांतचिंतयेत्युक्तत्वादि
त्याशंक्याह बुद्धे इति तत्त्वे ब्रह्मात्मैक्यलक्षणे बुद्धे साक्षात्कृते सतीत्यर्थः तर्ह्यासुप्तेरिति वाक्यस्य का गतिरि ट
ति चेत् ध्यानावसरं किंचित्कामादीनामनागपीति पूर्वार्द्धे कामाद्यवसरप्रदानस्य निषिद्धत्वात्तत्परत्वेनेति
वदामः अतो न काप्यनुपपत्तिरिति भावः ॥ ४४ ॥ श्रीरामकृष्णगोपालहरे ॥ श्रीः श्रीः

योगेनकिंद्वैतोपशमः तात्कालिकउच्यते आत्यंतिकोवेति विकल्प्याद्यमंगीकृत्य द्वितीयंदूषयति तात्कालि
केति ज्ञात्वादेवंमुच्यतेसर्वपाशैः ज्ञात्वाशिवंशांतिमत्यंतमेति यदा चर्मवदाकाशंवेष्टयिष्यंतिमानवाः तदा
देवमविज्ञायदुःखस्यांतोभविष्यतीत्यादिश्रुतिष्वन्वयव्यतिरेकाभ्यांब्रह्मज्ञानादेवबंधनिवृत्तिरभिधीयत
इतिभावः ३९ ननुवाह्यद्वैतनिवारणमंतरेणाद्वितीयब्रह्मज्ञानमेवनोदीयादित्याशंक्यतन्निवारणाभावे
पितस्यमिथ्यात्वज्ञानादेवपारमार्थिकमद्वैतंबोद्धुंशक्यतइत्याह अनिवृत्तेपीति ४० नद्वैतमृषात्वमद्वैत

तात्कालिकद्वैतशांतावप्यागामिजनिक्षयः ब्रह्मज्ञानंविनानस्यादितिवेदांतडिंडिमः ३९
अनिवृत्तेपीशसृष्टेद्वैतेतस्यमृषात्मताम् बुध्वाब्रह्माद्वयंबोद्धुंशक्यंवस्त्वैक्यवादिनः ४०
प्रलयेतन्निवृत्तौतुगुरुशास्त्राद्यभावतः विरोधिद्वैतहानेपिनशक्यंबोद्धुमद्वयम् ४१

ज्ञानेप्रयोजकमपितुतन्निराकरणमेवेत्यभिनिविशमानंप्रत्याह प्रलयेपीति प्रलयेप्रलयावस्थायांतन्निवृत्तौ
तुतस्यद्वैतस्यनिवारणेसत्यांतुविरोधिद्वैताभानेप्यद्वैतज्ञानाविरोधित्वेनभवदभिमतस्यद्वैतस्यनिवारणेसत्य
पिगुरुशास्त्राद्यभावतः गुरुशास्त्रादिरूपस्यज्ञानसाधनस्याभावाद्वैतोरद्वयंवस्तुबोद्धुंशक्यंनभवति अतस्त
न्निवारणमप्रयोजकमितिभावः ४१

पंचदशी ननु तत्त्वबोधात्प्राक् निवार्यमित्यभिधानात् उत्तरकालमस्य स्वीकार्यता स्यादित्याशंक्याह बोधादिति उक्तमर्थं
व्यतिरेकमुखेन दृढयति कामादीति कामादिरूपो यः क्लेशः स एव बंधस्तेन युक्तस्य बद्धस्य मुक्तता जीवन्मु
६० क्तत्वं न हि नास्त्येवेत्यर्थः ५१ ननु जन्मादिसंसारदुःखिनस्यात्यंतिकपुरुषार्थरूपया विदेहमुक्त्यैवालं
किमनया आपातिकया जीवन्मुक्त्येति शंकते जीवन्मुक्तीति ऐहिकभोगनिवृत्तिभयाज्जीवन्मुक्तित्यागे

बोधादूर्ध्वं च यद्देयं जीवन्मुक्तिप्रसिद्धये कामादिक्लेशबंधेन युक्तस्य न हि मुक्तता ५१
जीवन्मुक्तिरियं माभूज्जन्माभावे त्वहं कृती तर्हि जन्मापि तेस्त्वेव स्वर्गमात्रात्कृती भवान्
५२ क्षयातिशयदोषेण स्वर्गो हेयो यदा तदा स्वयं दोषतमात्मायं कामादिः किं न हीयते ५३

आमुष्मिकभोगनिवृत्तिभयाद्विदेहमुक्तिरपि त्याज्या स्यात् इति प्रतिबंदी परिहरति तर्हीति ५२ प्रति
बंदीमोचनं शंकते क्षयेति दोषयुक्तत्वेन स्वर्गादेस्त्याज्यत्वे सकलपुरुषार्थविघातकत्वेनातीवदोषरूपस्य
कामादेः सुतरां त्याज्यत्वमित्याह स्वयमिति ५३ ननु वैराग्यादिसंपादनेनात्यंतानर्थहेतोः कामादेस्त्य
क्तत्वात् ऐहिकभोगमात्रोपयोगिकामाद्यभ्युपगमे को दोष इत्याशंक्याह ॥ श्रीः

श्रीः

तत्त्वबोधोत्तरकालं तद्धेयत्वप्रतिपादनपराः श्रुतीरुदाहरति शास्त्राणीति ४५ ॥ ४६ ॥ ४७ ॥ तमेवैकं विजानीथेत्यनेन तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथ अमृतस्यैष सेतुरिति श्रुतिरर्थतः पठिता ४८ अशास्त्रीयस्यापि द्वैतस्यावांतरभेदमाह अशास्त्रीयमिति द्विविधमपि क्रमेणोदाहरति कामेति इतर

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ४५
ग्रंथमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः ४६
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायाद्बहूंछब्दान्वाचो विग्लापनं हि तत् ४७
तमेवैकं विजानीथ ह्यन्या वाचो विमुंचथ यच्छेद्वाङ्मनसी प्राज्ञ इत्याद्याः श्रुतयः स्फुटाः ४८
अशास्त्रीयमपि द्वैतं तीव्रं मंदमिति द्विधा कामक्रोधादिकं तीव्रं मनोराज्यं तथेतरत् ४९
उभयं तत्त्वबोधात्प्राङ्निवार्यं बोधसिद्धये शमः समाहितत्वं च साधने श्रूयते यतः ५०

मंदमित्यर्थः ४९ किमनयोः शास्त्रीयद्वैतस्येव तत्त्वबोधोत्तरकालमेव हेयत्वं नेत्याह उभयमिति प्राङ्निवारणं किमर्थमित्यत आह बोधेति तत्र लिंगमाह शम इति यतस्तत्त्वबोधात्प्राक्तनयोर्हेयत्वं तत एव नित्यानित्यवस्तुविवेकादिब्रह्मज्ञानसाधनेषु शांतः समाहितपदाभ्यां शांतिसमाधी श्रूयेते इत्यर्थः ५० ॥ श्रीः

पंचदशी
६१

तत्त्यागोपायमाह कामेति काम्याः काममानाविषयाः स्त्र्यादयः आदयो येषां द्वेष्यादीनां ते काम्यादयस्तेषां ये
दोषा अनित्यत्वसातिशयत्वादयस्तेषां दृष्टिरवलोकनमाद्यं येषां कोपस्वरूपविचारादीनां ते तथोक्ता
स्तेषां कामादित्यागहेतुत्वे प्रमाणमाह प्रसिद्धेति भवन्तु ततः किमायातमित्यत आह तानन्वीति ५८
ननु कामादीनामनर्थहेतुत्वात्त्याज्यत्वमस्तु मनोराज्यस्य त्वनर्थात्वात्तत्त्यागो नोपेक्षत इति शंकते त्य

कामादिदोषदृष्ट्याद्याः कामादित्यागहेतवः प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भवेत् ५८
त्यज्यतामेष कामादिर्मनोराज्ये तु का क्षतिः अशेषदोषबीजत्वात्क्षतिर्भगवतेरिता ५९
ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोभिजायते ६०
शक्यं जेतुं मनोराज्यं निर्विकल्पसमाधितः सुसंपादः क्रमात्सोपि सविकल्पसमाधिना ६१

ज्यतामिति साक्षादनर्थहेतुत्वाभावेपि परंपरया तद्धेतुत्वात्त्याज्यमभिप्रेत्य परिहरति अशेषेति ५९
परंपरयानर्थहेतुत्वप्रदर्शनपरं भगवद्वाक्यमुदाहरति ध्यायत इति ६० तर्ह्यस्य मनोराज्यस्य कः परि
हारोपाय इत्यत आह शक्यमिति सोपि क्रमतः सिध्यतीत्यत आह सुसंपाद इति ६१ ॥

१०
श्रीः

तत्वमिति तत्ववित्त्वाभिमानेन विधिनिषेधशास्त्रमतिक्रम्य कामाद्यधीनतया वर्त्तमानस्य तव यथेष्टाचरणं
स्यादित्यर्थः ५४ अस्तु को दोष इत्याशंक्य तदनिष्टत्वं प्रतिपादनपरं सुरेश्वराचार्यवचनमुदाहरति शुद्धाद्वैतेति
शुद्धमद्वैतसतत्वमद्वैतस्वरूपं ब्रह्म येन शुद्धाद्वैतसतत्वस्तत्ववित्तस्य यथेष्टाचरणं यदि स्यात् तर्ह्यशुचिभक्ष
णादिकमपि स्यात् तथा सति शुनां तत्वदृशां चैव न कोपि विशेषः स्यादित्यर्थः ५५ एतावता किमनिष्टमापा

तत्वं बुद्ध्वापि कामादीन्निःशेषं न जहाति चेत् यथेष्टाचरणं ते स्यात्कर्मशास्त्रातिलंघिनः ५४
शुद्धाद्वैतसतत्वस्य यथेष्टाचरणं यदि शुनां तत्वदृशां चैव को भेदोशुचिभक्षणे ५५
बोधात्पुरा मनोदोषमात्रात्क्लिष्टोस्यथाधुना अशेषलोकनिंदा चेत्यहो ते बोधवैभवम् ५६
विड्वराहादितुल्यत्वं माकांक्षीस्तत्वविद्भवान् सर्वधीदोषसंत्यागाल्लोकैः पूज्यस्व देववत् ५७

दितमित्याशंक्य सोपहासमुत्तरमाह बोधादिति तत्वज्ञानोदयात्प्राक्कामक्रोधादिचित्तदोषैस्तव क्लेशोभू
त् इदानीं तु सर्वलोकनिंदामपि सहस्व इति क्लेशद्वैगुण्यमिति भावः ५६ तर्हि किं कर्तव्यमित्यत आह विड्वरा
हेति सर्वोत्कर्षहेतुज्ञानवान् त्वं कामादित्यागाशक्त्येन सर्वाधमविड्वराहादिसाम्यं माकांक्षीः किंतु कामा
दिलक्षणसकलमनोदोषहानेन सर्वजनैर्देववत्पूज्यश्च पूज्यो भवेत्यर्थः ५७ ॥ श्रीः ॥

अद्वैतशास्त्रमत्यर्थं विचारितं तथा परस्परं गुरुशिष्यादिसंवादद्वारा चिरकालं प्रत्यापितं च एवं कृत्वा किं निश्चितमित्याह संत्यक्तेति सम्यक्परित्यक्ता कामादिवासना तन्मनसस्तत्त्वसीमाभावादतोऽधिकः पुरुषार्थो नास्तीति निश्चितमित्यर्थः ६४ एवं निर्वृत्तिकस्य चित्तस्य प्रारब्धकर्मणा विक्षेपे सति तत्प्रती

विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदम् ६५
विक्षिप्यते कदाचिद्धीः कर्मणा भोगदायिना पुनः समाहिता सा स्यात्तदैवाभ्यासपाटवात् ६६
विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्यते ब्रह्मैवायमिति प्राहुर्मुनयः पारदर्शिनः ६७

कारोपायः कः इत्यपेक्षायामाह विक्षिप्यत इति भोगप्रदेन प्रारब्धकर्मणा बुद्धिः कदाचिद्विक्षिप्यते चेत्तर्हि सा बुद्धिरभ्यासपाटवात्तदैव पुनरपि समाहिता स्यादित्यर्थः ६६ सदा चित्तविक्षेपरहितस्य ब्रह्मवित्त्वमप्यौपचारिकमित्याह विक्षेप इति पारदर्शिनो वेदान्तपारंगताः इत्यर्थः ॥ ६७ ॥

नन्वष्टांगयोगयुक्तस्य तथास्तु तद्रहितस्य का गतिरित्यत आह शुद्धेति शुद्धमवगतं तत्त्वं ब्रह्मात्मैक्यलक्षणं
येन स शुद्धतत्त्वस्तेन कामक्रोधादिक्षुद्रदोषरहितेन एकान्तवासिना विजनदेशनिवासशीलेन पुरुषेण दीर्घष
ड्द्वादशादिमात्रोपेतं प्रणवमोंकारमुच्चार्य मनोराज्यं विजीयते विनिवार्यत इति ६२ मनोराज्यविजये
किं भवतीत्यत आह जितेतस्मिन्निति यथा मूकः सकलवाग्व्यवहाररहितः तिष्ठत्येवं मनोपि सर्वव्यापार

शुद्धतत्त्वेन धीदोषशून्येनैकान्तवासिना दीर्घप्रणवमुच्चार्य मनोराज्यं विजीयते ६२
जितेतस्मिन्वृत्तिशून्यं मनस्तिष्ठति मूकवत् एतत्पदं वशिष्ठेन रामाय बहुधेरितम् ६३
दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ६४

रहितं भवति तिष्ठत इत्यर्थः अवृत्तिकमनोवस्थानस्य पुरुषार्थत्वे प्रमाणमाह एतत्पदमिति एतत्पदमियं द
शेत्यर्थः ६३ वशिष्ठश्लोकवाक्यद्वयमुदाहरति दृश्यमिति नेह नानास्ति किंचनेत्यादिश्रुत्याद्वितीयब्रह्माति
रिक्तंजगदभावज्ञानेन मनसः सकाशाद्दृश्यनिवारणं संपन्नं यदि तर्हि निरतिशयं मोक्षसुखं निष्पन्नमिति
जानीयादित्यर्थः ॥ ६४ ॥ श्रीरामकृष्णगोपालहरे श्रीकेशवमाधवकंसारे श्रीः

श्रीगुरवे नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः १
मुमुक्षोर्मोक्षसाधनब्रह्मात्मैकत्वावगतिसिद्धये प्रसिद्धानां चतुर्णां महावाक्यानामर्थं क्रमेण निरूपयन्प्रथ
मकृपालुराचार्य ऐतरेयारण्यकगतं प्रज्ञानं ब्रह्मेति महावाक्यं प्रज्ञानशब्दस्यार्थमाह येनेक्षते
इति येन चक्षुर्द्वारा निर्गतान्तःकरणवृत्त्युपहितचैतन्येनेदं दर्शनयोग्यं रूपादिकमीक्षते पश्यति पुरुषस्तथा
श्रोत्रद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन येन शब्दजातं शृणोति तथैव घ्राणद्वारा निर्गतान्तःकरणवृ

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितम् १

त्त्युपहितेनोपाधिकेन येन गंधजातं जिघ्रति येन वागिंद्रियावच्छिन्नेन व्याकरोति शब्दजातं व्याहरति येन र
सेंद्रियद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन स्वाद्वस्वादु रसो विजानाति अनुक्तसमुच्चयार्थश्चशब्दः
तथा चोक्तानुक्तैः सकलेंद्रियैरन्तःकरणवृत्तिभेदैश्चोपलक्षितं यच्चैतन्यमस्ति तदेवात्र प्रज्ञानमित्युच्यत इ
त्यर्थः अनेन येन वा पश्यतीत्यादेः सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि इत्यंतस्य वाक्यसन्दर्भ
स्यार्थः संक्षिप्य दर्शितः ॥ १ ॥ श्रीरामः ॥ श्रीकृष्णः ॥

१
श्रीः

अत्रापिवशिष्ठवाक्यमुदाहरति दर्शनेति योब्रह्मन्जानामिनजानामीतिव्यवहारद्वयंपरित्यज्यस्वयमद्वि
तीयचैतन्यमात्ररूपेणावतिष्ठते सस्वयंब्रह्मैवनब्रह्मविदित्यर्थः ६८ सकलंद्वैतविवेचनमुपसंहरति
जीवन्मुक्तेरिति असावुक्तप्रकारोजीवन्मुक्तेःपरकाष्ठा निरतिशयपर्यवसानभूमिजीवद्वैतस्यमनोम

दर्शनादर्शनेहित्वास्वयंकेवलरूपतः यस्तिष्ठतिसतुब्रह्मन्ब्रह्म[illegible]
नब्रह्मवित्स्वयम् ६८ जीवन्मुक्तेःपराकाष्ठाजीवद्वैतविसर्जनात् लभ्य
तेसावतोत्रेदमीशद्वैताद्विवेचितम् ६९ इत्यद्वैतविवेकःसमाप्तः ४

यप्रपंचस्यविवर्जनात्परित्यागाल्लभ्यतेप्राप्यते अतःकारणादिदंजीवद्वैतमीशद्वैतादीश्वरसृष्टद्वैताद्विवे
चितंविविच्यप्रदर्शितमित्यर्थः ६९ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमु
निवर्यकिंकरेणरामकृष्णाख्यविदुषाविरचिताद्वैतविवेकपदयोजनासमाप्ता ॥ ४ ॥

पंचदशी
६४ ला२

ब्रह्मशब्दार्थमाह स्वतइति स्वतः पूर्णः स्वभावतो देशकालाद्यनवच्छिन्नः पूर्वोक्तः परमात्माऽत्रास्मि
न्महावाक्ये ब्रह्मशब्देन ब्रह्मेत्यनेन पदेन वर्णितः लक्षणयोक्त इत्यर्थः एतद्वाक्यगतेनास्मीति पदेन पदद्व
यसामानाधिकरण्यंपलभ्यं जीवब्रह्मणोरैक्यं परामृश्यत इत्याह अस्मीति फलितमाह तेने

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम् ४
एकमेवाद्वितीयं सन्नामरूपविवर्जितम् सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते ५

ति ४ इदानीं छांदोग्यश्रुतिगतस्य तत्त्वमसीति वाक्यस्यार्थप्रकाशनाय तत्पदलक्ष्यार्थमाह एक
मेवेति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति वाक्येन सृष्टेः पुरा स्वगतादिभेदशून्यं नामरू
परहितं यत्सद्वस्तु प्रतिपादितमस्ति अस्य सद्वस्तुनोऽधुनापि सृष्ट्युत्तरकालमपि तादृक्त्वं विचारदृष्ट्या
तथात्वेन तदिति पदेनेर्यते लक्ष्यते इत्यर्थः ५ ॥ श्रीः श्रीरामः श्रीकृष्णः

२
श्रीः

एवं प्रज्ञानशब्दस्यार्थमभिधाय ब्रह्मशब्दस्यार्थमाह चतुर्मुखेति उत्तमेषु देवादिषु मध्यमेषु मनुष्यादिषु अधमेषु अश्वगवादिषु देहधारिषु आकाशादिषु भूतेषु च जगज्जन्मादिहेतुभूतेषु एकं चैतन्यमस्ति तद्ब्रह्मेत्यर्थः अनेन च एष ब्रह्मैष इन्द्र इत्यादेः प्रज्ञाप्रतिष्ठेत्यंतस्यावांतरवाक्यस्यार्थः संक्षिप्य दर्शितः इत्थं पदार्थमभिधाय वाक्यार्थमाह अतः प्रज्ञानं प्रज्ञानं ब्रह्म मय्यपीति यतः सर्वावस्थितं प्रज्ञानं ब्रह्मातो मय्यपि स्थितम् प्रज्ञानं ब्रह्मैव प्रज्ञानत्वाविशेषादित्यर्थः २ एवं ऋक्शाखागतं महावाक्यार्थं निरूप्य यजुःशा-

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि २
परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते ३

खासु मध्ये बृहदारण्यकोपनिषद्गतस्याहं ब्रह्मास्मीति महावाक्यस्यार्थाविःकरणाय अहंशब्दस्यार्थमाह परिपूर्ण इति परिपूर्णः स्वभावतो देशकालवस्तुभिरपरिच्छिन्नः परमात्मा अस्मिन्मायाकल्पिते जगति विद्याधिकारिणि शमादिसाधनसंपन्नत्वेन विद्यासंपादनयोग्येऽस्मिञ्छ्रवणाद्यनुष्ठानवति देहे मनुष्यादिशरीरे बुद्धेर्बुद्ध्युपलक्षितस्य सूक्ष्मशरीरस्य साक्षितयाऽविकारित्वेनावभासकतया स्थित्वा विस्याय स्फुरन् प्रकाशमानोऽहमितीर्यते लक्षणयाऽहंपदेनोच्यत इत्यर्थः ॥ ३ ॥ श्रीः

पंचदशी
६५

स्वप्रकाशेति अयमित्युक्तितो अयमितिशब्देन स्वप्रकाशापरोक्षत्वं स्वयं स्वप्रकाशेनापरोक्षत्वं मतमभिम
तं अदृष्टादिवन्नित्यपरोक्षत्वं घटादिवद्दृश्यत्वं च व्यावर्तयितुं विशेषणद्वयमिति बोद्धव्यं देहादिष्वात्म
शब्दप्रयोगदर्शनादत्रात्मशब्देन किं विवक्षितमित्याकांक्षायामाह अहंकारेति अहंकार आदिर्यस्याहंका
र प्राणमनइन्द्रियदेहसंघातस्य सोहंकारादिः तथा देहः अंतो यस्यापि संघातस्य स देहांतः सोहंकारादिः चा
सौ देहांतश्चेति तथा तस्मात्स्वगधिष्ठानतया साक्षितया चांतर आत्मेति गीयते अस्मिन्वाक्य इत्यर्थः ७

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम् अहंकारादिदेहांतात्प्रत्यगात्मेति गीयते ७ दृश्यमा
नस्य सर्वस्य जगतस्तत्त्वमीर्यते ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकम् ८ इति महावाक्यवि
वेकः १०

ब्राह्मणात्यादिष्वपि ब्रह्मशब्दस्य प्रयोगदर्शनात्तद्व्यावर्तनायात्र विवक्षितमर्थमाह दृश्यमिति दृश्यत्वेनाभि
व्याप्तस्य सर्वस्याकाशादेर्जगतस्तत्त्वमधिष्ठानतया तद्बाधावधित्वेन च पारमार्थिकं सच्चिदानंदलक्ष
णाख्यरूपमस्ति तद्ब्रह्मशब्देनेर्यते कथ्यत इत्यर्थः वाक्यार्थमाह तद्ब्रह्मेति यदुक्तलक्षणं ब्रह्म स्वप्रकाशा
त्मरूपं यस्य तत्स्वप्रकाशात्मरूपकं सदेवेत्यर्थः ८ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारती
तीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता महावाक्यव्याख्या समाप्ता १०

विवेक १

३
श्रीः

त्वंपदलक्ष्यार्थमाह श्रोतुरिति श्रोतुः श्रवणाद्यनुष्ठानेन वाक्यार्थप्रतिपत्तुर्देहेन्द्रियातीतं देहेन्द्रियोपलक्षितं स्थूलादिशरीरत्रयसाक्षितयातद्विलक्षणं सदसत्सदसत्त्वेव त्वंपदेरितं वाक्यगतेन त्वमिति पदेन लक्षितमित्यर्थः एतद्वाक्यस्थेन असीति पदेन तत्त्वंपदसामानाधिकरण्यलब्धं पदार्थद्वयैक्यं शिष्यं प्र

श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् एकता ग्राह्यतेसीति तदैक्यमनुभूयताम् ॥ ६ ॥ श्रीरामः ॥ श्रीकृष्णः ॥

ति प्रत्याप्यत इत्याह एकेति सिद्धमर्थमाह तदैक्यमिति तयोस्तत्त्वंपदार्थयोरैक्यं प्रमाणसिद्धमेकत्वमनुभूयतामुमुक्षुभिरित्यर्थः ६ क्रमप्राप्तस्याथर्वणवेदगतस्यायमात्मा ब्रह्मेति वाक्यस्यार्थं व्याचिकीर्षुरादावयमात्मेति पदद्वयेन विवक्षितमर्थं क्रमेण दर्शयति ॥ श्रीः ॥

पंचदशी

९८

...वग्न

ननुतर्हिस्व...
घावर्तनम...
अक्लिचित्...
पापिनाहे...
स्याघाव...

अस्तु...
अहंध्र...
वाढं...

...हमिति...
...पन...
तत्त्वमथ्यरोहेतुः विपरीतभावनापुनः कर्तृत्वाद्यभिमानरूपात् तीयद्वन्येवंविधाः अदाढ्यस्यहतवोवा ठे
संजिज्ञावंऽभाविद्यंतेऽतोऽपरोक्षानुभावदार्ढ्यायश्रवणादिकमावर्तनीयमितिभावः ९९ ॥ श्रीः ॥

९८

श्रीः

M 1+6-22 ~~15~~
M 23-65

पंचदशी ननुतर्हिपूर्वोक्तरीत्यासकृद्वाक्यविचारादेवापरोक्षज्ञानसिद्धेरावृत्तिरसकृदुपदेशादित्यादौविहितंश्रवणा
द्यावर्तनमननुष्ठेयंस्यादित्याशंक्याहतद्दार्ढ्यायतदावर्तनानुष्ठानस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह
६९ अस्त्विति अत्रब्रह्मात्मनिविषयेमहावाक्यात्सकृच्छ्रुताद्विचारसहितात्अपरोक्षबोधोऽस्तुभवत्येवत
थापिनासौदृढोऽतःश्रवणाद्यावर्तनीयम् श्रीमच्छंकराचार्यैःपुनर्वाक्यार्थज्ञानोत्पत्त्यनंतरमपिश्रव
णाद्यावर्तनाभिधानादित्यर्थः ९७ आचार्यैःकेनवाक्येनाभिहितमित्याशंक्यतद्वाक्यंपठति

अस्तुबोधोपरोक्षोत्रमहावाक्यात्तथाप्यसौ नदृढःश्रवणादीनामाचार्यैःपुनरीरणात् ९७
अहंब्रह्मेतिवाक्यार्थबोधोयावद्दृढीभवेत् शमादिसहितस्तावदभ्यसेच्छ्रवणादिकम् ९८
बाढंसंतिह्यदार्ढ्यस्यहेतवःश्रुत्यनेकता असंभाव्यत्वमर्थस्यविपरीतत्वभावना ९९

अहमिति ९८ ननुवाक्यप्रमाणजनितज्ञानस्यादार्ढ्यंकुतइत्याशंक्याह बाढमिति हियस्मात्कारणा
च्छ्रुत्यनेकताश्रुतीनांनानात्वमेकोहेतुरर्थस्यअखंडैकरसस्याद्वितीयब्रह्मरूपस्यालौकिकत्वेनासंभावि ६९
तत्वमपरोहेतुःविपरीतभावनापुनःकर्तृत्वाद्यभिमानरूपातृतीयऽस्त्येवंविधाःअदार्ढ्यस्यहेतवोबाढं
संतिसर्वेषांविद्यंतेऽतोऽपरोक्षानुभवदार्ढ्यायश्रवणादिकमावर्तनीयमितिभावः ९९ ॥ श्रीः ॥ श्रीः

ननु ब्रह्मणि फलव्याप्तिर्नास्ति वृत्तिव्याप्तिस्तु विद्यत इत्युक्तं तत्र किं प्रमाणमित्याशंक्यागमः प्रमाणमित्याह अप्रमेयमिति निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम् अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुधः इत्यत्रास्मिन्मंत्रे श्रुत्याम्नातविंद्रूपनिषदाऽप्रमेयशब्देनेदं फलव्याप्तिराहित्यमुक्तम् मनसैवेदमाप्तव्यं नेह नानास्ति किंचनेति कठवल्ल्यां धीव्याप्यताश्रुता वृत्तिव्याप्यत्वं श्रुतमित्यर्थः ९५ आत्मानं चेद्विजानीयादिति मंत्रेणापरोक्षज्ञान

अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितम् मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुता ९५
आत्मानं चेद्विजानीयादयमस्मीति वाक्यतः ब्रह्मात्मव्यक्तिमुल्लिख्य यो बोधः सोभिधीयते ९६

शोकनिवृत्त्याख्यं जीवगतमवस्थाद्वयमभिधीयत इत्युक्तमपरोक्षज्ञानशोकनिवृत्त्याख्ये तुभे इमे अवस्थे जीवगे इत्यत्रात्मानं चेदिश्रुतिः इत्यनेन श्लोकेन तत्र कियतांशेनपरोक्षज्ञानमुत्पद्यत इत्याकांक्षायामाह आत्मानं चेदिति ब्रह्मात्मव्यक्तिं सत्यादिलक्षणब्रह्माभिन्नप्रत्यगात्मस्वरूपमुल्लिख्य विषयीकृत्य यो बोधो जायते ब्रह्माहमस्मीति सोभिधीयतेऽनेन वाक्येनेत्यर्थः ९६ ॥ श्रीः ॥ श्रीः ॥ श्रीः;

14 50

इदानीमात्मनितत्तोवैलक्षण्यंदर्श यस्याज्ञानावृतत्वात्तस्यब्रह्मा
नस्यनिवृत्तयेवाक्यजन्यायाः हंवृ रपेक्ष्यतेस्वरूपेवस्फुरणरूपत्वा
त्तेःस्फुरणायचिदाभासोनापेक्ष्य अपेक्ष्यतइत्यर्थः ९२ उक्तमर्थं
दृष्टांतुप्रदर्शनेनविशदयति चंद् चक्षुर्दीपावुभावपेक्ष्येते दीप
प्रदर्शनेतुतथान किंत्वेकंचक्षुरे ज्ञायेतिपूर्वेणसंबंधः ९३

ब्रह्मण्यज्ञाननाशायवृत्तिव्या त्ताभासउपयुज्यते ९२
चक्षुर्दीपावपेक्ष्येतेघटादेर्दर्श नपेक्ष्यते ९३ स्थितोप्यसौचि
दाभासोब्रह्मण्येकीभवेत्परम् वेत् ९४ ॥ श्रीरामः ॥

ननुवृत्तिवृत्तीनांचिदाभासवैशिष्ट्य फलव्याप्तिर्वलाद्भवेत् इत्याशं
त्याह स्थितोपीति यद्यपिघटा दाभासोस्तितथापिनासौब्रह्म
रुणो मेदेनभासते किंतुप्रचंडातपमध्यवर्तिप्रदीपप्रभावात्तेनैकीभूतइवभवत्यतोनस्फुरणलक्षणातिश
यजनकोब्रह्मणीत्यर्थः ॥ ९४ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

इदानीमात्मनि ततोवैलक्षण्यंप्रदर्शयति ब्रह्मणीति प्रत्यग्ब्रह्मणोरेकत्वस्याज्ञानावृतत्वात्तस्याज्ञा-
नस्य निवृत्तये वाक्यजन्यया ऽहंब्रह्मास्मीत्येवमाकारया धीवृत्त्या व्याप्तिरपेक्ष्यते स्वस्यैव स्फुरणरूपत्वा-
त्तत्स्फुरणाय चिदाभासो नापेक्ष्यते ऽतो युज्यमानोपि चिदाभासो नोपयुज्यत इत्यर्थः ९२ उक्तमर्थं
दृष्टांतप्रदर्शनेन विशदयति चक्षुरिति अंधकारावृतघटादिदर्शने चक्षुर्दीपावुभावपेक्ष्येते दीप
प्रदर्शने तु तथा न किंत्वेकं चक्षुरेवापेक्ष्यते यथा तथा ब्रह्मण्यज्ञाननाशायेति पूर्वेण संबंधः ९३

ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता स्वयंस्फुरणरूपत्वान्नाभास उपयुज्यते ९२
चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने तथा न दीपदर्शने किंतु चक्षुरेकमपेक्ष्यते ९३ स्थितोप्यसौ चि-
दाभासो ब्रह्मण्येकीभवेत्परम् न तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत् ९४ ॥ श्रीरामः ॥

ननु बुद्धिवृत्तीनां चिदाभासवैशिष्ट्यस्याभाव्यात् घटादिष्विव ब्रह्मण्यपि फलव्याप्तिर्बलाद्भवेदित्याशं-
क्याह स्थितोपीति यद्यपि घटाद्याकारवृत्तिवद् ब्रह्मगोचरवृत्तावपि चिदाभासोस्ति तथापि नासौ ब्रह्म-
णो भेदेन भासते किंतु प्रचंडातपमध्यवर्तिप्रदीपप्रभावात्तेनैकीभूत इव भवत्यतो न स्फुरणलक्षणातिश-
यजनको ब्रह्मणीत्यर्थः ॥ ९४ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

ननुकेवलस्यप्रत्यगात्मनःस्वप्रकाशत्वाद्बुद्धिवृत्तिविषयत्वंनघटतइत्याशंक्याह स्वप्रकाशोपीति अन्यवत् घटादिवदित्यर्थः स्वप्रकाशोहमित्येवंबुद्धिसंभवादितिभावः तर्ह्यपसिद्धांतापातइत्याशंक्यपूर्वाचार्यैरपिवृत्तिव्याप्यत्वस्यांगीकृतत्वान्नापसिद्धांतापातइत्याह फलव्याप्यत्वमिति फलंवृत्तिप्रतिबिंबितश्चिदाभासः तद्व्याप्यत्वमेवास्यप्रत्यगात्मनोनिराकृतम् स्वस्यैवस्फुरणरूपत्वादिति

स्वप्रकाशोपिसाक्ष्येषधीवृत्त्याव्याप्यतेन्यवत् फलव्याप्यत्वमेवास्यशास्त्रकृद्भिर्निवारितम्
९० बुद्धितत्स्थचिदाभासौद्वावपिव्याप्नुतोघटम् तत्राज्ञानंधियानश्येदाभासेनघटःस्फुरेत्
९१

भावः ९० आत्मनिफलव्याप्त्यभावंदर्शयितुमनात्मनोवृत्त्याफलेनचव्याप्यत्वंदर्शयति बुद्धितत्स्थइति उभयव्याप्तेःप्रयोजनमाह तत्रेति तत्रतयोर्बुद्धिचिदाभासयोर्मध्येधियाबुद्धिवृत्त्याप्रमाणभूतयाऽज्ञानंनश्यति ज्ञानाज्ञानयोर्विरोधात् आभासेनचिदाभासेनघटःस्फुरेत् जडत्वेनस्वतःस्फुरणाभावादितिभावः ९१ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

ननु वेदांतानामतद्व्यावृत्त्या ब्रह्मबोधकत्वांगीकारे ऽहंशब्दार्थस्य कूटस्थस्यापि त्यागप्रसंगादहं ब्रह्मास्मीति सामानाधिकरण्येन ज्ञानं नोदेतुमर्हतीति शंकते अहमर्थ इति अहंशब्दार्थस्य सर्वस्य त्यक्तत्वान्नैवमिति परिहरति नैवमिति । यस्मात्कारणाद्भागलक्षणया जहदजहल्लक्षणया

अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः नैवमंशस्य हि त्यागो भागलक्षणयोदितः ८८
अंतःकरणसंत्यागादवशिष्टे चिदात्मनि अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीष्यते ८९

अंशस्याहंशब्दार्थैकदेशस्य जडांशस्य त्याग ईरितो न कूटस्थस्यातो ऽहं ब्रह्मास्मीति ज्ञानमुपपद्यत इत्यर्थः ८८ अंशत्यागेन बोधनप्रकारमभिनीय दर्शयति अंतःकरणेति ८९ श्रीः ॥

विधेरिवनिषेधस्यापिब्रह्मबोधोपायत्वेनब्रह्मोपाधित्वंदृढपित्वं [illegible] विधिनिषेधयोरुभयोर
पिब्रह्मबोधोपायत्वमाचार्यैर्निरूपितमितिदर्शयति अतदिति तच्छब्देनब्रह्मात्माभिधीय
तेः तच्छब्देनतदतिरिक्तमशनादि ननतत् अतत् तस्यप्रपंचस्यव्यावृत्तिर्निरसनंतदेवरूपम्

अतद्व्यावृत्तिरूपेणसाक्षाद्विधिमुखेनच वेदांतानांप्रवृ
त्तिःस्याद्द्विधेत्याचार्यभाषितम् ८७ ॥ श्रीः ॥

पायस्तेनसाक्षाद्विधिमुखेनचविधिर्विधानेसाक्षाद्वाचकशब्दप्रयोगः सत्यंज्ञानमनंतमि
त्येवमादिरूपस्तेनचाविधिमुखेनतद्द्वारेणापीत्यर्थः वेदांतानामुपनिषदांप्रवृत्तिःप्रवर्त
नंप्रतिपादनंब्रह्मणीतिशेषः ८७ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं वक्तव्यमित्याशंक्याह अंतःकरणेति जीवभावब्रह्मभावयोरंतःकरणसाहित्यराहित्ये एवोपाधिरित्यर्थः ८५ नन्वंतःकरणसंबंधस्य भावरूपत्वादुपाधित्वमस्तु नाभावरूपस्य तद्राहित्यस्य तदुचितमित्याशंक्य यावत्कार्यमवस्थायि भेदहेतोरुपाधिता इत्युक्तोपाधिलक्षणस्य साहित्यराहित्ययोरपि सत्त्वादुचितमेवोपाधित्वमित्यभिप्रायेण परिहरति यथेति

अंतःकरणसाहित्यराहित्याभ्यां विशिष्यते उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ८५
यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा न किम् सुवर्णलोहभेदेन शृंखलात्वं न भिद्यते ८६

विधिर्भावरूपोंतःकरणसंबंधो यथोपाधिः स्यात्तथा प्रतिषेधोऽभावरूपोंतःकरणवियोगो न किमुपाधिर्न स्यात्किंतु स्यादेवेत्यर्थः तथापि भावाभावरूपत्वलक्षणमवांतरवैलक्षण्यं दृश्यत एवेत्याशंक्य तथास्याकिंचित्करत्वेनानादरणीयत्वमित्यभिप्रेत्य दृष्टांतमाह सुवर्णेति पुरुषप्रचारनिरोधकत्वांशेऽनुपयुक्तं सुवर्णत्वलोहत्वादिवैलक्षण्यं यद्वदनादरणीयं तद्वदित्यर्थः ८६ श्रीरामः ॥

किंच त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसंगादपि न महावाक्यं परोक्षज्ञानजनकमित्यंगीकार्यमि
त्याह स्वत इति ८१ इष्टापत्तिरित्याशंक्याह वृद्धिमिति ८१ ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वं यु
क्तं ब्रह्मणस्तु निरुपाधिकस्य तन्न युज्यत इति शंकते अंतःकरणेति ८३ ब्रह्मणो निरुपाधिकत्वम

स्वतोपरोक्षजीवस्य ब्रह्मत्वमभिवांछतः नश्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ८१
वृद्धिमिष्टवतो मूलमपि नष्टमितीदृशम् लौकिकं वचनं सार्थं संपन्नं त्वत्प्रसादतः ८२
अंतःकरणसंभिन्नबोधो जीवोपरोक्षताम् अर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः ८३
नैवं ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः यावद्विदेहकैवल्यमुपाधेरनिवारणात् ८४

सिद्धमिति परिहरति नैवमिति जीवस्य ब्रह्मरूपताज्ञानं यदस्ति तस्य सोपाधिकवस्तुविषयत्वात्तद्वि
षयस्य ब्रह्मणोपि सोपाधिकत्वम् ज्ञानस्य सोपाधिकविषयत्वं च ज्ञेयस्य सोपाधिकत्वमंतरेण न
घटत इति भावः तदेव कुत इत्यत आह यावदिति ८४ ॥ श्रीः ॥ श्रीः ॥ श्रीः

ननुसमयबलेनसम्यक्परोक्षानुभवसाधनमागमइत्यागमलक्षणमतोवाक्यस्यापरोक्षज्ञानजन
कत्वंकथमुच्यतइत्याशंक्यसिद्धांतपरिज्ञानमस्यायमितिमनसिनिधायोपहसति एवंसतीति एवं
वदंतःसिद्धांतरहस्यंनैवजानंतीत्यर्थः ७९ ननुसिद्धांतस्तावत्तिष्ठतुवाक्यस्यापरोक्षज्ञानजनकत्वं

एवंसतिमहावाक्यात्परोक्षज्ञानमीर्यते यैस्तेषांशास्त्रसिद्धांतविज्ञानंशोभतेतराम् ७९
आस्तांशास्त्रस्यसिद्धांतोयुक्त्यावाक्यात्परोक्षधीः स्वर्गादिवाक्यवन्नैवंदशमेव्यभिचारतः ८०

त्वनुमानसिद्धमितिशंकते आस्तामिति विमतंवाक्यंपरोक्षज्ञानजनकंभवितुमर्हतिवाक्यत्वात्स्व
र्गादिप्रतिपादकवाक्यवदित्यनुमानेनपरोक्षज्ञानजनकत्वंसिद्धमित्यर्थः अनैकांतिकोयंहेतुरितिप
रिहरति नैवमिति दशमस्त्वमसीतिवाक्यस्यापरोक्षज्ञानजनकत्वस्योपलंभादितिभावः ८०

पं पंचदशी
६

अखंडैकरसवाक्यार्थं दर्शयति प्रत्यग्बोध इति यः प्रत्यग्बोधः सर्वांतरश्चिदात्मा आभाति बुद्ध्यादिसा
क्षित्वेन स्फुरति सोऽद्वयानंदलक्षणोऽद्वितीयानंदरूपः परमात्मेत्यर्थः अद्वयानंदरूपश्च तत्पदाभिधः
परः परमात्मा प्रत्यग्बोधैकलक्षणश्चिदेकरसः प्रत्यगात्मैवेत्यर्थः ७६ एवं अखंडार्थबोधने किं स्यादि

प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ७६
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ७७ तदर्थ
स्य च पारोक्ष्यं यद्येवं किं ततः शृणु पूर्णानंदरूपेण प्रत्यग्बोधोऽवतिष्ठते ७८ ॥ श्रीः

त्यत आह इत्थमिति त्वमर्थस्य प्रत्यगात्मनोऽब्रह्मत्वं भ्रांतिसिद्धाऽब्रह्मरूपता तदर्थस्य च ब्रह्मण
श्च पारोक्ष्यं परोक्षज्ञानविषयत्वं च निवर्तेत ततोऽपि किमिति पृच्छति यद्येवमिति उत्तरमाह ॥
शृण्विति ॥ ७७ ॥ ७८ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

साच कीदृशीत्यत आह तत्वमस्यादीति भागलक्षणं भागत्यागलक्षणेत्यर्थः तत्र दृष्टान्तः सोयमिति
सोयं देवदत्त इति वाक्यस्य यो: सोयमिति पदयोर्यथा जहदजहल्लक्षणाश्रिता नापरा जहल्लक्षणा
नाप्यजहल्लक्षणा तद्वदत्रापीत्यर्थः ७४ संसर्ग इति यथा लोके गा मानयेत्यादौ पदैः स्मारितानां
उर्दि:१ ननु गामानयेत्यादिवाक्येषु लक्षणायास्त्या विनापि वाक्यार्थबोधो दृश्यते तद्वदत्रापि किं न स्यादित्याह २

तत्वमस्यादिवाक्येषु लक्षणा भागलक्षणा सोयमित्यादिवाक्यस्थपदयो
रिव नापरा ७४ संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः अखंडैक
रसत्वेन वाक्यार्थो विदुषां मतः ७५ ॥ श्रीः ॥ श्रीः ॥ श्रीः

माकांक्षासंनिध्यादिमतां गवादिपदार्थानामन्वयो वाक्यार्थत्वेन स्वीकृतो यथा वा नीलं महत्सुगंधिउ
त्पलमित्यादौ नीलत्वादिविशिष्टस्योत्पलस्य वाक्यार्थत्वं स्वीकृतं नैवमत्र महावाक्येषु संसर्गविशिष्ट
योरन्यतरस्य वाक्यार्थत्वमभ्युपगम्यते किंत्वखंडैकरसत्वेन स्वगतादिभेदशून्यवस्तुमात्ररूपेण वा
क्यार्थो विद्वद्भिरभ्युपेयतेऽतो लक्षणाश्रयणीयेत्यर्थः ७५ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

वाक्यद्वतादुपपादनप्रकारं दर्शयति आलंबनतयेति योंतःकरणसंभिन्नबोधोंतःकरणोपाधिकश्चिदा
भासोस्मत्प्रत्ययशब्दयोरहमितिज्ञानस्याहमितिशब्दस्य चालंबनतया विषयत्वेन भाति स तथाविधो बोधः
त्वंपदाभिधः त्वंपदमभिधावाचकं यस्य स त्वंपदाभिधस्त्वंपदवाच्य इत्यर्थः ७१ एवं त्वंपदवाच्यार्थमभि
धाय तत्पदवाच्यार्थमाह मायोपाधिरिति पारोक्ष्यशबलः परोक्षधर्मविशिष्ट इत्यर्थः एवं तटस्थलक्ष

आलंबनतया भाति योस्मत्प्रत्ययशब्दयोः अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ७१
मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः पारोक्ष्यसबलः सत्याद्यात्मकस्तत्पदाभिधः ७२
प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता विरुध्येते यतस्तस्माल्लक्षणा संप्रवर्त्तते ७३ ॥

णमभिधाय स्वरूपलक्षणमाह सत्याद्यात्मक इति सत्यमादिर्येषां ज्ञानादीनां ते सत्यादयश्चात्मा
स्वरूपं यस्य स तथाभिधस्तत्पदमभिधावाचकं यस्य स तत्पदाभिधस्तत्पदवाच्य इत्यर्थः एवं पदार्थाभि
धाय वाक्यार्थबोधनाय लक्षणावृत्तिराश्रयणीयेत्याह प्रत्यगिति प्रत्यक्परोक्षत्वे सद्वितीयत्वेन सहि
तापूर्णतेति मध्यमपदलोपी समासः सद्वितीयत्वपूर्णते च एकस्य वस्तुनो विरुध्यतेऽतो लक्षणावृत्ति
राश्रयणीयेत्यर्थः ॥ ७३ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

इदानीमेतरेयश्रुतावपि तद्दर्शयति आत्मावाइति आत्मावाइदमेक एवाग्र आसीन्नान्यत्किंचनमिषदित्यनेन वाक्येन ब्रह्मणो लक्षणमभिधाय सऐक्षत लोकान्नुसृजा इत्युपक्रम्य तस्य त्रय आवसथास्त्रयस्वप्ना अयमावसथोऽयमावसथो यमावसथ इत्यनेन परमात्मनि जगदध्यारोपणप्रकारमभिधाय च स जातो भूतान्यभ्यवैख्यत् किमिहान्यं वावदिषदिति तस्यारोपितस्यापवादमभिधाय स एतमेव पुरुषं ब्रह्मततमपश्यदिदमदर्शमिति प्रत्यगात्मनो ब्रह्मरूपत्वमभिहितं पुनश्च पुरुषे ह वा इत्यादिनाज्ञान

आत्मावाइदमित्यादौ परोक्षं ब्रह्म लक्षितं अध्यारोपापवादाभ्यां प्रज्ञानं प्रदर्शितम् ६८
अवांतरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत् सर्वत्रैव महावाक्यविचारात्त्वपरोक्षधीः ६९
ब्रह्मापरोक्ष्यसिद्ध्यर्थं महावाक्यमितीरितम् वाक्यवृत्तावतो ब्रह्मापरोक्ष्ये विमतिर्न हि ७०

साधनवैराग्यजननाय गर्भवासादिदोषं प्रदर्श्य कोयमात्मेति वयमुपास्महे इत्यादिना विचारेण तत्त्वंपदार्थपरिशोधनपुरःसरं प्रज्ञानं ब्रह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं प्रदर्शितमित्यर्थः ६८ उक्तन्यायमितरश्रुतिष्वप्यतिदिशति अवांतरेणेति सर्वत्र सर्वासु श्रुतिष्वित्यर्थः ६९ ननु महावाक्यविचारस्यापरोक्षज्ञानजनकत्वं स्वकपोलकल्पितमित्याशंक्य वाक्यवृत्तावाचार्यैस्तथा प्रतिपादितत्वान्नैवमित्याह ब्रह्मापरोक्ष्येति अतो वाक्याद्ब्रह्मापरोक्ष्यज्ञाने विप्रतिपत्तिर्नास्तीत्यर्थः ७० ॥ श्रीः ॥ श्रीः

श्रीः

ननु ब्रह्मलक्षणस्यानंदात्मरूपेण प्रतीचि योजनं न घटते ब्रह्मणः तटस्थत्वेन प्रतीचो भिन्नत्वादित्याशंक्य न भेदः सत्यादिलक्षणस्य ब्रह्मणः प्रत्यग्रूपेणावस्थानश्रवणादित्याह सत्यमिति सत्यं ज्ञानमनंतं ब्रह्मेत्येवं ब्रह्मस्वलक्षणं ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन वाक्येन पंचकोशगुहांतःस्थितत्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः ६६ एवं तैत्तिरीयकश्रुतिपर्यालोचनया

सत्यं ज्ञानमनंतं चेत्येवं ब्रह्मस्वलक्षणम् उक्ता गुहाहितत्वेन कोशेष्वेतत्प्रदर्शितम् ६६
पारोक्ष्येण विबुध्येंद्रो य आत्मेत्यादिलक्षणैः अपरोक्षीकर्तुमिच्छंश्चतुर्वारं गुरुं ययौ ६७

ह्मणः परोक्षज्ञानपूर्वकं विचारजन्यत्वं साक्षात्कारस्य दर्शयित्वा छांदोग्यश्रुतिपर्यालोचनयापि तद्दर्शयति पारोक्ष्येणेति इंद्रो य आत्माहतपाप्मा विजरो विमृत्युर्विशोक इत्यादिवाक्यप्रतिपादितलक्षणमात्मानं परोक्षतयाऽवगत्य चिरच्छरीरत्रयनिराकरणेन तत्साक्षात्करणाय गुरुं ब्रह्माणं चतुर्वारमुपसन्नो इति छांदोग्योपनिषद्यष्टमाध्याये श्रूयते ६७ ॥ श्रीः ॥ श्रीः ॥ श्रीः

पंचदशी
६२

नन्वेवं प्रथमतः केवलवाक्यात्परोक्षज्ञानमुत्पद्यते पश्चाद्विचारसहिताद परोक्षज्ञानमित्येतत्कुतोऽवग
म्यत इत्याशंक्य तैत्तिरीकादिश्रुत्यर्थपर्यालोचनयेत्याह जन्मादीति भृगुर्नामैकः कश्चिदृषिः उपयतो वा
इमानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति तद्विजिज्ञासस्व ततभृतानि ब्रह्मपरोक्षतया
वगम्यान्नमयादिपंचकोशविचाराद्व्यक्तिं प्रत्यगात्मनो रूपं ब्रह्मा ब्रह्मेतीति वाक्यश्रुतेन जगज्जन्मादि

जन्मादिकारणत्वाख्यलक्षणेन भृगुः पुरा परोक्षेण गृहीत्वाथ विचाराद्व्यक्तिमैक्षत ६३
यद्यपि त्वमसीत्यत्र वाक्यं नोच्चेत्भृगोः पिता तथाप्यन्नं प्राणमिति विचारस्थलमुक्तवान् ६४
अन्नप्राणादिकोशेषु सविचार्य पुनः पुनः आनंदव्यक्तिमीक्षित्वा ब्रह्मलक्ष्माप्ययूयुजत् ६५

कारणत्वाख्यलक्षणेन जगत्कारणं दृष्टवानित्यर्थः ६३ नन्वास्मिन्प्रकरणे त्वं ब्रह्मासीत्येवमाद्युपदेशवा
क्याभावात्कथं भृगोरात्मतत्त्वसाक्षात्कार इत्याशंक्यात्मसाक्षात्कारहेतुविचारयोग्यस्थलप्रदर्शनादित्याह
यद्यपीति ६४ नन्वन्नमयादिकोशेषु विचारितेषु प्रतीचः साक्षात्कारो भवति ब्रह्मणस्तु कथमित्याशंक्य
प्रतीच एव ब्रह्मत्वात्पंचकोशविचारेणानंदात्मव्यक्तिं साक्षात्कृत्यानंदाद्ध्येव खल्विमानि भूतानि जायंत इ
त्यादिसंविशंतीत्यंतमित्येवं ब्रह्मलक्षणमपि प्रतीच्येव योजितवानित्याह अन्नप्राणादीति ६५ श्रीः

६२
श्रीः

प्रत्येकन्नेतस्यार्थमेवेति परिहारेऽभिहिते स्वात्मना सहेतरान्नवगणयित्वाहंदशमोऽस्मीति स्वयमेवदशमं स्मरेदित्यर्थः ५९ तस्य दशमोऽस्मीतिज्ञानस्य विचारसहितवाक्यजनितत्वान्नविपर्ययादिरूपतेत्याह दशमोऽस्मीति अस्य दशमस्य त्वमेवदशमोऽसीतिवाक्यात्परिगणनादिलक्षणविचारसहितादुत्पन्नाहंदशमोऽस्मीतिबुद्धिर्नविहन्यतेनकेनापि ज्ञानेनबाध्यते परिगणनक्रियायांचनवानामादिमध्यावसानेषु स्वपरिगणनेप्यहंदशमोनवेतिसंशयश्चनभवेदतः सादृढापरोक्षरूपेत्यर्थः ६० तत्सर्वंदार्ष्टांतिके योजयति

दशमोऽस्मीवाक्योत्थानधीरस्यविहन्यते आदिमध्यावसानेषुननवत्वस्यसंशयः ६० सदे
वेत्यादिवाक्येनब्रह्मसत्यंपरोक्षतः गृहीत्वातत्त्वमस्यादिवाक्याद्व्यक्तिंसमुल्लिखेत् ६१ आ
दिमध्यावसानेषु स्वस्यब्रह्मत्वधीरियम् नैवव्यभिचरेत्तस्मादापरोक्ष्यंप्रतिष्ठितम् ६२ ॥

सदेवेत्यादिना सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमित्यादिवाक्येनब्रह्मसद्भावंप्रथमंनिश्चित्यतस्यजीवरूपेणप्रवेशादियुक्तिपर्यालोचनयाप्रत्यग्रूपत्वंसंभाव्यतत्त्वमसीत्यादिनावाक्येनाद्वितीयब्रह्मरूपमात्मानमहंब्रह्मास्मीतिसाक्षात्कुर्यादतइयमात्मनोब्रह्मत्वबुद्धिः पंचानांकोशानां आदिमध्यावसानेष्वात्मनोऽन्यवसरेपिनैवान्यथाभवेत्ततोऽस्याद्दृढापरोक्षज्ञानत्वंसुस्थितमित्यर्थः ६१ ॥ ६२ ॥ श्रीः श्रीः

अपरोक्षत्वेनग्रहणयोग्यविषयंपरोक्षज्ञानंभ्रमोनभवतीत्येतद्दृष्टांतप्रदर्शनेनापिद्रढयति दशमोस्ती
ति दशमोस्तीत्याप्तवाक्यजन्यंज्ञानमभ्रांतंयथा ब्रह्मास्तीतिवाक्यजन्यंज्ञानमपितद्वदभ्रांतंस्यादज्ञान
कृतस्यासत्वावरणांशस्यसमत्वादितिभावः ५७ ननुवाक्यात्परोक्षज्ञानमुत्पद्यतेचेदपरोक्षज्ञानंकु
तोजायतइत्याशंक्यविचारसहिताद्वाक्यादेवेत्याह आत्माब्रह्मेतीति अयमात्माब्रह्मेति महावाक्या

दशमोस्तीत्यविभ्रांतंपरोक्षज्ञानमीक्षते ब्रह्मास्तीत्यपितद्वत्स्यादज्ञानावरणंसमम् ५७
आत्माब्रह्मेतिवाक्यार्थेनिःशेषेणविचारिते व्यक्तिरुल्लिख्यतेयद्वद्दशमस्त्वमसीत्यतः ५८
दशमःकइतिप्रश्नेत्वमेवेतिनिराकृते गणयित्वास्वेनसहस्वमेवदशमंस्मरेत् ५९ ॥

र्थेसम्यग्विचार्यमाणेपूर्वमस्तीतिपरोक्षतयाऽवगतस्यब्रह्मणःप्रत्यगभिन्नत्वंसाक्षात्क्रियते तत्र
दृष्टांतः यद्वदिति दशमस्त्वमसीत्यतोवाक्यादात्मनिदशमत्वंयथासाक्षात्क्रियतेतद्वदित्यर्थः ५८
विचारसहकृतेनवाक्येनापरोक्षज्ञानोत्पत्तिप्रकारंतावद्दृष्टांतेनदर्शयति दशमइति त्वयाऽस्तीतिनि
रूपितोदशमःकइति ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

तृतीयेनिराकरोति अपरोक्षत्वेति अपरोक्षत्वेनग्रहणयोग्यस्यप्रत्यगभिन्नब्रह्मविषयस्यपरोक्षज्ञा
नस्यभ्रमत्वेनसंभवति कुतइत्यतआह परोक्षमिति ब्रह्मपरोक्षमित्येवमाकारेणग्रहणाभावात् कुतस्त
र्हि तस्यपरोक्षत्वमित्याशंक्याह अर्थादिति इदंब्रह्मेत्येवंव्यक्तोल्लेखाभावसामर्थ्यात्परोक्षत्वसिद्धिरिति
भावः ४४ चरममाशंकते अंशाग्रहीतिरिति ब्रह्मांशग्रहणेऽपिप्रत्यगंशाग्रहणाद्भ्रमत्वमित्यर्थः एवं

अपरोक्षत्वयोग्यस्यनपरोक्षमतिर्भ्रमः परोक्षमित्यनुल्लेखादर्थात्पारोक्ष्यसंभवात् ५४
अंशाग्रहीतिर्भ्रान्तिश्चेद्घटमानेभ्रमोभवेत् निरंशस्यापिसांशत्वंव्यावर्त्यांशधिभेदतः ५५ अं
शत्वांशोनिवर्तेतपरोक्षज्ञानतस्ततः अभानांशनिवृत्तिःस्यादपरोक्षधियाकृता ५६ ॥

तर्हिघटादिज्ञानस्यापिभ्रमत्वप्रसंगइतिपरिहरति घटेति अंतएवयथानोऽग्रहणादितिभावः
ननुघटस्यसावयवत्वादंशाग्रहणेऽप्यंशाग्रहणंसंभवति ब्रह्मणस्तुनिरंशत्वात्कथमंशाग्रहणसंभ
वइत्याशंक्यव्यावर्त्यांशोपाधिनिमित्तकंसांशत्वंतस्यभविष्यतीत्याह निरंशस्येति ५५ तौकौव्याव
र्त्यांशावित्याकांक्षायामाह असत्वांशइति ५६ ॥ श्रीः ॥श्रीः ॥ श्रीः ॥ श्रीरामः ॥

भवतु द्वैविध्यमेतावता परोक्षज्ञानविषयत्वे किमायातमित्याशंक्य विषयस्वप्रकाशत्वं परोक्षज्ञानविषयत्वे विरोधि न भवतीत्याह परोक्षेति अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेपि विषयस्य ब्रह्मणः स्वप्रकाशतास्त्येव तत्रोपपत्तिमाह ब्रह्मेति ५० प्रत्यगभिन्नब्रह्मगोचरस्य ज्ञानस्य कुतः परोक्षत्वमित्याशंक्य प्रत्यगंशाग्रहणादित्याह अहं ब्रह्मेति नन्विदं भ्रांतमित्याशंक्यास्य भ्रांतत्वे किं बाध्य

परोक्षज्ञानकालेपि विषयस्वप्रकाशता समा ब्रह्म स्वप्रकाशमस्तीत्येवंविबोधनात् ५०
अहं ब्रह्मेत्यनुल्लिख्य ब्रह्मास्तीत्येवमुल्लिखेत् परोक्षज्ञानमेतन्न भ्रांतं बाधानिरूपणात्
५१ ब्रह्म नास्तीति मानं चेत्स्याद्बाधेत तदा ध्रुवम् न चैवं प्रबलं मानं पश्यामोतो न बाध्यते ५२
व्यक्त्यनुल्लेखमात्रेण भ्रमत्वे सर्वधीरपि भ्रांतिः स्याद्व्यक्त्यनुल्लेखात्सामान्योल्लेखदर्शनात्
५३

त्यादुत व्यक्त्यनुल्लेखाद्वा ऽऽ परोक्ष्येणाग्रहणायोग्यस्यापारोक्ष्येणाग्रहणाद्ब्रह्मांशाग्रहणादिति चतुर्द्धा विकल्प्य प्रथमं प्रत्याह एतन्नेति ५१ चतुर्थहेतुं विवृणोति ब्रह्म नास्तीति ५२ द्वितीयमतिप्रसंगेन दूषयति व्यक्त्यनुल्लेखेति अयं स्वर्ग इत्येवमाकारेणाग्रहणाभावात्किंतु स्वर्गोस्तीत्येवं सामान्याकारेण प्रतीतेः स्वर्गबुद्धेरपि भ्रमत्वप्रसंग इत्यर्थः ५३ ॥ श्रीः

नन्वात्मानंचेद्विजानीयादितिमंत्रव्याख्यानेप्रवृत्तत्वाद्विहामध्येऽज्ञानाद्यवस्थासप्तकनिरूपणंप्रकृ
तासंगतमित्याशंक्यात्मानंचेद्विजानीयादित्यस्याःश्रुतेस्तात्पर्यनिरूपणाशेषत्वेनाभिहितत्वान्नप्रकृता
संगतमित्यभिप्रेत्यश्रुतितात्पर्यमाह अपरोक्षेति चिदाभासनिष्ठंयदवस्थासप्तकमस्ति तत्रापरो
क्षज्ञानशोकनिवृत्तिलक्षणमवस्थाद्वयंप्रतिपादयितुमयंमंत्रःप्रवृत्तइत्यभिप्रायः ४८ अयमित्यप

अपरोक्षज्ञानशोकनिवृत्त्याख्येउभेइमे अवस्थेजीवगेब्रूतआत्मानंचेदितिश्रुतिः ४८
अयमित्यपरोक्षत्वमुक्तंतद्द्विविधंभवेत् विषयस्वप्रकाशत्वाद्धियाप्येवंतदीक्षणात् ४९

रोक्षत्वमित्यत्रायमितिपदेनात्मनोऽपरोक्षत्वमुच्यतेइत्युक्तंतथासत्यपरोक्षज्ञानविषयत्वमेवस्या
न्नपरोक्षज्ञानविषयत्वमित्याशंक्यतदुपपादनायापरोक्षज्ञानंविभजते अयमिति द्वैविध्येकारण
माह विषयेति विषयस्यचिद्रूपस्यात्मनःस्वप्रकाशत्वात्स्वव्यवहारेसाधनांतरनिरपेक्षत्वात् धिया
बुद्ध्याएवंस्वप्रकाशत्वेनतदीक्षणात् तस्यविषयस्यात्मनोऽवलोकनाच्चेत्यर्थः ॥ ४९ ॥ श्रीः

कस्यांशकेननिवृत्तिरित्यपेक्षायामुभयंविभज्यदर्शयतिपरोक्षज्ञानतइति कूटस्थोस्तीत्येवंरूपात्परो
क्षज्ञानादज्ञानस्यासत्त्वावरणकारणत्वंनिवर्तते कूटस्थोस्मीत्यपरोक्षज्ञानेनतु कूटस्थोनभातीत्येवं
रूपावरणकारणत्वंविनिवर्तते ४५ इदानींज्ञानस्यफलरूपावस्थाद्वयेप्रथमावस्थामाह अभानेति

परोक्षज्ञानतोनश्येदसत्त्वावृतिहेतुता अपरोक्षज्ञाननाश्याह्यभानावृतिहेतुता ४५ अ
भानावरणेनष्टेजीवत्वारोपसंक्षयात् कर्तृत्वाद्यखिलःशोकःसंसाराख्योनिवर्त्तते ४६
निवृत्तेसर्वसंसारेनित्यमुक्तत्वभासनात् निरंकुशाभवेत्तृप्तिःपुनःशोकासमुद्भवात् ४७ ॥

अभानावरणेनिवृत्तेभ्रांत्याप्रतीयमानस्यजीवस्यापिनिवृत्तत्वात्तन्निमित्तकःकर्तृत्वादिलक्षणःसंसा
राख्यःशोकःसर्वोपिनिवर्ततइत्यर्थः ४६ एवंशोकापगमरूपामवस्थांप्रदर्श्यनिरंकुशतृप्तिलक्षणां
द्वितीयांदर्शयति निवृत्तइति ४७ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

एवं तर्हि ज्ञानावरणयोरपि जीवाश्रितत्वेनानुभूयमानत्वाज्जीवावस्थात्वमेवेति परिहरति तर्हीति मद्दृ
ष्टितो ममानुभवेनेत्यर्थः ४२ ननु तर्हि ज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्य तद्विवक्षां दर्शय
ति अज्ञानस्येति ब्रह्मणोऽज्ञानाधिष्ठानत्वविवक्षयात दाश्रयत्वमुक्तमित्यर्थः भवद्भिस्तर्हि किं विवक्ष
याजीवावस्थात्वमुक्तमित्याशंक्य स्वविवक्षां दर्शयति जीवावस्थात्वमिति ४३ एवं बंधहेतुमवस्थात्र

तर्हि सोऽहं ब्रह्मसत्त्वभाने मद्दृष्टितो न हि इति पूर्वेऽवस्थेवभासेते जीवगे खलु ४२ अज्ञान
स्याश्रयो ब्रह्मेत्यधिष्ठानतया जगुः जीवावस्थात्वमज्ञानाभिमानित्वादवादिषम् ४३ ज्ञा
नद्वयेन नष्टेऽस्मिन्नज्ञाने तत्कृतावृतीः न भाति नास्ति चेत्येषा द्विविधापि विनश्यति ४४॥

यं प्रदर्श्यावशिष्टास्ववस्थासु मध्ये पूर्वोक्ताज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं दर्शयति
ज्ञानद्वयेनेति परोक्षत्वापरोक्षत्वलक्षणेन ज्ञानद्वयेनावरणकारणेऽज्ञाने नष्टे सति तत्कृतावृतीरिति तेना
ज्ञानेनोत्पादितं न भाति नास्तीति व्यवहारकारणं द्विविधमप्यावरणं कारणाभावान्नश्यति ४४

ननु अवस्थावतो विक्षेपस्येदानीमभावात्तदवस्थात्वाभिधानमनुपपन्नमित्याशंक्य विक्षेपाभा
वेपि तत्संस्कारस्येदानीं सत्वाद्विक्षेपावस्थात्वाभिधानं न विरुध्यत इत्याह विक्षेपेति ततः कारणात्त
योस्तदवस्थात्ववर्णनमविरुद्धमिति योजना ३९ नन्वप्रसिद्धसंस्काराभ्युपगमद्वारा विक्षेपावस्था
त्ववर्णनाद्वरमधिष्ठानतया प्रसिद्धब्रह्मावस्थात्ववर्णनमित्याशंक्यातिप्रसंगान्मैवमिति परिहर

विक्षेपोस्य निवृत्तः पूर्वमपि विक्षेपसंस्कृतिः अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः ३९ ब्रह्म
ण्यारोपितत्वेन ब्रह्मावस्थे इमे इति न शंकनीयं सर्वासां ब्रह्मण्येवाधिरोपणात् ४० सं
सार्यहं विबुद्धोहं निःशोकस्तुष्ट इत्यपि जीवगा उत्तरावस्था भान्ति न ब्रह्मगा यदि ४१ ॥

ति ब्रह्मणीति ४० ननु ब्रह्मण्यारोपितत्वाविशेषेपि विक्षेपोत्पत्त्युत्तरकालभाविनीनां संसारि
त्वाद्यवस्थानां जीवाश्रितत्वेनानुभूयमानत्वान्न ब्रह्मावस्थात्वमिति शंकते संसार्यहमिति सं
सारी कर्तृत्वादिधर्मवान् विबुद्धस्तत्त्वसाक्षात्कारवान् निःशोकः शोकरहितः तुष्टो वक्ष्यमाणकृतकृत्यत्वा
दिजनितसंतोषवानहमस्मीत्युत्तरावस्था जीवगा जीवाश्रिता भान्ति न ब्रह्माश्रिता इत्यर्थः ४१ ॥

आवृत्तिकार्यं दर्शयति अमार्गेणेति शास्त्रोक्तप्रकारमतिलंघ्य केवलं तर्केण विचार्यानंतरं कूटस्थो नास्ति न भातीत्येवंरूपो विपरीतव्यवहार आवृत्तिकार्यमित्यर्थः ३६ विक्षेपस्य स्वरूपं तत्कार्यं च दर्शयति देहद्वयेति स्थूलसूक्ष्माख्यशरीरद्वयसहितश्चिदाभास एव विक्षेपः बंधको बंधहेतुः संसाराख्यः कर्तृत्वाद्यखिलः शोकोऽस्य चिदाभासस्य कार्यमिति शेषः कर्तृत्वादिइत्यादिशब्देन प्रमातृत्वादयो गृह्यं

अमार्गेण विचार्यापि नास्ति नो भाति चेत्यसौ विपरीतव्यवहृतिरावृत्तेः कार्यमिष्यते ३६
देहद्वयचिदाभासरूपो विक्षेप ईरितः कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बंधकः ३७
अज्ञानमावृतिश्चैते विक्षेपात्प्राक्प्रसिध्यतः यद्यप्यथाप्यवस्थेते विक्षेपस्यैव नात्मनः ३८

ते ३७ ननु सुषुप्त्यवस्थायाश्चिदाभासस्येत्युक्तमनुपपन्नम् अज्ञानावरणयोर्विक्षेपोत्पत्तेः पुरास्थितत्वाच्चिदाभासस्य ~~उक्तमनुपप~~ च विक्षेपांतःपातित्वात्तदवस्थात्वानुपपत्तेरित्याशंक्याह अज्ञानमिति अनयोर्विक्षेपात्पुरास्थितत्वेपि नात्मावस्थात्वं तस्यासंगत्वेनावस्थावत्त्वानुपपत्तेरतः परिशेषाच्चिदाभासवस्थात्वमेव तयोर्वक्तव्यमिति भावः ॥ ३८ ॥ श्रीः श्रीः श्रीः श्रीः

पंचदशी
५७

दार्ष्टांतिकेप्युक्तमवस्थासप्तकमनुवदति अज्ञानमिति ३३ ननूक्तावस्थासप्तकस्यात्मधर्मत्वांगी
कारे तस्य कूटस्थत्वं व्याहन्येतेत्याशंक्यैताः सप्तावस्थाश्चिदाभासस्यैव न कूटस्थस्येत्याह सप्तावस्था
इति सर्वावस्थावधारणमिति न्यायेन चिदाभासस्यैव न कूटस्थस्येत्यवगम्यते आसामत्रोपन्या
सोव्यर्थेत्याशंक्य न वृथा बंधमोक्षकारित्वद्योतनफलत्वादुपन्यासस्येत्यभिप्रायेणाह तास्विमावि

अज्ञानमावृतिस्तद्वद्विक्षेपश्च परोक्षधीः अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकु
शा ३३ सप्तावस्था इमाः संति चिदाभासस्य तास्विमौ बंधमोक्षौ स्थितौ तत्र तिस्रो बं
धकृताः स्मृताः ३४ न जानामीत्युदासीनव्यवहारस्य कारणम् विचारप्रागभा
वेन युक्तमज्ञानमीरितम् ३५

ति किमासां सप्तानामप्यविशेषेण बंधमोक्षकारित्वं नेत्या
ह तत्र तिस्र इति अज्ञानावरणविक्षेपरूपास्तिस्र इत्यर्थः ३४ आसां बंधकारित्वदर्शनाय तिसृ
णामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टीचिकीर्षुरज्ञानस्य स्वरूपं तावद्दर्शयति न जानामी
ति आत्मतत्त्वविचारस्य प्रागभावसहितमुदासीनव्यवहारस्य कारणं न जानामि इत्यनुभूयमा
नमज्ञानमीरितमित्यर्थः ॥ ३५ ॥ श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः

५७
श्रीः

तत्रात्मन्यसो [illegible] दिक्रमेराद [illegible] संसारासक्तेत्यादिना अयं चिदाभासो विषयसंपादनादिव्यासक्त
चित्तः सन्कदाचन श्रुतिविचारात्पूर्वं कदाचित्स्वतत्त्वं स्वस्य निजं रूपं स्वप्रकाशचिद्रूपं कूटस्थं प्रत्यगात्मानं नै
व वेत्ति न जानाति इति यत्तदज्ञानं चिदात्मविषये प्रसंगे जाते कूटस्थो नास्ति न भातीति मत्वा ब्रूते इदम
ज्ञानकार्यमावरणम् कूटस्थासत्त्वाभानाभिधानवाक्कर्तृत्वादिकमात्मन्यारोपयति अस्यारोपस्येह

संसारासक्तचित्तः संश्चिदाभासः कदाचन स्वयंप्रकाशकूटस्थं स्वतत्त्वं नैव वेत्त्ययम् २९ ॥
न भाति नास्ति कूटस्थ इति वक्ति प्रसंगतः कर्ता भोक्ताहमस्मीति विक्षेपं प्रतिपद्यते ३० ॥
अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्तया पश्चात्कूटस्थ एवास्मीत्येवं वेत्ति विचारतः ३१॥
कर्ता भोक्तेत्येवमादिशोकजातं प्रमुंचति कृत्यं कृतं प्रापणीयं प्राप्तमित्येव तुष्यति ३२ ॥

तुहर्द्वयुतश्चिदाभासो विक्षेपः परेणाबोधितः कूटस्थोऽस्तीति जानातीतीदं परोक्षज्ञानम् श्रवणा
दिपरिपाकवशात्कूटस्थोऽहमेवास्मीति जानातीदमपरोक्षज्ञानम् कूटस्थासंगात्मज्ञानानंतरम् कर्तृत्वा
दिशोकजातं त्यजतीति यदयं शोकापगमः कृत्यं कर्तव्यजातं कृतं निष्पादितं प्रापणीयं फलजातं प्राप्तं ल
ब्धमिति तुष्यतीयं तृप्तिरित्यर्थः ॥ श्रीः ॥ २९ ॥ श्रीः ॥ ३० ॥ श्रीः ॥ ३१ ॥ ३२

पंचदशी
पं
५६
५

अज्ञानस्यैवकार्यविशेषंविक्षेपंदर्शयति· नघामिति २५ दशमस्यासत्वांशनिवर्तकं परोक्षज्ञानमाह
नमृतइति २६ तस्यैवाभानांशनिवर्तकमपरोक्षज्ञानंदर्शयति स्वेनपरिगणितैर्नवभिःसह
स्वात्मानंगणयित्वात्वमेवदशमोसीतिप्रदर्शितोदशमोस्मीत्यपरोक्षतयाज्ञात्वाहर्षंप्राप्नोति

नघांममारदशमइतिशोचन्प्ररोदिति अज्ञानकृतविक्षेपंरोदनादिंविदुर्बुधाः २५
नमृतोदशमोस्तीतिश्रुत्वाप्तवचनंतदा परोक्षत्वेनदशमंवेत्तिस्वर्गादिलोकवत् २६
त्वमेवदशमोसीतिगणयित्वाप्रदर्शितः अपरोक्षतयाज्ञात्वाहृष्यत्येवनरोदिति २७
अज्ञानावृतिविक्षेपद्विविधज्ञानतृप्तयः शोकापगमइत्येतेयोजनीयाश्चिदात्मनि २८

रोदनंत्यजति २७ एवंदृष्टांतभूतेदशमेप्रदर्शितमवस्थासप्तकमन्त्यदार्ष्टांतिके आत्मन्यपि
तेऽत्रयोजनीयमित्याह अज्ञानावृतीति अज्ञानंचआवृतिश्चविक्षेपश्चद्विविधज्ञानेचतृ
प्तिश्चेतिद्वंद्वसमासः ॥ २८ ॥ श्रीरामकृष्णगोपालहरये श्रीहरयेनमः श्रीराम ॥

५६
श्रीः

नन्वात्मनः स[illegible]काशचिद्रूप[illegible] नित्यापरोक्षस्याभ्युपगमेयमिति प[illegible]ोगस्याभिप्रायवर्णनां गीद ,ख
लादागतमा[illegible]त्मनः स्परोक्षविषय[illegible]मपरोक्षविषयत्वं श्रुत्युक्ते ज्ञानाज्ञानाश्रयविषयत्वं चानुपपन्नमित्या
शंक्य दशम इव सर्वमुपपत्स्यत इत्याह परोक्षमिति परोक्षमपरोक्षं चेत्येकं युगलं ज्ञानमज्ञानमित्यप
रं इदं द्वयं नित्यापरोक्षरूपेप्यात्मनि दशम इव स्यादित्यर्थः २२ दृष्टान्तं व्युत्पादयति नवसंख्येति परि

परोक्षमपरोक्षं च ज्ञानमज्ञानमित्यदः नित्यापरोक्षरूपेपि द्वयं स्याद्दशमे यथा २२
नवसंख्याहृतज्ञानो दशमो विभ्रमात्तदा न वेत्ति दशमोस्मीति वीक्षमाणोपि तान्नव २३
न भाति नास्ति दशम इति स्वं दशमं तदा मत्वा वक्ति तदाज्ञानकृतमावरणं विदुः २४ ॥

गणनीयपुरुषनिष्ठया नवसंख्ययाऽपहृतविवेकज्ञानो दशमस्तदा तान्परिगणनीयान्नवसंख्या
कान्वीक्ष्यमाणोपि सम्यक्पश्यन्नपि भ्रान्त्या गणनाकर्तारं स्वयमात्मानं दशमोहमस्मीति न वेत्ती
त्यर्थः २३ एवं दशमेऽज्ञानं प्रदर्श्य तत्कार्यमावरणं दर्शयति न भातीति तदा दशमः स्वं दशमं
संतं दशमो न भाति नास्तीति मत्वा वक्त्यस्य व्यवहारस्य यत्कारणं दर्शयति दज्ञानकृतमज्ञानकार्यमा
वरणं विदुर्बुधा इति शेषः ॥ २४ ॥ श्रीरामकृष्णगोपालहरे श्रीहरये नमः श्रीरामः ॥

ईदृशस्यैवबोधस्यमोक्षसाधनत्वे आचार्यवाक्यंसंवादयति देहात्मेति अहंमनुष्यइतिदेहात्मवि
षयोदृढप्रत्ययोयथैवंप्रत्यगात्मन्येवदेहएवात्मत्वज्ञानापबाधनेनब्रह्माहमस्मीतिज्ञानंयस्यजाय
तेसविद्वानिच्छन्नपिमोक्षेच्छारहितोपिमुच्यते संसारहेत्वोरज्ञानस्यज्ञानेनापबाधितत्वादिति
भावः २० अयमितिपदप्रयोगस्याभिप्रायांतरंशंकते अयमिति यथाअयंघटइत्यादिप्र

देहात्मज्ञानवज्ज्ञानंदेहात्मज्ञानबाधकम् आत्मन्येवभवेद्यस्यसनेच्छन्नपिमुच्यते
२० अयमित्यपरोक्षत्वमुच्यतेचेत्तदुच्यताम् स्वयंप्रकाशचैतन्यमपरोक्षंसदायतः २१

योगेष्विदमानिर्दिष्टस्यवस्तुनः आपरोक्ष्यंदृष्टंतथायमस्मीत्यत्रापीतिभावः तदप्यस्माक
मिष्टमेवेत्याह तदुच्यतामिति कुतइत्यतआह स्वयमिति साधनांतरनिरपेक्षतयावभासमानंचै
तन्यंव्यवधापकाभावान्नित्यपरोक्षमित्यस्माभिरभ्युपगमत्वाददिमर्थः ॥ २१ ॥ श्रीः

उपपादितमर्थमुपसंहरति तस्मादिति यस्मात्कूटस्थ एव चिदाभासस्य निजं स्वरूपं तस्मात्पुरुषशब्दवाच्यः कूटस्थेन सहितश्चिदाभासस्तं कूटस्थं मिथ्याभूतात्स्वस्माद्विविच्य लक्षणया कूटस्थोऽहमस्मीत्यवगन्तुं शक्नोतीत्यभिप्रायेण श्रुतिरस्मीत्युक्तवतीत्यर्थः १६ एवं पुरुषोऽस्मीति पदद्वयप्रयो

तस्मादाभासपुरुषः सकूटस्थो विविच्यताम् कूटस्थोऽस्मीति विज्ञातुमर्हतीत्यभ्यधाच्छ्रुतिः १८ असंदिग्धाविपर्यस्तबोधो देहात्मनीष्यते तद्वदत्रेति निर्णेतुमयमित्यभिधीयते १९

गाभिप्रायमभिधायायमितिप्रयोगाभिप्रायमाह असंदिग्धेति लौकिकानां प्रसिद्धे देहरूपे आत्मनि संशयविपर्ययरहितोऽयमस्मीति बोधो यद्वदुपलभ्यते अत्र प्रत्यगात्मनि विषये तद्वत्त्याविधंसानं मुक्तिसिद्ध्ये संपाद्यमिति निर्णेतुमयमित्यभिधीयते श्रुत्येति शेषः ॥ १९ ॥ श्रीरामकृष्णगोपाल हरे श्रीहरये नमः ॥

तस्य कूटस्थादन्यत्वमेव सिद्धमिति परिहरति नायमिति तत्रोपपत्तिमाह आभासस्येति यथादर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थमुखमेव तत्त्वं तद्वदिति भावः १५ ननु चिदाभासस्य मिथ्यात्वे तदाश्रितं कूटस्थोस्मीति ज्ञानमपि मिथ्या स्यादिति शंकते कूटस्थ इति कूटस्थस्वरूपातिरिक्तस्य ज्ञानस्यापि मिथ्यात्वाभ्युपगमात् तन्मिथ्यात्वमस्माकमिष्टमेवेति परिहरति नेतीति उक्तमर्थं दृ

नायं दोषश्चिदाभासः कूटस्थैकस्वभाववान् आभासत्वस्य मिथ्यात्वात्कूटस्थत्वावशेष
णात् १५ कूटस्थोस्मीति बोधोपि मिथ्या चेन्नेति को वदेत् नहि सत्यतयाभीष्टं रज्जुसर्पवि
सर्पणम् १६ तादृशेनापि बोधेन संसारो विनिवर्तते यक्षानुरूपो हि वलि रित्याहुर्लौकि
का जनाः १७

ष्टांतेन स्पष्टयति नहीति रज्ज्वां कल्पितस्य सर्पस्य गत्यादिकमपि प्रतीयमानं वास्तवं नांगीक्रियते यथा तद्वदिति भावः १६ ज्ञानस्य मिथ्यात्वे तेन संसारनिवृत्तिर्न स्यादित्याशंक्य निवर्त्तस्य संसारस्यापि तथात्वात् तन्निवृत्तिरुपपद्यते स्वाप्नव्याघ्रदर्शनेन निद्रानिवृत्तिवदित्यभिप्रायेणाह तादृशेनापीति अत्र यादृशो यक्षस्तादृशो वलिरिति लौकिकीं गाथां संदर्शयति यक्षानुरूपो हीति १७

पर्यायेणाप्रयुंक्ते इत्युक्तमेवार्थं प्रपंचयति प्रतिपत्तिसौकर्याय श्लोकद्वये लौकिकेत्यादिना ।बुद्धो विद्वानहं गच्छामीत्यादिके लौकिके व्यवहारे कूटस्थाच्चिदाभासं विविच्य तमेवाहंशब्देन विवक्षति वक्तुमिच्छति १२ अयं बुद्धः शास्त्रीयदृष्टितो वेदांतश्रवणजनितज्ञानेन केवले चिदाभासाद्विविक्ते कूटस्थेऽसंगोहं चिदात्माहमिति लक्षणयाऽहंशब्दं प्रयुंक्ते अतो लक्षणयाहंशब्दार्थत्वेन

लौकिके व्यवहारेऽहं गच्छामीत्यादिके बुधः विविच्यैव चिदाभासं कूटस्थं तं विवक्षति १२
असंगोहं चिदात्माहमिति शास्त्रीयदृष्टितः अहंशब्दं प्रयुंक्तेऽयं कूटस्थे केवले बुधः ॥ १३ ॥
ज्ञानिताज्ञानिते त्वात्माभासस्यैव न चात्मनः तथा च कथमाभासः कूटस्थोऽस्मीति बुध्यताम्

अहंप्रत्ययविषयत्वसंभावादसंगोहमस्मीति ज्ञानमुपपद्यते इत्यभिप्रायः १३ ननु पृथगाभासकूटस्थयोरहंशब्दस्य मुख्यार्थाविवेके तयोर्मध्ये कूटस्थः किमज्ञाननिवृत्तयेऽसंगोस्मीति जानाति किं वा चिदाभासः न तावत्कूटस्थः तस्यासंगचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेरतश्चिदाभासस्य ज्ञानित्वादिकं वक्तव्यं तथा सति कूटस्थादन्यश्चिदाभासोऽहं कूटस्थोस्मीति न ज्ञातुमर्हतीति शंकते ज्ञानितेति १४ श्रीः

पंचदशी

५३

कीदृशोमुख्योर्थइत्याकांक्षायांतंदर्शयति अन्योन्येति कूटस्थचिदाभासयोःस्वरूपमन्योन्याध्यासेनैक्यंप्राप्तमहंशब्दस्यवाच्यत्वेनमुख्योर्थोभवति अस्यकुतोमुख्यत्वमतआह तत्रमूढाइति यतइत्याध्याहारः तत्रतस्मिन्नविविक्तेकूटस्थचिदाभासयोःस्वरूपेयतोविवेकज्ञानशून्यैःसर्वैरप्यहंशब्दःप्रयुज्यतेऽतोस्यमुख्यत्वमित्यर्थः १० इदानीममुख्यार्थौद्वौदर्शयति पृथगिति आभासकूटस्थौप्रत्येकमहंशब्दार्थत्वेनयदाविवक्षितौतदामुख्यार्थौभवतः अनयोरमुख्यत्वेका

अन्योन्याध्यासरूपेणकूटस्थाभासयोर्वपुः एकीभूयभवेन्मुख्यस्तत्रमूढाःप्रयुंजते १०
पृथगाभासकूटस्थावमुख्यौतत्रतत्त्ववित् पर्यायेणप्रयुंक्तेहंशब्दंलोकेचवैदिके ॥ ११

रणमाह तत्रेति अत्रापियतइत्यध्याहारः तत्त्वविद्यतस्तत्रतयोःकूटस्थचिदाभासयोरहंशब्दंलोकेलौकिकेवैदिकेचव्यवहारेपर्यायेणप्रयुंक्तेइतियोजना अयंभावः चिदाभासकूटस्थयोरविविक्तरूपस्यसार्वजनीनव्यवहारविषयत्वान्मुख्यार्थत्वं विविक्तरूपत्वस्यतुकतिपयजनैः म कदाचिदेवव्यवह्रियमाणत्वादमुख्यार्थत्वमिति ॥ ११ ॥ श्रीरामकृष्णगोपालहरे श्रीः

५३

श्रीः

तमोंशस्येति यदा पुनस्तमोंऽशस्य देहद्वयसहितस्य चिदाभासस्य तिरस्कारं मिथ्यात्वज्ञानेन
अनादरणात् अधिष्ठानप्रधानं प्रधानता अधिष्ठानभूतस्यैव कूटस्थस्य स्वरूपत्वं जीवेन स्वीक्रि-
यते तदाहं चिदात्मासंगश्चास्मीति बुध्यते न जानाति ८ नन्वधिष्ठानचैतन्यस्य जीवस्वरूप-
त्वस्वीकारे चिदात्माहमसंगोस्मीति बुध्यते इति यदुक्तं तदनुपपन्नं स्यात् असंगचिद्रूपस्य

तमोंशस्य तिरस्कारादधिष्ठानप्रधानता यदा तदा चिदात्माहमसंगोस्मीति बुध्यते ८
नासंगेऽहंकृतिर्युक्ता कथमस्मीति चेच्छृणु एकोमुख्योद्वावमुख्यावित्यर्थस्त्रिविधोहमः ९

कूटस्थस्याहंप्रत्ययविषयत्वाभावादित्याशंकते नासंग इति असंगे चिदात्मन्यविषयेहंप्र-
त्ययो न युज्यते यतोऽतः कथमस्मीति जानीयान्नैकथमपीत्यर्थः मुख्ययावृत्त्याहंप्रत्ययवि-
षयत्वाभावेपि लक्षणया तदस्मीति विवक्षुरहंशब्दार्थं तावद्विभजते एक इति अहमो
अहंशब्दस्येत्यर्थः ॥ ९ ॥ श्रीरामकृष्णगोपाल हरे श्रीकृष्णमाधव हरे श्रीरामः

पंचदशी
५२

नन्वत्रपुरुषशब्देनकेवलचिदाभासरूपोजीवएवोच्यतेकिमनेनकूटस्थचैतन्येनाधिष्ठानभू
तेनेत्याशंक्यतस्यमोक्षाद्यन्वयित्वसिद्धयेतदपिस्वीकर्तव्यमित्याह साधिष्ठानइति साधि
ष्ठानोऽधिष्ठानेनकूटस्थचैतन्येनसहितोजीवोविमोक्षादौविमोक्षस्वर्गादिसाधनानुष्ठा
नेऽधिक्रियतेऽधिकारीभवति नतुकेवलश्चिदाभासःकुतइत्यतआह निरधिष्ठानेति

साधिष्ठानोविमोक्षादौजीवोधिक्रियतेनतु केवलोनिरधिष्ठानविभ्रांतेःक्वाप्यसिद्धि
तः ६ अधिष्ठानांशसंयुक्तंभ्रमांशमवलंबते यदातदाहंसंसारीत्येवंजीवोभिम
न्यते ७ श्रीरामः

अधिष्ठानरहितस्यारोपस्यलोकेऽदृष्टत्वादितिभावः ६ इदानींसाधिष्ठानस्यैवतस्य
संसारघन्वयित्वंश्लोकद्वयेनविभज्यदर्शयति अधिष्ठानांशसंयुक्तमिति जीवोयदा
धिष्ठानांशसंयुक्तंकूटस्थसहितंभ्रमांशंचिदाभासोपेतंशरीरद्वयमवलंब्यते स्वस्वरूप
त्वेनस्वीकरोति तदाहंसंसारीत्येवमभिमन्यते ७ श्री[illegible]सगोपालहरे श्रीः

५२
श्रीः

एवंपुरुषशब्दार्थयोर्विवोधोर्थयोर्भीनींस्पष्टमभिधायेदानींकूटस्थशब्दार्थमाह भ्रमाधिष्ठानेति
पःकूटस्थासंगचिद्वपुरविकार्यसंगचित्स्वरूपः भ्रमाधिष्ठानभूतात्मा भ्रमस्य देहेंद्रियाध्यासस्या
धिष्ठानभूतोऽधिष्ठानत्वेनवर्त्तमानः परमात्मास्ति सोऽसंगरागवान्योन्याध्यासतः अन्योन्यस्मि
न्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यास्येतराविवेकेनेत्याचार्यैर्निरूपितेन तादात्म्याध्यासेना

भ्रमाधिष्ठानभूतात्मा कूटस्थासंगचिद्वपुः अन्योन्याध्यासतोऽसंगधीस्थजीवोऽत्र पूरुषः ५

संगधीस्थजीवः स्वेन पारमार्थिकसंबंधभूतायां बुद्धौ वर्त्तमानो जीवः सन्नत्रास्यांश्रुतौ पुरुष
इत्युच्यते स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति श्रुत्या पुरुषशब्दस्य व्युत्पादितत्वात्पुरुषस्यैव
पुरुषत्वात्पुरुष एव पूरुषः बुद्ध्यादिकल्पनाधिष्ठाने कूटस्थचैतन्यमेव बुद्धौ प्रतिबिंबितत्वे
न प्राप्तजीवभावः सन्पुरुषशब्देनोच्यते इत्यभिप्रायः ५ श्रीरामकृष्णगोपालहरे

तत्रकेनकिंपरिकल्पितमित्यतआह ईक्षणादिति तदैक्षतबहुस्यांप्रजायेयेतिश्रुतमीक्षणमादिर्यस्याः सेक्षणादिः अनेनजीवेनात्मनाऽनुप्रवेश्येतिश्रुतः प्रवेशोंतोयस्याः साप्रवेशांताईक्षणादिश्चासौप्रवेशांताचेतिपश्चात्कर्मधारयः सेयंसृष्टिरीश्वरेणकल्पिता जाग्रदादिर्यस्यसंसारस्यासौजाग्रदादिः विमोक्षोमुक्तिः अंतोयस्यसः विमोक्षांतः संसारोजीवेनकल्पितः तदभिमानित्वाज्जीवस्येत्यर्थः तेचजाग्रदादयः इत्थंश्रूयंते सएवमायापरिमोहितात्मा

ईक्षणादिप्रवेशांतासृष्टिरीशेनकल्पिता जाग्रदादिविमोक्षांतःसंसारोजीवकल्पितः ४

शरीरमास्थायकरोतिसर्वम् वस्त्रान्नपानादिविचित्रभोगैः सएवजाग्रत्परितृप्तिमेति स्वप्नेसजीवःसुखदुःखभोक्तास्वमाययाकल्पितविश्वलोके सुषुप्तिकालेसकलेविलीनेतमोभिभूतःसुखरूपमेति पुनश्चजन्मांतरकर्मयोगात्सएवजीवःस्वपितिप्रबुद्धः पुरत्रयेक्रीडतियश्चजीवस्ततस्तुजातंसकलंविचित्रम् जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचंयत्प्रकाशते तद्ब्रह्माहमितिज्ञात्वासर्वबन्धैःप्रमुच्यतइति ४ ॥ श्रीः ॥ ४ ॥ श्रीः ॥ ४ ॥

पदच्छेदःपदार्थोक्तिर्विग्रहोवाक्ययोजना आक्षेपस्यसमाधानंव्याख्यानंपंचलक्षणमि
तिव्याख्यानलक्षणस्योक्तत्वात् उरखइतिपदस्यार्थमभिधातुंतदुपोद्घातत्वेनस्वाशयंसंक्षि
प्यदर्शयति मायाभासेनेति प्रतिपाद्यमर्थंबुद्धौसंगृह्यतदर्थमर्थांतरवर्णनमुपोद्घातः
अत्रमायाशब्देनचिदानंदमयब्रह्मप्रतिबिंबसमन्विता सत्वरजस्तमोगुणात्मिकाजगदुपा
दानभूताप्रकृतिरुच्यते साचसत्वगुणस्यशुद्धिविशुद्धिभ्यांद्विधाभिद्यमानाक्रमेणमाया

मायाभासेनजीवेशौकरोतीतिश्रुतत्वतः कल्पितावेवजीवेशौताभ्यांसर्वंप्रकल्पितं ३

याविद्याचभवति तयोर्मायाऽविद्ययोःप्रतिबिंबितंब्रह्मचैतन्यमेवेश्वरोजीवश्चेत्युच्यते तदि
दंतत्वविवेकाख्यग्रंथेश्रीमद्विद्यारण्यगुरुभिर्निरूपितम् चिदानंदमयब्रह्मप्रतिबिंबसमन्वि
ता तमोरजःसत्वगुणाप्रकृतिर्द्विविधाचसासत्वविशुद्ध्यविशुद्धिभ्यांमायाविद्येचतेमते माया
बिंबोवशीकृत्यतांस्यात्सर्वज्ञईश्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा साकारणश
रीरंस्यादिति इममेवार्थंमनसिविधायजीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभव
तीतिश्रुतिरपिप्रवृत्ता अतोजीवेश्वरयोर्मायाकल्पितत्वमन्यत्कृत्स्नंजगत्ताभ्यामेवकल्पितम् ३

श्रीगणेशायनमः वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः १ नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियतेतृप्तिदीपस्यव्याख्यानंगुर्वनुग्रहात् २ तृप्तिदीपाख्यप्रकरणमारभमाणाःश्रीभारतीतीर्थगुरवःतस्यश्रुतिव्याख्यानरू

आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंचरेत् १ अस्याःश्रुतेरभिप्रायःसम्यगत्रविचार्यते जीवन्मुक्तस्ययातृप्तिः॥ सातेनविशदायते २

पत्वात्व्याख्यायांश्रुतिमादौपठति आत्मानंचेदिति १ इदानींचिकीर्षितग्रंथविचारंतत्फलंचदर्शयति अस्याइति अत्रतृप्तिदीपाख्येग्रंथेअस्या आत्मानंचेद्विजानीयादित्यादिकायाःश्रुतेःअभिप्रायःतात्पर्यंसम्यग्विचार्यते तेनाभिप्रायविचारेणजीवन्मुक्तस्यश्रुतिसिद्धायातृप्तिःसाविशदायतेस्पष्टीभवति २ श्रीः

सर्वगतत्वं च तत्सर्वसाक्षित्वमपि न वास्तवमित्याह अंतर्बहिर्वेति २२ तथा वस्तु बुधो जयेदित्येतत्प्रपंचयति
यद्यदिति तर्हि किं तस्य निजं रूपं इत्यत आह स्वत इति २३ अवाङ्मनसगोचरत्वे मुमुक्षुणा न ग्राह्येतेति शंक
ते रूपमिति अग्राह्यत्वमिष्टमेवेति नन्वात्मनो ग्राह्यत्वाभावे विचारेण विनष्टायां मायायां शिष्यते स्वयमि

अंतर्बहिर्वा सर्वं वा यं देशं परिकल्पयेत् बुद्धिस्तद्देशगः साक्षी तथा वस्तु बुधो ज
येत् २२ यद्यद्रूपादि कल्प्येत बुद्ध्या तत्तत्प्रकाशयेत् तस्य भवेत्साक्षी स्वतो वा
ग्बुद्ध्यगोचरः २३ रूपं तादृक्कमथाग्राह्यमिति चेन्नैवं ग्राह्यताम् ॥
सर्वग्रहोपसंशांतौ स्वयमेवावशिष्यते २४ ॥ श्रीः ॥

त्युक्तं परमात्मावशेषणं न सिद्ध्येदित्यत आह सर्वग्रहेति स्वात्मातिरिक्तस्य द्वैतस्य मिथ्यात्वनिश्चयेन तत्प्रती
त्युपशांतौ स्वात्मैव सत्यतयावशिष्यत इति भावः ॥ २४ ॥ श्रीरामकृष्णगोपालहरे श्रीः ॥

पंचदशी

१४९

स्व २

यद्यप्युक्तन्यायेन स्वात्मापरिशिष्यते तथापि न तावदेतस्या यत्किंचित्प्रमाणमपेक्षितमित्यत आह नतत्रेति तत्र हेतुमाह स्वप्रकाशेति नन्वात्मा प्रकाशतयास्वस्फूर्तौ मानं नापेक्षतां इति व्युत्पत्तिसिद्धये मानमपेक्षितमित्याशंक्य श्रुतिरेवात्र प्रमाणमित्याह तादृगिति २५ एवमुत्तमाधिकारिणः आत्मानुभवोपायमभिधाय

नतत्र मानापेक्षास्ति स्वप्रकाशस्वरूपतः तादृग्व्युत्पत्त्यपेक्षा चेच्छ्रुतिं
पठगुरोर्मुखात् २५ यदि सर्वग्रहत्यागोऽशक्यस्तर्हि धियंव्रज श
रणं तदधीनोंतर्बहिर्वैषोऽनुभूयताम् २६ इति नाटकदीपः ॥

मंदाधिकारिणस्तं दर्शयति यदि सर्वेति बुद्धिशरणत्वे किं फलमित्यत आह तदधीन इति बुद्ध्या यद्यत्परिकल्प्यते बाह्यमांतरं वा तस्य तस्य साक्षित्वेन तदधीनः परमात्मा तथैवानुभूयतामित्यर्थः २६ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता नाटकदीपव्याख्या समाप्ता ॥ श्रीः ॥ श्रीराम कृष्ण गोपाल हरे श्रीकेशव माधव कंसारे श्रीः

६

श्रीः

पंचदशी
१४८

दार्ष्टांतिकमाह निजस्थानेति १९ निजस्थानस्थित इत्यनेन किं बाह्यादिदेशस्थत्वमेवोच्यते नेत्याह न
बाह्य इति तत्र हेतुमाह बुद्धेरिति तर्हि किं विवक्षितमित्यत आह बुद्ध्यादीति आदिशब्देनेंद्रियादयो गृह्यंते
संशांतिशब्देन तत्तीत्सुपरतिर्विवक्षिता २० ननु सर्वव्यवहारोपरतौ देश एव नोपलभ्यते कुतस्तन्निष्ठत्वमुच्यत

निजस्थानस्थितः साक्षी बहिरंतर्गमागमौ अकुर्वन्बुद्धिचांचल्यात्करोतीव यथा तथा १९
न बाह्यो नांतरः साक्षी बुद्धेर्देशौ हि तावुभौ बुद्ध्याद्यशेषसंशांतौ यत्र भात्यस्ति तत्र सः २०
देशः कोपि न भासेत यदि तर्ह्यस्त्वदेशभाक् सर्वदेशप्रक्लृप्त्यैव सर्वगत्वं न तु स्वतः २१

इत्याशंक्यास्याभिप्रायमाविःकरोति देश इति देशादिकल्पनाधिष्ठानस्यास्यातिरिक्तदेशापेक्षा नास्तीति भावः
ननु देशाद्यभावे शास्त्रोक्तसर्वगतत्वसर्वसाक्षित्वादियुक्तिर्विरुध्येतेत्यत आह सर्वदेशेति स्वाभाविकमेव किं न स्यादि
त्यत आह न त्विति अद्वितीयत्वादसंगत्वाच्चेति भावः ॥ २१ ॥ श्रीः ॥ श्रीः ॥

५
श्रीः

ननुस्थिरस्यापीतस्यासाक्षीणबहिरंतःप्रकाशयेदितिअविकारिणःसतोबहिरंतरवभासकत्वोक्तिरयुक्ताअहंघटंपश्या
मीत्यत्राहमित्यहंकारसाक्षितयाप्रथममंतोभासकस्यानंतरंघटंपश्यामीतिघटाकारवृत्तिस्फुरणरूपेणबहिर्निर्गमनानुभवा
दित्याशंक्याह अंतस्थेति द्वाभ्यामाहकंचेनदेहांतरवस्थिताबुद्धिःरूपादिग्रहणायचक्षुरादिद्वारद्वारेभूयोभूयोनिर्ग

अंतस्थाधीःसहैवाक्षैर्बहिर्यातिपुनःपुनः भास्यबुद्धिस्थचांचल्यंसाक्षि
ण्यारोप्यतेतथा १७ गृहांतरगतःस्वल्पोगवाक्षादातपोऽचलः
तत्रहस्तेनकंप्यमानेकंपतीवातपोयथा १८ ॥ श्रीः ॥

च्छतितथाचतन्निष्ठंचांचल्यंतद्भासकेसाक्षिण्यारोप्यतेऽतोनवास्तवंसाक्षिणश्चांचल्यमितिभावः १७ भा
सकेभास्यचांचल्यारोपःक्वदृष्टइत्याशंक्याह गृहांतरेति गवाक्षाद्गृहांतरगतःस्वल्पआतपोऽचलएवप्रवर्तते तत्र
तस्मिन्नातपेपुरुषेणहस्तेनर्तमानेइतस्ततःचांचल्यमानेयथातपोकंपतीवचलतीवलक्ष्यतेनतुचलतीत्यर्थः १८

ननुसाक्षिणोप्यहंकाराद्यवभासकत्वे तेन तेन संबंधापगमागमरूपविकारवत्त्वं स्यादित्याशंक्याह
स्वस्थानइति दीपोयथागमनादिविकारशून्यः स्वदेशोऽवस्थितएवसन्स्वसंनिहिताखिलपदार्थानवभा
सयतिएवंसाक्ष्यंसाक्ष्यपीतिभावः १५ ननुसाक्षिणोबहिरंतरवभासकत्वाभिधानमनुपपन्नमपूर्वमन

स्वस्थानेसंस्थितोदीपःसर्वतोभासयेद्यथा स्थिरस्थायीत
थासाक्षीबहिरंतःप्रकाशयेत् १५ बहिरंतर्विभागोयंदेहापेक्षो
नसाक्षिणि विषयाबाह्यदेशस्थादेहस्यांतरहंकृतिः १६ ॥

परमनंतरमबाह्यमितिश्रुत्यातस्यबाह्यांतरविभागाभावाभिधानादित्याशंक्याह बहिरंतरिति ५
कस्यबाह्यत्वंकस्यांतरत्वंइत्यतआह विषयाइति १६ ॥ श्रीः श्रीः श्रीः ॥ श्रीः

ननुप्रकाशरूपायाबुद्धेरेवाहंकारादिसर्ववस्त्ववभासकत्वंसंभवात्किंतद्व्यतिरिक्तसाक्षिकल्पनयेत्याशंक्याह निरंतरमिति ऽहंकारस्यनिर्विकारेसाक्षिणिअधिरूपतः स्वप्रकाशचैतन्यरूपतयानिरंतरंभासमानेसदास्फुरति सतीयंबुद्धिः तद्भासातस्यसाक्षिणः स्वरूपचैतन्येनभास्यमानाप्रकाश्यमानेवाऽनेकधाधरोयंपरमित्यादिनानानाकारेण नृत्यतिविक्रियते अयंभावः यतोबुद्धेर्विकारितयाजडत्वात्स्वतः स्फूर्तिराहित्यमतस्तदति

निरंतरंभासमानेऽहंकारस्येज्ञप्तिरूपतः तद्भासाभास्यमानेयंबुद्धिर्नृत्यत्यनेकधा १३
अहंकारः प्रभुः सभ्याविषयानर्तकीमतिः तालादिधारीण्यक्षाणिदीपः साक्ष्यवभासकः १४

रिक्तसर्वावभासकः साक्षी अभ्युपगंतव्यइति १३ उक्तमर्थंश्रोतृबुद्धिसौकर्यायनाटकत्वेननिरूपयति अहंकार इति विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वात् न स्वाभिमानीप्रभुतुल्यत्वमहंकारस्यपरिसरवर्तित्वेपिविषयाणांतद्राहित्यात्सभ्यपुरुषसाम्यंनानाविधविकारवत्त्वान्नर्तकीसाम्यंधियः धीविक्रियमाणामनुकूलव्यापारवत्त्वात्तालादिधारिसमानत्वमिंद्रियाणामेवंसर्वावभासकत्वात्साक्षिणोदीपसादृश्य
मितिद्रष्टव्यम् १४

पंचदशी
१४६

साक्षिणएकत्वेनसर्वस्फोरकत्वमभिनीयदर्शयति ईक्षइति ईक्षेरूपमहंपश्यामीत्येवंद्रष्टृदर्श
नदृश्यलक्षणांत्रिपुटीमेकत्वेनभासयते एवंशृणोमीत्यादावपियोज्यं युगपदविकारित्वेनानेका
वभासकत्वेदृष्टांतमाह नृत्येति १० दृष्टांतंस्पष्टयति नृत्यशालास्थितइति अविशेषेणात्रभ्यादि

ईक्षेशृणोमिजिघ्रामिस्वादयामिस्पृशाम्यहं इतिभासयतेसर्वंनृत्यशालास्थदीपवत् १०
नृत्यशालास्थितोदीपःप्रभुंसभ्यांश्चनर्तकीम् दीपयेदविशेषेणतदभावेपिदीप्यते ११
अहंकारंधियंसाक्षीविषयानपिभासयेत् अहंकाराद्यभावेपिस्वयंभात्येवपूर्ववत् १२

विषयविशेषावभासनायनर्तक्यादिविकारमंतरेणेतियावत् ११ दार्ष्टांतिकेयोजयति अहंकार
मिति सुषुप्त्यादावहंकाराद्यभावेपिनत्साक्षितयाभात्येवेत्यर्थः १२ ॥ श्रीः ॥ श्रीः

३
श्रीः

ननु मनसैव सर्वव्यवहारसिद्धौ चक्षुरादिवैयर्थ्यं प्रसज्येतेत्याशंक्याह इदमइति मनसेदमिति सामान्यमात्रं गृह्यते न तु विशेषो गंधादिस्तस्य ग्रहणे घ्राणादिकमुपयुज्यत इत्यर्थः ८ एवं सोपकरणं जीवस्वरूपं निरूप्य परमात्मानं निरूपयति कर्तारमिति कर्तारं पूर्वोक्तमहंकाररूपं क्रियामहमिदमात्मकं मनोवृत्ति

इदमो ये विशेषाः स्युर्गंधरूपरसादयः आसां कार्येण तान्विद्या
द्घ्राणादीन्द्रियपंचकम् ८ कर्तारं च क्रियां तद्वद्व्यावृत्तविष
यानपि स्फोरयेदेकयत्नेन योसौ साक्ष्यत्र चिद्वपुः ९ ॥

रूपां व्यावृत्तविषयानपि व्यावृत्तानन्योन्यविलक्षणान् घ्राणादिग्राह्यान्गंधादीन्विषयांश्च एकयत्नेन युगपदेव यश्चिद्वपुः चिद्रूप एव सन् स्फोरयेत् प्रकाशयेत् असावत्र वेदांतशास्त्रे साक्षीत्युच्यत इत्यर्थः ९

तत्रजीवस्यस्वरूपंतावन्निरूपयति अहमिति यश्चिदाभासविशिष्टोऽहंकारोव्यवहारदशायांदेहादावहमित्यभिमन्यते असौकर्ताकर्तृत्वादिधर्मविशिष्टोजीवइत्यर्थः तस्यकिंकारणमित्याकांक्षायामाह तस्येति कामादिवृत्तिमानंतःकरणभागोमनः करणस्यक्रियापेक्षितत्वात्तत्क्रियांदर्शयति तस्यक्रिये

अहमित्यभिमंतायःकर्तासोत्रतस्यसाधनम् मनस्तस्यक्रियेअंतर्बहि
र्वृत्तीक्रमोत्थिते ६ अंतर्मुखाहमित्येषावृत्तिःकर्तारमुल्लिखेत्
बहिर्मुखेदमित्येषाबाह्यंवस्त्विदमुल्लिखेत् ॥ ७ ॥ श्रीः

ति ६ अनयोःस्वरूपंविषयंचविविच्यदर्शयति अंतर्मुखेति इदमित्येषेतिबहिर्वृत्तेःस्वरूपाभिन्नयोःरयाशिष्टेनविषयप्रदर्शनेनाहंदेहाद्बहिःप्रवर्तमानमिदंतयानिर्दिश्यमानंवस्तूल्लिखेत् विषयीकुर्यादित्यर्थः ७ ॥

ननुतद्ब्रह्माहमितिज्ञात्वासर्वबंधैःप्रमुच्यतइत्यादिश्रुतिभिर्बंधनिवृत्तिलक्षणस्यमोक्षस्यज्ञानफलत्वाभिधानात्परमात्मावशेषणस्यनफलत्वाभिधानमनुपपन्नमित्याशंक्याह अद्वयेति अद्वितीयब्रह्मणोवास्तवस्यमोक्षस्यबंधस्यचादुर्निरूपितत्वात्दुःखित्वादिभ्रमएवबंधः स्वरूपावस्थितिलक्षणातन्निवृत्तिरेवमोक्षःतेनश्रुतिविरोधइतिभावः ४ ननुकर्मणैवसंसिद्धिमास्थिताजनकादयःइतिस्मृतेर्मोक्षस्य

अद्वयानंदरूपस्यसद्वयत्वंचदुःखिता बंधःप्रोक्तःस्वरूपेणस्थितिर्मुक्तिरितीर्यते ४
अविचारकृतोबंधोविचारेणनिवर्तते तस्माज्जीवपरात्मानोसर्वदैवविचारयेत् ५

कर्मसाधनत्वावगमात्किमनेनविचारजनितज्ञानेनेत्यतआह अविचारेति विचारप्रागभावोपलक्षिताज्ञानकृतस्यबंधस्यनविचारजन्यज्ञानादन्यतोनिवृत्तिरुपपद्यतेउदाहृतस्मृतौचसंसिद्धिशब्देनचित्तशुद्धिरेवाभिधीयतेनमोक्षःइतिभावः विचारेणबंधनिवृत्तिःकोऽपिविषयेणाविचारेणेत्यतआह तस्मादिति तत्त्वसाक्षात्कारपर्यंतंसर्वदाविचारंकुर्यादित्यर्थः ॥ ५ ॥ श्रीः ॥ श्रीः ॥

पंचदशी
१५४

ननु परमात्मन एवैकस्य सर्वशरीरेषु प्रविष्टत्वे पूज्यपूजकादिभावे प्रतीयमान उत्तमाधमभावो वि
रुध्येतेत्याशंक्याह देवादीति नायं स्वाभाविक उत्तमाधमभावः किंतु शरीरोपाधिनिबंधनोऽतो न वि
रोध इति भावः २ इत्थमात्मन्यध्यारोपं संक्षेपेण प्रदर्श्य स साधनं तदपवादं संक्षिप्य दर्शयति अ
नेकेति अनेकजन्मभजनात् अनेकेषु जन्मसु अनुष्ठितानां कर्मणांईश्वरेसमर्पणरूपात्भजनात्

देवाद्युत्तमदेहेषु प्रविष्टो देवताभवत् मर्त्याद्यधमदेहेषु स्थितो भजति मर्त्यताम् २
अनेकजन्मभजनात्स्वविचारं चिकीर्षति विनष्टायां स्वमायायामद्वयं शिष्यते स्वयम् ३

स्वविचारं स्वस्यात्मनो ब्रह्मरूपस्य ज्ञानसाधनं श्रवणादिकं चिकीर्षति कर्तुमिच्छति ततः स्वविचारे
ण विचारजनितेन ज्ञानेन मायायां स्वस्याद्वयानंदत्वादिरूपाच्छादिकायां अज्ञानाविद्यादिशब्दवाच्या
यां विनष्टायां निवृत्तायां सत्यां स्वयमद्वयानंदपूर्णपरमात्मैवावशिष्यते ॥ ३ ॥ श्रीः
६२

१
श्रीः

श्रीगुरवे नमः नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ अर्थो नाटकदीपस्य मया संक्षिप्य वक्ष्य-
ते १ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिपूरणायाभिमतदेवतातत्वानुस्मरणलक्षणं मंगलमाचरन्
मंदाधिकारिणामनायासेन निःप्रपंचे प्रत्यगात्मतत्वप्रतिपत्तिसिद्धयेऽध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यते
शिष्याणां बोधसिद्ध्यर्थं तत्वज्ञैः कल्पितः क्रमः इति न्यायमनुसृत्यात्मन्यध्यारोपं तावदाह परमात्मेति
पूर्वं सृष्टेः प्रागद्वयानंदपूर्णः सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयंचॅ नमानंदं ब्रह्म पूर्णमदः पूर्णमि सा५

परमात्माद्वयानंदपूर्णः पूर्वं स्वमायया स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपतः १

इत्यादिश्रुतिप्रसिद्धः स्वगतादिभेदशून्यः परमानंदरूपः परिपूर्णः परमात्मा स्वमायया मायां तु प्रकृतिं वि-
द्यान्मायिनं तु महेश्वरम् इति श्रुत्युक्तया स्वनिष्ठमायया शक्त्या स्वयमेव जगद्भूत्वा तदात्मानं स्वयमकुरुत स-
च्चासच्चाभवदित्यादिश्रुतेः स्वयमेव जगदाकारतां प्राप्य जीवरूपतः प्राविशत् तत्सृष्ट्वा तदेवानुप्राविशदनेन जी-
वेनात्मनाऽनुप्रविश्येत्यादिश्रुतेर्जीवरूपेण प्रविष्टवानित्यर्थः ॥ १ ॥ श्रीः ॥ श्रीः ॥

श्रुत्यर्थस्यैकरूपत्वेन प्रतिपादकानामेव कुतो विप्रतिपत्तिरित्याशंक्य श्रुतितात्पर्यबोधशून्यानामेव विप्रतिपत्तिः न तु तद्विदामित्याह श्रुतीति ७४ तर्हि विवेकिनो निश्चयः कीदृश इत्याकांक्षायामाह मायामेघ

श्रुतितात्पर्यमखिलमबुद्ध्वा भ्राम्यते जडः विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानंदवारिधौ ७४
मायामेघो जगन्नीरं वर्षत्वेष यथा तथा चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ७५
इमं कूटस्थदीपं योऽनुसंधत्ते निरंतरम् स्वयं कूटस्थरूपेण दीप्यते सो निरंतरम् ७६
इति कूटस्थदीपः ५

इति ७५ ग्रंथाभ्यासफलमाह इमं कूटस्थमिति ७६ इति श्रीमत्परहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचिता कूटस्थदीपव्याख्या समाप्ता ५

कूटस्थस्य जन्माद्यतिशयाभावः कुतोवगम्यत इत्याशंक्य श्रुतिवाक्यादित्यभिप्रेत्य तद्वाक्यं पठति ननिरो
धइति ७१ ननु तर्हि श्रुतिषु तत्र तत्र जीवेश्वरादिस्वरूपप्रतिपादनं किमर्थमित्याशंक्यावाङ्मनसगोचर
स्यात्मनोवबोधनायेत्याह अवाङ्मनसगम्यमिति ७२ ननु तादृग्रूपस्य श्रुतिबोध्यत्वे श्रुतिषु विगा स्पेक२

ननिरोधोचोत्पत्तिर्नवद्धोनचसाधकः नमुमुक्षुर्नवैमुक्तइत्येषापर
मार्थता ७१ अवाङ्मम्यंतंश्रुतिर्बोधयितुंसदा जीवमीशंजगद्वा
पिसमाश्रित्यप्रबोधयेत् ७२ ययाययाभवेत्पुंसांव्युत्पत्तिःप्रत्य
गात्मनि सासैवप्रक्रियेहस्यात्साध्वीत्याचार्यभाषितम् ७३ ॥

नं कुतो दृश्यत इत्याशंक्य न तत्त्वे विगानमस्ति अपि तु तद्बोधनप्रकारे तदपि बोध्यपुरुषचित्तवैष
म्यानुसारेण परमेश्वराचार्यैरुक्तमित्याह ययायथेति ॥ ७३ ॥ श्रीः ॥ श्रीः

ननुकूटस्थस्यजीवेशयोश्चवास्तवत्वाभासत्वयोश्चसाधनेश्रुतयएवप्रदर्श्यंतेनतर्कैः किंचिदपिसाध्यतइत्या
शंक्यमुमुक्षूणांश्रुत्यर्थविशदीकरणायप्रवृत्तत्वान्नतर्कोपन्यासःइत्याह श्रुत्यर्थमिति ६७ ततःकिमित्य
तआह तस्मादिति मुमुक्षूणांश्रुत्यर्थःकीदृशोनुसंधेयःइत्यतआह श्रुताविति ६८ ईक्षणादीतिद्वा

श्रुत्यर्थंविशदीकुर्मोनतर्काद्वच्मिकिंचन तेनतार्किकशंकानामत्रकोऽवसरोभवेत् ६७
तस्मात्कुतर्कंसंत्यज्यमुमुक्षुःश्रुतिमाश्रयेत् श्रुतौतुमायाजीवेशौकरोतीतिप्रदर्शितम् ६८
ईक्षणादिप्रवेशांतासृष्टिरीशकृताभवेत् जाग्रदादिविमोक्षांतःसंसारोजीवकर्तृकः ६९
असंगएवकूटस्थःसर्वदानास्यकश्चन भवत्यतिशयस्तेनमनस्येवंविचार्यताम् ७०

भ्यांश्रुतिषुजीवेशयोर्मायिकत्वमीक्षणादिप्रवेशांतायाःसृष्टेरीश्वरकर्तृत्वंजाग्रत्स्वप्नसुषुप्तिबंधमोक्ष
लक्षणसंसारस्यजीवकर्तृत्वंकूटस्थस्यासंगत्वादिकंमनिजन्मादिलक्षणस्यव्यवहारजातस्यासत्यत्वंचप्र
तिपादितम् अतोमुमुक्षुरिममर्थंसदाविचारयेदित्यभिप्रायः ॥ ७० ॥ श्रीः ॥ श्रीः

उक्तमर्थं कैमुतिकन्यायेन द्रढयति अस्मिन्निति ६३ ईश्वरस्यापि मायिकत्वे तस्य जीववदसर्वज्ञत्वा
दिकं स्यादित्याशंक्य सर्वज्ञत्वादिकमपि मायैव कल्पयिष्यतीत्याह सर्वज्ञेति तत्रोपपत्तिमाह धर्मिण
मिति ६४ ननु जीवेशयोरिव कूटस्थस्यापि मायिकत्वं प्रसज्येतेति शंकते कूटस्थ इति प्रमाणाभावा

अस्मन्निद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजेत् महामाया सृजत्येतावित्याश्चर्यं किमत्र ते ६३
सर्वज्ञत्वादिकं चेशे कल्पयित्वा प्रदर्शयेत् धर्मिणं कल्पयेद्यास्याः को भारो धर्मकल्पने ६४
कूटस्थेप्यतिशंका स्यादिति चेन्मातिशंक्यताम् कूटस्थमायिकत्वे तु प्रमाणं न हि विद्यते ६५
वस्तुत्वं घोषयंत्यस्य वेदांताः सकला अपि सपत्नरूपं वस्त्वन्यं न सहंतेऽत्र किंचन ६६

न्नैवमिति परिहरति कूटस्थमायिकत्वेति ६५ कूटस्थस्य वास्तवत्वेपि प्रमाणं नोपलभ्यत इत्याशंक्य श्रु
तयः सर्वा अपि प्रमाणमित्याह वस्तुत्वमिति अत्र कूटस्थस्य पारमार्थिकत्वे प्रतिपक्षभूतमन्यवस्तु किं
चन न सहंत इत्यर्थः ६६

जीवेशत्वादिरहितत्वं कुत इत्याशंक्य श्रुत्या तयोर्मायिकत्वप्रदर्शनादित्याह जीवेशाविति जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिर्मायाविद्याधीनयोश्चिदाभासयोर्मायिकत्वं प्रतिपादयतीति भावः मायिकत्वेन योर्देहादिभ्यो वैलक्षण्यं न स्यादित्याशंक्य पार्थिवाविशेषेपि काचकुंभस्य घटादिभ्यो वैलक्षण्यमिवानयोरपि स्यादित्याह स्वच्छाविति ६० ननु घटकाचकुंभारंभकयोर्मृद्विशेष

मायाभासेन जीवेशौ करोतीति श्रुतत्वतः मायिकावेव जीवेशौ स्वच्छौ तौ काचकुंभवत् ६०
अन्नजन्यं मनो देहात्स्वच्छं यद्वत्तथैव तौ मायिकावपि सर्वस्मादन्यस्मात्स्वच्छतां गतौ ६१
चिद्रूपत्वं च संभाव्यं चित्त्वेनैव प्रकाशनात् सर्वकल्पनशक्ताया मायाया दुष्करं न हि ६२

योर्भेदात्तद्वैलक्षण्यमुचितं जगज्जीवेश्वरभेदहेतोर्मायाया एकत्वात्तयोर्जगतो वैलक्षण्यमनुचितमित्याशंक्यान्नजन्ययोर्देहमनसोर्यथा वैलक्षण्यं तद्वदित्याह अन्नजन्यमिति ६१ भवतु काचादिवत्स्वच्छत्वं चित्वं तु कुत इत्याशंक्य दुर्घटकारित्वादुपपन्नमित्याह चिद्रूपत्वमिति चित्त्वेन प्रकाशनमपि मायिकयोरनुपपन्नमित्याशंक्य तस्या दुर्घटकारित्वादुपपन्नमित्याह सर्वकल्पनेति ६२ ॥ श्रीः ॥

अत्र चेदमभिप्रेतं विमतः शिवो कर्त्रादिभ्योभिद्यते कर्त्रादिसाक्षित्वाद्यद्यत्कर्त्रादिभ्यो नभिद्यते नतत्कर्त्रादिसाक्षिनभवति यथाकर्त्रादि विमतः सत्योभवितुमर्हति मिथ्याधिष्ठानत्वात् असत्यरजताधिष्ठानशुक्तिवत् विमतश्चिद्रूपः जडमात्रावभासकत्वात् यश्चिद्रूपे नभवति नतत्सर्वंजडावभासकमपिन भवति यथाघटादिः विमतः परमानंदरूपः परप्रेमास्पदत्वात् यत्परमानंदरूपंनभवतिनतत्परप्रेमास्प

आनंदरूपः सर्वार्थसाधकत्वेनहेतुना सर्वसंबंधवत्त्वेनसंपूर्णः शिवसंज्ञितः ५८
इति शैवपुराणेषु कूटस्थः प्रविवेचितः जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः ५९

दमपिनभवति यथाघटादिः विमतः परिपूर्णः सर्वसंबंधित्वाद्गगनवत् सर्वसंबंधित्वंच सर्वार्थसाधकत्वेन विमतः सर्वसंबंधवान् सर्वावभासकत्वात् यः सर्वसंबंधवान्नभवति ससर्वावभासकोपिनभवति यथाशिलादिरिति ५८ उदाहृतपुराणवाक्यस्य तात्पर्यमाह इतिशैवेति इत्येवंप्रकारेणोक्तसंहितादिषुपुराणेषुजीवेश्वरादिकल्पनारहितः केवलोद्वितीयः स्वप्रभः स्वयंप्रकाशचेतन्यरूपः शिवः कूटस्थोविवेचित इत्यन्वयः ५९

एवंबंधमोक्षयोरविवेकमूलत्वे सत्यद्वैतवादे कस्य बंधः कस्य मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः
कुतर्कमूलाः परिहासविशेषाः खंडनोक्तयुक्तिभिस्तेषांनिरुत्तरत्वापादनेन परिहरणीया इत्याह एवंचेति
५५ एवंश्रुतियुक्तिभ्यां कूटस्थं पुच्छादिभ्यो विविच्य दर्शयित्वा आलोच्यपि तद्विवेकः कृत इत्याह वृत्तेःसा

एवंचसतिबंधःस्यात्कस्येत्यादिकुतर्कजाः विडंबनादृढंखंड्याःखंडनो
क्तिप्रकारतः ५५ वृत्तेःसाक्षितयावृत्तिप्रागभावस्यचस्थितः बुभुत्सायां
तथाज्ञोस्मीत्याभासाज्ञानवस्तुनः ५६ असत्यालंबनत्वेनसत्यःस
र्वजडस्यतु साधकत्वेनचिद्रूपःसदाप्रेमास्पदत्वतः ५७ श्रीरामः

वृत्तीति श्लोकत्रयेण कामादिवृत्त्युत्पत्तौ सत्यां तत्साक्षित्वेन तदुदयात्पूर्वं तत्प्रागभावसाक्षित्वेन जिज्ञासायां
सत्यां तत्साक्षित्वेन ततः पूर्वमज्ञोस्मीत्यनुभूयमानाज्ञानसाक्षित्वेन च स्थित एव तिष्ठति ५६ सत्यासत्यस्य ज
गतश्चालंबनत्वेनाधिष्ठानत्वेन सत्यः जडस्य सर्वस्य साधकत्वेनावभासकत्वाच्चिद्रूपः सर्वदा प्रेमविषय
त्वादानंदरूपः सर्वधीविभासकत्वेन सर्वसंबंधिकत्वात्संपूर्ण इत्युच्यते ५७ ॥ श्रीः ॥

ननुचिदाभासस्यभ्रांतिकारजतादिवदधिष्ठानारोप्योभयधर्मवत्त्वान्नत्वंभ्रान्त्युपमारोपितत्वमित्या
शंक्याह कर्तृत्वादीति बुद्ध्युपाधिद्वारासमारोप्यमाणान्कर्तृत्वभोक्तृत्वमातृत्वादीनस्फुरणलक्षणमा
त्मरूपत्वंचदधत्पुरतोभाति स्पष्टंप्रतिभासतेऽतआभासःकल्पितइत्यर्थः ५२ अस्यभ्रमस्यकिंकार

कर्तृत्वादीन्बुद्धिधर्मान्स्फूर्त्याख्यांचात्मरूपताम् दधद्विभातिपुरतआभा
सोऽतोभ्रमोभवेत् ५२ काबुद्धिःकोयमाभासःकोवात्मात्रजगत्कथम्
इत्यनिर्णयतोमोहःसोयंसंसारउच्यते ५३ बुद्ध्यादीनांस्वरूपंयोविवि
नक्तिसतत्त्ववित् सएवमुक्तइत्येवंवेदांतेषुविनिश्चयः ५४ ॥ ४

रणमित्याकांक्षायांबुद्ध्यादिस्वरूपापरिज्ञानमेवेत्याह काबुद्धिरिति तस्यनिवर्तनीयत्वायानर्थहेतुताम
ह सोयंसंसारइति ५३ अस्यकिंनिवर्तकमित्याकांक्षायांबुद्ध्यादीनांस्वरूपविवेकएवनिवर्तकइत्यभि
प्रेत्यतद्विद्वानेवज्ञानी ततएवचानर्थनिवृत्तिरित्याह बुद्ध्यादीनांरूपमिति ॥ ५४ ॥ ४

ब्रह्मशब्दस्यार्थमाह जगद्भ्रमस्येति कृत्स्नजगत्कल्पनाधिष्ठानं यच्चैतन्यं वेदान्तेषु निरूपितं तदत्र ब्रह्म
शब्देन विवक्षितमित्यर्थः ४९ ननु जीवभ्रमाधिष्ठानचैतन्यं कूटस्थ इत्युक्तमनुपपन्नं जीवस्यारोपितत्वा
सिद्धेः इत्याशंक्य तस्यारोपितत्वं कैमुतिकन्यायेन साधयति एतस्मिन्निति जगदेकदेशत्वं चानेन जीवेनानु

जगद्भ्रमस्य सर्वस्य यदधिष्ठानमीरितम् त्रय्यंतेषु तदत्र स्याद्ब्रह्मशब्दवि
वक्षितम् ४९ एतस्मिन्नेव चैतन्ये जगदारोप्यते यदा तदा तदेकदेशस्य
जीवाभासस्य का कथा ५० जगत्तदेकदेशाख्यसमारोप्यस्य भेदतः ॥
तत्त्वंपदार्थौ भिन्नौ स्तो वस्तुतस्त्वेकता चितः ५१ ॥ श्रीः ॥

प्रविश्येत्यादिश्रुतिसिद्धं ५० ननु जगदधिष्ठानचैतन्यस्यैकत्वात्तत्त्वंपदार्थभेदाभावेन तत्त्वंपदार्थयोः वै
नरत्वमित्याशंक्य तयोरौपाधिकभेदो वास्तवमैक्यमित्याह जगत्तदेक इति जगदिति तदेकदेश इति च
आख्यायस्य समारोप्यस्य तत्तया जातावेकवचनम् ॥ ५१ ॥ श्रीः ॥

ननु तर्हि विवरणाचार्यैर्बाधायां सामानाधिकरण्यं कुतो निराकृतमित्याशंक्योत्तरं हेयांशेन कूटस्थस्य स्वविवक्षितत्वादित्याह सामानाधिकरण्यस्येति ४६ कूटस्थस्य विवक्षयेत्युक्तमर्थं विवृणोति शोधित इति शोधितो बुद्ध्यादिभ्यो विवेचितः त्वंपदलक्ष्यो यः कूटस्थो वक्ष्यमाणलक्षणस्तस्य ब्रह्मरूपतां सत्यादिलक्षणब्रह्मरूपतां वक्तुं विवरणादिषु बाधायां सामानाधिकरण्यनिराकरणपूर्वकं मुख्यसामानाधिकरण्यमुक्तमित्यर्थः ४७ इदानीं कूटस्थस्य ब्रह्मणैक्यं संभावयितुं कूटस्थशब्देन विवक्षितमर्थमाह देहेंद्रियादीति आदिशब्देन मन आदयो गृह्यंते एवं च देहेंद्रियादियुक्तस्य शरीरद्वयसहितस्य जीवाभासभ्रमस्य चिदाभासरूपभ्रमस्य याऽधिष्ठानचितिः यदधिष्ठानचैतन्यमस्ति तदत्र वेदांते कूटस्थत्वेन विवक्षितमित्यर्थः ४८

सामानाधिकरण्यस्य बाधार्थत्वं निराकृतम् प्रयत्नतो विवरणे कूटस्थत्वविवक्षया ४६
शोधितस्त्वंपदार्थो यः कूटस्थो ब्रह्मरूपताम् तस्य वक्तुं विवरणे तथोक्तमितरत्र च ४७
देहेंद्रियादियुक्तस्य जीवाभासभ्रमस्य या अधिष्ठानचितिः सैषा कूटस्थात्र विवक्षिता ४८

बाध्यायां सामानाधिकरण्येन वाक्यार्थप्रतिपत्तिप्रकारो वार्तिककारैः सदृष्टांतोभिहितः इतिइममर्थंत
त्राप्योदाहरणपूर्वकं स्फोरयति योयं स्थाणुरिति स्थाणुरेष पुमानिति यस्मिन्वाक्ये पुरुषत्वबोधेन स्थाणु
त्वबुद्धिर्निवर्त्यते यथा एवं ऽहंब्रह्मास्मीति बोधेनाहंबुद्धिः कर्ताहमस्मीत्येवमादिरूपा सर्वापि निवर्तत इ
ति ४३ एवमुक्तेन प्रकारेणाचार्यैर्वार्तिककारैः नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थत्वं स्प

योयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव ब्रह्मास्मीति धियाशेषा ह्यहंबुद्धिर्निवर्त्यते ४३
नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्टमीरितम् सामानाधिकरण्यस्य बाधार्थत्वं ततोस्तु तत् ४४
सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत् अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेत् ४५

ष्टमीरितमिति फलितमाह ततोस्तु तदिति ततः कारणाद्ब्रह्माहमस्मीतिवाक्येन सामानाधिकरण्यस्य
बाधार्थत्वमस्त्वित्यर्थः ४४ नन्वेवमपि श्रुतिषु बाधायां सामानाधिकरण्येन क्वापि दृष्टमित्याशंक्य सर्वं
खेन ब्रह्मेत्यत्र बाधायां सामानाधिकरण्यं दृष्टं अतोऽपि तन्न विष्यतीत्याह सर्वं ब्रह्मेति ४५ ॥

पंचदशी ननुजीवापेतंवावकिलेदंम्रियतेनजीवोम्रियतइतिश्रुत्यात्वस्यौपाधिकस्यापिअविनाशित्वंप्रतिपा
१३८ द्यतइत्याशंक्यनास्याःश्रुतेर्देहांतरप्राप्तिविषयत्वाऽविनाशित्वमुक्तंनात्यंतिकनाशाभावपरत्वमित्याह
जीवापेतमिति जीवापेतंजीवरहितंजीवेनत्यक्तमितियावत् वावएव सजीवोनम्रियतइत्यर्थः ४१

जीवापेतंवावकिलशरीरंम्रियतेनसः इत्यत्रनविमोक्षोऽर्थःकिंतुलोकांत
रेगतिः ४१ नाहंब्रह्मेतिबुध्येतसविनाशीतिचेन्नतत् सामानाधिकर
ण्यस्यबाधायामपिसंभवात् ४२

ननुजीवस्याविनाशित्वेऽहंब्रह्मास्मीत्यविनाशिब्रह्मता
दात्म्यस्यानेनघटतइतिशंकते नाहंब्रह्मेति विनाशीसजीवोऽहंब्रह्मेतिब्रह्मरूपेणात्मानंनबुध्येतनजानीया १०
द्विनाश्यऽविनाशिनोरेकत्वविरोधादितिचेत् मुख्यसामानाधिकरण्याभावेऽपिबाधायांसामानाधिकरण्यसं
भवात् जीवभावबाधेनब्रह्मभावोऽवगंतुंशक्यतइत्याह सामानाधिकरण्यस्येति ॥ ४२ ॥ ४ श्रीः

प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति औपाधिकरूपस्य विना
शप्रतिपादिकां श्रुतिं दर्शयति समुत्थायेति एष प्रज्ञानघन आत्मा एतेभ्यो देहेंद्रियादिरूपेभ्यः पंचभूतका
र्येभ्यो निमित्तभूतेभ्यः उपाधिभ्यः समुत्थाय जीवत्वाभिधानं प्राप्य तान्येव देहादीनि विनश्यंत्यनुविनश्यति
तेषु विनश्यत्सु तत्कृतं जीवत्वाभिधानं जहाति एवं प्रकारेण सोपाधिकरूपस्य विनाशित्वं याज्ञवल्क्यो

समुत्थायैष भूतेभ्यस्तान्येवानुविनश्यति विनष्टमिति मैत्रेय्यै याज्ञवल्क्य
उवाच हि ३९ अविनाश्ययमात्मेति कूटस्थः प्रविवेचितः मात्रासंस
र्गऽस्त्वेवमसंगत्वस्य कीर्तनात् ४० ॥ श्रीः ॥ श्रीः ॥

मैत्रेय्या उक्तवानित्यर्थः ३९ अविनाशी वा अरेयमात्मानुच्छित्तिधर्मेति श्रुत्या कूटस्थस्ततो विभिन्नः प्रद
र्शित इत्याह अविनाश्येति मात्रासंसर्गस्त्वस्य भवतीति श्रुत्याविनाशित्वे हेतुरसंगत्वं चोक्तवानित्याह
मात्रेति मीयंत इति मात्रा देहादयः ताभिरस्यात्मनोऽसंसर्गो भवतीत्यर्थः ४० ॥ श्रीः ॥

नोपपत्तिमर्हतः पठति कथंचिदिति अयं परमात्मा साक्षदेहमक्षाणि च देहश्चाक्षदेहास्तैः सहवर्तत इ
ति साक्षदेहमिदं जडजातं मदृते चेतनं मां विहाय कथं नु स्यान्न कथमपि निर्वहेदिति विचार्य मूर्द्धसीमानं
कपालत्रयमध्यदेशं विदार्य स्वसन्निधिमात्रेणाभित्याप्रविष्टः सन् संसरति जाग्रदादिकमनुभवतीत्य

कथं न्विदं साक्षदेहं मदृते स्यादितीरणात् विदार्य मूर्द्धसीमानं प्रविष्टः
संसरत्ययम् ३७ कथं प्रविष्टोऽसंगश्चेत् सृष्टिर्वास्य कथं वद
मायिकत्वं तयोस्तुल्यं विनाशश्च समस्तयोः ३८ श्रीः ॥

र्थः ३७ नन्वसंगस्यात्मनः प्रवेशोऽयुक्त इति शंकते कथं प्रविष्ट इति इदं चोद्यं सृष्टावपि समानमि
त्याह सृष्टिर्वास्येति सृष्टिकर्तुर्मायिकत्वान्न दोष इत्याशंक्याद्यं परिहरः प्रवेशेऽपि समान इत्याह
मायिकत्वमिति अनयोर्मायिकत्वे हेतुश्च सम इत्याह विनाश इति ३८ ॥ श्रीः ॥

इत्थंचिदाभासस्याप्रयोजकतांनिराकृत्येदानींतस्यबुद्धेःपृथक्सत्त्वंसाधयितुंपूर्वपक्षमाह नहीति य
थासत्यांतस्यामेवमकन्धरोनमद्दोभिधीयते तद्वदितिभावः नन्वेवंतर्हिदेहातिरिक्ताधीरपिनसिध्येदितिप्रति
बंद्यापरिहरति अल्पमेवोक्तमिति ३४ प्रतिबंदीमोचनंशंकते देहेमृतेपीति देहव्यतिरिक्तायाबुद्धेःस
विज्ञानोभवतीत्यादिश्रुतिसिद्धत्वान्नासत्त्वमितिभावः ननुश्रुतिबलाद्देहातिरिक्ताबुद्धिरभ्युपगम्यतेचेत्त

नहिधीभावभावित्वादाभासोस्तिधियःपृथक् यथामदल्पमेवोक्तंधीरप्येवंस्वदेहतः ३४
देहेमृतेपिबुद्धिश्चेच्छास्त्रादस्तितथासति बुद्धेरन्यश्चिदाभासःप्रवेशश्रुतिषुश्रुतः ३४
धीयुक्तस्यप्रवेशश्चेन्नैतरेयेधियःपृथक् आत्माप्रवेशंसंकल्प्यप्रविष्टइतिगीयते ३५

र्हिप्रवेशश्रुतिबलाद्बुद्ध्यतिरिक्तश्चिदाभासोप्यभ्युपेयइत्याह बुद्धेरिति ३५ ननुबुद्ध्युपाधिकस्यैवप्रवे
शोयुज्यतेनैतरेयस्येतिशंकते धीयुक्तेति ऐतरेयश्रुतौबुद्ध्यतिरिक्तस्यैवप्रवेशश्रवणान्मैवमितिपरिहर
ति आत्माप्रवेशइति ३६ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ ॥

कांस्यपात्रस्येतंडुलपरिमाणाधिक्याभावेपिप्रतिविंबलक्षणमाधिक्यमस्तीत्याशंक्यनहिकुड्यावपि
चिदाभासोभवतेवांगीकृतः स्यादित्याह परिमाणेति ३१ प्रतिविंबांगीकारेचिदाभासः कथमंगी
कृतः स्यादित्याशंक्यप्रतिविंबाभासशब्दाभ्यामभिधेयस्यार्थस्यैक्यादित्याह ईषद्भासेति प्रतिविं
वस्याभासत्वंकथमित्याशंक्य आभासलक्षणयोगादित्याह विंवेति हियस्मात्कारणात्प्रतिविं

परिमाणविशेषेपिप्रतिविंवो विशिष्यते कांस्येयद्वत्तथाकुड्येप्याभासोभवेद्धना
त् ३१ ईषद्भासनमाभासः प्रतिविंवस्तथाविधः विंवलक्षणहीनः सन्विंववद्भा
सते सहि ३२ ससंगत्वविकाराभ्यां विंवलक्षणहीनता स्फूर्तिरूपत्वमेतस्य विं
ववद्भासनंविदुः ३३

योविंवलक्षणरहितोविंववद्भासतेऽतोविंवाभासइतिभावः ३२ आ
भासलक्षणयोगित्वमेवस्पष्टयति ससंगत्वेति एतस्यचिदाभासस्यससंगत्वविकारित्वाभ्यांविंवभू
तासंगाविकारिचैतन्यलक्षणहीनत्वंस्फुरणरूपत्वंविंववद्भासनमित्यर्थः हेतुलक्षणरहिताहेतु
वद्भासमानाहेत्वाभासाइतिवत् ॥ ३३ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

ग२

तत्रचिदाभासमाक्षिपति बुध्यवछिन्नेति स्वस्मिन्कल्प्यमानयाबुध्यावच्छिन्नःकूटस्थएवघटद्वारा घटाकाशइवबुद्धिद्वारालोकांतरेगमनागमनेकर्तुंशक्तोति अतश्चिदाभासकल्पनायांगौरवमितिभावः २७ असंगस्यकूटस्थस्यबुध्यवच्छेदमात्रेणजीवत्वंनघटते अन्यथातिप्रसंगादितिपरिहर

ग

बुध्यवच्छिन्नकूटस्थोलोकांतरगमागमौ कर्तुंशक्तोघटाकाशइवाभासेनकिंवद २७
शृण्वसंगःपरिच्छेदमात्राज्जीवोभवेन्नहि अन्यथाघटकुड्यादेरवच्छिन्नस्यजीवता २८
नकुड्यसदृशीबुद्धिःस्वच्छत्वादितिचेत्तथा अस्तुनामपरिच्छेदेकिंस्वच्छेनभवेत्तव २९
प्रस्थेनदारुजन्येनकांस्यजन्येनवानहि विक्रेतुस्तंडुलादीनांपरिमाणंविशिष्यते ३०

ति शृण्वेति २८ बुद्धिकुड्ययोःस्वाच्छ्यास्वाच्छ्याभ्यांवैषम्यंशंकते नकुड्येति उक्तंस्वच्छत्वं परिच्छेदप्रयोजकंनभवतीत्याह अस्तुनामेति २९ उक्तमर्थंदृष्टान्तेनस्पष्टयति प्रस्थेनेति दारुकांस्यजन्ययोःप्रस्थयोःस्थितेस्वच्छत्वास्वच्छत्वेतंडुलपरिमाणेन्यूनाधिकभावहेतूनभवतइत्यर्थः ३०

पंचदशी
१३५

चिदाभासव्यतिरिक्तकूटस्थाभ्युपगमः स्वकपोलकल्पित इत्याशंक्याचार्यैः कूटस्थस्योपपादितत्वात्
मेवमित्याह अंतःकरणेति अंतःकरणतद्वृत्तिसाक्षीत्येतन्नविग्रहः आनंदरूपः सत्यः सन्किं नात्मा
नं प्रपद्यत इत्यादावित्यर्थः २५ कूटस्थातिरिक्तश्चिदाभासोपि तैर्वर्णित इत्याह आत्मेति आत्मा
च आभासश्च आश्रयश्च आत्माभासाश्रयाश्चेति द्वंद्वसमासः मुखाभासाश्रया इत्यत्रापि तथा

अंतःकरणतद्वृत्तिसाक्षीत्यादावनेकधा कूटस्थ एव सर्वत्र पूर्वाचार्यैर्विनिश्चितः २५
आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा गम्यंते शास्त्रयुक्तिभ्यामित्याभासश्च वर्णितः २६

मुखं प्रसिद्धम् आभासो मुखप्रतिबिंबः आश्रयो दर्पणादिश्चेति त्रितयं यथा प्रत्यक्षेणावगम्यते एव
मात्मा कूटस्थः आभासश्चिदाभासः आश्रयोंतःकरणादिः इति त्रयोपि शास्त्रयुक्तिभ्यामवगम्यंत इत्यर्थः
अत्र चाभासशब्देन कूटस्थातिरिक्तश्चिदाभासो वर्णित इति भावः मनसः साक्षी बुद्धेः साक्षीति बुद्धिसा
क्षिणः प्रतिपादकं शास्त्रं रूपं रूपं प्रतिरूपो बभूवेति चिदाभासप्रतिपादकं विकारित्वाविकारित्वादिरूपा युक्तिः पूर्वमेवोक्तेत्यभिप्रायः २६

श्रीः ८

नन्वत्रापि घटादिष्विव ज्ञातताऽज्ञाततावभासकत्वेन कूटस्थः किं न स्यादित्याशंक्य तत्र ज्ञातताद्यभावादेवेत्याह ज्ञातता इति तत्रोपपत्तिमाह स्वस्येति ज्ञानाज्ञानव्याप्तिभ्यां ज्ञातताज्ञातते भवतः वृत्तीनां तु स्वप्रकाशत्वेन ज्ञानव्याप्तिर्नास्ति ताभिर्वृत्तिभिः स्वोत्पत्तिमात्रेण स्वगोचराज्ञानस्य निवृत्तत्वाँज्ञान ९२

ज्ञातताज्ञातते न स्तो घटवद्वृत्तिषु क्वचित् स्वस्य स्वेनागृहीतत्वात्ताभिश्चाज्ञाननाशनात्
२३ द्विगुणीकृतचैतन्ये जन्मनाशानुभूतितः अकूटस्थं तदन्यत्तु कूटस्थमविकारतः २४

स्य व्याप्तिरपि नास्तीति भावः २३ ननु कूटस्थचिदाभासयोरपि चित्त्वे समाने एकस्य कूटस्थत्वमपरस्याकूटस्थत्वं इत्येतत्कुत इत्याशंक्य चिदाभासनिष्ठयोर्जन्मनाशयोरनुभूयमानत्वात् अस्याकूटस्थत्वमितरस्य विकारित्वे प्रमाणाभावात्कूटस्थत्वमित्याह द्विगुणीकृतेति ॥ २४ ॥

पंचदशी
१३४

नवत्वेवं समाध्यादौ वृत्तिविलयो ऽनेन कथं कूटस्थोऽवगम्यत इत्याशंक्य वृत्त्यभावसाक्षित्वेनासाव
वगम्यत इत्याह संधय इति वृत्तिसंधयो वृत्त्यभावाश्च येन चैतन्येनावभास्यंते स कूटस्थो वगंत
व्य इत्यर्थः २१ एवं च सति किं फलितमित्यत आह घट इति बाह्ये घटे यथा घटमात्रावभासक

संधयोऽखिलवृत्तीनामभावाश्चावभासिताः निर्विकारेण येनासौ कूट
स्थ इति चोच्यते २१ घटे द्विगुणचैतन्यं यथा बाह्ये तथांतरे वृत्ति
ष्वपि ततस्तत्र वैशिष्ट्यं संधितोऽधिकम् २२ ॥ श्रीः ॥

श्चिदाभासः घटस्य ज्ञाततावभासकं ब्रह्मचैतन्यं चेति चैतन्यं द्विगुणं तथांतरे ऽहंकारादिवृत्ति ६
ष्वपि कूटस्थचैतन्यं वृत्त्यवभासकश्चिदाभासश्चेति द्विगुणं चैतन्यमस्ति तत्रोपपत्तिमाह तत
स्तत्रेति यतो द्विगुणं चैतन्यमस्ति ततः संधितः संधिभ्यः तत्र वृत्तिषु वैशिष्ट्यमधिकं दृश्यत इति शेषः २२ श्रीः

ननु देहाद्बहिश्चिदाभासव्याप्यघटाकारवृत्तिवदंतरविषयगोचरवृत्त्यभावात्कथं तद्व्यापकश्चिदा
भासोभ्युपगम्यत इत्याशंक्य विषयगोचरवृत्त्यभावेप्यहमादिवृत्तिसद्भावात्तद्व्यापकश्चिदाभासोभ्यु
पगंतुं शक्यत इति सदृष्टांतमाह अहंवृत्तौ चिदाभासेति १८ अहमादिवृत्तीनामेव चिदाभासभास्य

अहंवृत्तौ चिदाभासः कामक्रोधादिकासु च संव्याप्य वर्तते तप्ते लोहे वह्निर्यथा
तथा १८ स्वमात्रं भासते तप्ते लोहं नान्यत्कदाचन एवमाभाससहिता वृत्त
यः स्वस्वभासिकाः १९ क्रमाद्विच्छिद्य विच्छिद्य जायंते वृत्तयोखिलाः
सर्वा अपि विलीयंते सुप्तिमूर्छासमाधिषु २० श्रीरामायनमः ॥

त्वं दृष्टांतप्रपंचनेन स्पष्टयति स्वमात्रंभासते १९ एवं चिदाभासं युक्त्या घकूटस्थरूपं युक्त्यादपि
तुं नेदुपयोगिनेवृत्त्यभावावसरं दर्शयति क्रमाद्विच्छिद्येति ॥ २० ॥ श्रीः ॥ ०

पंचदशी
१३३

कुंभस्य चिदाभासब्रह्मोभयभास्यत्वे लिंगमाह चैतन्यमिति अतो घटस्य ब्रह्मचिदाभासोभयभास्यत्वात्कुंभे ज्ञातत्वेन द्विगुणं चैतन्यं भातीति इदं एव घटस्य ज्ञाततावभासकं चैतन्यं तार्किकैर्ज्ञानांतरेणानुव्यवह्रियत इत्याह अन्येनुव्यवसायाख्यमिति यथोदितं यथोक्तमेतदेव ब्रह्मचैतन्यमन्ये

चैतन्यं द्विगुणं कुंभे ज्ञातत्वेन स्फुरणं तथा अन्येनुव्यवसायाख्यमाहुरेतद्यथोदितम् १५
घटोयमित्यसावुक्तिराभासस्य प्रसादतः विज्ञातो घट इत्युक्तिर्ब्रह्मानुग्रहतो भवेत् १६
आभासब्रह्मणी देहाद्बहिर्यद्वद्विवेचिते तद्वदाभासकूटस्थौ विविच्येतां वपुष्यपि १७

तार्किका अनुव्यवसायाख्यं ज्ञानांतरं प्राहुरिति योजना १५ अयं घट इति ज्ञातो घट इति व्यवहारभेदादपि चिदाभासब्रह्मणोर्भेदोवगंतव्य इत्याह घटोयमिति १६ देहाद्बहिश्चिदाभासब्रह्मणी विविच्येते यथा तथा देहांतश्चिदाभासकूटस्थौ विवेचनीयावित्याह आभासेति १७ ॥

५

श्रीः

एवंचसतिप्रकृतेकिमायातमित्यतआह आभासेति यस्माद्ब्रह्मचित्फलयोर्भेदःसिद्धस्तस्माद्घटे
उदितउत्पन्नेआभासश्चिदाभासस्तत्रघटेज्ञातत्वंजनयेत् उत्पन्नंतत्ज्ञातत्वंपुनरज्ञातत्ववत् ब्र

आभासउदितस्तस्मात्ज्ञातत्वंजनयेत्घटे तत्पुनर्ब्रह्मणाभास्य
मज्ञातत्ववदेवहि १३ धीवृत्त्याभासकुंभानांसमूहोभास्यतेचि
ता कुम्भमात्रफलत्वात्सएकआभासतःस्फुरेत् १४ ॥ ः

ह्मणैवावभास्यंभवतीतिहिप्रसिद्धमित्यर्थः १३ एवंब्रह्मचिदाभासयोर्भेदमुपपादितंविषयभेद
प्रदर्शनेनस्पष्टयति धीवृत्त्येति चिताब्रह्मचैतन्येनेत्यर्थः चिदाभासस्यकुंभमात्रनिष्ठफलरूप
त्वात्तेनाभासेनसघटएकएवस्फुरेभास्यतेत्यर्थः ॥ १४ ॥ श्रीरामकृष्णगोपालहरे ॥

नन्विदं परागर्थप्रमेयेष्वित्यादिसुरेश्वरवार्तिकविरुद्धमित्याशंक्य तद्विवक्षानभिज्ञस्येदं चोद्यमिति
परिहरति परागर्थेति अस्यायमर्थः परागर्था वाह्या घटादयः पदार्थाः तेषु प्रमेयेषु प्रमाणविष
येषु सत्सु या प्रमाणफलत्वेनाभ्युपेता संविदस्ति सैवेहास्मिन् शास्त्रे वेदांतोक्तिप्रमाणतः वेदांत
वाक्यलक्षणप्रमाणेन मेयोर्थो ज्ञातव्योर्थः इत्यनेन वार्तिकेन ब्रह्मचैतन्यसदृशश्चिदाभासः प्रमा

परागर्थप्रमेयेषु या फलत्वेन संमता संवित्सैवेह मेयोर्थो वेदांतोक्तिप्रमाणतः ११
इति वार्तिककारेण चित्सादृश्यं विवक्षितम् ब्रह्मचित्फलयोर्भेदः सहस्र्यां विश्रुतो यतः १२

णफलत्वेन विवक्षितो न ब्रह्मचैतन्यमिति भावः ११ वार्तिककाराणां ईदृशी विवक्षेति कुतोवग
म्यते इत्याशंक्य न गुरुभिः श्रीमदाचार्यैरुपदेशसहस्र्यां ब्रह्मचैतन्यचिदाभासयोर्भेदस्य प्रतिपादित
त्वादित्याह ब्रह्मचित्फलयोरिति ब्रह्मचिच्च फलं च ब्रह्मचित्फले तयोरिति विग्रहः १२ ॥

चिदाभासरहितबुद्धिव्याप्तस्य घटस्य ज्ञातत्वाभावं दृष्टांतप्रदर्शनेन स्पष्टयति ज्ञात इति लोके कुत्रचिदपि घटो मृदा शुल्करकरूपया लिप्तो लेपनं प्राप्तो ज्ञात इति नोच्यते यथा तथा चिदाभासरहितबुद्धिव्याप्तस्यापि कुंभस्य ज्ञातत्वं नाभ्युपगम्यत इति भावः ९ फलितमाह ज्ञातत्वं नामेति यतः केवलाया बुद्धेर्ज्ञातत्वजननासमर्थतामतः कुंभे चिदाभासलक्षणफलस्योत्पत्तिरेव ज्ञातत्वं नाम प्र

ज्ञात इत्युच्यते कुंभो मृदा लिप्तो न कुत्रचित् धीमात्रव्याप्तकुंभस्य ज्ञातत्वं नेष्यते तथा ९
ज्ञातत्वं नाम कुंभेऽस्मिंश्चिदाभासफलोदयः न फलं ब्रह्मचैतन्यं मानात्प्रागपि सत्वतः १०

सिद्धमित्यर्थः नन्वथापि चिदाभासो न कल्पनीयः ब्रह्मचैतन्यस्यैव फलस्य सद्भावादित्याशंक्याह न फलमिति ब्रह्मचैतन्यं फलं घटादिस्फुरणं न भवतीति कुत इत्यत आह मानादिति मानात्प्रागपि प्रमाणप्रवृत्तेः पूर्वमपि विद्यमानत्वात् फलस्य तु तदुत्तरकालीनत्वनियमादिति भावः १० ॥

नन्वज्ञातस्य कुंभस्याज्ञानव्याप्तत्वात् भवतु ब्रह्मावभासत्वं ज्ञानव्याप्तस्य तु ज्ञातस्य कुंभस्य कुतो ब्रह्मचैतन्यावभास्यत्वमित्याशंक्याज्ञानस्याज्ञानताजनकइव ज्ञानस्यापि ज्ञातताजननेन मात्रोपक्षीणत्वादज्ञातकुंभवत् ज्ञातस्यापि ब्रह्मावभास्यत्वं भवतीत्याह अज्ञातो ब्रह्मणाभास्येति य-

अज्ञातो ब्रह्मणाभास्यो ज्ञातः कुंभस्तथा न किम् ज्ञातत्वजननेनैव चिदाभासपरिक्षयः
७ आभासहीनया बुद्ध्या ज्ञातत्वं नैव जन्यते तादृग्बुद्धेर्विशेषः को मृदादेः स्याद्धि कारिणः ८

था ज्ञातः कुंभो ब्रह्मणाभास्यः तथा ज्ञातः कुंभो न किम् ब्रह्मावभास्यो न भवति किंतु भवत्येवेत्यर्थः कुत इत्यत आह ज्ञातत्वजननेनेति ७ नन्वज्ञातताजनने यथाज्ञानमिव ज्ञातताजनने नापि बुद्ध्यैवालं किमनेन चिदाभासेनेत्याशंक्य चिदाभासरहिताया बुद्धेर्घटादिवदप्रकाशरूपत्वेन ज्ञातताजननं संभवतीत्याह आभासहीनयेति ८

नन्वेकस्यैव घटस्य ज्ञातत्वाज्ञातत्वलक्षणं द्वैरूप्यं कथं संभवतीत्याशंक्य तदवबोधनाय ज्ञातताऽज्ञातता निमित्तयोर्ज्ञानाज्ञानयोः स्वरूपं तावद्दर्शयति चिदाभासांतधीवृत्तिरिति चिदाभासांतधीवृत्तिश्चिदाभासश्चित्प्रतिबिंबः सोंते पुरो यस्याः सा धीवृत्तिर्ज्ञानमित्युच्यते बोधेद्धा बुद्धिरि

चिदाभासांतधीवृत्तिर्ज्ञानं लोहांतकुंतवत् जाड्यमज्ञानमेता
भ्यां व्याप्तः कुंभो द्विधोच्यते ६ श्रीरामाय नमः श्रीः ॥

त्याचार्यैरभिधानात् तत्र दृष्टांतो लोहांतकुंतवदिति जाड्यं स्वतःस्फूर्तिरहितत्वमज्ञानमित्युच्यते एताभ्यां पर्यायेण व्याप्तः सर्वतः संबद्धः कुंभो ज्ञात इत्यज्ञात इति चोच्यत इत्यर्थः ॥ ६ ॥

इदानीं देहांतःकूटस्थचिदाभासयोर्भेदप्रदर्शनायदेहाद्बहिरपिचिदाभासब्रह्मणोर्विभज्यदर्शयति
घटैकाकारेति घटैकाकारधीस्थाचिद्घटस्यैवैकस्याकारइवाकारो यस्याःसाघटैकाकारा तथा
विधायांबुद्धौवर्तमानःचिदाभासोघटमेकमेवावभासयेत् तस्यघटस्यज्ञातताख्योधर्मोघटोज्ञा
तइतिव्यवहारहेतुर्यःसघटकल्पनाधिष्ठानेनब्रह्मचैतन्येनसाधनभूतेन अवभास्यतप्रकाश्यत

घटैकाकारधीस्थाचिद्घटमेवावभासयेत् घटस्यज्ञातताब्रह्मचैतन्येनावभास्यते ४
अज्ञाततत्वेनभातोयंघटोबुद्ध्युदयात्पुरा ब्रह्मणैवोपरिष्टात्तुज्ञातत्वेनेत्यसौभिदा ५

इत्यर्थः ४ ननुज्ञाततावभासकचैतन्येनैवघटप्रतीतिसंभवाद्बुद्धिःकिमर्थेत्याशंक्यघटस्यज्ञातता
दिभेदसिद्ध्यर्थेत्याह अज्ञाततत्वेनेति बुद्ध्युदयात्पुराएवंघटोब्रह्मणैवाज्ञाततत्वेनाप्रकाशितोबुद्ध्युत्प
त्तौसत्यांज्ञातत्वेनब्रह्मणैवप्रकाश्यतइतीयानेवभेदः नान्यइत्यर्थः ५ ॥ श्रीः ॥

२
श्रीः

ननु तत्र दर्पणादित्यदीप्तिव्यतिरेकेण खादित्यदीप्तिर्नोपलक्ष्यते इत्याशंक्य तामप्यस्तां विभज्य दर्शयति
अनेकदर्पणादीति यथा अनेका बहुदर्पणजन्याः कुड्ये तत्र तत्र मंडलाकारा विशेषप्रभा दृश्यंते तासां सं
धौ मध्ये मध्ये इतरा सामान्यप्रकाशरूपा खादित्यप्रभा व्यज्यते अभिव्यक्तोपलभ्यते तासां दर्पणज
णा॥५ न्यप्रभाणामभावे दर्पपगमादिना सत्येव च स्वयं सर्वत्र प्रकाशते २ दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजय

अनेकदर्पणादित्यदीप्तीनां बहुसंधिषु इतरा व्यज्यते तासामभावेपि प्रकाशते २
चिदाभासविशिष्टानां तथानेकधियामसौ संधिं धियामभावं च भासयन्प्रविविच्यतां ३

ति चिदाभास इति तथा तेनैव प्रकारेण चिदाभासविशिष्टानां चित्प्रतिबिंबयुक्तानामनेकधियामने
कासां बुद्धिवृत्तीनां घटज्ञानादिरूपव्याप्यानां संधिमंतरालं जाग्रदादौ धियां तासामेव बुद्धिवृत्तीनां
अभावं च सुषुप्त्यादौ भासयन्प्रकाशयन्नसौ कूटस्थः प्रविविच्यताम् ताभ्यो भेदेन ज्ञायतामित्यर्थः ३

मंयाउ

श्रीगुरवेनमः जीवईशोविशुद्धाचिद्भेदस्तस्यास्तयोर्द्वयोः अविद्यातच्चितोर्योगःषडस्माकमनादयः १ तस्याभिध्यानाद्योजनात्तत्वभावाद्भूयश्चांतेविश्वांनिवृत्तिरितिश्रुतिः अवरणपरिपाकोभिध्यानंसानेनने त्रीभावोयोजनं जीवब्रह्मणोरितिर्विदेहकैवल्येनतत्वभावः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ कुर्वेकूटस्थदीपस्यव्याख्यांतात्पर्यदीपिकाम् १ मुमुक्षोर्मोक्षसाधनस्यब्रह्मात्मैकत्वज्ञानस्यत्वंपदार्थशोधनपूर्वकत्वात्त्वंपदार्थशोधनपरंकूटस्थदीपाख्यंग्रंथमारभमाणआचार्योऽस्यग्रंथस्यवेदांत

स्वादित्यदीपितेकुड्येदर्पणादित्यदीप्तिवत् कूटस्थभासितोदेहोधीस्थजीवेनभास्यते १

प्रकरणत्वेनतदीयैरेवविषयादिभिः तद्वत्तासिद्धिमभिप्रेत्यत्वंपदलक्ष्यवाच्योःकूटस्थजीवयोःसदृष्टांतंभेदंनिर्दिशति स्वादित्यदीपितइति खेआदित्यः स्वादित्यः प्रसिद्धः सूर्यइत्यर्थः तेनचतत्संबंध्यालोको लक्ष्यते तेनदीपितेप्रकाशितेकुड्येदर्पणादित्यदीप्तिवद्दर्पणेषुनिपात्यपर्यावर्तितैः कुड्यसंबंधैरादित्यरश्मिभिस्तत्प्रकाशनमिवकूटस्थभासितः कूटस्थेनाविकारिचैतन्येनभासितः प्रकाशितोदेहोधीस्थजीवेनबुद्धिस्थचिदाभासेनभास्यतेप्रकाश्यते अनेनसामान्यतोविशेषतश्चकुड्याद्यवभासकादित्यप्रकाशद्वयमिवदेहावभासकचैतन्यद्वयमस्तीतिप्रज्ञातंभवति ॥ १ ॥ श्रीरामकृष्णगोपालहरे ॥

१

श्रीः

इदानीमुपपादितमर्थं संक्षिप्य दर्शयति देहाभिमानमिति मरणशीले देहेऽहमित्यभिमान परित्यागात्स्वयमेवममृतोभूत्वाऽत्रास्मिन्नेवशरीरे स्वस्यनिजं स्वरूपं सदानंदचिद्रूपं ब्रह्मप्राप्नोतीत्यर्थः ५७ ध्यानदीपानुसंधानफलमाह ध्यानदीपमिति १५८ ॥ ९

देहाभिमानंविध्वस्यध्यानादात्मानमद्वयम् पश्यन्मर्त्योऽमृतोभूत्वा
ह्यत्रब्रह्मसमश्नुते ५७ ध्यानदीपमिमंसम्यक्परामृशतियोनरः मु
क्तसंशयएवायंध्यायतिब्रह्मसंततम् १५८ इतिध्यानदीपःसमाप्तः ९

इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिकिंकरेणश्रीरामकृष्णाख्यविरचिताध्यानदीपव्याख्यासमाप्ता ॥ ९ ॥ श्रीरामकृष्णगोपालहरे श्रीरामः

अनुभूतेरिति ध्यानाद्धि ब्रह्मप्राप्तौ कैमुतिकन्यायमाह अप्यसदिति उपासकस्य पूर्वं मयि धर्मा
नमपि देवत्वादिकं ध्यानात्प्राप्यते किल स्वरूपत्वेन नित्यप्राप्तं सर्वात्मकं ब्रह्म ध्यानात्प्राप्यत इति किमु

अनुभूतेरभावेऽपि ब्रह्मास्मीत्येव चिंत्यताम् अप्यसत्प्राप्यते ध्यानान्नित्या
प्तं ब्रह्म किं पुनः ५५ अनात्मबुद्धिशैथिल्यं फलं ध्यानाद्दिने दिने पश्य
न्नपि न चेद्ध्यायेत्कोऽपरोऽस्मात्पशुर्वद ५६ श्रीरामो जयतितराम् ॥

वक्तव्यमित्यर्थः ५५ ब्रह्मध्यानफलस्य प्रत्यक्षसिद्धत्वादपि ध्यानं कर्तव्यमित्याह अनात्मेति पृद
श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

विचारजन्यज्ञानसंपादनासमर्थस्य निर्गुणब्रह्मध्यानेऽधिकार इत्ययमर्थ आत्मगीतायां सम्यगभिहित इत्याह अर्थोयमिति ५१ आत्मगीतावाक्यान्येवोदाहरति साक्षात्कर्तुमिति ५२ ध्यानस्य

अर्थोयमात्मगीतायामपिस्पष्टमुदीरितः विचारक्षमआत्मानमुपासीतेतिसंततम् ५१ साक्षात्कर्तुमशक्तोपिचिंतयेन्मामशंकितः कालेनानुभवारूढोभवेयंफलितोध्रुवम् ५२ यथागाधनिधेर्लब्धौनोपायःखननंविना मल्लाभेपि तथास्वात्मचिंतांमुक्त्वानचापरः ५३ देहोपलमपाकृत्यबुद्धिकुद्दालकात्पुनः खात्वामनोभुवंभूयोगृह्णीयान्मांनिधिंपुमान् ५४ ॥ श्रीः ॥

सम्यग्ज्ञानोपायत्वे दृष्टान्तमाह यथेति दार्ष्टान्तिके योजयति मल्लाभेपीति ५३ व्यतिरेकेणोक्तमर्थमन्वयमुखेनाह देहोपलमिति ५४ ज्ञानेऽसमर्थस्य ध्यानेऽधिकार इत्यत्र वाक्यान्तरं पठति ॥

इदानीं प्रणवोपासनप्रसंगाद्बुद्धिस्थं तद्द्वैविध्यं दर्शयति प्रणवेति ४७ द्वैविध्ये प्रमाणमाह परापरे-
ति एतद्वै सत्यकामाय परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेन एकतरमन्वेतीत्युभयरूपत्वं

प्रणवोपास्तयः प्रायो निर्गुणा एव वेदगाः क्वचित्सगुणतापूर्वकाः प्रणवोपासनस्य हि
४७ परापरब्रह्मरूपत्वेॐकार उपवर्णितः पिप्पलादेन मुनिना सत्यकामाय पृच्छ-
ते ४८ एतदालंबनं ज्ञात्वा यो यदिच्छति तस्य तत् इति प्रोक्तं यमेनापि पृच्छते न-
चिकेतसे ४९ इह वा मरणे वास्य ब्रह्मलोकेऽथवा भवेत् ब्रह्मसाक्षात्कृतिः सम्य-
गुपासीनस्य निर्गुणम् ५०

प्रतिपादितमित्यर्थः ४८ कठवल्ल्यां यमेनापि एतदालंबनं
ज्ञात्वेत्यादिना द्वैविध्यमुक्तमित्याह एतदिति ४९ उक्तमर्थमुपसंहरति इहवेति ५० ॥

पंचदशी

१२६

ननुशैव्यप्रश्नेसकामस्यब्रह्मलोकगतिरितिनमुक्तिः प्रतीयतएवइत्याशंक्याहतत्रतत्त्वसाक्षात्कारःस्यात
इत्याह सएतस्मादिति ब्रह्मलोकंगतःसउपासकएतस्माज्जीवघनाज्जीवसमष्टिरूपाद्धिरण्यगर्भा
त्परमुत्कृष्टंपुरुषंनिरुपाधिकचैतन्यरूपंपरमात्मानमीक्षतेसाक्षात्करोतीत्यर्थः ४४ किंचाप्रती
कालम्बनान्नयतीतिबादरायणः उभयथापिअदोषात्तत्क्रतुश्चेत्यत्रकामानुसारेणफलप्राप्ति

सएतस्माज्जीवघनात्परंपुरुषमीक्ष्यते ४४ अप्रतीकाधिकरणेतत्क्रतुन्यायईरि
तः ब्रह्मलोकफलंतस्मात्सकामस्येतिवर्णितम् ४५ निर्गुणोपास्तिसाम
र्थ्यात्तत्रतत्त्वमवेक्षते पुनरावर्तनेनायंकल्पांतेतुविमुच्यते ४६ ॥

र्भवतीतिप्रतिपादितम् तस्मादपिसकामस्यब्रह्मलोकगतिरित्युक्तेत्याह अप्रतीकेति ४५ तर्हिसका
मस्यतत्त्वज्ञानंकुतोजायतइत्याशंक्याह निर्गुणेति इदंमानवमावर्तंनावर्तंतेनसपुनरावर्ततेनसपुन
रावर्ततेब्रह्मणासहतेसर्वेइत्यादिश्रुतिस्मृतिसद्भावान्नतस्यपुनःसंसारप्राप्तिः किंतुमुक्तिरेवेत्याह ॥
पुनरिति ४६ श्रीः

२६

श्रीः

ननूपासनयापि मुक्तिः स्याच्चेन्नान्यः पंथा विद्यतेऽयनायेति श्रुतिविरोध इत्याशंक्य विद्याव्यवधानेन मोक्षप्रदत्वाभिधानान्न विरोध इत्याह उपासनस्येति ४२ मरणाद्ब्रह्मलोके यातस्य तत्त्वविज्ञानमुच्यत इत्युक्तार्थे श्रुतिद्वयं प्रमाणयति निष्कामेति तत्र सोऽकामो निःकाम इत्यादिना तापनीयवाक्यं द्वयमे

उपासनस्य सामर्थ्याद्विद्योत्पत्तिर्भवेत्ततः नान्यः पंथा इति ह्येतच्छास्त्रेणैव विरुध्यते ४२ निष्कामोपासनान्मुक्तिस्तापनीये समीरिता ब्रह्मलोकः सकामस्य शैब्यप्रश्ने समीरितः ४३ य उपास्ते त्रिमात्रेण ब्रह्मलोके स नीयते ॥

योग्राहतम् ४३ इत्थं प्रश्नोपनिषद्वाक्यमर्थतः पठति य उपास्त इति यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोके स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत इति सकामस्य ब्रह्मलोकप्राप्तिः श्रूयत इत्यर्थः ॥ ॥ ॥

ननुनिर्गुणोपासनस्यमानसक्रियारूपस्यमुक्तिसाधनत्वाभिधानंविरुद्धमित्याशंक्यतज्जन्यज्ञानस्य
मोक्षसाधनान्नविरोधइत्याह तत्सामर्थ्यादिति तत्रदृष्टांतमाह अविमुक्तेति ५० ननुनिर्गुणोपा
सनस्यमोक्षफलमित्यत्रकिंप्रमाणमित्याशंक्याह सोकामइति सोऽकामोनिष्कामआप्तकामआ
त्मकामोनतस्यप्राणाउत्क्रामंत्यत्रैवसमवलीयंते ब्रह्मैवसन्ब्रह्माप्येति अशरीरोनिरिन्द्रियोऽ

तत्सामर्थ्याज्जायतेधीर्मूलाविद्यानिवर्तिका अविमुक्तोपासनेनतारकब्रह्मबुद्धिवत् ५०
सोकामोनिष्कामइतिह्यशरीरोनिरिंद्रियः अभयंहीतिमुक्तत्वंतापनीयेफलंश्रुतम् ५१

प्राणोह्यमनाःसच्चिदानंदमात्रःसस्वराड्भवतियएवंवेद चिन्मयोह्ययमोंकारश्चिन्मयमिदंसर्वंतस्मा
त्परमेश्वरएवैकमेवह्येतदमृतमभयमेतद्ब्रह्माभयंहिवैब्रह्मभवति यएवंवेदेतिरहस्यमित्यादिवाक्ये
स्तापनीयोपनिषदिनिर्गुणोपासनस्यमोक्षःफलत्वेनश्रुतइत्यर्थः ॥ ५१ ॥ श्रीः ॥

ननूदाहृताभ्यां श्रुतिस्मृतिवाक्याभ्यां अन्त्यप्रत्ययतो भाविजन्माभिधीयते न ज्ञानान्मुक्तिरित्याशंक्यमु
खतस्तथाभिधानमंगीकरोति अन्त्यप्रत्ययत इति कथं तर्हि मरणकाले ज्ञानान्मोक्षो भवतीत्यत्रेदं वा
क्यद्वयं प्रमाणत्वेनोपन्यस्तमित्याशंक्याह तथा सतीति यथा सत्यंत्यप्रत्ययाद्भाविजन्मनिश्चये सति
सगुणोपासकस्य यथा मरणावसरे पूर्वाभ्यासवशात्सगुणब्रह्माकारः प्रत्ययो जायते एवं निर्गुणोपा

अंत्यप्रत्ययतो नूनं भाविजन्म तथा सति निर्गुणप्रत्ययोपि स्यात्सगुणोपासने यथा ३८
नित्यं निर्गुणरूपं तन्नाममात्रेण गीयताम् अर्थतो मोक्ष एवैष संवादिभ्रमवन्मतः ३७

सकस्यापि निर्गुणब्रह्मगोचरः प्रत्ययो जनिष्यत इत्यर्थः ३८ ननु निर्गुणस्य प्रत्ययाभ्यासवशान्निर्गु
णब्रह्मप्राप्तिरेव भवेन्न मुक्तिरित्याशंक्य ब्रह्मप्राप्तिमुक्त्योः शब्दमात्रेण भेदो नार्थत इत्याह नित्येति तद्ब्र
ह्म नित्यमिति निर्गुणमिति नाममात्रेणोच्यतामर्थतस्त्वेष मोक्ष एव स्वस्वरूपावस्थितिर्मुक्तिरित्य
भिधानादिति भावः तत्र दृष्टान्तमाह संवादीति यथा संवादिभ्रमो नाममात्रेण भ्रम इत्युच्यते वस्तु
तस्तत्वज्ञानमेव तद्वदित्यर्थः ३९

योगसांख्ययोरुभयोरपि तत्त्वज्ञानद्वारा मुक्तिसाधनत्वे गीतावाक्यं प्रमाणयति यत्सांख्यैरिति यत् सांख्यं च योगं च फलत एव एकं पश्यति स शास्त्रार्थं सम्यक् पश्यतीत्यर्थः ३४ न केवलं गीतावाक्यं प्रमाणं किंतु तन्मूलभूता श्रुतिरप्यस्तीत्याह तत्कारणमिति ननु सांख्ययोगयोस्तत्त्वज्ञानसाधनत्वेनांगीकारे तच्छास्त्रप्रतिपादितानां तत्त्वानामपि स्वीकार्यत्वं स्यादित्याशंक्याह यस्तु श्रुतेरिति आभा

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सांख्यं च योगं च यः पश्यति स पश्यति ३४
तत्कारणं सांख्ययोगाभिपन्नमिति हि श्रुतिः यस्तु श्रुतेर्विरुद्धः स आभासः सांख्ययोगयोः ३५
उपासनं नातिपक्वमिह यस्य परत्र सः मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यते ३६ यं यं
वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् तं तमेवैति यच्चित्तस्तेन यातीति शास्त्रतः ३७ ॥

सो बाध्य इत्यर्थः ३५ ननु उपासनं कुर्वाणस्य तत्त्वज्ञानात्प्राङ् मरणे सति मोक्षो न सिध्येदित्याशंक्याह उपासनमिति ३६ मरणावसरे ज्ञानान्मुक्तिलाभे प्रमाणमाह यं यं वेति यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं नयतीति वाक्याच्चेत्यर्थः ३७ ॥

नन्वात्मतत्त्वविचारं परित्यज्य निर्गुणोपासनं कुर्वतामप्ययं न्यायः समान इत्याशंक्यांगीकरोति उपासकानामिति तर्हि निर्गुणोपासनं कुतः प्रतिपाद्यत इत्याह तस्मादिति यस्मादुक्तन्यायप्रसंगस्तस्माद्विचारासंभवे योगमुपासनमुक्तमित्यर्थः ३१ विचारासंभवे कारणमाह बह्विति यतो विचारेण संभ

उपासकानामप्येवं विचारत्यागतो यदि बाढं तस्माद्विचारस्यासंभवे योग ईरितः ३१
बहुव्याकुलचित्तानां विचारात्तत्त्वधीर्नहि योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति ३२
अव्याकुलधियां मोहमात्रेणाच्छादितात्मनाम् सांख्यानामविचारः स्यान्मुख्यो झटिति सिद्धिदः ३३ ॥

वत्यतो योगः कर्तव्य इत्याह योग इति मुख्यत्वे कारणमाह धीदर्प इति तेन योगेन यतो धीदर्पो नश्यत्यतो मुख्य इत्यर्थः ३२ एवं व्याकुलचित्तानां योगस्य मुख्यत्वमभिधाय तद्रहितानां विचार एव मुख्य इत्याह अव्याकुलेति सांख्यनामा विचारः सांख्यशब्दवाच्यस्तत्त्वविचारो मुख्यः कुत इत्यत आह झटितीति ३३ ॥ श्रीः ॥

पंचदशी
१२३

तत्त्वज्ञानस्वरूपमेव विशदयति निर्विकारेति २८ ननु निर्विकल्पकसमाधिवशादपरोक्षज्ञानमुदेति इत्यत्र किं प्रमाणमित्याशंक्यामृतबिंद्वादिश्रुतनिः प्रमाणमित्याह योगाभ्यास इति फलितमाह एवं च सति निर्गुणोपासनस्यापरोक्षज्ञानप्रत्यासत्तिसंभवे सति दृष्टद्वारापि निर्विकल्पकसमाधि

निर्विकारासंगनित्यस्वप्रकाशैकपूर्णता बुद्धौ झटिति शास्त्रोक्ता आरोहत्यविवादतः २८
योगाभ्यासस्त्वेतदर्थोऽमृतबिंद्वादिषु श्रुतः एवं च दृष्टद्वारापि हेतुत्वादन्यतो वरम् २९
उपेक्ष्य तत्तीर्थयात्रां जपादीनेव कुर्वताम् पिंडं समुत्सृज्य करं लेढीति न्याय आपतेत् ३०

लाभद्वारेणापि शब्दाद्दृष्टद्वारापि हेतुत्वात् ज्ञानसाधनत्वादन्यतः सगुणोपासनाभ्यो वरं श्रेष्ठमित्यर्थः २९ एवं निर्गुणोपासनस्यापरोक्षज्ञानसाधनत्वे सिद्धे सति तत्परित्यज्यान्यत्र प्रवर्त्तमानानां वृथाश्रमः स्यादिति लौकिकन्यायप्रदर्शनेनाह उपेक्ष्येति ॥ ३० ॥ श्रीः ॥ . श्रीः

२३
श्रीः

नन्वेवंसतिमूर्तिध्यानादेरपिचित्तैकाग्र्यसंपादनद्वाराऽपरोक्षज्ञानसाधनत्वंस्यादितिचेत्तदंगी
क्रियतइत्याह मूर्तीति तर्हिनिर्गुणोपासनेकोविशेषइत्यत्राह तथापीति प्रत्यासत्तिःसामीप्यंज्ञानंप्र
तीतिशेषः २५ प्रत्यासत्तिप्रकारमेवदर्शयति निर्गुणेति निर्गुणोपासनंयदापक्वंभवति तदास
विकल्पकःसमाधिःस्यात्ततःसविकल्पसमाधेर्निरोधाख्योयःतस्यापिनिरोधेसर्वनिरोधान्निर्वी

मूर्तिध्यानस्यमंत्रादेरपिकारणतायदि अस्तुनामतथाप्यत्रप्रत्यासत्तिर्विशिष्यते २५
निर्गुणोपासनंपक्वंसमाधिःस्याच्छनैस्ततः यःसमाधिर्निरोधाख्यःसोनायासेनल
भ्यते २६ निरोधलाभेपुंसोंतःसंगवस्तुशिष्यते पुनःपुनर्वासितेस्मिन्वाक्याज्जाये
ततत्वधीः २७ ॥ श्रीः

जःसमाधिरितिसूत्रोक्तलक्षणोविकल्पःसमाधिःसोनायासेनलभ्यते २६ भवत्वेवंनिर्विकल्पक
लाभःततःकिमित्यतआह निरोधेति ततोकिमित्यतआह पुनःपुनरिति अस्मिन्नसंगवस्तुनिपुनः
पुनःवासितेभावितेसतिवाक्यात्तत्वमस्यादिलक्षणात्तत्वधीस्तत्वज्ञानमहंब्रह्मास्मीत्येवमाकारं
जायेतउत्पद्येत २७

पंचदशी
१२२

इत्यनुष्ठानाच्छ्रैष्ठ्यमेवदर्शयति पामराणामिति २१ उत्तरोत्तरश्रैष्ठ्येकारणमाह यावदिति नि
र्गुणोपासनस्यसर्वश्रैष्ठ्येकारणमाह ब्रह्मज्ञानायेति २२ उक्तमर्थंदृष्टांतप्रदर्शनपूर्वकंदृढय

पामराणांव्यवहृतेर्वरंकर्माद्यनुष्ठितिः ततोपिसगुणोपास्तिर्निर्गुणोपास
नंततः २१ यावद्विज्ञानसामीप्यंतावच्छ्रैष्ठ्यंविवर्धते ब्रह्मज्ञानायतेसाक्षा
न्निर्गुणोपासनंशनैः २२ यथासंवादिविभ्रांतिःफलकालेप्रमायते वि
द्यायतेतथोपास्तिर्मुक्तिकालेतिपाकतः २३ संवादिभ्रमतःपुंसःप्रवृत्त
स्यान्यमानतः प्रमेतिचेत्तथोपास्तिर्मान्तरेकारणायताम् २४ ॥ ॥

तियथेति २३ ननुसंवादिविभ्रांतिःस्वयमेवनप्रमाभवतिकिंतुतयाप्रवृत्तस्येंद्रियार्थसंनिकर्षा
त्प्रमाजायतइतिशंकते संवादीति अस्तुतर्हिनिर्गुणोपासनमपिनिदिध्यासनरूपंसद्वाक्यजन्याप
रोक्षज्ञानेकारणंभविष्यतीत्याह तथोपास्तिरिति ॥ २४ ॥ श्रीः ॥ श्रीः ॥

२२

श्री

वास्तवत्वादेव ज्ञानेन नैव जन्यत इत्याह तत इति यतोऽदो ब्रह्मत्वं नित्यं ततो ज्ञानं तस्याभिज्ञापकमेव बोधकमेव न जनकमित्यर्थः तत्रोपपत्तिं व्यतिरेकमुखेनाह ज्ञापकेति अयमभिप्राय ब्रह्मत्वं यदि ज्ञानजन्यं स्यात्तर्हि ज्ञाननाशे स्वयं विलीयेत न च विलीयतेऽतो न जन्यत इत्यर्थः १८ ननु ज्ञानिवदुपासकस्यापि ब्रह्मत्वं वास्तवमस्त्येवेति शंकते अस्त्येवेति अत्यल्पमिदमुच्यत इत्यभिप्रायेणाह पामराणामिति

ततोऽभिज्ञापकं ज्ञानं नित्यं जनयत्यदः ज्ञापकाभावमात्रेण न हि सत्यं विलीयते १८
अस्त्येवोपासकस्यापि वास्तवी ब्रह्मतेति चेत् पामराणां तिरश्चां च वास्तवी ब्रह्मता न किम् १९
अज्ञानात्पुरुषार्थत्वमुभयत्रापि तत्समम् उपवासाद्यथा भिक्षा वरं ध्यानं तथान्यतः २०

१९ पामरादीनां विद्यमानमपि ब्रह्मतत्त्वमज्ञातत्वान्न पुरुषार्थोपयोगीत्याशंक्याज्ञातत्वेनापुरुषार्थोपयोगित्वमुपासकस्यापि समानमित्याह अज्ञानादिति ननु तर्ह्युपासनं किमर्थमभिधीयत इत्याशंक्येतरानुष्ठानेभ्यः श्रेष्ठत्वाभिप्रायेणोक्तमिति दृष्टान्तपूर्वकमाह उपवासाद्यथेति ॥ २० ॥ श्री

ननुजगत्प्रपंचस्यमिथ्यात्वज्ञानेनतत्रेच्छैवनोदियादितिचेत्तर्हिस्वकर्मानुसारेण वर्त्ततामित्याह मिथ्यात्वेति १५ इदानीमुपासकस्यातोवैषम्यंदर्शयति उपासकस्त्विति तत्रोपपत्तिमाह यतइति यतःकारणात्तस्यब्रह्मत्वंध्यानेनैवकृतंनप्रमाणेनप्रमितमतोध्यायिनासदाध्यानंकर्तव्यमित्यर्थः तत्रदृष्टांतः विष्णुत्वेति यथास्वस्मिन्ध्यानेनसंपादितस्यविष्णुत्वादेःपरमार्थिकत्वंनास्तितद्वदित्यर्थः १६ ध्यानसंपादितस्यापितस्यपारमार्थिकत्वंकिंनस्यादित्याशंक्यध्यानसंपादितस्यवाग्धेनुत्वादेर्ध्यानापायेपगमदर्शनात्तमेवमित्याह ध्यानेति ज्ञानेनप्रकाशितस्यब्रह्मत्वस्यतुततोवैलक्षण्यमाह वास्तवीति हेतुगर्भितंविशेषणंयतोब्रह्मत्वंवास्तवमतोज्ञापकज्ञानाभावेसतिनैवविलीयते १७

मिथ्यात्वबुद्ध्यातत्रेच्छानास्तिचेत्तर्हिमास्तुतत् ध्यायन्वाथव्यवहरन्यथारब्धंवसत्वयम् १५ उपासकस्तुसततंध्यायन्नेववसेद्यतः ध्यानेनैवकृतंतस्यब्रह्मत्वंविष्णुतादिवत् १६ ध्यानोपादानकंयत्तद्ध्यानाभावेविलीयते वास्तवीब्रह्मतानैवज्ञानाभावेविलीयते १७ ॥ श्रीः ॥

एतेपिभोगतृष्णयैविषयान्संपादयेयुरित्याशंक्यतदातेषांपतितत्वमेवहीयतेतत्त्वभिप्रायेणोपहसति
भिक्षावस्त्रादीति १२ विषयलंपटैःपामरैःक्रियमाणयानिंदयाक्रियापराणांविशिष्टानांहानिर्नास्ती
त्युच्यतेचेन्नहिदेहाभिमानिभिःक्रियापरैःक्रियमाणयानिंदयातत्त्वविदोपिनहानिरित्यर्थः वर्णाश्रम

भिक्षावस्त्रादिरक्षेषुर्यद्यपेतेभोगतृष्णये अहोपतितत्वमेतेषांवैराग्यभरमंपरम्
१२ वर्णाश्रमपरान्मूढानिंदंत्वित्युच्यतेयदि देहात्ममतयोबुद्धंनिंदंत्वाश्रम
मानिनः १३ तदित्थंतत्त्वविज्ञानेसाधनानुपमर्दनात् ज्ञानिनाचरितुंश
क्यंसम्यग्राज्यादिलौकिकम् १३ ॥ श्रीः ॥ श्रीः ॥ श्रीः

पराणीति १३ प्रासंगिकंपरिसमाप्यप्रकृतमनुसरति तदित्थमिति तत्तस्मात्कारणादित्थमुक्तेन
प्रकारेणतत्त्वविज्ञानेसतिसाधनानुपमर्दनाल्लौकिकव्यवहारसाधनानांमनआदीनांअविलापना
ल्लौकिकंराज्यादिराज्यपरिपालनादिकर्मवाज्ञानिनासम्यगाचरितुंशक्यमित्यर्थः १४ ॥

ननु व्यासादीनां तत्त्वविदामपि शापादिसामर्थ्यं दृश्यत इत्याशंक्य तेषां न तत्त्वज्ञानफलमपि तु तपःफलमित्याह व्यासादेरपीति ननु तर्हि तपोबलविहीनस्य जिज्ञासोस्तपोरहितस्य तत्त्वज्ञानमपि न घटेतेत्याशंक्य शापादिकारणादन्यस्य तपसः सत्वान्नैवमित्याह शापादिकारणादिति ९ तर्हि तेषां

व्यासादेरपि सामर्थ्यं दृश्यते तपसो बलात् शापादिकारणाद
न्यत्तपो ज्ञानस्य कारणम् ९ द्वयं यस्यास्ति तस्यैव सामर्थ्यज्ञानयो
र्जनि एकैकं तु तपः कुर्वन्नेकैकं लभते फलम् १० सामर्थ्यहीनो
निंद्यश्चेद्यतिभिर्विधिवर्जितः निंद्यंते यतयोप्यन्यैरनिशं भोगलंपटैः ११

व्यासादीनां तत्त्वज्ञानित्वं शापादिकारणत्वं चैकत्र दृश्यत इत्याशंक्योभयविधतपसः सद्भावादित्याह द्वयमिति १० ननु शापादिसामर्थ्यरहितः तस्य विद्वद्भावेपि विहितानुष्ठातृभिः निंद्यत्वं स्यादित्याशंक्य तेषामपि विषयलंपटैर्निंद्यत्वं स्यादित्याह सामर्थ्येति ११ ॥ श्रीः ॥

भवत्येवं प्रसक्ते किमायातमित्यत आह एवमिति कस्य तर्ह्यतिप्रसंग इत्यत आह प्रसंग इति ५ एवंक
दृष्टमित्यत आह विघ्नभावादिति दृष्टीति के योजयति स्यात्कुत इति ६ बालस्य विघ्नभावे प्रयो
जकमस्तत्वमस्ति नाविदुष इत्याशंक्य तस्यास्तत्वाभावेपि विघ्नभावप्रयोजकं सर्वज्ञत्वमस्तीत्याह न

एवंनास्तिप्रसंगोपिकुतोऽस्यातिप्रसंजनम् प्रसंगोयस्यतस्यैवसंकेतातिप्रसंजनम् ५
विघ्नभावान्नबालस्यदृश्यतेऽतिप्रसंजनम् स्यात्कुतोतिप्रसंगोस्यविघ्नाभावेसमेसति ६
नाकिंचिद्वेत्तिबालश्चेत्सर्वंवेत्त्येवतत्ववित् अल्पज्ञस्यैवविधयः सर्वेस्युर्नान्ययोर्द्वयोः ७
शापानुग्रहसामर्थ्यंयस्यासौनतत्वविद्यदि तन्नशापादिसामर्थ्यंफलंतपसोयतः ८

किंचिद्वेत्ति तर्हि विध्यधिकारः कस्येत्याशंक्याह अल्पज्ञस्येति ७ ननु व्यासादिवच्छापानुग्रह
सामर्थ्यं यस्य स एव तत्वविन्नान्य इति शंकते शापानुग्रहेति परिहरति तन्नेति तत्र हेतुमाह शापानु
ग्रहेति ८ ॥ श्री: ॥

ननुतत्वविन्निश्चयःतावत्तिष्ठतुशास्त्रंतुतस्यकर्त्तव्यंप्रतिपादयतीत्याशंक्यतदपितस्यकर्तव्याभाव
मेवबोधयतीत्याह समाधिमिति योहृदयेनबुध्या अस्तसर्वास्थोऽस्ताःपरित्यक्ताअशेषाआशा
क्तिविशेषायस्यसेतथाविधः अतएवोक्तमाशयउक्तम-आशयोऽभिप्रायोनिर्मलंज्ञानंयस्यसत

समाधिमथकर्माणिमाकरोतुकरोतुवा हृदयेनास्तसर्वास्थोमुक्तएवोत्तमाशयः १०२
नैःकर्मेणनतस्यार्थस्तस्यार्थोस्तिनकर्मभिः नसमाधानजाप्याभ्यांयस्यनिर्वासनंमनः १०३
आत्मासंगस्ततोऽन्यत्स्यादिंद्रजालंहिमायिकम् इत्यचंचलनिर्णीतेकुतोमनसिवासना १०४

योक्तसमुक्तएवातःसमाधिमथकर्माणीत्यन्वयः १०२ विदुषःकर्तव्यंनास्तीत्यत्रवचनांतरमुदाहर
ति नैष्कर्मेणेति नैःकर्म्यंकर्मराहित्यंतेनकर्मत्यागेनेत्यर्थः समाधानंसमाधिः जाप्यंजपः ३ नन्
विदुषामपिवासनानिवृत्तयेध्यानंकर्तव्यमित्याशंक्यसम्यग्ज्ञानिनोवासनैवनास्तीत्याह आत्मेति ४

तर्हि प्रयत्नमभ्युपगमेऽतिप्रसंगः स्यादित्याशंक्य प्रसंगस्य दुर्निरूपत्वान्मैवमिति परिहरति अतिप्रसंग इ-
ति न प्रसंगो दुर्निरूपो विधिशास्त्रस्य प्रसंगशब्देन विवक्षितत्वात् इति चेन्न तस्याज्ञानविषयत्वेन तत्त्ववि-

अतिप्रसंग इति चेत्प्रसंगं तावदीरय प्रसंगो विधिशास्त्रं चेन्न तत्तत्त्ववि-
दं प्रति ९९ वर्णाश्रमवयोवस्थाभिमानो यस्य विद्यते तस्यैव च नि-
षेधाश्च विधयः सकला अपि १०० वर्णाश्रमादयो देहे मायया प-
रिकल्पिताः नात्मनो बोधरूपस्येत्येवं तस्य विनिश्चयः १०१

द्विषयत्वाभावादित्याह प्रसंग इति ९९ विधिशास्त्रमित्युपलक्षणं निषेधशास्त्रस्यापि विधिशास्त्र-
स्याविद्वद्विषयत्वमेव दर्शयति वर्णाश्रमेति १०० ननु तत्त्वविदोपि देहधारित्वेन वर्णाश्रमाद्यभि-
मानित्वमस्तीत्याशंक्याह वर्णाश्रमादय इति १०१ ॥

पंचदशी

१२०

सममात्मनीत्युक्तमर्थं विवृणोति निश्चित्येति ९५ ननु तत्त्वविदप्युपासकवदात्मानुसंधानवशाज्जगदननुसंधानरहितो दृश्यत इत्याशंक्य सोऽनुसंधानाभावो ध्यानप्रयुक्तो न वेदनप्रयुक्त इत्याह उपासक इवेति ९६ ननु तत्त्वविदापि मुक्तिसिद्धये ब्रह्मध्यानं कर्तव्यमित्याशंक्य ज्ञानादेव तु कैवं

तथा

निश्चित्य सकृदात्मानं यदापेक्षा तदैव तम् वक्तुं मंतुं ध्यातुं शक्नोत्येव हि तत्त्ववित् ९५
उपासक इव ध्यायल्लौकिकं विस्मरेद्यदि विस्मरत्येव सा ध्यानाद्विस्मृतिर्न तु वेदनात् ९६ उ२
ध्यानं त्वैच्छिकमेतस्य वेदनान्मुक्तिसिद्धितः ज्ञानादेव तु कैवल्यमिति शास्त्रेषु डिंडिमः ९७
तत्त्वविद्यदि न ध्यायेत्प्रवर्तेत तदा बहिः प्रवर्ततां सुखेनायं को बाधोऽस्य प्रवर्तने ९८

स्वं प्राप्यते येन मुच्यते तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय तस्मात्यादेवं मुच्यते सर्वपाशैरित्यादिशास्त्रसद्भावान्न मोक्षाय ध्यानं कर्तव्यमित्याह ध्यानं त्विति ९७ ननु तत्त्वविदो ध्यानानभ्युपगमे तस्य सदा बहिः प्रवृत्तिः स्यादित्याशंक्याबाधकत्वात्प्रवृत्तेः साभ्युपेयत इत्याह तत्त्वेति ९८

१२

श्रीः

ननु घटस्य स्थूलत्वेन स्पष्टत्वात्तद्दर्शने चित्तपीडनं नापेक्ष्यते ब्रह्मणस्तु न तथात्वात्ततस्तज्ज्ञाने तदपे
स्व२ क्ष्यत इत्याशंक्य तस्य स्वप्रकाशत्वेन घटादेरपि स्पष्टतरत्वाच्चित्तनिरोधनं नैवापेक्ष्यत इत्याह सकृदिति
९२ ननु ब्रह्मणः स्वप्रकाशत्वेऽपि तद्गोचराया बुद्धिवृत्तेरेव तज्ज्ञानत्वात्तस्याश्च क्षणिकत्वेन ब्रह्म॥

सकृत्प्रत्ययमात्रेण घटश्चेद्भासते तदा स्वप्रकाशोऽयमात्मा किं घटवच्च न भासते ९२
स्वप्रकाशतया किं ते तद्बुद्धिस्तत्त्ववेदनम् बुद्धिः क्षणविनाश्येति चोद्यं तुल्यं घटादिषु ९३
घटादौ निश्चिते बुद्धिर्नश्यत्येव यदा घटः इष्टो नेतुं तदा शक्य इति चेत्सममात्मनि ९४

णि पुनः पुनरवस्थानमपेक्ष्यत इत्याशंक्येदं चोद्यं घटादिष्वपि समानमित्याह स्वप्रकाशतयेति ९३
घटादिज्ञानस्य क्षणिकत्वेऽपि सकृन्निश्चितस्य घटस्य सर्वदा व्यवहर्तुं शक्यत्वात्तत्र चित्तस्थैर्यसंपादन
मप्रयोजनमित्याशंक्येदमात्मन्यपि समानमित्याह घटादाविति ॥ ९४ ॥ श्रीः

अविरुद्धत्वमेव दर्शयति मायामय इति ८८ विरोधाभावमेव प्रपंचयति अपेक्षत इति ८९ कानि व्यवहारसाधनीत्यत आह मनोवागिति तद्बाह्याः पदार्था गृहक्षेत्रादयस्तान्मनआदींस्तत्त्वज्ञानी न वारयति अतोऽस्य ज्ञानिनो व्यवहारः कुतो नो भवति भवत्येवेत्यर्थः ९० ननु विषयानुपमर्दनेपि त

मायामयः प्रपंचोयमात्मा चैतन्यरूपधृक् इति बोधे विरोधः को लौकिकव्यवहारिणः ८८
अपेक्षते व्यवहृतिर्न प्रपंचस्य वस्तुताम् नाप्यात्मजाड्यं किंत्वेषा साधनान्येव कांक्षति ८९
मनोवाक्कायतद्बाह्यपदार्थाः साधनानि तान् तत्त्वविन्नोपमृद्नाति व्यवहारोऽस्य नो कुतः ९०
उपमृद्नाति चित्तं चेद्ध्यातासौ न तु तत्त्ववित् न बुद्धिं मर्दयन्दृष्टो घटतत्त्वस्य वेदिता ९१

त्त्वविदा चित्तोपमर्दनं कार्यमित्याशंक्य तथाकरणे तत्त्वविदेव न स्यादित्याह उपमृद्नातीति न तु तत्त्वविदा चित्तं नोपमृद्यत इत्येतत्क्व दृष्टमित्याशंक्याह न बुद्धिमिति घटतत्त्वस्य वेदिता सा तां बुद्धिं मर्दयन् पीडयन् एकाग्रं कुर्वन् पुरुषो न दृष्टो नोपलब्ध इत्यर्थः ९१ ॥ श्रीः ॥

ननुप्रारब्धकर्मवशाद्विषयाननुभवतः कथंनैरंतर्येणभावनासिद्धिरित्याशंक्यास्थातिशयेसतिविषय
व्यसनिवद्भावनासिद्धिःस्यादित्याह भुंजानइति ८३ दृष्टांतंविवृणोति परेति ८४ परसंगस्वादने
गृहकृत्यविच्छेदःस्यादित्याशंक्याह परसंगमिति ८५ आपातेनैववर्ततइत्युक्तमर्थंविवृणोति गृहकृ

भुंजानोपिनिजारब्धमास्थातिशयतोनिशम् ध्यातुंशक्तोनसंदेहोविषयंव्यसनीयथा ८३
परव्यसनिनीनारीव्यग्रापिगृहकर्मणि तदेवस्वादयत्यंतःपरसंगरसायनम् ८४ परसं
गंस्वादयंत्या अपिनोगृहकर्मतत् कुंठीभवेदपित्वेतदापातेनैववर्तते ८५ गृहकृत्यव्यसनि
नीयथासम्यक्करोतितत् परव्यसनिनीतद्वन्नेकरोत्येवसर्वथा ८६ एवंध्यानैकनिष्ठो
पिलेशाल्लौकिकमाचरेत् तत्त्ववित्त्वविरोधित्वाल्लौकिकंसम्यगाचरेत् ८७ ॥

त्येति ८६ दार्ष्टांतिकेयोजयति एवमिति ननुतत्त्वविदपिलौकिकव्यवहारंकिंलेशेनाचरतिकिंवासम्य
गितिविषयव्यवहारस्यतत्त्वज्ञानाविरोधित्वात्सम्यगेवाचरतीत्याह तत्त्वविदिति ॥ ८७ ॥

आमनिधारणेनिमित्तंदर्शयन्ननिच्छायंननिवर्तयेदित्युक्त्वाबोधधर्माद्वैलक्षण्यमाह पुरुषेति उपास्तिःपुरुषस्योपासकस्येच्छयाकर्तुमकर्तुमन्यथावाप्रकारांतरेणवाकर्तुंशक्याअतःपुरुषस्येच्छाधीनत्वादुपासनंसर्वदाकुर्यादित्यर्थः ८० एवंसर्वदाचिंतनेकिंभवतीत्यतआह वेदेति अप्रमत्तोवे

पुरुषस्येच्छयाकर्तुमकर्तुंकर्तुमन्यथा शक्योपास्तिरतोनित्यंकुर्यात्प्रत्ययसंततिम् ८०
वेदाध्यायीह्यप्रमत्तोऽधीतेस्वप्नेपिवासितः जपितातुजपत्येवतथाध्यातापिवासयेत् ८१
विरोधिप्रत्ययंत्यक्त्वानैरंतर्येणभावयन् लभतेवासनावेशात्स्वप्नादावपिभावनाम् ८२

दाध्यायीसदाध्ययनशीलः जपितासदाजपशीलोवावासितःदृढवासनयास्वप्नादिष्वध्ययनंजपंवाकरोत्येवमुपासकोपिवासनादार्ढ्यात्स्वप्नादावपिध्यायीत्यर्थः ८१ स्वप्नादावपिध्यानानुवर्तनेकारणमाह विरोधीति वासनानुवेशात्संस्कारपाटवात्भावनांध्यानम् ८२ ॥

उपासनायाश्चबोधाद्भेदलक्षणंपांतरसिद्धयेतद्दर्शयति आप्तेति आप्तस्यगुरोरुपदेशमुपास्यस्वरूपप्रति
पादकवाक्यादिजातंविश्वस्यविश्वासंकृत्वाविचारयन् उपास्यतत्वेप्रत्ययैरन्यैर्घटादिविषयैरनंतरितवृ
त्तिभिरव्यवहितवृत्तिभिश्चिंतयेदिति ७७ कियंतंकालंचिंतयेदित्याशंक्याह यावदिति ७८ उपास
कस्यतद्रूपत्वाभिमानमुदाहरणप्रदर्शनेनस्पष्टीकरोति ब्रह्मचारीति कश्चित्संवर्गत्वगुणविशिष्टब्रा

आप्तोपदेशंविश्वस्यश्रद्धालुरविचारयन् चिंतयेत्प्रत्ययैरन्यैरनंतरितवृत्तिभिः ७७ याव
च्चिंत्यस्वरूपत्वाभिमानःस्वस्यजायते तावद्विचिंत्यपश्चाच्चतथैवामृतिधारयेत् ७८ ब्र
ह्मचारीभिक्षमाणोयुतःसंवर्गविद्यया संवर्गरूपतांचित्तेधारयित्वाह्ययाचत ७९

णोपासकोब्रह्मचारीभिक्षाहरणार्थमागत्याभिप्रतारिनाम्नोराज्ञःपुरतोमहात्मनश्चतुरोदेवएकः
सोजगारभुवनस्यगोप्तातंनाभिपश्यंतिमर्त्याः अभिप्रतारिन्बहुधावसंतमितिमंत्रेणस्यात्मनःसंवर्ग
रूपत्वंचित्तेधृत्वाप्रकटीकृतवान्इतिछांदोग्येश्रूयतइत्यर्थः ॥ ७९ ॥ श्रीः ॥ श्रीः

तथोपासनप्रकारमेव दर्शयति आनंदादिभिरिति अत्रासुश्रुतिषु प्रोऽखंडैकरस आत्मा आनंदादिभि रस्थूलादिभिश्च गुणैर्लक्षितः सोहमस्मीत्येवमुपासते गुरुमुखादवगत इति शेषः ७३ नन्वेवं सति वि द्योपासनयोः कुतो भेद इत्याशंक्य वस्तुतंत्रकर्तृतंत्रत्वाभ्यां भेद इत्याह बोधोपास्त्योरिति ७४

आनंदादिभिरस्थूलादिभिश्चात्मात्र लक्षितः अखंडैकरसः सोहमस्मीत्येवमुपासते ७३
बोधोपास्त्योर्विशेषः क इति चेत् कथ्यते शृणु वस्तुतंत्रो भवेद्बोधः कर्तृतंत्रमुपासनम् ७४
विचाराज्जायते बोधोऽनिच्छा यं न निवर्तयेत् सोत्पत्तिमात्रात्संसारे दहत्यखिलसत्यताम् ७५
तावता कृतकृत्यः सन्नित्यतृप्तिमुपागतः जीवन्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षते ७६

वैलक्षण्यांतरसिद्धये बोधस्य हेत्वादिकं दर्शयति विचाराज्जायते बोध इत्यादिना श्लोकद्वयेन विचारा दिति तावता कृतकृत्यः सन्निति विचाराद्वस्तुतत्त्वविचाराद्बोधो जायते किंच विचारबलाज्जायमानं यं बोध मनिच्छा बोधो माभूदित्येवंरूपा न निवर्तयेत् न निवारयेत् उत्पद्यमानश्च बोधः स्वजन्ममात्रात्संसा रेऽखिलप्रपंचस्य सत्यतां दहति नाशयति ७५ तावता तावन्मात्रेणोत्पत्तिमात्रेणानिरतिशयसुखं प्राप्नोती

चोद्यमुचितमित्याह निर्गुणब्रह्मत्वस्येति ७० हिरण्यश्मश्रुत्यादिश्रु.....ण्यश्मश्रुमूर्त्तौ नाम्नमभिधानादिदं २

ननु निर्गुणब्रह्मविद्यायां न गुणोपसंहार एव उच्यते निर्गुणविद्यान्यविरोधादित्याशंक्य सूत्रकारेणैव अभिहितस्योपसंहारस्यास्माभिर्धीयमानत्वान्नोऽस्मान्प्रतीदं निर्गुणोपासनमेवेति चेन्नाहं न विरोध इत्याह हिरण्येति हिरण्यश्मश्रुसूर्यादिनाम मूर्त्तौ नां हिरण्मयानि श्मश्रूणि यस्यासौ हिरण्यश्मश्रुस्तत्पादि

निर्गुणब्रह्मतत्वस्य विद्यायां गुणसंहृतिः न युज्यते त्वुपालंभो व्यासं प्रत्येव मां गत ७० हिरण्यश्मश्रुसूर्यादिमूर्त्तौ नामनुरुद्धतेः अविरुद्धं निर्गुणत्वमिति चेद्बुध्यतां त्वया ७१ गुणानां लक्षकत्वेन न तत्वे तत्प्रवेशनम् इति चेदस्त्वेवमेव ब्रह्मतत्वमुपास्यताम् ७२

यः सर्वो हिरण्यश्मश्रुः सर्यो हि स आदित्ये यांते हिरण्यश्मश्रुसूर्यादयः तेषां मूर्त्तयो हिरण्यसूर्यादिमूर्त्तयः तासामिति विग्रहः ७१ नन्वानंदादीनामस्थूलादीनां च गुणानामुपास्यतत्वे ततः प्रवेशाभावात्तद्गुणविशिष्टत्वेन कथमुपास्यत्वमित्याशंक्यते यांतत्वांतः प्रवेशाभावेऽपि लक्षकत्वसंभवात्तैर्लक्षितं ब्रह्मोपास्यमित्याह गुणानामिति ७२ ॥ :

एवं प्रासंगिकं परिसमाप्य प्रकृतमनुसरति तिष्ठंत्विति सर्ववेदांतप्रत्ययं चोदनाद्यविशेषादित्युक्त
न्यायेन निर्गुणोपासनस्यैकत्वात्तासु शाखासु श्रुतानुपास्यगुणानेकत्रोपसंहृत्योपासनं कर्तव्यमित्या
ह विधैक्यादिति ९७ ते च गुणाः द्विप्रकाराः विधेया निषेध्याश्चेति तत्रानंदो ब्रह्म विज्ञानमानंदं
ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनो विभुरद्वय आनंदः परः प्रत्यगेकरस इत्यादयो विधेयगु

तिष्ठंतु मूढाः प्रकृता निर्गुणोपास्तिरीर्यते विधैक्यात्सर्वशाखास्थान्गुणानत्रोपसंह
रेत् ९७ आनंदादेर्विधेयस्य गुणसंघस्य संहृतिः आनंदादय इत्यस्मिन्सूत्रे व्यासे
न वर्णिता ९८ अस्थूलादेर्निषेधस्य गुणसंघस्य संहृतिः तथा व्यासेन सूत्रेऽस्मि
न्नुक्ताक्षरधियां त्विति ९९

णास्तेषामुपसंहारस्त्वानंदादयः प्रधानस्येत्यस्मिन्नधिकरणेऽभिहित इत्याह आनंदादेरिति ९८
यथास्थूलमनण्वह्रस्वमदीर्घं तदद्रेश्यमग्राह्यमशब्दमस्पर्शमरूपमव्ययमित्यादयो निषेध्यगुणा
स्तत्र तत्र श्रुतास्तेषामुपसंहारोऽक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तमित्यस्मिन्नधि
करणेऽभिहितमित्याह अस्थूलादेरिति ९९

त्यादपलापोनयुक्तइत्याह नानुतिष्ठतीति ६३ प्रमाणसिद्धस्याऽनुष्ठानाभावेनापरित्याज्य उरिः ३

नन्वेतदुपासनंज्ञानसाधनमेवनमुक्तिसाधनमित्याशंक्यब्रह्मज्ञानोपास्त्यापिमुच्यतइतियदुक्तमस्मा
कमनुकूलमित्याह ज्ञानेति ६४ ननुसगुणोपासनमेवसर्वैरनुष्ठीयतेननिर्गुणोपासनमित्याशंक्यतत
स्यप्रमाणसिद्धस्यानुष्ठानाभावेनापरित्याज्यत्वेदृष्टान्तमाह इतोपीतिअयमभिप्रायः यथासगुणो

ज्ञानसाधनमेतच्चेन्नेतिकेनात्रवर्णितम् ६४ नानुतिष्ठतिकोप्ये
तदस्तिचेन्मानुतिष्ठतु पुरुषस्यापराधेनकिमुपास्तिप्रदुष्यति ६५
इतोप्यतिशयंमत्वामंत्रान्वश्यादिकारिणः मूढाजपंतुतेभ्योपि
मूढाःकृषिमुपासताम् ६६

पासनेभ्यःकालांतरभाविफलेभ्योवश्यादिकारिमं
त्रेष्वैहिकफलप्रदत्वमतिशयंबुध्वामूढानांतन्मंत्रजपादौप्रवृत्तावपिविवेकिभिःसगुणोपासनंनप
रित्यज्यतेयथावाकृनियमानुष्ठानापेक्षेभ्यःतेभ्योमंत्रेभ्यःकृष्यादावतिशयंनियमनैरपेक्ष्यंमत्वामूढ
नराणांतत्रप्रवृत्तावपिनमंत्रानुष्ठानंत्यज्यतेयथासंसारिकफलेप्सूनांनिर्गुणोपासनानुष्ठानाभावेपि
नमुमुक्षुभिर्निर्गुणोपासनंत्यज्यतइति ६६ ॥

बहुश्रुतिषु दर्शनादित्युक्तमर्थं विवृणोति उत्तरस्मिन्निति तापनीयोपनिषदादितावत् देवा ह वै प्र
जापतिमब्रुवन्नणोरणीयांसमिममात्मानमोंकारं नो व्याचक्ष्वेत्यादिना बहुधा निर्गुणोपासनमभि
धीयते शैब्यप्रश्ने प्रश्नोपनिषदि पंचमे प्रश्ने यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुष
मभिध्यायीतेति काठके कठवल्ल्यां सर्वे वेदा यत्पदमामनंतीत्युपक्रम्य एतद्ध्येवाक्षरं ब्रह्म एत

उत्तरस्मिंस्तापनीये शैब्यप्रश्नेऽथ काठके मांडूक्यादौ च सर्वत्र
निर्गुणोपास्तिरीरिता ९२ अनुष्ठानप्रकारोऽस्याः पंचीकरण ॥
ईरितः ॥

दालंबनं श्रेष्ठमित्यादिना प्रणवोपासनमुच्यते मांडूक्योपनिषदि ओमित्येतदक्षरमिदं सर्वमि
त्यादिनाऽवस्थात्रयातीततुर्योपासनमेवाभिधीयत इत्यर्थः आदिशब्देन तैत्तिरीयकमंडूका
दयो गृह्यंते ९२ ननु निर्गुणोपासनं कथमनुष्ठेयमित्यत आह अनुष्ठानेति ॥ श्रीः ॥

ननुवेद्यत्वंब्रह्मणोवास्तवंनभवतीत्याशंक्योपास्यत्वमपितन्नेत्याह अवास्तवीति ननुवेदनपक्षेवृ
त्तेर्ब्रह्माकारत्वमस्तिनोपासनइत्याशंक्यशब्दबलात्तदाकारत्वमुभयत्रसमानमित्याह वृत्तिव्याप्ति

अवास्तवीवेद्यताचेदुपास्यत्वंतथानकिम् वृत्तिव्याप्तिर्वेद्यता
चेदुपास्यत्वेपितत्समम् ६१ कातेभक्तिरुपास्तौचेत्कस्तेद्वेष
स्तदीरयन् मानाभावोनवाच्योऽस्याबहुश्रुतिषुदर्शनात् ६२

रिति ६१ युक्तिसाम्यउपालंभस्त्वत्पक्षेपिसमानइत्याह कातेभक्तिरिति ननुनिर्गुणोपा
सनेप्रमाणंनास्तीत्याशंक्याऽनेकासुश्रुतिषुउपलभ्यमानत्वान्मैवमित्याह मानाभावइति ६२

ननुब्रह्मणउपास्यत्वंश्रुत्यानिषिध्यतइतिशंक्यते ब्रह्मेति यन्मनसानमनुतेयेनाहुर्मनोमतं
तदेवब्रह्मत्वंविद्धिनेदंयदिदंउपास तइतिश्रुतिरुपास्यस्यब्रह्मत्वंनिषेधतीत्यर्थः त्वंयद्वाङ्मन
सगम्यंतदेवब्रह्मविद्धीदमिति यदुपासतेपुरुषास्तन्नविद्धीतियोजना ५९ उपास्यवेद्यत्वस्यापि

ब्रह्मविद्धितदेवत्वंनत्विदंयदुपासते इतिश्रुतेरुपास्यत्वंनिषिद्धंब्रह्मणोयदि ५९
विदितादन्यदेवेतिश्रुतेर्वेद्यत्वमस्यन यथाश्रुत्यैववेद्यत्वंतथाश्रुत्याप्युपास्यताम् ६०

तन्निषेधःसमानइत्याह विदितादिति अन्यदेवतद्विदितादथोऽविदितादधीति ब्रह्मणोवेद्यत्वम
पिनिवारयतीत्यर्थः विदितात्ज्ञातादित्यर्थः विदिताविदिताभ्यामन्यद्ब्रह्मेतिश्रुतिः प्रतिपादयतीति
चेत्तर्हितथैवतज्ज्ञानीयादित्याशंक्योपासनेमित्याह यथेति ॥ ६० ॥ श्रीः ॥
प्येतत्समानं

ननु तर्हि निर्गुणब्रह्मतत्त्वस्य गुणरहितत्वात्तदुपासनं न घटत इत्याशंक्योपासनस्य प्रत्ययावृत्तिरू
पत्वात्सगुणब्रह्मणीव निर्गुणेऽपि तत्संभवतीत्याह निर्गुणेति ५५ ननु निर्गुणस्य ब्रह्मणो वाङ्मन
सगोचरत्वाभावान्नोपास्यत्वमित्याशंक्य वेदनपक्षेऽप्ययं दोषः समान इत्याह अवाङ्मनसेति ५६ ननु

निर्गुणब्रह्मतत्त्वस्य नह्युपास्तेरसंभवः सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसंभवात् ५५
अवाङ्मनसगम्यं तन्नोपास्यमिति चेत्तदा अवाङ्मनसगम्यस्य वेदनञ्च न संभवेत् ५६
वागाद्यगोचराकारमित्येवं यदि वेत्त्यसौ वागाद्यगोचराकारमित्युपासीत नो कुतः ५७
सगुणत्वमुपास्यत्वाद्यदि वेद्यत्वतोऽपि तत् वेद्यं चेल्लक्षणावृत्त्या लक्षितं समुपास्यताम् ५८

ब्रह्म वाङ्मनसगोचरमित्येवं ज्ञातुं शक्यमित्याशंक्य एवमेवोपासितुमशक्यमित्याह वागादीति ५७
ब्रह्मण उपास्यत्वे सगुणत्वप्रसज्येतेत्याशंक्य वेद्यत्वेऽपि तत्सगुणत्वं स्यादित्याह सगुणत्वमित्यर्थः ननु ल
क्षणावृत्त्या श्रवणान्न वेद्यत्वे सगुणत्वप्रसंग इत्याशंक्योपासनमपि तथैव क्रियतामित्याह वेद्यं चेदि
ति ५८ श्रीः

एवंतत्त्वविचारेक्रियमाणेप्रतिबंधवशादत्रसाक्षात्कारोनजायतेइत्यभिधायतीव्रपापिनांतुसोपिवि
चारोदुर्लभइत्याह केषांचिदिति तत्रप्रमाणमाह श्रवणायेति यःपरमात्माबहुभिःपुरुषैःश्रवणाया
पिश्रोतुमपिनलभ्यःदुर्लभइत्यर्थः ५३ एतावतासतिप्रतिबंधेतत्त्वसाक्षात्कारस्तत्साधनभूतोविचार

केषांचित्सविचारोपिकर्मणाप्रतिबध्यते श्रवणायापिब
हुभिर्योनलभ्यइतिश्रुतेः ५३ अत्यंतबुद्धिमांद्याद्वासामग्र्या
वाप्यसंभवात् योविचारंनलभतेब्रह्मोपासीतसोनिशम् ५४

श्चनसंभवतीत्यभिधायेदानींविचारासमर्थेनपुरुषार्थार्थिनाकिंकर्तव्यमित्यपेक्षायांविचाराक्षमम
तीश्चेत्तब्रह्मोपासतेगुणैरिति यत्प्राक्प्रतिज्ञातं तदुपपादयति अत्यंतेति सामग्र्यसंभवोनामत
त्त्वोपदेष्टुर्गुरोरध्यात्मशास्त्रस्यदेशकालादेर्वासंभवस्तस्मादित्यर्थः ॥ ५४ ॥ श्रीः ॥

न्ययोभ्यासेकारणमाह पूर्वेति सयोगभ्रष्टस्तेनपूर्वाभ्यासेनैवावशोप्यस्वाधीनोपिह्रियते आकृष्यते एव
मनेकेषुजन्मसुकृतेनप्रयत्नेनसंसिद्धस्तत्वज्ञानसंपन्नस्ततस्तस्मात्तत्वज्ञानात्परांगतिंमुक्तिंयातिप्राप्नोती
त्यर्थः ५० आगामिप्रतिबंधांतरंदर्शयति ब्रह्मलोकेति ब्रह्मलोकप्राप्तीच्छायांइच्छायांसत्यांतांनिरुध्यय
आत्मानंविचारयेत्तस्यसाक्षात्कारेणैवजायतइत्यर्थः ५१ ननुतर्हितस्यकदाचिदपिमुक्तिर्नस्यादित्या

पूर्वाभ्यासेनतेनैव ह्रियतेह्यवशोपिसः अनेकजन्मसंसिद्धस्ततोयातिपरांगतिम् ५०
ब्रह्मलोकाभिवांछायांसम्यक्सत्यांनिरुध्यताम् विचारयेद्यआत्मानंनतुसाक्षात्करोत्ययम्
५१ वेदांतविज्ञानसुनिश्चितार्थाइतिशास्त्रतः ब्रह्मलोकेसकल्पांतेब्रह्मणासहमुच्यते ५२

शंक्याह वेदांतेति वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयःशुद्धसत्वाः तेब्रह्मलोकेतुपरांत
कालेपरामृतात्परिमुच्यंतिसर्वे ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मनःप्रविशंतिपरं
पदमित्यादिशास्त्राद्ब्रह्मलोकप्राप्त्यनंतरंतत्वंसाक्षात्कृत्यब्रह्मणासहमुक्तिर्भविष्यतीत्यर्थः ५२ ॥

पक्षांतरमाह अथवेति निस्पृहः स्वयमतिविरक्तः चेद्ब्रह्मतत्वविचारादेव धीमतां आत्मतत्वनिश्चय
विचारवतां योगिनां चित्तैकाग्र्यवतां कुले भवति जायत इत्यर्थः पूर्वस्मादस्य कोतिशय इत्यत आह
तद्धीति हि यस्मात्कारणात्तद्योगिकुले जन्म दुर्लभमल्पपुण्येनालभ्यमित्यर्थः ४८ तस्य दुर्लभ

अथवा योगिनामेव कुले भवति धीमताम् निस्पृहो ब्रह्मतत्वस्य विचारात्तद्धि दुर्लभम् ४८
तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् यतते च ततो भूयस्तस्मादेतद्धि दुर्लभम् ४९

त्वं [illegible]पादयति तत्र तमिति हि यस्मात्कारणात् तत्र तस्मिन् जन्मनि पौर्वदेहिकं पूर्वदेहे भवं तं बुद्धिसं
[illegible] विचारगोचरबुद्धिसंबंधं शीघ्रं लभते प्राप्नोति न केवलं बुद्धिसंबंधमात्रेण लाभः किंतु ततः पू
[illegible]त्नाद्भूयो यतते चाधिकयत्नं करोति तस्मादेतज्जन्म दुर्लभं इत्यर्थः ॥ ४९ ॥

एवमतीतप्रति[illegible]र्शयति आगामीति आगामीप्रतिबंधो जन्मां[illegible]हेतुप्रारब्धशेष इत्यर्थः तस्य च भो
प्रश्नां[illegible] नच स्वभावात्तन्निरतौ कालनियमो नास्तीत्याह एकेनेति स च एकेन जन्मना क्षीणो वामदेवस्य
विपर्दः भरतस्य त्रिजन्मभिः क्षीण इत्यनुषज्यते ४५ नन्वेकेन त्रिजन्मभिरिति नियतकालभ्यतेयोच्यत
नन्वाशंक्याह योगेति योगभ्रष्टस्तत्त्वसाक्षात्कारपर्यंतविचाररहित इत्यर्थः तर्हि तत्त्वविचारेण निष्फ

आगामीप्रतिबंधश्च वामदेवे समीरितः एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ४५
योगभ्रष्टस्य गीतायामतीते बहुजन्मनि प्रतिबंधक्षयः प्रोक्तो न विचारोप्यनर्थकः ४६
प्राप्य पुण्यकृतांल्लोकानात्मतत्त्वविचारतः शुचीनां श्रीमतां गेहे साभिलाषोभिजायते ४७

लः स्यादित्याशंक्याह नविचारोपीति प्रतिबंधनिरस्यनंतरमेवापरोक्षज्ञानलक्षणफलसद्भावादि
तिभावः ४६ गीतायां प्रतिपादितमर्थं दर्शयति प्राप्येति योगभ्रष्ट आत्मतत्त्वविचारबलादेव पुण्यकृ
तां पुण्यकारिणां लोकान्स्वर्गविशेषान्प्राप्य तत्र बहुकालं सुखमनुभूय तत्र भोगवासनेसाभिलाषश्चे
दस्मिल्लोके शुचीनां मातृतः पितृतः शुद्धानां श्रीमतां कुलेऽभिजायते ॥ ४७ ॥ श्रीः

एवमतीतप्रबंधं प्रदर्श्य वर्तमानं तं दर्शयति प्रतिबंध इति वर्तमाने प्रतिबंधश्चित्तस्य विषयासक्तिरूपः प्रज्ञामांद्यं बुद्धेस्तैक्ष्ण्याभावः कुतर्कश्च शुष्कतार्किकत्वेन श्रुत्यर्थस्यान्यथोहनं विपर्ययदुराग्रहः विपर्यये आत्मनः कर्तृत्वादिधर्मयुक्तत्वज्ञानलक्षणे दुराग्रहो युक्तिरहितोऽभिनिवेशः एतेषामन्यतमस्यापि सत्वे ज्ञानं नोदेतीत्यर्थः ४३ अस्यापि प्रतिबंधस्य केन निवृत्तिरित्यत आह शमाद्यैरिति

प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः प्रज्ञामांद्यं कुतर्कश्च
विपर्ययदुराग्रहः ४३ शमाद्यैः श्रवणाद्यैश्च तत्रतत्रोचितैः
क्षयम् नीतेऽस्मिन्प्रतिबंधेऽतः स्वस्य ब्रह्मत्वमश्नुते ४४

शमादयः शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वेति श्रुत्युक्ताः श्रवणादयः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्याभिहिताः एतैः साधनैस्तत्रतत्र प्रतिबंधस्य निवर्तने उचितैर्योग्यैस्तस्मिन् प्रतिबंधे क्षयं नीते सति विनाशिते सत्यतः प्रतिबंधापगमात्स्वस्य प्रत्यगात्मनो ब्रह्मत्वं प्राप्नोतीत्यर्थः ४४

न्वती तस्य प्रतिबंधकत्वेन दृष्टमित्याशंक्याह अतीतेनेति अयमर्थः कश्चिद्यतिः पूर्वगार्हस्थ्यदशायां कस्योचिन्महिष्यां स्नेहं कृत्वा पश्चात्संन्यासानंतरं श्रवणे प्रवृत्तोपि तेनैव स्नेहेन जनितात्प्रतिबंधात्तत्वं गुरुणोपदिष्टमपि न ज्ञातवानित्येवंविधा गाथा लोके प्रगीयते नपुराणादिषु पठितेत्यर्थः ४१ तर्हि तस्या

अतीतेनापि महिषीस्नेहेन प्रतिबंधतः भिक्षुस्तत्वं न वेदेति लो
के गाथा प्रगीयते ४१ अनुसृत्य गुरुः स्नेहं महिष्यां तत्वमुक्त
वान् ततो यथावद्वेदैष प्रतिबंधस्य संक्षयात् ४२ ॥

विधस्य तस्य कथं ज्ञानोत्पत्तिरित्यत आह अनुसृत्येति गुरुस्तस्य तत्वोपदेशात्तदीयं महिषीस्नेहमनुसृत्य तस्यामेव महिष्यां तत्वेन महिष्युपाधिकं ब्रह्मोक्तवान् अतः सोपि महिषीस्नेहलक्षणप्रतिबंधकापगमेन गुरूपदिष्टं तत्वं यथावच्छास्त्रोक्तप्रकारेणैव ज्ञातवानित्यर्थः ॥ ४२ ॥ श्रीः

तान्येववार्तिकान्युदाहरति कुतस्तत्ज्ञानमित्यादि भरतस्यत्रिजन्मभिरित्यंतेन तत्र तावत्सर्वमनुत्पन्न
स्य ज्ञानस्येदानीमुत्पत्तौ कारणं पृच्छति कुतइति उत्तरमाह तद्धीति बंधः प्रतिबंधस्तस्यपरिक्षयादित्य
र्थः प्रतिबंधस्ततः किमित्यत आह अधीतेति अत एव प्रतिबंधसद्भावादेवेत्यर्थः सति प्रतिबंधे ज्ञानं नोदे

कुतस्तत्ज्ञानमितिचेत्तद्धिबंधपरिक्षयात् असावपिचभूतो
भावीवावर्तते ऽथवा ३९ अधीतवेदवेदार्थोप्यतएवनमुच्य
ते हिरण्यनिधिदृष्टांतादिदमेवहिदर्शितम् ४० ॥

तीत्येतद्यथा हिरण्यनिधिंनिहितमक्षेत्रज्ञाउपर्युपरिसंचरंतोनविंदेयुः एवमेवेमाः सर्वाः प्रजा अह
रहर्ब्रह्मलोकंगच्छंत्यएतंब्रह्मलोकंनविंदति अनृतेनहिप्रत्यूढाइत्यनयाश्रुत्याप्रदर्शितमित्याह हिर
ण्येति ४० ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

ननु इदं कुतोऽवगतमित्याशंक्य ब्रह्मसूत्रकृता व्यासेनैहिकामुष्मिकमप्रस्तुतप्रतिवंधे तद्दर्शनादित्यस्मिन्सू-
त्रेऽभिधानादित्याह इहवेति सति प्रतिवंधे इह जन्मनि ज्ञानानुत्पत्तौ श्रुतिं दर्शयति शृण्वंत इति ३४
इह जन्म निष्फलश्रवणादिकर्तुर्जन्मांतरेऽपरोक्षज्ञानं भवतीत्यत्रापि गर्भेवसन्नन्वेषामवेदमहं देवानां जनि-
मानि विश्वेत्यादिकां श्रुतिमर्थतः पठति गर्भएवेति इह जन्मन्यनुत्पन्नज्ञानस्य कालांतरोत्पत्तौ दृ-

इह वामुत्र वा विद्येत्येवं सूत्रकृतोदितम् शृण्वंतोप्यत्र बहवो यन्न विद्युरिति श्रुतेः ३४
गर्भएव शयानः सन्वामदेवोऽवबुद्धवान् पूर्वाभ्यस्तविचारेण यद्वदध्ययनादिषु ३५
बहुवारमधीतेऽपि तदा नायाति चेत्पुनः दीनांतरेनधीत्यैव पूर्वाधीतं स्मरेत्पुमान् ३६
कालेन परिपच्यंते कृषिगर्भादयो यथा तद्वदात्मविचारोऽपि शनैः कालेन पच्यते ३७
पुनः पुनर्विचारेऽपि त्रिविधप्रतिवंधतः नवेत्ति तत्त्वमित्येतद्वार्तिके सम्यगीरितम् ३८

ष्टांतरमप्याह यद्वदिति ३५ दृष्टांतं विवृणोति बहुवारमिति ३६ आदिशब्देन परिगृहीतानि दृष्टांत-
राण्याह कालेनेति दार्ष्टांतिके योजयति तद्वदिति ३७ बहुवारं विचारितेऽपि तत्त्वे प्रतिवंधबलात्साक्षा-
त्कारेण जायत इत्येतद्वार्तिककारैरपि निरूपितमित्याह पुनः पुनरिति ॥ ३८ ॥ श्रीः

आप्तोपदेशमात्रेणोपासनानुष्ठानोपयोगि परोक्षज्ञानमुत्पद्यते अपरोक्षज्ञानं तु विचारमंतरेण न जायत इत्युक्तं तत्र कारणमाह परोक्षेति यतो विश्वास एव परोक्षज्ञानं प्रतिबध्नाति नाविचारोऽतस्तन्निवृत्तौ सद्गुरूपदेशादेव परोक्षज्ञानजन्मोपपद्यतेऽविचारप्रतिबंधस्यापरोक्षज्ञानस्य तु विचारद्वारा तन्निवृत्तिमंतरेणोत्पत्तिर्न संभवत्यतो विचारः कर्तव्य इति भावः ३१ ननु विचारे कृतेपि यद्यऽपरोक्षज्ञानं न जायते तदा

परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरत् अविचारोपरोक्षस्य ज्ञानस्य प्रतिबंधकः ३१
विचार्याप्यपरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् आपरोक्ष्यावसानत्वाद्भूयो भूयो विचारयेत् ३२
विचारयन्नामरणं नैवात्मानं लभेत चेत् जन्मांतरे लभेतैव प्रतिबंधक्षये सति ३३

किं कर्तव्यमित्यत आह विचार्यापीति तत्त्वंपदार्थौ सम्यग्विचार्यापि वाक्यार्थं ब्रह्मात्मैकत्वमपरोक्षतया न जानातीति चेत्तदापि पुनः पुनः विचार एव कर्तव्योऽपरोक्षज्ञानहेतोरन्यस्याभावादिति भावः ३२ ननु भूयो भूयो विचारेणापि इह साक्षात्कारानुदये सति विचारो व्यर्थः स्यादित्याशंक्याह विचारयन्निति ३३

ननु तर्ह्यननुष्ठेयत्वमेव कर्मोपासनयोः प्राप्तमित्याशंक्याह निर्णीतेति जैमिन्यादिभिः पूर्वाचार्यैर्निर्ण्णीतोर्थः अनुष्ठानप्रकारः कल्पसूत्रैः संगृहीतोस्ति तावता तैर्ग्रथितत्वेनैव तेषु विश्वासवान् पुरुषो विचारं विनापि कर्म सम्यगनुष्ठातुं शक्नोत्येव २७ ननु तत्रोपासनाविचाराभावात् तदनुष्ठानं संभवेदित्याह उपास्तीनामिति आर्षग्रंथेषु व्राल्प वाशिष्ठादिमंत्रकल्पेषु उपासनानुष्ठानप्रकारो वर्णितः ततो विचारासमर्था मनुष्याः कल्पेषू

निर्णीतोर्थः कल्पसूत्रैः ग्रंथितस्तावतास्तिकः विचारमंतरेणापि शक्नोनुष्ठातुमंजसा २७
उपास्तीनामनुष्ठानमार्षग्रंथेषु वर्णितम् विचाराक्षममर्त्याश्च तत्छ्रुत्वोपासते गुरोः २८
वेदवाक्यानि निर्णेतुमिच्छन्मीमांसतां जनः आप्तोपदेशमात्रेण ह्यनुष्ठानं हि संभवेत् २९
ब्रह्मसाक्षात्कृतिस्त्वेवं विचारेण विना नृणाम् आप्तोपदेशमात्रेण न संभवति कुत्रचित् ३०

क्तं तदुपासनं गुरुमुखादवगत्यानुतिष्ठंतीत्यर्थः २८ ननु तर्हीदानींतनैरपि ग्रंथकर्तृभिर्वेदवाक्यविचारः कृतः क्रियत इत्याशंक्य स्वबुद्धिपरितोषायैव क्रियते नानुष्ठानसिद्ध्यै इत्याह वेदेति २९ ननु ब्रह्मोपासनना ब्रह्मसाक्षात्कारस्यापि उपदेशमात्रादेव सिद्धिः किं न स्यादित्याशंक्याह ब्रह्मेति ३० ॥ श्रीः ॥

केचनविप्रतिपद्यमानाउपलभ्यंतइत्याशंक्याह अश्रद्धालोरिति कुतइत्यतआह अश्रद्धालोरिति सर्वेषुवेदोक्तानुष्ठानेषुअश्रद्धालोरेवश्रद्धावतएवाधिकारित्वादित्यर्थः २४ एतावतापरोक्षज्ञानेकिमायातमित्यतआह सकृदिति उक्तमर्थंलोकानुभवेनदृढयति विष्णुमूर्तीति २५ ननुतर्हिकुतःशास्त्रे

अश्रद्धालोरविश्वासोनोदाहरणमर्हति अश्रद्धालोरेवसर्वत्रवैदिकेष्वधिकारतः २४
सकृदाप्तोपदेशेनपरोक्षज्ञानमुद्भवेत् विष्णुमूर्त्युपदेशोहिनमीमांसामपेक्षते २५
कर्मोपास्तीविचार्येतेअनुष्ठेयाविनिर्णयात् बहुशाखाविप्रकीर्णंनिर्णेतुंकःप्रभुर्नरः २६

षुविचारःक्रियतइत्याशंक्यानुष्ठेययोःकर्मोपासनयोःसंदेहसंभवात्तन्निर्णयायविचारःक्रियतइत्याह कर्मोपास्तीति संदेहसंभवमेवोपपादयति बहुशाखेति अनेकासुशाखासुतत्रतत्रचोदितंकर्मोपासनंवाएकत्रसमाहृत्यनिर्णेतुमस्मदादिर्नरःकःप्रभुःसमर्थोनकोपीत्यर्थः २६ ॥ श्रीः

ननु सम्यग्ज्ञानस्य प्रमाणवस्तुपरतंत्रत्वात्प्रमाणस्य च तत्त्वमस्यादिवाक्यरूपस्य सद्भावाद्वस्तुनश्च ब्रह्मात्मैक्यलक्षणस्य विद्यमानत्वात् कुतो विचारमंतरेण दुर्बोधत्वमित्याशंक्याह देहादीति ब्रह्मात्मैकत्वापरोक्षज्ञानविरोधिनो देहेंद्रियाद्यात्मभ्रमस्य विचारनिवर्त्यस्य सद्भावात्तन्निवृत्तये विचारोपेक्ष्यत इत्यर्थः २१ ननु तर्हि देहेंद्रियादिगोचरस्य द्वैतभ्रमस्य सद्भावादद्वितीयब्रह्मगोचरं परोक्षज्ञानमपि नोदीयात् इत्याशंक्याह परो

देहाद्यात्मत्वविभ्रांतौ जाग्रत्यां न हठात्पुमान् ब्रह्मात्मत्वेन विज्ञातुं क्षमते मंदधीस्त्वतः २१
ब्रह्ममात्रं सुविज्ञेयं श्रद्धालोः शास्त्रदर्शिनः अपरोक्षद्वैतबुद्धिः परोक्षाद्वैतबुद्ध्यनुत् २२
अपरोक्षशिलाबुद्धिर्न परोक्षेशतां नुदेत् प्रतिमादिषु विष्णुत्वे को वा विप्रतिपद्यते २३

क्षद्वैतभ्रमस्य परोक्षाद्वैतज्ञानाविरोधित्वाच्छ्रद्धावतः पुंसः शास्त्रात्परोक्षज्ञानमुत्पद्यत एवेत्याह ब्रह्ममात्रमिति अपरोक्षद्वैतबुद्धिर्यतः परोक्षात् द्वैतबुद्ध्यनुदतो ब्रह्ममात्रं तु सुविज्ञेयमिति योजना २२ अपरोक्षभ्रमस्य परोक्षसम्यग्ज्ञानाविरोधित्वे दृष्टांतमाह अपरोक्षेति विरोधाभावमेवोदाहृत्य दर्शयति प्रतिमादिष्विति २३

कथं तर्हि तथाविधब्रह्मगोचरस्य ज्ञानस्य तत्त्वज्ञानत्वमित्याशंक्यागमप्रमाणजन्यत्वादित्याह शास्त्रे
ति तत्ज्ञानं परोक्षमपि शास्त्रोक्तेनैव प्रकारेण ब्रह्मणः सच्चिदानंदरूपनिश्चयकत्वात्सम्यग्ज्ञानमे
वन भ्रम इत्यर्थः १९ ननु सत्यज्ञानादिवाक्यैर्ब्रह्मणः सच्चिदानंदरूपत्वमिव तत्त्वमस्यादिवाक्यैः प्रत्य

शास्त्रोक्तेनैव मार्गेण सच्चिदानंदनिर्णयात् परोक्षमपि तज्ज्ञानं तत्त्वज्ञानं न तु भ्रमः १९
ब्रह्म यद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितम् महावाक्यैस्तथाप्येतद् दुर्बोधमविचारिणः २०

ग्रूपत्वमपि तस्य बोध्यत एवातः शास्त्रजन्यस्यापि ब्रह्मज्ञानस्य प्रत्यग्व्यक्त्युल्लेखित्वापरोक्षत्वमेवे
ब्रह्म २ त्याह ब्रह्मेति यद्यपि वेदांतेषु महावाक्यैः प्रत्यगात्मत्वेनैवोपदिष्टं तथाप्येतत्प्रत्यग्रूपत्वमन्वयव्यति
रेकाभ्यां तत्त्वंपदार्थविवेकशून्यस्य दुर्बोधं बोद्धुमशक्यमतः केवलाद्वाक्यान्नापरोक्षज्ञानमुत्पद्यत
इत्यर्थः २० श्रीः

ननु विह्न्यादिगोचरस्य ज्ञानस्य यत्नुल्लेखित्वाभावाद्भ्रमत्वमित्याशंक्य प्रमाणेन जनितत्वान्न भ्रमत्वमित्याह परोक्षत्वेति परोक्षज्ञानत्वं भ्रांतिज्ञानत्वे कारणं न भवति किंतु विषयासत्यत्वमिह तु प्रमाणभूतेन शास्त्रेणैव यथार्थभूताया विह्न्यादिमूतेर्भासनान्न भ्रमत्वमित्यर्थः १७ ननु सच्चिदानंदस्यात्नुल्लेखिनो ब्रह्मतत्त्वज्ञानस्य शास्त्रजन्यस्यापि कुतः परोक्षतेत्याशंक्य परोक्षत्वप्रयोजकप्रत्यक्तो

परोक्षत्वापराधेन भवेन्नातत्त्ववेदनम् प्रमाणेनैव शास्त्रेण सत्यवस्तुर्विभासनात् १७
सच्चिदानंदरूपस्य शास्त्राज्ज्ञानेप्यनुल्लिखन् प्रपंचे साक्षिणं तत्तु ब्रह्म साक्षान्नवी
क्षते १८ श्रीः

ल्लेखाभावादित्याह सच्चिदिति सत्यं ज्ञानमनंतं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनः सदिदं सर्वं सत्सदिति चिद्धीदं सर्वं प्रकाशत इत्यादिशास्त्रात्सच्चिदानंदरूपस्य ब्रह्मणो भानेपि प्रपंचे साक्षिणमनुल्लिख्य तस्य ब्रह्मणः प्रत्यगात्मरूपत्वमजानानस्तद्ब्रह्म साक्षान्नवीक्षते नैव पश्यति १८ ॥

उपास्यब्रह्मतत्वगोचरस्यपरोक्षज्ञानस्यकिंरूपमित्याकांक्षायामाह प्रत्यगिति प्रत्यग्व्यक्तिं बुद्ध्या
दिसाक्षिणमात्मानमनुल्लिख्याविषयीकृत्यशास्त्रात्सत्यज्ञानादिवाक्यजाताद्ब्रह्मास्तीत्येवंसामा
न्याकारेणजायमानंज्ञानमत्रास्यामुपासनायांपरोक्षधीःपरोक्षज्ञानंविवक्षितमित्यर्थः तत्र दृष्टां
तमाह विष्ण्वादीति विष्ण्वादिमूर्तिप्रतिपादकशास्त्रजन्यज्ञानवदित्यर्थः १५ ननुशास्त्रेणावि

प्रत्यग्व्यक्तिमनुल्लिख्यशास्त्राद्विष्ण्वादिमूर्तिवत् अस्तिब्रह्मेतिसामान्यज्ञानमत्रपरोक्ष
धीः १५ चतुर्भुजाद्यवगतावपिमूर्तिमनुल्लिखन् अक्षैःपरोक्षज्ञान्येवनतदाविष्णु
मीक्षते १६ ॥

ष्ण्वादिमूर्तेश्चतुर्भुजत्वादिविशेषप्रतीतौतज्ज्ञानस्यापिकुतःपरोक्षत्व
मित्याशंक्याह चतुर्भुजादीति शास्त्रेणचतुर्भुजत्वमित्यादिविशेषप्रतीतावपिचक्षुरादिभिर्विष्ण्वा
दिमूर्तिमविषयीकुर्वन्पुरुषःपरोक्षज्ञान्येव तत्रोपपत्तिमाह नतदेति तदाउपासनाकालेविष्णु
मुपास्यंनेक्षतेनेन्द्रियैर्विषयीकरोतीत्यर्थः १५ ॥ श्रीः ॥ श्रीः ॥ श्रीः

४
श्रीः

ननुब्रह्मोपासनस्यायथावस्तुविषयस्य कथं सम्यग्ज्ञानसाध्यमुक्तिफलप्रदत्वमित्याशंक्य संवादिभ्रमादे
वेत्याह स्वयमिति १३ ननुब्रह्मतत्वंज्ञात्वोपासनंक्रियतेऽज्ञात्वावा आद्येउभेउपासनावैयर्थ्यंमोक्षसा
धनस्यज्ञानस्यैवविद्यमानत्वात् द्वितीयेविषयापरिज्ञानादुपासनमेवनघटतइत्याशंक्याह वेदांतेभ्य

स्वयंभ्रमोपिसंवादीयथासम्यक्फलप्रदः ब्रह्मतत्वोपासनापित
थामुक्तिफलप्रदा १३ वेदांतेभ्योब्रह्मतत्वमखंडैकरसात्मक
म् परोक्षमवगत्यैतदहमस्मीत्युपासते १४ ॥ श्रीः

इति अयमभिप्रायः ब्रह्मात्मैकत्वापरोक्षज्ञानस्यमोक्षसाधनस्यानुत्पन्नत्वान्नोपासनावैय
र्थ्यम् शास्त्रात्परोक्षतयावगतत्वाद्ब्रह्मणउपासनाविषयत्वमिति ॥ १४ ॥ श्रीः

विक्षेपबाधप्रदर्शनेनोक्तमर्थं दृढयति अन्यथेति अन्यथासंवादिभ्रमाभावे मृदादयः फलसिद्धये
देवतात्वेन पूज्या भवेयुः स्वतो देवतात्वाभावादित्यर्थः बाधकांतरमाह अग्नित्वादीति पंचाग्निवि
द्यायां योषा वाव गौतमाग्निः पुरुषो वाव गौतमाग्निः पृथिवी वाव गौतमाग्निः पर्जन्यो वाव गौतमा
ग्निरसौ वाव द्युलोको गौतमाग्निरित्यादिवाक्यैर्योषित्पुरुषपर्जन्यद्युलोकानामग्नित्वेनोपासनं

अन्यथा मृत्तिकादारुशिलाः स्युर्देवताः कथम् अग्नित्वादिधियोपास्याः कथं वा योषिदा
दयः ११ अयथावस्तुविज्ञानात्फलं लभ्यत इप्सितम् काकतालीयतः सोयं सं
वादिभ्रम उच्यते १२

ब्रह्मलोकाप्तिफलं न भवेदित्यर्थः आदिशब्देन मनो ब्रह्मेत्युपा
सीत आदित्यो ब्रह्म इत्यादेशा एवमादयो गृह्यंते ११ इदानीं बहुभिर्ग्रंथैरुपपादितं संवादिभ्रमं बु
द्धिसौकर्याय संक्षिप्य दर्शयति अयथेति विहितादविहिताद्वा यस्मादयथावस्तुविज्ञानात्तद्विपरी
तज्ञानादीप्सितमभिलषितं फलं काकतालीयतो दैवगत्या लभ्यते सोयं संवादिभ्रम इत्यर्थः १२

आगमविषयेपि तंदर्शयति गोदावरीति गोदावर्युदकस्यापि विशुद्धिहेतुत्वमागमसिद्धमतस्तत्प्रोक्षणादपि शुद्धिरस्त्येवायापि गोदावर्युदकेगंगोदकबुद्धिः साभ्रांतिरेव ८ उदाहरणांतरमाह ज्वरेणेति ज्वरेणसंनिपातंप्राप्तः पुरुषः इदंनारायणस्मरणंममस्वर्गसाधनमिति ज्ञानमंतरेणापि सन्निपातप्र

गोदावर्युदकंगंगोदकंमत्वाविशुद्धये संप्रोक्ष्यशुद्धिमाप्नोतिससंवादिभ्रमोमतः ८
ज्वरेणाप्तः संनिपातंभ्रांत्यानारायणंस्मरन् मृतःस्वर्गमवाप्नोतिससंवादिभ्रमोमतः ९
प्रत्यक्षस्यानुमानस्यतथाशास्त्रस्यगोचरे उक्तन्यायेनसंवादिभ्रमाःसंतिसहस्रशः १०

युक्तभ्रमवशात्साधारणपुरुषतया चेद्यादिवन्नारायणंस्मरन्मृतः स्वर्गमवाप्नोत्येव हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः आक्रुष्यपुत्रमघवान्यदजामिलोपिनारायणेतिम्रियमाणउपैतिमुक्तिमित्यादिपुराणवचनेभ्यः अत्रापिनारायणनाम्नः पुत्रनामत्वज्ञानंभ्रांतिरेव ९ एवंत्रिविधसंवादिभ्रमोदाहरणेनसिद्धमर्थमाह प्रत्यक्षस्येति ॥ १० ॥ श्रीः श्रीः श्रीः श्रीः श्रीः ॥

अथापि दीपप्रभायां मणिबुद्धिं कृत्वा धावता पुरुषेण मणिर्न लभ्यते मणिप्रभायां मणिबुध्या धावता मणिर्लभ्यतेव ५ भवत्येवं वार्त्तिकार्थः प्रकृते किमायातमित्यत आह दीपप्रभेति यादीपप्रभायां मणिभ्रांतिरस्ति स विसंवादिभ्रम इति स्मृतो विद्वद्भिर्मणिलाभलक्षणार्थक्रियारहितत्वान्मणिप्रभा

न लभ्यते मणिर्दीपप्रभां प्रत्यभिधावता प्रभायां धावतावश्यं लभ्येतैव मणिर्मणेः ५
दीपप्रभामणिभ्रांतिर्विसंवादिभ्रमः स्मृतः मणिप्रभामणिभ्रांतिः संवादिभ्रम उच्यते ६
वाष्पं धूमतया बुध्वा तत्रांगारानुमानतः वह्निर्यदृच्छया लब्धः स संवादिभ्रमो मतः ७

यां मणिबुद्धिस्तु मणिलाभलक्षणार्थक्रियावत्त्वात्संवादिभ्रम इत्युच्यत इत्यर्थः ६ एवं प्रत्यक्षविषये संवादिभ्रमं दर्शयित्वानुमानविषयेपि तं दर्शयति वाष्पमिति क्वचित्प्रदेशे स्थितं वाष्पं धूमत्वेन निश्चित्य तन्मूलप्रदेशोयं प्रदेशोग्निमान्धूमवत्त्वादित्यनुमाय प्रवर्त्तनेन पुरुषेण देवगत्या वह्निस्तत्रोपलभ्येत तदा वाष्पविषयधूमज्ञानं संवादिमतः ॥ ७॥ ॥ श्रीः श्रीः श्रीः ॥

२
श्रीः

संवादित्वमवदित्युक्तं दृष्टांतं प्रपंचयितुं संवादित्वमप्रतिपादकं वार्त्तिकं पठति मणिप्रदीपेति मणिश्च
प्रदीपश्च मणिप्रदीपौ तयोः प्रभे मणिप्रदीपप्रभे तयोरिति विग्रहः मणिप्रभायां दीपप्रभायां च या मणिबुद्धिः
सा मिथ्याज्ञानमेवातस्मिंस्तद्बुद्धित्वाद्यद्यपि मणिप्रभायां मणिबुद्ध्याभिधावतः पुरुषस्य मणिलाभो भवति
इतरस्य तु स नास्तीत्यर्थक्रियायां वैषम्यमस्तीत्यर्थः ३ वार्त्तिकं व्याचष्टे दीप इत्यादिना श्लोकत्रयेणाकस्मिं

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः मिथ्याज्ञानाविशेषेपि विशेषोऽर्थःक्रियांप्रति २
२ दीपोपवरकस्यांतर्वर्त्तते तत्प्रभा बहिः दृश्यते द्वार्यथान्यत्र तद्वद्दृष्टा मणेः प्रभाः ३ दूरे प्रभाद्व
यं दृष्ट्वा मणिबुद्ध्याभिधावतोः प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ४ ॥

श्चिन्मंदिरेऽपवरकस्यांतर्दीपस्तिष्ठति तस्य प्रभा बहिर्द्वारप्रदेशे रत्नमिव वर्त्तुलोपलक्ष्यते तथाऽन्यस्मि
न्मंदिरेऽपवरकस्यांतस्थितस्य रत्नप्रभा बहिर्द्वारप्रदेशे दीप्रभेव रत्नसमानोपलभ्यते ३ तथाविधं प्रभाव
द्वयं दूरतो दृष्ट्वायं प्राणिरयं मणिरिति बुद्ध्या द्वौ पुरुषावभिधानं कुरुतः तयोर्द्वयोरपि प्रभाविषयं जायमानं म
णिज्ञानं भ्रांतमेव ॥ ४ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

श्रीगुरवेनमः नत्वाश्रीभारतीर्थविद्यारण्यमुनीश्वरौ क्रियते ध्यानदीपस्य व्याख्या संक्षेपतो मया १ इह तावद्वेदांतशास्त्रे नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपन्नस्य सम्यक्श्रवणमनननिदिध्यासनानुष्ठानवतः तत्वंपदार्थविवेचनपूर्वकंमहावाक्यार्थापरोक्षज्ञानेनब्रह्मभावलक्षणोमोक्षोभवतीतिप्रतिपादितम् तत्रश्रुतोपनिषत्कस्यापिबुद्धिमांद्यादिनाकेनचित्प्रतिबंधेनवाक्यार्थविषयापरोक्षप्रमित्यनुत्पत्तौसत्यांतदुत्पादनद्वारामोक्षफलकोपासनानिदिदर्शयिषुरादौतावत्सदृष्टांतंब्रह्मतत्वोपासनयापि

संवादिभ्रमवद्ब्रह्मतत्वोपास्त्यापिमुच्यते उत्तरेतापनीयेऽतःश्रुतोपास्तिरनेकधा १

मोक्षोभवतीतिप्रतिजानीते संवादीति यथासंवादिभ्रमेणप्रवृत्तस्याभिप्रेतार्थलाभोभवत्येवंब्रह्मतत्वोपासनयाप्यभिलषितब्रह्मभावलक्षणोमोक्षोभवतीत्यर्थः तत्रकिंप्रमाणमित्यतआह उत्तरइति यत उपासनयामोक्षोस्त्यतस्तापनीयोपनिषद्यनेकप्रकारेणब्रह्मतत्वोपासनाश्रुताउक्तेत्यर्थः ॥ १ ॥

पंचदशी
१०३

अस्यसर्वस्यकारणभूतपुण्यपुंजपरिपाकमनुस्मृत्यतुष्यतीत्याह अहोपुण्यमिति एवंविधपुण्यसंपादकमात्मानमनुस्मृत्यतुष्यति अस्येति ९६ इदानींसम्यक्ज्ञानसाधनंशास्त्रंतदुपदेष्टारमाचार्यं चानुस्मृत्यतुष्यति अहोशास्त्रमिति पुनश्चशास्त्रजन्यंज्ञानंतज्जन्यंसुखंचानुस्मृत्यसंतुष्यति ॥

अहोपुण्यमहोपुण्यंफलितंफलितंदृढम् अस्यपुण्यस्यसंपत्तेरहोवयमहोवयम् ९६
अहोशास्त्रमहोशास्त्रमहोगुरुरहोगुरुः अहोज्ञानमहोज्ञानमहोसुखमहोसुखम् ९७
तृप्तिदीपमिमंनित्यंयेनुसंदधतेबुधाः ब्रह्मानंदेनिमज्जंतस्तेतृप्यंतिनिरंतरम् ९८ ॥
इतितृप्तिदीपःसमाप्तः ३

अहोज्ञानमिति ९७ ग्रंथाभ्यासफलमाह तृप्तिमिति ९८ इतिश्रीमत्परहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणरामकृष्णाख्यविदुषाविरचितातृप्तिदीपव्याख्यासमाप्ता ३

१०३
श्रीः

एवमिष्टप्राप्त्यातुष्टिमभिधायानिष्टनिवृत्त्यापितुष्टीमाह धन्योहमिति अद्येदानींदुःखंदुःखरूपं
संसारंनवीक्षेनपश्याम्यतःकृतार्थइत्यर्थः दुःखाप्रतीतौकारणमाह धन्योहमिति अनेकवासनाजालम

धन्योहंधन्योहंकर्तव्यंमेनविद्यतेकिंचित् धन्योहंधन्योहंप्रा
प्तव्यंसर्वमद्यसंपन्नम् ९४ धन्योहंधन्योहंतृप्तेर्मेकोपमा
भवेल्लोके धन्योहंधन्योहंधन्योधन्यःपुनःपुनर्धन्यः ९५

ज्ञानेक्वापिपलायितंनष्टमित्यर्थः ९३ अज्ञाननिवृत्तिफलंकृतकृत्यत्वंप्राप्तप्राप्यत्वंचदर्शयति ध
न्योहमिति ९४ इदानींकृतकृत्यमित्यादिनाज्ञातायास्तृप्तेर्निरतिशयत्वमाह धन्योहमिति अतःपरंवक्त
व्यादर्शनात्तुष्टिरेवपरिस्फुरतीतिदर्शयति धन्योहमिति ॥ ९५ ॥ श्रीः ॥ श्रीः ॥

येनासौ कृतकृत्यस्तस्य भावस्तत्तातया तृप्तः सन् पुनर्वक्ष्यमाणप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं येन त्रुटिः २

एतद्वर्णिष्यमाणयोस्तात्पर्यमाह कृतकृत्यतयेति असौ विद्वान्पूर्वोक्तप्रकारेण कृतकृत्यतया कृतं कृत्यं जातं सः प्राप्तप्राप्यस्तस्य भावस्तत्ता तया तृप्यन् तुष्टो भवन् स्वमनसा निरंतरमेवं मन्यते ९१ किं मन्यत इत्यत आह धन्योहमिति धन्यः कृतार्थः आदरार्थे वीप्सा नित्यमनवरतं स्वात्मानं स्वस्य निजं स्वरूपं देशाद्यन

कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः तृप्यन्नेवं स्वमनसा मन्यतेसौ निरंतरम् ९१
धन्योहं धन्योहं दुःखं सांसारिकं वीक्षेद्य धन्योहं धन्योहं स्वस्याज्ञानं पलायितं क्वापि ९३
धन्योहं धन्योहं नित्यं स्वात्मानमंजसा वेद्मि धन्योहं धन्योहं ब्रह्मानंदो विभाति मे स्पष्टम् ९२

वच्छिन्नं प्रत्यगात्मानमंजसा साक्षाद्यतो वेद्मि जानामि अतो धन्य इत्यर्थः एवमात्मज्ञानलाभनिमित्तां तृप्तिमभिधाय तत्फललाभनिमित्तां तां दर्शयति धन्योहमिति ब्रह्मानंदः ब्रह्मभूतानंदः मे स्पष्टं विभाति स्वयंप्रभया भवतीति वा स्फुरतीत्यर्थः ९२ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

पितुस्तनंधयानुसारित्वमेव दर्शयति अधिक्षिप्त इति ८८ दार्ष्टांतिके योजयति निंदित इति विद्वान
ज्ञैर्निन्दितः स्तूयमानो वा स्वयं न निंदति न स्तौति किं त्वेषामज्ञानिनां यथा बोध उपजायते तथा चरेत् ८९
एवमाचरणे निमित्तमाह येनायमिति अयमज्ञानी अत्रास्मिंल्लोके विदुषा येन यादृशेन नटनेन आच

अधिक्षिप्तस्ताडितो वा बालेन स्वपिता तदा नक्लिश्नाति नकुप्येच्च बालं प्रत्युत लालयेत् ८८
निंदितस्तूयमानो वा विद्वानज्ञैर्न निंदति न स्तौति किंतु तेषां स्याद्यथा बोधस्तथा चरेत् ८९
येनायं नटनेनात्र बुध्यते कार्यमेव तत् अज्ञप्रबोधान्नैवान्यत्कार्यमस्त्यत्र तद्विदः ९०

रणेन बुध्यते तत्त्वमवगच्छति तदाचरणं तेन कर्तव्यमेव तर्हि तद्वदेव कार्यांतरमभिप्रसज्येतेत्यत आह
अज्ञप्रबोधादिति यतस्तद्विदः तत्त्वविदोऽत्र लोकेऽज्ञप्रबोधादन्यत्कर्तव्यं नैवास्त्यतः तदनुसारेण तत्त्वबोध
नं कर्तव्यमित्यर्थः ॥ ९० ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

तर्हिज्ञानिवरज्ञानिनोपिप्रव्रज्यावाग्रहोनयुक्तइत्याशङ्क्य प्रव्रज्याविति तत्रोपपत्तिमाह॥ स्वर्गायचेति ८४ विदुषआग्रहोनयुक्तइत्युक्तंतर्हिकर्मिणांमध्येवर्तमानेनतेनकिंकर्तव्यमित्यतआह विद्वांश्चेदिति विद्वांस्तादृशांकर्मिणांमध्येतिष्ठेच्चेत्तदनुरोधतस्तेषामनुसारेणशरीरादिभिःसर्वाःक्रियाःकरोत्वेवनतान्कर्मिणोनिवारयेदित्यर्थः ८५ अस्यैवतत्त्वबुभुत्सानांमध्येवास्थितस्यकृत्यमाह एषइति एषविद्वान्बुभुत्सानांमध्येयदातिष्ठेत्

प्रव्रज्यावाग्रहोन्यायोबोधहीनस्यसर्वथा स्वर्गायवापवर्गाययतितव्यंयतोनृभिः ८४
विद्वांश्चेत्तादृशांमध्येतिष्ठेत्तदनुरोधतः कायेनमनसावाचाकरोत्येवाखिलाःक्रियाः ८५
एषमध्येबुभुत्सानांयदातिष्ठेत्तदापुनः बोधायेषांक्रियाःसर्वादूषयंस्त्यजतुस्वयम् ८६
अविद्वदनुसारेणवृत्तिर्बुद्धस्ययुज्यते स्तनंधयानुसारेणवर्त्ततेतत्पितायतः ८७ ॥

तदाएषांबुभुत्सानां[illegible]बोधायतत्त्वज्ञानजननायताःक्रियाःदूषयन्स्वयमपित्यजतु ८६ कुतएवंकर्तव्यमित्यतआह अविद्वदिति अज्ञान्यनुसारेणज्ञानिनोवर्तनमुचितंकृपालुत्वात्तेषामनुकंपनीयत्वाच्चेतिभावः एवंक्वदृष्टमित्यतआह स्तनंधयेति स्तनंधयाःस्तनपानकर्तारःशिशवइत्यर्थः ॥८७॥ श्रीः ॥ श्रीः

दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति आदाविति आदौ विद्याभ्यासस्समये चित्रैर्बहुविधैः स्वकार्यैः प्रमातृत्वभोक्तृत्वादिभिर्जृंभमाणया विवर्द्धमानयाविद्यया बोधो युध्वा युद्धं कृत्वा तां अजयत् स एवाभ्यासपाटवेन सुदृढोऽद्येदानीमविद्यानिवृत्तौ सत्यां निर्मूलेन तत्कार्येणाध्यासेन वा कथं बा-

आदावविद्यया चित्रैः स्वकार्यैर्जृंभमाणया युध्वा बोधोऽजयत्सोद्य सुदृढो बाध्यतां कथम् ८१ तिष्ठंत्वज्ञानतत्कार्याः शवा बोधेन मारिताः नभीतिर्बोधसम्राजः कीर्तिः प्रत्युत तस्य तैः ८२ य एवमतिशूरेण बोधेन न वियुज्यते प्रवृत्त्या वा निवृत्त्या वा देहादिगतयास्य किम् ८३

ध्यतां न कथमपि बाध्येत इत्यर्थः ८१ उपपादितमर्थं श्रोतृबुध्यारोहाय रूपकेणाह तिष्ठंत्विति ८२ भवत्वेवं प्रकृते किमायातमित्यत आह य एवमिति यः पुमानेवमुक्तप्रकारेणातिशूरेणाविद्यातत्कार्यघातकेन बोधेन ब्रह्मात्मैकत्वज्ञानेन न वियुज्यते न कदापि वियुक्तो भवति अस्य पुंसो देहादिनिष्ठया प्रवृत्त्या वा निवृत्त्या वा किं न किमपीष्टमनिष्टं वेत्यर्थः ॥ ८३ ॥ श्रीः ॥ श्रीः ॥ श्रीः

ननुअविद्यायावाधितत्वेपितत्कार्यस्यप्रतीयमानस्यवाधितत्वासंभवात्तेनवोधस्यवाधोभवेदि
त्याशंक्योपादाननिरस्तैवतस्यापिवाधितत्वान्नतेनापिवाधःशंकितुंशक्यइत्याह वाधितमिति तत्र
दृष्टांतमाह जीवन्निति आखुर्मूषकः ७९ द्वैतदर्शनेनतत्त्वबोधस्यवाधाभावेकैमुतिकन्यायप्रद

वाधितंदृश्यतामक्षैस्तेनवाधोनशक्यते जीवन्नाखुर्नमार्जा
रंहंतिहन्यात्कथंमृतः ७९ अपिपाशुपतास्त्रेणविद्धश्चे
न्नममारयः निष्फलेषुविभिन्नांगोनंक्ष्यतीत्यत्रकाप्रमा ८०

र्शनेनदृढयितुंदृष्टांतमाह अपीति यःसमर्थः पाशुपतास्त्रेणविद्धोनममारचेत्किलसनिष्फलेषु
शल्यरहितेषुणाव्यथितदेहःसन्नंक्ष्यतीतिनाशंप्राप्स्यतीत्यत्रकाप्रमाप्रमाणंनास्तीत्यर्थः ८० ॥

ननुबुद्धस्यबुभुत्साभावात्प्रवृत्तेरनुपयोगित्वमितिपुनःशंकते बुद्धश्चेदिति तर्हिबुद्धस्यपुनर्बोधाभा
वात्तद्धेतुर्निवृत्तिरपिबुद्धंप्रत्यनुपयोगिनीत्याह नाप्यसाविति सकृज्जातस्यबोधस्यस्थिरत्वायनिवृत्ति
रपेक्ष्यतइत्याशंक्यस्थिरत्वंबाधकाभावमपेक्षतेनसाधनांतरमित्याह बाधादिति वाक्यप्रमाणज

बुद्धश्चेन्नबुभुत्सेतनाप्यसौबुध्यतेपुनः अबाधादनुवर्तेतबोधोनत्वन्यसाधनात् ७७
नाविद्यानापितत्कार्यंबोधंबाधितुमर्हति पुरैवतत्त्वबोधेनबाधितेतेउभेयतः ७८

न्यज्ञानस्यबलवत्ताप्रमाणेनबाधाभावादनुवृत्तिःस्यादेवातोनसाधनांतरंतदर्थमननुष्ठेयमित्यर्थः
७७ ननुप्रमाणांतरेणबाधाभावेप्यविद्यातत्कार्येणकर्तृत्वाध्यासेनवाबाधःस्यादित्याशंक्याह
नाविद्येति तत्रहेतुमाह पुरैवेति ७८ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

कुतः परिहास्यत्वमित्याशंक्य निर्विषयकलहकारित्वादित्याह यंकर्मीति द्वाभ्याम् कर्मीयं साक्षिणं कर्मा
नुष्ठानोपयोगिदेहवाग्बुद्ध्यतिरिक्तं प्रत्यगात्मानं न विजानाति तत्त्वविदां तस्य ब्रह्मत्वे कर्मिणः कर्मानुष्ठाने
किं हीयते ७४ ज्ञानिनामिथ्यात्वबुद्ध्यापरित्यक्ताभिः देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानिनो वा किं हीयते

यंकर्मी न विजानाति साक्षिणं तस्य तत्त्ववित् ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते ७४
देहवाग्बुद्धयस्त्यक्ता ज्ञानिनानृतबुद्धितः कर्मी प्रवर्तयत्याभिः ज्ञानिनो हीयतेऽत्र किम् ७५
प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः कोपयुज्यते बोधहेतुर्निवृत्तिश्चेद्बुभुत्सायां तथेतरा ७६

अतो निर्विषयकलहकारिणोः परिहसनीयत्वमित्यर्थः ७५ कर्मानुष्ठानं प्रयोजनशून्यत्वान्न ज्ञानिनाऽ
भ्युपगम्यत इति शंकते प्रवृत्तिरिति उपयोगाभावो निवृत्तावपि समान इति परिहरति निवृत्तिरिति निवृ
त्तेर्बोधहेतुत्वान्नोपयोगाभाव इति शंकते बोधहेतुरिति तर्हि प्रवृत्तिरपि बुभुत्साहेतुत्वादुपयोगवदित्याह
बुभुत्सायामिति ॥ ७६ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

शास्त्रीय एव मार्गे प्रवर्तनांगीकारे तर्हि तदभिमानप्रयुक्तो विकारः स्यादेवेत्याह देवार्चनेत्यादिना श्लोकद्वयेन तारं प्रणवं आम्नायमस्तकं वेदांतशास्त्रम् ६९ ॥ ७० फलितमाह एवं चेति ७१ विभिन्न

देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः तारं जपतु वाक् तद्वत्पठत्वाम्नायमस्तकम् ६९
विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानंदे विलीयताम् साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ७०
एवं च कलहः कुत्र संभवेत्कर्मिणो मम विभिन्नविषयत्वेन पूर्वापरसमुद्रवत् ७१ व
पुर्वाग्धीषु निर्बंधः कर्मिणो न तु साक्षिणि ज्ञानिनः साक्ष्यलेपत्वे निर्बंधो नेतरत्र हि ७२
एवं चान्योन्यवृत्तांतानभिज्ञौ बधिरोविव विवदेतां बुद्धिमंतो हसंत्येव विलोक्य तौ ७३

विषयत्वमेव स्पष्टयति वपुरिति ७२ अथापि यो ज्ञानि कर्मिणोः कलहं कुर्वीते तौ विद्वद्भिः परिहसनीयावित्याह एवं चान्योन्येति ७३ ॥ श्रीः ॥ श्रीरामकृष्णगोपालहरे श्रीकेशवमाधव ॥

ध्यानस्याकर्तव्यत्वेपिविक्षेपपरिहारायसमाधिःकर्तव्यइत्याशंक्यविक्षेपसमाधानयोर्मनोधर्मत्वान्नविक्षे
पनिवारकेपिसमाधौममाधिकारइत्याह विक्षेपइति ६५ ननुफलमनुभवःसंपादनीयइत्याशंक्यतस्यमत्स्व
रूपत्वान्नसंपाद्यइत्याह नित्यानुभवेति उपपादितंकृतंकृत्यंनिगमयति कृतमिति ६६ एवंसर्वत्रकर्तृ

विक्षेपोनास्तियस्मान्मेनसमाधिस्ततोमम विक्षेपोवासमाधिर्वामनसःस्याद्विकारिणः ६५
नित्यानुभवरूपस्यकोमेत्रानुभवःपृथक् कृतंकृत्यंप्रापणीयंप्राप्तमित्येवनिश्चयः ६६ व्य
वहारोलौकिकोवाशास्त्रीयोवान्यथापिवा ममाकर्तुरलेपस्ययथारब्धंप्रवर्त्तताम् ६७ अ
थवाकृतकृत्योपिलोकानुग्रहकाम्यया शास्त्रीयेणैवमार्गेणवर्तेहंकाममक्षतिः ६८

त्वानभ्युपगमेऽनियतवर्त्तित्वंप्रसज्येतेत्याशंक्यप्रारब्धवशात्प्राप्तमनियतवर्त्तित्वमंगीकरोति व्यवहारइति
लौकिकोभिक्षाहारादिःशास्त्रीयोजपसमाध्यादिरन्यथापिवाप्रतिषिद्धहिंसादिर्वाव्यवहारःकर्तृत्वभोक्तृत्व
रहितस्यममप्रारब्धंकर्मानतिक्रम्यप्रवर्त्ततामित्यर्थः ६७ एवंवस्तुतत्वमभिधायप्रौढवादेनाह अथवेति
लोकानुग्रहकाम्ययाप्राण्यनुग्रहेच्छयेत्यर्थः ॥ ६८ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

पंचदशी
९७

माभूत्तांश्रवणमननेविपर्ययनिरासार्थंनिदिध्यासनंकर्तव्यमित्याशंक्यदेहाद्यात्मबुद्धिलक्षणस्यविप
र्ययस्याभावात्तदपिनानुष्ठेयमित्याह विपर्यस्तइति ६१ ननुविपर्ययाभावेऽहंमनुष्यइतिव्यवहारःकथं
प्रवर्ततइत्याशंक्यवासनावशाद्भवतीत्याह अहंमनुष्यति ६२ नह्यस्यव्यवहारस्यनिवृत्तिसिद्धयेध्या

विपर्यस्तोनिदिध्यासेत्किंध्यानमविपर्यये देहात्मत्वविपर्यासंनकदाचिद्भजाम्यहम् ६१
अहंमनुष्यइत्यादिव्यवहारोविनाप्यमुम् विपर्यासंचिराभ्यस्तवासनातोऽवकल्पते ६२
प्रारब्धकर्मणिक्षीणोव्यवहारोनिवर्तते कर्माक्षयेत्वसौनैवशाम्येद्ध्यानसहस्रतः ६३
विरलत्वंव्यवहृतेरिष्टंचेद्ध्यानमस्तुते अबाधिकांव्यवहृतिंपश्यन्ध्यायाम्यहंकुतः ६४

नंसंपाद्यमित्याशंक्यप्रारब्धक्षयमंतरेणास्यनिवृत्तिर्नास्तीत्याह प्रारब्धकर्मणि ६३ नन्वप्रारब्धनि
मित्तकस्यापिव्यवहारस्यविरलत्वायक्षीणत्वायध्यानंकर्तव्यमेवेत्याशंक्यव्यवहारस्याबाधकत्वदर्शनात्त
न्निवृत्तयेध्यानमननुष्ठेयमित्याह विरलत्वमिति ६४ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

९७
श्रीः

ननु स्वदेहनिर्वाहार्थं भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपालभ्यते ऽतो ऽक्रियत्वमसिद्धमित्याशंक्य तदपि स्वेच्छया नैवास्ति किंत्वन्यैरेव कल्पितमित्याह निद्राभिक्षेति ५८ अन्यकल्पनयापि बाधोस्तीत्याशंक्य तदभावे दृष्टांतमाह गुंजापुंजादीति ५९ ननु फलांतरेच्छाभावे कर्मानु

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात् ५८
गुंजापुंजादि दह्येत नान्यारोपितवह्निना नान्यारोपितसंसारधर्मानेवमहं भजे ५९ शृण्वं
त्वज्ञाततत्वास्ते जानन्कस्मान्न शृणोम्यहम् मन्यंतां संशयापन्ना न मन्येहमसंशयः ६०

ष्ठानं मा भूत् तत्वसाक्षात्काराय श्रवणादिकं कर्तव्यमेवेत्याशंक्याज्ञानाद्यभावाच्छ्रवणादिकर्तृत्वमपि नास्तीत्याह शृण्वंत्विति अज्ञाततत्वा अज्ञातं ब्रह्मात्मैकत्वलक्षणं तत्वं यैस्ते तथाभूताः श्रवणं कुर्वंतु तत्वमित्थमन्यथा वेति संशयवंतो मननं कुर्वंतु तदुभयाभावान्नोभयत्र प्रवृत्तिरित्यर्थः ॥ ६० ॥ श्रीः ॥

तत्फलमभूतां एवंकृतकृत्यत्वमुपपाद्य तत्फलमभूतां तृप्तिं दर्शयति प्रतियोगिपुरःसरं प्रतियोग्यनुसंधानपूर्वकं यथा भवति तथा एवं वक्ष्यमाणप्रकारेण सर्वदा तृप्यति ५४ तदेवानुसंधानं प्रपंचयति दुःखिनोऽज्ञाः इत्यादिना कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनरित्थंनः प्राक्तनेन मंथेन तत्र तावदैहिकसुखार्थिभ्यो

तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरम् अनुसंदधदेवायमेवं तृप्यति नित्यशः ५४
दुःखिनोऽज्ञाः संसरंतु कामं पुत्राद्यपेक्षया परमानंदपूर्णोऽहं संसरामि किमिच्छया ५५
अनुतिष्ठंतु कर्माणि परलोकं यियासवः सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम्
५६ व्याचक्षतां ते शास्त्राणि वेदानध्यापयंतु वा येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः ५७

वैलक्षण्यं स्वस्य दर्शयति दुःखिन इति ५५ स्वर्गाद्यर्थं कर्माद्यनुष्ठातृभ्यो वैलक्षण्यमाह अनुतिष्ठंत्विति ५६ ननु स्वार्थप्रवृत्त्यभावेऽपि परार्था प्रवृत्तिः किं न स्यादित्याशंक्याधिकाराभावात्सापि नास्तीत्याह व्याचक्षतामिति ५७ ॥ श्रीः ॥ श्रीरामकृष्णगोपालहरे श्रीकेशवमाधवकंसारे ॥

अपरोक्षज्ञानजन्यायास्तृप्तेर्निरंकुशत्वं प्रतियोगिदर्शनपुरःसरं प्रतिजानीते सांकुशेति विषयलाभजन्यायास्तृप्तेर्विषयांतरकामनयाकुंठितत्वात्सांकुशत्वमस्यास्तु तदभावान्निरंकुशत्वं तदेव दर्शयति कृतमिति ५२ कृतकृत्यत्वमेवोपपादयति ऐहिकेति अस्य विदुषस्तत्त्वज्ञानोदयात्पूर्वमिह लोके

सांकुशाविषयैस्तृप्तिरियंतृप्तिर्निरंकुशा कृतंकृत्यंप्रापणीयं
प्राप्तमित्येवतृप्यति ५२ ऐहिकामुष्मिकव्रातसिद्ध्यैमुक्तेश्च
सिद्धये बहुकृत्यंपुरास्याभूत्तत्सर्वमधुनाकृतम् ५३ ॥

इष्टप्राप्तयेऽनिष्टनिवृत्तये च कृषिवाणिज्यादिकं स्वर्गादिसिद्धये यागोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकं चेति बहुविधं कर्तव्यमासीत् इदानीं तु सांसारिकफलेच्छाभावाद्ब्रह्मानंदसाक्षात्कारस्य सिद्धत्वाच्च तत्सर्वं कृषियागश्रवणादिकृतम् कृतप्रायमभूत् इतः परमनुष्ठेयाभावादित्यर्थः ५३

पंचदशी परोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे अवस्थे जीवगे ब्रूत आत्मानं चेदिति श्रुतिरित्यनेन श्लोकेन ॥
आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति अस्मिन्मंत्रे
८५ परोक्षज्ञानशोकनिवृत्त्याख्ये जीवावस्थे द्वे अभिहिते इत्युक्तमिदानीं तदभिधानसूचितां जीवस्य सप्तमीं

किमिच्छन्निति वाक्योक्तः शोकमोक्ष उदीरितः आभासस्य ह्यवस्थैषा षष्ठी तृप्तिस्तु सप्तमी ५१ ॥

तृप्तिलक्षणामवस्थां उक्तानुकीर्तनपूर्वकं वक्तुमारभते किमिच्छन्नितीति किमिच्छन्नुत्तरार्द्धेनाभिहि
तोयः शोकमोक्षः स एतावता ग्रंथसंदर्भेणोदीरितोऽभिहितः एषा अज्ञानमावृतिस्तद्वद्विक्षेपश्च परोक्षधीः ८५
अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशेत्यनेन श्लोकेनाभिहितासु सप्तसु जीवावस्थासु षष्ठीत्याह आभा
सस्येति सप्तमीत्वाख्यायत इति शेषः ५१ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः श्रीः

जीवन्मुक्तिव्रतं नेदमित्युक्तं तत्रव्रतत्वाभावे किमापातमित्यतआह व्रताभावादिति पुनःपुनर्विचारक
रणे दृष्टांतमाह रससेवीति यथा रससेवीनरः एकस्मिन्दिने क्षुद्बाधापरिहाराय पुनःपुनर्भुंक्ते तद्वद्ध्या

व्रताभावाद्यद्ध्यासस्तदभ्यासो विविच्यताम् रससेवी दिने भुंक्ते
भूयोभूयो यथा तथा ४९ शमयत्यौषधेनायं दशमः स्वंव्र
णं यथा भोगेन शमयित्वैतत्प्रारब्धं मुच्यते तथा ५० ॥

सनिवृत्तये पुनर्विवेकः क्रियतामित्यर्थः ४९ ज्ञानेनानिवर्त्यस्य प्रारब्धकर्मफलस्य केन तर्हि
निवृत्तिरित्याशंक्य ताडनजन्यव्रणस्यौषधेनेव भोगेनैव निवृत्तिरित्याह शमयतीति ५० श्रीः

पंचदशी

९४

ननुपुनर्मर्त्यत्वबुद्ध्युदये तेनतत्वज्ञानंबाध्यतेइत्याशंक्याह नैतावतेति कदाचिदहंमर्त्यइत्येवंविधस्या
कृत२ नोदयमात्रेणागमप्रमाणजनितंतत्वज्ञानंनबाध्यतेइत्यतआह जीवन्मुक्तीति इदंमर्त्यत्वबुद्ध्यपकर
णालक्षणंजीवन्मुक्तिव्रतंनियमेनानुष्ठेयंनभवतिकिंतुसम्यग्ज्ञानेनभ्रांतिज्ञाननिवृत्तिरित्ययंस्वभा
वः अतःकदाचिन्मर्त्यत्वबुद्ध्युदयेपिपुनस्तत्वज्ञानांतरेणतस्याएवबाध्यत्वमितिभावः ४६ भवतुर

नैतावतापराधेनतत्वज्ञानंविनश्यति जीवन्मुक्तिव्रतंनेदंकिंतुवस्तुस्थितिःखलु ४६
दशमोपिशिरस्ताडन्रुदन्बुध्वानरोदिति शिरोव्रणस्तुमासेनशनैःशाम्यतिनोतदा ४७
दशमाप्तिलाभेनजातोहर्षोव्रणव्यथाम् तिरोधत्तेमुक्तिलाभस्तथाप्रारब्धदुःखिताम् ४८

उक्तसर्पादिस्थलेविपरीतज्ञाननिवृत्तावपितत्कार्यकंपाद्यनुवृत्तिःप्रकृतदृष्टांतेदशमेदशमस्त्वमसीति
वाक्यविचारजन्यज्ञानेनभ्रमनिवृत्तौतत्कार्यानुवृत्तिर्नोपलभ्यतेइत्याशंक्याह दशमोपीति दशमोस्मीति
ज्ञानोदयेसतिशिरस्ताडनपूर्वकंरोदनमात्रंनिवर्तते ताडनजन्यव्रणस्त्वनुवर्तत एवेत्यर्थः ४७ ननुज्ञानोत्त
रकालेपिसंसारानुवृत्तौमुक्तिःकुतः पुरुषार्थतेत्याशंक्यमुक्तिलाभजन्यहर्षस्यतत्तद्दुःखाच्छादकस्यसायापु

रुषार्थतेति दृष्टांतपूर्वकमाह दशमेति ४८

९४

श्रीः

ननुतत्वज्ञानेनाभासत्वमपगच्छतिचेत्कथंतत्वविदांजीवत्वव्यवहारइत्याशंक्यप्रारब्धकर्मक्षयपर्यंतं
तदुपपत्तिसदृष्टांतमाह यावदिति यथाग्न्यादौप्रविष्टपुरुषोदाहादिनास्वदेहनाशपर्यंतंसः नरत्वंनर
त्वव्यवहारयोग्यत्वंनैवमुंचति एवंप्रारब्धकर्मक्षयपर्यंतंचिदाभासत्वव्यवहारोननिवर्ततइत्यर्थः ४३

यावत्स्वदेहदाहंसनरत्वंनैवमुंचति यावदारब्धदेहःस्यान्नाभा
सत्वविमोचनम् ४३ रज्जुज्ञानेपिकंपादिःशनैरेवोपशाम्यति पु
नर्मंदांधकारेसारज्जुःक्षिप्तोरगीयते ४४ एवमारब्धभोगो
पिशनैःशाम्यतिनोहठात् भोगकालेकदाचित्तुमर्त्योहमितिभासते ४५

ननुभोदेहादिभ्रमोपादानस्याज्ञानस्यनिवृत्तत्वात्पुनःकथंभोगानुवृत्तिःकथंवामर्त्योहमितिवि
परीतप्रतीतिरित्याशंक्यदृष्टांतप्रदर्शनेनएतत्संभावयति रज्जुज्ञानेपीति ४४ दार्ष्टांतिकंयोजयति ॥
एवमिति ४५ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥०

न केवलं स्वापराधनिवृत्तये साक्ष्यनुसरणं किंतु महत्प्रयोजनसिद्ध्यर्थमपीति सिंहावलोकनन्यायेन स
दृष्टांतमाह यौवराज्य इति राजानुकारी भवति राजेव प्रजारंजनादिगुणवान्भवतीत्यर्थः ४० ननु यौवरा
ज्यस्य राजानुसरणे साम्राज्यफलं दृश्यते नैव साक्ष्यनुसरणेऽतस्तदनुसरणं कथं प्रवर्त्तत इत्याशंक्याह
यो ब्रह्मेति स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले भवति तरति शोकं तरति पाप्मानं

यौवराज्ये स्थितो राजपुत्रः साम्राज्यवांछया राजानुकारी भवति तथा साक्ष्यनुकार्ययम् ४०
यो ब्रह्म वेद ब्रह्मैव भवत्येष इति श्रुतिम् श्रुत्वा तदेकचित्तः सन्ब्रह्म वेत्ति न चेतरत् ४१
देवत्वकामा ह्यग्न्यादौ प्रविशंति यथा तथा साक्षित्वेनावशेषाय स्वविनाशं स वांछति ४२

गुहाग्रंथिभ्यो विमुक्तोऽमृतो भवतीति श्रुतौ ब्रह्मभावादिरूपस्य फलस्य श्रूयमाणत्वात्तत्फलवांछया
साक्ष्यनुसरणे प्रवर्त्तनं युक्तमित्यर्थः ४१ ननु ब्रह्मज्ञानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेवत्वमेव विनश्ये
दतः स्वनाशाय कथं प्रवर्त्तत इत्याह देवत्वकामा इति यथा लोके देवत्वप्राप्तिकामा मनुष्या भृग्वग्निप्रयाग
गंगाप्रवेशादौ प्रवर्त्तंते एवं साक्षिरूपेणावस्थानलक्षणस्याधिकफलस्य विद्यमानत्वाच्चिदाभासत्वाप
गमेऽतो ब्रह्मज्ञानेपि प्रवृत्तिर्घटत एवेत्यर्थः ४२ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

साक्षिणं सदार्चितयन्नित्युक्तं दृष्टान्तेन स्पष्टयति मिथ्येति यथा लोके मिथ्याभियोगकर्त्ता तद्दोषस्य प्राय
श्चित्तसिद्ध्यर्थं मिथ्याभियुक्तं पुनः पुनः क्षमापयति एवमयं चिदाभासोऽपि साक्षिण्यसंगात्मनि भोक्तृत्वाद्या
रोपलक्षणमिथ्याभियोगदोषप्रायश्चित्तार्थं साक्षिणमात्मानं क्षमापयन्निव शरणं गतः ३६ तत्रैव दृष्टा
न्तान्तरमाह आवर्त्तेति यथा पापकारिणा पुरुषेणावर्त्तनपापनुत्त्यर्थं अभ्यस्तपापापनोदाय विहितं स्नानादि

मिथ्याभियोगदोषस्य प्रायश्चित्तत्वसिद्धये क्षमापयन्निवात्मानं साक्षिणं शरणं गतः ३६
आवर्त्तपापनुत्त्यर्थं स्नानाद्यावर्त्तते यथा आवर्त्तयन्निव ध्यानं सदा साक्षिपरायणः ३७
उपस्थकुष्ठिनी वेश्या विलासेषु विलज्जते जानतोग्रे तथाभासः स्वप्रख्यातौ विलज्जते ३८
ग्रहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्पुनः म्लेच्छैः संकीर्यते नैव तथाभासः शरीरकैः ३९

कं प्रायश्चित्तमावर्त्यते पुनः पुनरनुष्ठीयते तथायमपि चिरं साक्षिणि संसारित्वारोपणदोषपरिहाराय ध्या
नं परिवर्त्तयन्निव सदा साक्षिपरायणो भवति ३७ एवं साक्षिपरत्वं दृष्टान्तैरूपवर्ण्य स्वगुणप्रख्यापने लज्जा
लुत्वं सदृष्टान्तमाह उपस्थेति ३८ इदानीं शरीरत्रयाद्विवेचितस्य चिदाभासस्य पुनस्तैः सह तादात्म्यभ्र
माभावे दृष्टान्तमाह ग्रहीत इति ३९ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

दृष्टांतं विशदयति पुत्रेति ३३ एवमविवेकदशायां चिदाभासे भ्रांत्या ज्वरं प्रदर्श्य विवेकदशायां तदभावं दर्शयति विविच्येति चिदाभासः कूटस्थस्य स्वात्मानं शरीरादिभ्यो विविच्य भेदेन ज्ञात्वा इदं सर्वं मम वास्तवं स्वरूपमिति मन्यत इत्युक्तां भ्रांतिं परित्यज्य स्वस्याभं त्वस्वरूपज्ञानेन स्वस्मिन्नप्यादरमकुर्वन्स्वस्य निजं रूपं ज्वरादिरहितं साक्षिणं सदा चिंतयन्सरीरमनुज्वरवच्छरीरमनुसंत्यस्य पं कस्मात्संज्वरेदेवेत्यर्थः ३४

पुत्रदारे भृतप्यत्सु तप्यामीति यथा तथा मन्यते पुरुषस्तद्ददाभासोप्यभिमन्यते ३३
विविच्य भ्रांतिमुत्कित्वा स्वमप्यगाणयन्सदा चिंतयेन्साक्षिणं कस्माच्छरीरमनुसंज्वरेत ३४
अयथावस्तुसर्पादिज्ञानं हेतुः पलायने रज्जुज्ञाने हि धीध्वस्तौ कृतमप्यनुशोचति ३५

भ्रांतिज्ञानतत्त्वज्ञानयोर्ज्वरतदभावकारणत्वं दृष्टांतप्रदर्शनेन स्पष्टयति अयथेति रज्ज्वादौ कल्पितस्य सर्पादेर्ज्ञानं पलायने कारणं दृष्टांतप्रदर्शनेन स्पष्टयति भवति आदिशब्देन स्थाणौ कल्पितचोरो गृह्यते रज्ज्वादिज्ञानेन सर्पादिबुद्धिनिवृत्तौ तदपि पलायनमनुशोचति यथाकृतमपेत्यनुतप्यत इत्यर्थः ३५

यद्यपि चिदाभासे ज्वराभाव उपपादितस्तदिदानीं दर्शयति यदा चिदाभासेपीति यदा चिदाभासेपि ज्वरो
न संभाव्यंते तदा न साक्षिणि संभवतीति किमु वक्तव्यमिति भावः ननु तर्हि ज्वरामीत्यनुभवस्य का गतिरित्यत
आह एवमिति एकतां मेने इति ३० संक्षेपेणोक्तमर्थं प्रपंचयति साक्षिसत्यत्वमिति चिदाभासः

चिदाभासेप्यसंभाव्या ज्वराः साक्षिणि का कथा एवमप्येकतां मेने
चिदाभासो ह्यविद्यया ३० साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुस्त्रये
तत्सर्वं वास्तवं स्वस्य स्वरूपमिति मन्यते ३१ एतस्मिन्भ्रांतिकालेयं
शरीरेषु ज्वरत्स्वथ स्वयमेव ज्वरामीति मन्यते हि कुटुंबिवत् ३२

स्वेन सहिते शरीरत्रये साक्षिगतं सत्यत्वमध्यस्य तत्सर्वं ज्वरवच्छरीरत्रयं स्वस्य वास्तवं रूपमिति मन्यत इत्य
र्थः ३१ एवं भ्रांतिज्ञाने सति किं भवतीत्यत आह एतस्मिन्निति अयं चिदाभासोऽस्यां भ्रांतिवेलायां शरीरनि
ष्ठं ज्वरं स्वात्मन्यारोपयतीत्यर्थः तत्र दृष्टांतमाह कुटुंबिवदिति ३२ श्रीरामकृष्णगोपाल हरे ॥

एवं त्रिष्वपि देहेषु ज्वरानभिधाय तेषामपरिहार्यतामाह एतइति त्रिष्वपि शरीरेषु प्रतीयमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः संमताः स्वाभाविकत्वं व्यतिरेकमुखेन दृढयति वियोगे त्विति यतः कारणादेभिर्ज्वरैस्तेषां शरीराणां वियोगे तानि शरीराणि नासत्त एव न भवंत्यतः स्वाभाविका इत्यर्थः २७

एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मताः वियोगे तु ज्वरैस्तानि शरीराण्येव नासते २७
तंतोर्वियुक्ते न पटो वालेभ्यः कंवलो यथा मृदो घटस्तथा देहो ज्वरेभ्योपीति दृश्यताम् २८
चिदाभासे स्वतः कोपि ज्वरो नास्ति यतश्चितः प्रकाशैकस्वभावत्वमेव दृष्टं न चेतरत् २९

तत्र दृष्टांतमाह तंतोरिति २८ इदानीं कूटस्थे ज्वराभावं कैमुतिकन्यायेन दर्शयितुं चिदाभासे तावज्ज्वराभावं दर्शयति चिदाभास इति चिदाभासे स्वतः शरीरत्रयगतज्वरसंबंधमंतरेण न कोपि ज्वरो विद्यते कुत इत्यत आह यत इति चितः प्रकाशैकस्वभावस्य विद्वदनुभवसिद्धत्वात् तत्प्रतिबिंबस्यापि चिदाभासस्य तथात्वमेष्टव्यमिति भावः २९ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

तत्र स्थूलशरीरे ज्वरांस्तावदाह वातपित्तेति २४ सूक्ष्मशरीरे ज्वरान्दर्शयति कामेति कामादीनां शांत्यादीनां च ज्वरत्वमुपपादयति द्वयेपि द्विविधा अपि क्रमेण प्राप्त्यप्राप्तिभ्यां नरं बाधंते ऽतो ज्वरसाम्यात् ज्वरा इत्युच्यंत इत्यर्थः २५ कारणशरीरगतो ज्वरश्छान्दोग्यश्रुतावुक्त इत्याह स्वं परं चेति नैव खल्वयमेवं संप्रत्यात्मानं

वातपित्तश्लेष्मजन्या व्याधयः कोटिशस्तनौ दुर्गंधत्वकुरूपत्वदाहभंगादयस्तथा २४
कामक्रोधादयः शांतिदांत्याद्या लिंगदेहगाः ज्वरा द्वयेपि बाधंते प्राप्त्याप्राप्त्या नरं क्रमात् २५
स्वं परं न च वेत्त्यात्मा विनष्ट इव कारणे आगामिदुःखबीजं चेत्येतदिंद्रेण दर्शितम् २६

जानातीत्ययं अहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति वाक्ये न स्वपरज्ञानभ्रंशत्वं मरणेन सुप्रापत्वं परे चागामिदुःखबीजं वासनासद्भावं चेंद्रेण शिष्येण गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः ॥ २६ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

इदानींज्ञानानंतरं साक्षिणो भोक्तृत्वाभावः केमुतिकन्यायसिद्ध इत्याह यदेति अयं चिदाभासः स्वस्यापि भोक्तृत्वं मंतुमहं भोक्तेति ज्ञातुं जिहेति विलज्जते यदा तदा एतत्स्वगतं भोक्तृत्वं साक्षिण्यसंगे आरोपयेदिति यथा कथा पर्यशन्या केवन कापीत्यर्थः २१ उक्तमर्थं श्रुत्यारूढं करोति इति अभिप्रेत्येति कस्यकामायेति श्रुति-

यदा स्वस्यापि भोक्तृत्वं मंतुं जिह्रेत्ययं तदा साक्षिण्यारोपयेदेतदिति कैव कथा वृथा २१ इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविशंकया कस्य कामायेति ततः शरीरानुज्वरोनहि २२ स्थूलं सूक्ष्मं कारणं च शरीरं त्रिविधं स्मृतम् अवश्यं त्रिविधोस्त्येव तत्र तत्रोचितो ज्वरः २३ ॥

रित्यर्थः कूटस्थस्य चिदाभासस्य पारमार्थिकभोक्तृत्वाभावमभिप्रेत्य विशंकया शंकाराहित्येन भोक्तारमाक्षिपति निराकरोति भवत्वेवं भोक्त्राक्षेपस्ततः किमित्यत आह ततइति ज्वरो ज्वरणं संतापः २२ तत्वविदः शरीरानुज्वराभावं दर्शयितुं शरीरभेदं तत्र तत्र ज्वरसद्भावं च दर्शयति स्थूलमिति २३ ॥ श्रीः ॥

अस्य जगत इव विनाशित्वानुभवादपि मृषात्वमित्याह विलयोपीति मूर्च्छादिष्वित्यर्थः भवतु मृषात्वं ततः किमित्यत आह एतादृशमिति यदा कूटस्थाद्विवेचितश्चिदाभासो मायिकोऽस्तानस्तदा स्वस्वभावं स्वतत्त्वमेतादृशम् मृषात्मकं पुनः पुनः विविनक्ति कूटस्थाद्विविच्य जानाति १८ ततोपि किमित्यत आह विविच्येति स्व

विलयोप्यस्य सुप्त्यादौ साक्षिणा ह्यनुभूयते एतादृशं स्वस्वभावं विविनक्ति पुनः पुनः १८
विविच्य नाशं निश्चित्य पुनर्भोगं न वांछति मुमूर्षुः शायितो भूमौ विवाहं कोऽभिवांछति १९
जिह्रेति व्यवहर्तुं च भोक्ताहमिति पूर्ववत् छिन्ननास इव ह्रीतः क्लिश्यन्नारब्धमश्नुते २०

विनाशनिश्चये भोगेच्छाभावे दृष्टान्तमाह मुमूर्षुरिति १९ किंच पूर्ववदहं भोक्तेति व्यवहर्तुमपि लज्जत इत्याह जिह्रेतीति तर्हि ज्ञानोत्पत्त्यनन्तरं प्रारब्धावसानपर्यन्तं कथं व्यवहरतीत्यत आह छिन्ननास इति ह्रीतो लज्जितः क्लिश्यन्निदानीमपि कर्म क्षीयतामिति क्लेशमनुभवन्प्रारब्धमश्नुते प्रारब्धकर्मफलं भुंक्ते इत्यर्थः २०

एवंविवेकेनात्मतत्वेसंगेनिश्चितेभोक्तृत्वंकस्येत्यतआह एवंविवेचितइति योविज्ञानमयशब्देनाभिधीयमानश्चिदाभासस्तस्यविकारित्वाद्भोक्तृत्वमित्यर्थः १६ ननुचिदाभासस्यभोक्तृत्वांगीकारेकस्यकामायेतिवचोभोक्तृभावविवक्षयेति पूर्वोक्तंव्याहन्यतेत्याशंक्यतस्यपारमार्थिकभोक्तृभावपरत्वमभिप्रेत्यभोक्तुश्चिदाभा

एवंविवेचितेतत्वेविज्ञानमयशब्दितः चिदाभासोविकारीयोभोक्तृत्वंतस्यशिष्यते १६
मायिकोयंचिदाभासःश्रुतेरनुभवादपि इंद्रजालंजगत्प्रोक्तंतदंतःपात्ययंयतः १७

स्यमिथ्यात्वंसाधयति मायिकोयमिति अयंचिदाभासोमायिकोमृषात्मकःश्रुतेर्जीवेशावाभासेनकरोतीतिश्रुतेः अनुभवादपिद्रष्ट्रादित्रितयमध्यवर्तित्वेनानुभूयमानत्वादपीत्यर्थः तदेवोपपादयति इंद्रजालमिति इंद्रजालवन्मिथ्याभूतेजगत्यंतर्भूतत्वादस्यापिमिथ्यात्वंतद्वदनुभूयते विद्वद्भिरितिशेषः यस्माज्जगदंतःपातीत्यतोमृषेतियोजना ॥ १७ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

भोक्तृतात्मविवेचनपराणि श्रुत्यंतराणि दृश्यंते जाग्रदिति यत्सत्यज्ञानानंदलक्षणं ब्रह्मसाक्षिरूपेणाव
स्थितं तत् जाग्रदादिप्रपंचं प्रकाशते प्रकाशयतीति तद्ब्रह्माहमस्मि नत्वंतु बुद्धिचिदाभासाद्यहमस्मीति ज्ञात्वा श्रु
त्यनुभवाभ्यां निश्चित्य सर्वप्रतिबंधैः प्रमातृत्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते जाग्रदा
दिष्ववस्थास्वेक एवात्मा मंतव्यः एवं विवेकज्ञाने स्थानत्रयव्यतीतस्यावस्थात्रयाद्विविक्तस्यात्मनः पुन

जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते १३
एक एवात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते १४
त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः १५

र्जन्म न विद्यते एतच्छरीरपातानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः १३ ॥ १४ त्रिषु धामसु त्रिष्ववस्थाने
सु यद्भोग्यं स्थूलप्रविविक्तानंदरूपं यश्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोगस्तदनुभवरूपश्चेति यद्विद्यते
तेभ्यः स्थानादिभ्यो विलक्षणो यश्चिन्मात्ररूपः साक्षी सदाशिवः निरतिशयानंदरूपत्वेन सर्वदा शोभमा
नः परमात्मास्ति सोहमस्मीत्यर्थः ॥ १५ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

अन्वयव्यतिरेकौदर्शयति यत्रेति जाग्रदादिषुमध्येयत्रयस्मिन्स्थाने जाग्रतिस्वप्नेसुप्तौवायत्स्थू
लसूक्ष्ममानंदश्चेतित्रिविधंभोग्यंद्रष्ट्रासाक्षिणादृश्यतेऽनुभूयतेतत्दृश्यंतत्रैवतस्यामेवावस्थायांतिष्ठ
तिइतरत्रनइतरस्यामवस्थायांनास्तिद्रष्टासर्वत्रानुगततयावर्ततइत्यनुभवःसर्वसंमतःहिप्रसिद्धमेतदि
त्यर्थः ११ नकेवलमनुभवःकिंत्वागमोपीत्यभिप्रायेणसयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेनभवति

यत्रयद्दृश्यतेद्रष्ट्राजाग्रत्स्वप्नसुषुप्तिषु तत्रैवतन्नेतरत्रेत्यनुभूतिर्हिसंमता ११
सयत्तत्रेक्षतेकिंचित्तेनानन्वागतोभवेत् दृष्ट्वैवपुण्यंपापंचेत्येवंश्रुतिषुडिंडिमः १२

असंगोह्ययंपुरुषःसवाएतस्मिन्संप्रसादेरत्वाचरित्वादृष्ट्वैवपुण्यंचपापंचपुनःप्रतिन्यायंप्रतियोन्या
द्रवतीत्यादिवाक्यद्वयमर्थतःपठति सयत्तत्रेति सआत्मातत्रतस्यामवस्थायांयत्किंचिद्भोग्यमीक्षतेप
श्यतितेनदृश्येनानन्वागतोभवेत् अनुश्रित्यगतोनभवेत् किंतुस्वयमेवावस्थांतरंगच्छतीत्यर्थः पु
ण्यंपुण्यफलंसुखंपापंतत्फलंदुःखंचदृष्ट्वैवानादायेत्यर्थः ॥ १२ ॥ श्रीः ॥ श्रीः ॥

योगीयोगाभ्यासवान्अणिमाद्यैश्वर्यलोभेच्छया महायासेनचित्तैकाग्र्यंयथासंपादयेत्तद्वत्स्वमात्मानंसदाविवि-
च्याद्देहादिभ्योविविच्यजानीयादित्यर्थः ८ नन्वेवमेतेषांसदभ्यासेनकिंफलमित्यतआह कौशलानीति यथाते-
षांकार्याद्यभ्यासवतामभ्यासपाटवत्वेनतस्मिंस्तस्मिन्विषयेकौशलानिविवर्धन्ते एवमस्यापिमुमुक्षोरभ्यासा-

चित्तैकाग्र्यंयथायोगीमहायासेनसाधयेत् अणिमादिप्रेप्सयैवंविविच्यात्स्वंमुमुक्षया ८
कौशलानिविवर्द्धन्तेतेषामभ्यासपाटवात् यथातद्वद्विवेकोऽस्याप्यभ्यासाद्विशदायते ९
विविंचताभोक्तृतत्वंजाग्रदादिष्वसंगता अन्वयव्यतिरेकाभ्यांसाक्षिण्यध्यवसीयते १०

द्विवेकोदेहादिभ्यआत्मनोभेदज्ञानंविशदायतेस्पष्टंभवति ९ विवेकवैशद्यस्यफलमाह विविंचतेति अ-
न्वयव्यतिरेकाभ्यांभोक्तृतत्त्वंभोक्तुःपारमार्थिकस्वरूपंविविंचताभोग्येभ्योजडतात्तेभ्योभेदेनजानतापुरुषेण
जाग्रदादिषुजाग्रत्स्वप्नसुषुप्तिषुअवस्थासुसाक्षिरूपसंगताध्यवसीयतेनिश्चीयतइत्यर्थः १० ॥ श्रीः

मयंत्येवं पुरुषोऽस्तुतो किमायातमित्यत आह इति न्यायेनेति इत्यनेन पुरस्तोक्तन्यायेन सर्वस्मात् भोग्यजा
तात्पतिजायादिलक्षणाद्विरक्तधीः विरक्ता धीर्यस्यासौ विरक्तधीः पुरुषभोग्यगोचरां प्रीतिं भोक्तर्यात्मन्युप
संहृत्य एवमात्मानं बुभुत्सते बोद्धुमिच्छति ४ एवमात्मन्येव प्रेमोपसंहारे फलितं सदृष्टांतमाह स्रक्चं
दनेति पामरः पृथग्जनः स्रगादिविषये यथा प्रमत्तः सावधानो भवति एवं मुमुक्षुरप्यात्मनि विषयेन प्रमा

इति न्यायेन सर्वस्माद्भोग्यजाताद्विरक्तधीः उपसंहृत्य तां प्रीतिं भोक्तर्येवं बुभुत्सते ४
स्रक्चंदनवधूवस्त्रसुवर्णादिषु पामरः अप्रमत्तो यथा तद्वन्न प्रमाद्यति भोक्तरि ५
काव्यनाटकतर्कादिमभ्यस्यति निरंतरम् विजिगीषुर्यथा तद्व[illegible] मुमुक्षुः ६
स्वं विचारयेत् ६ जपयागोपासनादि कुरुते श्रद्धया यथा स्वर्गादिवांछया तद्वच्छ्रद्द
ध्यात्स्वमुमुक्षया ७

द्यत्यनवधानं न करोति किंतु तच्चिंतयैव तिष्ठतीत्यर्थः ५ अनवधाना
भावमेव बहुभिर्दृष्टांतैः स्पष्टयति काव्येति यथा विजिगीषुः प्रतिवादिजयकामः इहलोकप्रधानः पुरुषो
निरंतरं काव्यादीनभ्यस्यति एवं मुमुक्षुरपि सदा स्वात्मानं विचारयेत् ६ यथा वैदिकः स्वर्गाद्यर्थी तत्साध
नानि जपादीनि श्रद्धापुरःसरमनुतिष्ठति तथा मुमुक्षुरपि मोक्षेच्छया स्वस्मिन्नात्मनि विश्वासं कुर्यात् ७

अनुवादः किमर्थमित्याशंक्य भोक्तर्य्येव प्रेम्णो विधानायेत्याह भोग्यानामिति भोग्यानां पतिजायादीनां भो
क्तुः स्वस्य भोगोपकरणत्वात् भोग्येष्वनुरागो न कर्तव्यः किंतु प्रधानभूते भोक्तर्य्येवानुरागः कर्त्तव्य इति विधा
नायेत्यर्थः २ भोग्येषु प्रेमत्यागपुरःसरं आत्मप्रेमकर्त्तव्यतायां दृष्टान्तत्वेनेश्वरे प्रेमप्रार्थनापुरःसरं प्रह्लादव
भ॰ ५ चनमुदाहरति याप्रीतिरिति अविवेकिनामात्मस्वान्यां विषयेष्वनपायिनी दृढा या प्रीतिरस्ति हे मापलक्ष्मी

भोग्यानां भोक्तृशेषत्वान्मा भोग्येष्वनुरज्यताम् भोक्तर्य्येव प्रधानेऽतो
नुरागं तं विधित्सति २ या प्रीतिरविवेकानां विषयेष्वनपायिनी ॥
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ३ ॥ श्रीः ॥ श्रीः

पतेः सा प्रीतिस्त्वामनुस्मरतस्त्वां सदा चिंतयतो मे हृदयान्मनसः सर्पतु गच्छतु मम मनो विषयेष्वासक्तिं परि
त्यज्य त्वय्येव सदा तिष्ठत्वित्यर्थः यद्वा अविवेकानां विषयेषु दृढा या यादृशी प्रीतिरस्ति सादृशी विषयेषु विद्यमा
ना प्रीतिस्त्वामनुस्मरतो मे हृदयान्मापसर्पतु मापगच्छतु सदा तिष्ठत्वित्यर्थः ॥ ३ ॥ श्रीः ॥ श्रीः

नन्वुक्तरीत्या भोक्तुर्मिथ्यात्वे प्राणिनां तस्मिन्सत्यत्वबुद्धिः कुतो जायत इत्याशंक्याह कूटस्थेति आत्मा लोकप्रसिद्धो भोक्ता अविवेकतः स्वस्य कूटस्थाद्विवेकज्ञानाभावेन कूटस्थनिष्ठं सत्यत्वमात्मन्यध्यस्य तद्द्वारा स्वनिष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कदाचिदपि न हातुमिच्छति २०० ननु तर्ह्यात्मनस्तु कामाय सर्वं प्रियं

कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्माविवेकतः तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति २००
भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति एष लौकिकवृत्तान्तः श्रुत्या सम्यगनूदितः २०१

भवतीत्यात्मशेषत्वं भोग्यस्य कथं प्रतिपाद्यत इत्याशंक्य न कूटस्थात्मशेषत्वं प्रतिपाद्यते किंतु लोकप्रसिद्धोभयात्मकभोक्तृशेषत्वं श्रुत्यानूद्यत इत्याह भोक्तेति लोके यो भोक्ता स स्वस्यैव भोगाय पतिजायादिभोगोपकरणमिच्छतीत्ययम् लोकवृत्तान्तः श्रुत्या सम्यगनूदितो नार्थान्तरं प्रतिपाद्यत इत्यर्थः २०१

ननु बृहदारण्यकवाक्यार्थं तावत्संक्षिप्य दर्शयति आत्मेति जनकेन कतम आत्मेत्येवमात्मनि पृष्टे सति याज्ञवल्क्यस्तं विबोधयन्योयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमुपक्रम्यासंगो ह्ययं पुरुष इत्यसंगकूटस्थं परिशेषितवानित्यर्थः ९८ एवं बृहदारण्यकेऽसंगात्मपरिशेषणप्रकारं प्रदर्श्येतरेयादिश्रुत्यंतरेष्वपि

आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन् विज्ञानमयमारभ्यासंगं तं पर्यशेषयत् ९८
कोयमात्मेत्येवमादौ सर्वत्रात्मविचारतः उभयात्मकमारभ्य कूटस्थः शिष्यते श्रुतौ ९९

तद्दर्शयति कोयमिति कोयमात्मेति वयमुपास्महे कतरः स आत्मेत्येवमादावात्मविचारेणांतःकरणोपाधिकमात्मानमारभ्य प्रज्ञानमात्रात्मकः कूटस्थः परिशेषितः एवमन्यत्रापि द्रष्टव्यं एवमुक्तिश्रुतिपर्यालोचनयाउभयात्मकस्य भोक्तृमिथ्यात्वं पारमार्थिकासंगकूटस्थस्याभोक्तृत्वं सिद्धम् ९९ ॥ श्रीः ॥

ननु तर्हि विकारिणश्चिदाभासस्य भोक्तृत्वं स्यादित्याशंक्य विकारित्वेपि निरधिष्ठानस्य तस्यैवासिद्धेर्मैवमिति परि-
हरति विकारीति चिदाभासस्य विकारिबुद्ध्युपाध्यधीनत्वात् स्वस्मिन्विरेकसंभवत्यपि तस्यारोपितस्वरूपत्वेना-
धिष्ठानभूतं कूटस्थं विहाय स्थातुं स्वेनावस्थानासंभवात्केवलचिदाभासस्यापि भोक्तृत्वं न संभवतीति भावः ९६
तस्मात्तृतीयः पक्षः परिशिष्यत इत्याह उभयात्मक इति यत एकैकस्य भोक्तृत्वं न संभवत्यत उभयात्मकः साधि-

विकारिबुद्ध्यधीनत्वादाभासे विकृतावपि निरधिष्ठानविभ्रांतिः केवला न हि तिष्ठति ९६
उभयात्मक एवातो लोके भोक्ता निगद्यते तादृगात्मानमारभ्य कूटस्थः शेषितः श्रुतौ ९७

ष्ठानचिदाभास एव लोके व्यवहारदशायां भोक्तेत्यभिधीयते परमार्थतस्तूभयात्मकत्वमेव न घटत इति भावः ९७
नन्वसंगो ह्ययं पुरुष इत्यादावसंगत्वस्यैव योयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिसाक्षित्वस्यापि श्रवणादु-
भयात्मकभोक्तृत्वस्वरूपमपि पारमार्थिकमेव स्यान्न लोकव्यवहारमात्रसिद्धमित्याशंक्य श्रुतेः तत्रैतात्प-
र्याभावान्मैवमित्याह तादृगात्मानमिति तादृगात्मानं बुद्ध्युपाधिकं भोक्तारमात्मानमारभ्यानघकूटस्थपर्यं-
तं व्याकल्पनाधिष्ठानभूतश्चिदात्मा शेषितः बुद्ध्याद्यनात्मनिरसनेन परिशेषितः श्रुतौ बृहदारण्यकादौ

नन्वात्मनो भोक्तृत्वनिषेधः तत्प्रसक्तिपूर्वको वक्तव्यः सा तु न विद्यते असंगत्वादात्मन इत्याशंक्य तस्य तस्यानुभवसिद्धत्वान्मैवमित्यभिप्रेत्य दृतुवादिकां श्रुतिमर्थतोऽनुक्रामति पतिजायादिकमिति न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यारभ्य आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यंतेन वाक्यसंदर्भेण पतिजायादिकस्य प्रपंचस्यात्मनो भोगसाधनत्वं प्रतिपाद्यते ततश्चात्मनो भोक्तृत्वप्रसक्तिरित्यर्थः ९३ एवमात्मत्वं प्रदर्श्य तद्वादाय भोक्तारं वि

पतिजायादिकं सर्वं तत्तद्भोगाय नेच्छति किंत्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु ९३
किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्तृतां व्रजेत् ९४
सुखिदुःख्यभिमानाख्यो विकारो भोग उच्यते कूटस्थश्च विकारी चेत्येतन्न व्याहतं कथम् ९५

कल्पयति किं कूटस्थ इति किं कूटस्थस्य भोक्तृत्वमुत चिदाभासस्य किं वोभयात्मकस्येति विकल्पार्थः तत्र प्रथमं प्रत्याह तत्र न कूटस्थ इति ९४ असंगत्वमस्तु भोक्तृत्वमप्यस्तु को दोष इत्याशंक्याह सुखी दुःखीति सुखित्वंदुःखित्वाभिमानलक्षणो विकारो भोगः सोऽसंगकूटस्थस्य न युज्यते कूटस्थत्वविकारित्वयोरेकत्र समावेशायोगादित्यर्थः ९५ श्रीः ॥

एवमभिप्रायवर्णनेकारणमाह रागो लिंगमिति रागो लिंगमबोधस्य चित्तव्यायामभूमिषु कुतः शाद्वल
तातस्य यस्याग्निः कोटरे तरोरिति तत्त्वविदो रागनिषेधपरं शास्त्रम् शास्त्रार्थस्य समाप्तत्वान्मुक्तिः स्यात्तावता
रागो मुनेः रागादयः संतु कामं न तद्भावोऽपराध्यते जितस्येवांगीकारं च शास्त्रं एवं च सति तत्त्वविदो दृढरागाभावे स

रागो लिंगमबोधस्य संतु रागादयो बुधे इति शास्त्रद्वयं सार्थमेवं सत्यविरोधतः ९१
जगन्मिथ्यात्ववत्स्वात्माऽसंगत्वस्य समीक्षणात् कस्य कामायेति वाचो भोक्त्रभावविवक्षया ९२

तिशास्त्रद्वयं सार्थमर्थवद्भवति अविरोधतो रागनिषेधपरस्य शास्त्रस्य दृढरागपरत्वात्तदभ्युपगमपर
स्य रागाभासविषयत्वादितिभावः ९१ एवं किमिच्छन्नित्यंशस्याभिप्रायमुपवर्ण्य कस्य कामायेत्यंश
स्याभिप्रायमाह जगदिति यथा जगन्मिथ्यात्वबोधेन वास्तवकाम्याभावविवक्षया किमिच्छन्नित्युक्तमे
वमात्मनोऽसंगत्वबोधेन वास्तवभोक्त्रभावविवक्षया कस्य कामायेति श्रुत्याभिहितमित्यर्थः ९२ श्रीः

श्रीः

नन्वद्वैतादर्शनात्मज्ञानयोरुभयोरेव विघ्नत्वं नैकैकस्येति शंकते उभयमिति द्वैतविस्मृतेरपि विघ्नांशत्वां
गीकारे जडस्याप्यर्द्धविघ्नावत्त्वप्रसंग इति परिहरति तर्हीति अत्रोपपत्तिमाह सकलेति ८७ अस्मिन्नेव
पक्षे समाधिमतां पुरुषाणां अर्द्धविघ्नावत्त्वमपि न स्यादिति सोपहासमाह मशकेनेति घटादीनां यथाद्वैत
विस्मरणं दृढं तथा तत्त्वसमाधौ द्वैतविस्मरणं न संभवति मशकध्वन्यादीनामनेषां विक्षेपाणां सद्भावादित्यर्थः
८८ नन्वात्मज्ञानस्यैव विघ्नत्वं न द्वैतविस्मृतेरिति शंकते आत्मधीरिति तदस्माकमिष्टमित्यर्थप्रायेण

उभयंमिलितंविघ्नायदितर्हिघटादयः अर्द्धभाजिनःस्युःसकलंद्वैतविस्मृतेः ८७
मशकध्वनिमुख्यानांविक्षेपाणांबहुत्वतः तवविघ्नातथानस्यात्घटादीनांयथादृढा ८८
आत्मधीरेवविघ्नेतियदितर्हिसुखीभव दुष्टचित्तंनिरुंध्याश्चेन्निरुंधित्वंयथासुखम् ८९
तदिष्टमेष्टव्यमायामयत्वस्यसमीक्षणात् इच्छन्नप्यज्ञवन्नैच्छेत्किमिच्छन्नितिहिश्रुतम् ९०

शीर्षीदयति तर्हीति नन्वात्मधीरेव विघ्नास्तानदुष्टचित्ते संभवति अतश्चित्तदोषपरिहाराय चित्तवृत्तिनिरो
धः कार्य इति शंकामनुभाषते दुष्टचित्तमिति तदंगीकरोति निरुंधीति तदिष्टमिति अस्माकमपीति शेषः
कुत इत्यत आह एष्टव्येति चित्तदोषापगमे सत्यद्वितीयात्मज्ञानायैष्टव्यमायाजगन्मायामयत्वं सम्यगीक्ष्य
ते ऽतइष्टमित्यर्थः एवं किमिच्छन्नितिमंत्रांशेनाभिप्रेतमर्थमुपपादितमुपसंहरति इच्छन्निति इच्छन्नप्य
यं नैच्छेदतः किमिच्छन्नितिश्रुतमितियोजना ९०

अस्याःश्रुतेसुषुप्त्यादिविषयत्वानंगीकारेबाधकमाह अन्यथेति तत्रोपपत्तिमाह द्वैतदृष्टाविति याज्ञवल्कादिर्यदिद्वैतंपश्येत्तर्हितदाद्वैतज्ञानाभावान्नाचार्योभवेद्यद्वैतंनपश्यति तर्हिवोध्यशिष्याद्यनुलंभादाचार्यवाक्शिष्यप्रतिवोधनायप्रवर्तेततोविद्यासंप्रदायोच्छेदप्रसंगइतिभावः ८४ ननुयाज्ञवल्कादीनामाचार्यत्वेदशायांविद्यमानस्यज्ञानस्यविद्यात्वमस्त्येवतथापितस्यानपरोक्षविद्यात्वंद्वैतप्रतीतिसद्भावान्निर्वि

अन्यथायाज्ञवल्कादेराचार्यत्वंनसंभवेत् द्वैतदृष्टावविद्वत्ताद्वैतादृष्टौनवाग्वदेत् ८४
निर्विकल्पसमाधौतुद्वैतादर्शनहेतुतः सैवापरोक्षविद्येतिचेत्तर्हि सुषुप्तिस्तथानकिम् ८५
आत्मतत्त्वंनजानातिसुप्तौयदितदात्वया आत्मधीरेवविद्येतिवाच्यंनद्वैतविस्मृतिः ८६

कल्पसमाधौद्वैतदर्शनाभावात्सैवापरोक्षविद्येतिशंकते निर्विकल्पेति द्वैताप्रतीतेरतिप्रसंगापादकत्वात्मैवमितिपरिहरति सुषुप्तिरिति ८५ अतिप्रसंगपरिहारंशंकते आत्मतत्त्वमिति सुषुप्तौद्वैतदर्शनाभावेपि आत्मगोचरज्ञानाभावान्नविद्यात्वंतस्याइत्यर्थः तर्हिप्राप्ताप्राप्तविवेकेनज्ञानस्यैवविद्यात्वं नद्वैतदर्शनाभावस्येत्याह तदात्वयेति ८६ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिर्द्वैतदर्शनदृश्याभावं बोधयत्यतो विद्योत्पद्यमानाज
गद्विलापयेदेव एवं सति विदुषो भोगः कथं स्यादिति श्रुत्यवष्टंभेन शंकते श्लोकद्वयेन यत्र त्वस्येति यत्र य
स्यां विद्यावस्थायां कृत्स्नं जगदस्य विदुषः स्वात्मैवाभूदिदं सर्वं यदयमात्मेति ज्ञानेन स्वरूपमेव भवति तत्र
तस्यां दशायां को द्रष्टा केन साधनेन चक्षुषा किं दृश्यं रूपजातं पश्येदेवं घ्राणलक्षणेन किं कुसुमादिकं

यत्र त्वस्य जगत्स्वात्मा पश्येत्कस्तत्र केन किम् किं जिघ्रेत्किं वदेद्वेति श्रुतौ तु वहुघोषितम् ८१
तेन द्वैतमपह्नुत्य विद्योदेति न चान्यथा तथा च विदुषो भोगः कथं स्यादिति चेच्छृणु ८२
सुषुप्तिविषया मुक्तिविषया वा श्रुतिस्त्विति उक्तं स्वाप्ययसंतत्योरिति सूत्रे ह्यतिस्फुटम् ८३

जिघ्रेत् किं वाच्यं केन वागिंद्रियेण स वदेदेवमितरेंद्रियव्यापाराभावद्योतनाय वाशब्दः इत्येवंप्रकारेण श्रु
तौ बहुवारमभिहितमित्यर्थः ८१ ततः किमित्यत आह तेनेति स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि
त्यस्मिन्सूत्रे यत्र त्वस्येत्युदाहृतायाः श्रुतेः सुषुप्तिमोक्षयोरन्यतरविषयत्वेन व्याख्यातत्वान्न विद्या जगदपह्नुत
इति परिहरति शृण्विति ८२ स्वाप्ययः सुषुप्तिः संपत्तिर्मुक्तिरित्यर्थः ८३ ॥ श्रीः ॥ श्रीः ॥

ननुमिथ्यापदार्थैर्भोगोभवतीत्यथापिदृष्टांतोनास्तीत्याशंक्याह अन्यूनइति ७८ नापिद्वितीयइत्याह यदीति विद्यायदि यगद्भोग्यजातमपन्हुवीतनेदंरजतमितिनिषेधंकृत्वानवाप्रतीयमानस्यभोग्यस्यस्वरूपंविलोपयेत्तदाप्रारब्धकर्मभोग्यस्यसुखदुःखानुभवस्यसाधनापहारेणप्रारब्धकर्मविघातिनीस्यात्नैचतत्पाकरोतिकिंतुमिथ्यात्वमेवबोधयति अतोनप्रारब्धकर्मविरोधिनीभावः ननुमिथ्यात्वे

अन्यूनोजायतेभोगः कल्पितैःस्वाप्नवस्तुभिः जाग्रद्वस्तुभिरप्येवमसत्यैर्भोगइष्यताम् ७८
यदिविद्यापन्हुवीतजगत्प्रारब्धघातिनी तदास्यान्नतुमायात्वबोधेनतदपन्हवः ७९
अनपन्हुत्यलोकास्तदिंद्रजालमिदंत्विति जानंत्येवानपन्हुत्यभोगमायात्वधीस्तथा ८०

बोधनादेवस्वरूपमपिविलापयेदित्याशंक्याह नत्विति इंद्रजालादेःस्वरूपलयंविनापिमिथ्यात्वदर्शनदर्शनादितिभावः ७९ एतदेवप्रपंचयति अनपन्हुत्येति लोकाजनास्तदिंद्रजालस्वरूपमनपन्हुत्यानिरस्यइंद्रजालमितिजानंत्येवंयथातथाभोगभोग्यमपन्हुत्याविलाप्यजगन्मिथ्यात्वधीर्जगन्मिथ्यात्वज्ञानंभवतीत्यर्थः ८०॥ श्रीः

एवंविभिन्नविषयत्वंप्रदर्श्यप्रयोगमाह विद्येति विद्याप्रारब्धकर्मणीपरस्परंनविरुध्येतेविभिन्नविष
यत्वात्संप्रतिपन्नरूपरसज्ञानवदित्यर्थः भोग्यमिथ्यात्वज्ञानंभोगबाधकंनभवतीत्येतत्क्वदृष्टमित्याशंक्या
ह जानद्भिरिति इन्द्रजालसंबंधीचमत्कारविशेषः जानद्भिरपीन्द्रजालत्वंजानद्भिरप्यवलोक्यतइतिप्र
सिद्धमित्यर्थः ७६ किंचविद्याप्रारब्धकर्मणोर्विरोधोस्तीतिवदन्प्रष्टव्यः किंप्रारब्धकर्मविद्याविरोधीत्यु

विद्यारब्धेविरुध्येतेनभिन्नविषयत्वतः जानद्भिरप्यैंद्रजालविनोदोदृश्यतेखलु ७६
जगत्सत्यत्वमापाद्यप्रारब्धंभोजयेद्यदि तदाविद्यायाभोगमत्रान्नसत्यता ७७ विरोधि॰

च्यतेउतविद्याप्रारब्धकर्मविरोधिनीतिनाद्यइत्याह जगत्सत्यत्वमिति प्रारब्धंकर्मजगतोभोग्यजातस्य
सत्यत्वमबाध्यत्वमापाद्यसंपाद्ययदिभोजयेज्जीवस्यसुखदुःखेदद्यात्तदाविद्याविषयस्यमिथ्यात्वस्या
पहाराद्विद्यायाविरोधिस्यान्नचतथाकरोतिकिंतुभोगमेवप्रयच्छति अतोनविद्याविरोधिप्रारब्धमितिभावः
भोगबलादेवभोग्यस्यसत्यत्वमपिस्यादित्याशंक्याह भोगेति विमतंसत्यंभोग्यत्वादित्यत्रदृष्टांताभावइतिभावः ७७

पंचदशी

८१

ननुप्रपंचगोचरस्यमिथ्यात्वज्ञानस्यविषयसत्यत्वोपजीविनोभोगस्यचपरस्परविरोधित्वान्मिथ्या
त्वज्ञानेसतिकथंभोगसिद्धिरित्याशंक्यभोगस्यविषयसत्यत्वापेक्षाभावान्नविरोधइतिपरिहरति इंद्र
जालमिति इदंद्वैतंभोग्यजातमचिंत्यरचनात्वादिंद्रजालवन्मिथ्येतिप्रत्यानुसंधायाविस्मरतोविदु
षः प्रारब्धभोगतःप्रारब्धकर्मफलयोःसुखदुःखयोरनुभवेनमिथ्यात्वानुसन्धानस्यकाहानिः या

इंद्रजालमिदंद्वैतमचिंत्यरचनात्वतः इत्यविस्मरतोहानिः कावाप्रारब्धभोगतः ७४
निर्बंधस्तत्वविद्यायाइंद्रजालत्वसंस्मृतौ प्रारब्धस्याग्रहोभोगेजीवस्यसुखदुःखयोः ७५

शक्तामिथ्यात्वानुसंधानेनवाभोगस्यकाहानिः विभिन्नविषयत्वादितिभावः ७४ विभिन्नविषय
त्वमेवदर्शयति निर्बंधइति तत्वविद्यायाजगतत्वगोचरस्यज्ञानस्यइंद्रजालवज्जगतोमिथ्यात्वानुसंधाने [illegible]
निर्बंधोनतुभोगायप्रारब्धकर्मणश्चजीवजीवस्यसुखदुःखयोःप्रदानेआग्रहोनतुभोग्यसत्यत्वापादनेइति

८१

श्रीः

विवेकिनस्तदभावं दर्शयति मायामयत्वमिति ७० ननु मायामयत्वबोधे सत्यपि भोगस्य तदानींतनसुखहेतुत्वात्कुतस्तस्योपसंहारः इत्याशंक्य बहुविधदोषदर्शनादित्याह स्वप्नेन्द्रजालेति ७१ ननु कथं स्वप्नेंद्रजालसादृश्यादिज्ञाने सत्यासक्तिभावो न भवेत्तदेव कुतो जायत इत्याशंक्य तज्जन्मोपायमाह स्वस्वप्नमिति

मायामयत्वं भोगस्य बुद्ध्वाऽऽस्थामुपसंहरन् भुंजानोपि न संकल्पं कुरुते व्यसनं कुतः ७०
स्वप्नेन्द्रजालसदृशमचिंत्यरचनात्मकम् दृष्टनष्टं जगत्पश्यन्कथं तत्रानुरज्यति ७१
स्वस्वप्नमापरोक्ष्येण दृष्ट्वा पश्यन्स्वजागरम् चिंतयेदप्रमत्तः सन्नुभावनुदिनं मुहुः ७२
चिरं तयोः सर्वसाम्यमनुसंधाय जागरे सत्यत्वबुद्धिं संत्यज्य नानुरज्यति पूर्ववत् ७३

स्वकीयं स्वप्नमपरोक्षतया दृष्ट्वा स्वकीयं च जागरमनुभवन् स्वप्नजागराउभावप्यप्रमत्तः सन्मुहुः चिंतयेत् स्वप्नतुल्योयं जागर इति ७२ एवं तयोः सर्वसाम्यं तात्कालिकभोगहेतुत्वं परिणामतिविरसत्वविनाशित्वादिलक्षणं चिरमनुसंधाय जागरेपि सत्यत्वबुद्धिं परित्यज्य जाग्रद्वस्तुष्वपि पूर्ववज्जगत्सत्यत्वज्ञानदशायामिव नानुरज्यति अनुरक्तो न भवतीत्यर्थः ७३ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

व्यसनहेतुं भ्रमं दर्शयति माविनश्यत्विति अयं भोगो मा विनश्यतु एष उत्तरोत्तरं वर्द्धतां विघ्नाश्चैनं मा प्रतिबध्नंतु अस्य प्रतिबंधं मा कुर्वंतु अस्मादेव भोगादहं धन्यः कृतार्थोस्मीति एवंरूपो भ्रमो भवति ततश्च व्यसनमित्यर्थः ६७ प्रसंगादस्य परिहारोपायमाह यद्भावीति यद्भवितुमयोग्यं तन्न भवेदेव भवितुं योग्यं चेत्तदन्यथा न भवेदेवेत्येवंरूपः चिंताविषघ्नः इदं मे श्रेयः फलं भविष्यति इदमनिष्टं फलं निवर्तयिष्यतीत्येवं मा

माविनश्यत्वयंभोगोवर्द्धतामुत्तरोत्तरम् माविघ्नाःप्रतिबध्नंतुधन्योस्म्यस्मादितिभ्रमः ६७
यद्भाविनतद्भाविभाविचेन्नतदन्यथा इतिचिंताविषघ्नोयंबोधोभ्रमनिवर्तकः ६८
समेपिभोगेव्यसनंभ्रांतोगच्छेन्नबुद्धवान् असंभाव्यार्थस्यसंकल्पाद्भ्रांतस्यव्यसनंबहु ६९

दिचिंतैव विषमिव स्वसंसृष्टपुरुषस्य नाशहेतुत्वाद्विषमिदं चिंताविषं हंतीति चिंताविषघ्नः एवंभूतो योबोधः सोयं भ्रमनिवर्तकः पूर्वोक्तभ्रमनिवर्तक इत्यर्थः ६८ ननु विद्वदविदुषोरुभयोरपि भोगित्वाविशेषे एकस्य व्यसनमपरस्य तु नेत्येतत्कुत इत्याशंक्य विपरीतज्ञानसत्यासत्याभ्यां तत्सिद्धिरित्याह समेपीति बुद्धवान्ज्ञातवान्ज्ञानीत्यर्थः भ्रांतेः कथं व्यसनहेतुत्वमित्यत आह असंभाव्येति ६९ श्रीः

श्रीः

संक्षेपेणोक्तमर्थंप्रपंचयति भर्जितानीति यथाभर्जितानिवीजानिस्वयंस्वस्वरूपेणाविद्यमानान्यपिनांकुरा
दिकार्यकराणिभवंतितथाविद्वदिच्छास्वयंविद्यमानापीष्यमाणपदार्थस्यासत्वज्ञानेनवाधितत्वान्नव्यस
नादिकार्यक्षमेत्यर्थः ६४ ननुतर्हिविदुषइच्छैवनांगीकर्तव्याफलाभावादित्याशंक्य फलाभावोऽसिद्धोभो
गलक्षणफलसद्भावादितिसदृष्टांतमाह दग्धंवीजमिति यावत् व्यसनंविषयादिरूपंवहुविधंव्यसनं

भर्जितानिचवीजानिसंत्यकार्यकराणिच विद्वदिच्छातथेष्टव्यासत्वबोधान्नकार्यकृत् ६४
दग्धवीजमरोहेपिभक्षणायोपयुज्यते विद्वदिच्छाप्यल्पभोगंकुर्यान्नव्यसनंवहु ६५
भोगेनचरितार्थत्वात्प्रारब्धंकर्महीयते भोक्तव्यसत्यताभ्रांत्याव्यसनंतत्रजायते ६६

विपदिभ्रंशेदोषेकामजकोपजेइत्यभिधानात् ननुतर्हिकर्मैवभोगद्वाराव्यसनमपिजनयेदित्याशंक्या
ह भोगेनेति प्रारब्धकर्मणोभोगमात्रहेतुत्वान्नव्यसनजनकत्वमित्यर्थः कुतस्तर्हिव्यसनजन्मेत्यत
आह भोक्तव्येति तत्रतस्मिन्विषये ६६ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

इदानीं परेच्छाप्रारब्धमप्यस्तीत्याह नानिच्छंतइति अनिच्छंतोपिनभवंति इच्छंतोपिनभवंति किंतुपरदाक्षिण्यसंयुताः संतस्तत्प्रीत्यर्थमेवदुःखसुखे अनुभवंति अतएतत्सुखादिभोगहेतुभूतंपरेच्छापूर्वकंप्रारब्धंप्रसिद्धमित्यर्थः अतएवदोषदर्शनेसत्यपिप्रारब्धस्यापरिहार्यत्वात्तस्येच्छाजनकत्वेननिवारयितुंशक्नोतिइतिभावः ६२ ननुतत्त्वविदोपीच्छांगीकारे किमिच्छन्निति श्रुतिविरोधइतिशंकते कथमिति किमिच्छन्नित्यनेनवाक्येनकथमिच्छाभावोवर्णितः इत्यर्थः नानेनेच्छाऽभिधीयते किंतुसत्या अपितस्याः समर्थप्रवृत्तिजनकत्वंनास्तीतिबोध्यतइतिपरिहरति नेच्छेति स्वरूपेणसत्या अपितस्याः सामर्थ्यराहित्येदृष्टांतमाह भर्जितेति ६३ ॥ श्रीः ॥

नानिच्छंतोनचेच्छंतः परदाक्षिण्यसंयुताः सुखदुःखेभजंत्येतत्परेच्छापूर्वकर्महि ६२
कथंतर्हिकिमिच्छन्नित्येवमिच्छानिषिध्यते नेच्छानिषेधः किंत्विच्छाबाधोभर्जितबीजवत् ६३

तत्रार्जुनस्यप्रश्नंतावद्दर्शयति अथकेनेति हेवार्ष्णेयवृष्णिसंबंधिन्अयंपुरुषःकेनप्रेरितःइच्छामकुर्वन्
अपिराज्ञाबलान्नियोजितइवपापंचरति ५९ कृष्णोत्तरमाह कामइति एषःपुरुषप्रवर्तकःरजोगुणात्स
मुद्भवउत्पत्तिर्यस्यसरजोगुणसमुद्भवःकामःएषःप्रसिद्धोयंकामःकश्चित्क्रोधरूपेणापिपरिणमते ततः
क्रोधःसपुनःकीदृशः महाशनःमहत्अशनंविषयजातंयस्यसमहाशनःमहापाप्मामहतःपापस्यहेतुत्वा
दुपचारान्महापाप्मत्वमस्यअतइहसंसारेएनंकामंक्रोधरूपंवैरिणंविद्धिअयमभिप्रायःप्रारब्धवशाद्बुद्धि

अथकेनप्रयुक्तोयंपापंचरतिपूरुषः अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितः ५९
कामएषक्रोधएषरजोगुणसमुद्भवः महाशनोमहापाप्माविद्ध्येनमिहवैरिणम् ६०
स्वभावजेनकौंतेयनिबद्धःस्वेनकर्मणा कर्तुंनेच्छसियन्मोहात्करिष्यस्यवशोपितत् ६१

त्करजोगुणकार्ययोःकामक्रोधयोरन्यतरस्यैवपुरुषप्रवर्तकत्वंनप्रवृत्तीच्छायाइति ६० नन्वत्रकामक्रो
धयोरेवपुरुषप्रवर्तकत्वमुपलभ्यतेनानिच्छाप्रारब्धस्येत्याशंक्यतस्यैवप्रवर्तकत्वप्रतिपादकंतद्वाक्यंपठ
ति स्वभावजेनेति हेकौंतेयस्वेनैवानुष्ठितेनातएवस्वकीयेनप्रारब्धेनकर्मणानिबद्धःसन्यत्कर्तुंनेच्छ
सितदपिमोहादविवेकतःअवशःपरवशःकरिष्यसीत्यतोऽनिच्छाप्रारब्धमस्तीत्यभ्युपगंतव्यमितिभावः ६१

गीतावाक्यं पठति सदृशमिति विवेकज्ञानवानपि पुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृशं अनुरूपं चेष्टते प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्त्तमानजन्मादावभिव्यक्तः किंपुनर्मूर्खः तस्मात्प्रकृतिं यान्ति भूतानि निग्रहः प्रवृत्तिनिरोधो निरोधो मयान्येन वा कृतः किं करिष्यति न किमपीत्यर्थः ५५ तीव्रप्रारब्धस्यापरिहार्यत्वे वचनान्तरसंमतिमाह अवश्यमिति अवश्यंभाविनां भावानां दुःखादीनामित्यर्थः ५६ प्रा

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ५५
अवश्यंभाविभावानां प्रतीकारो भवेद्यदि तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः ५६
न चेश्वरत्वमीशस्य हीयते तावता यतः अवश्यंभाविताप्येषामीश्वरेणैव निर्मिता ५७
प्रश्नोत्तराभ्यामेवैतद्गम्यतेऽर्जुनकृष्णयोः अनिच्छापूर्वकं चास्ति प्रारब्धमिति तच्छृणु ५८

रब्धस्यापरिहार्यत्वेन तत्परिहारसमर्थस्येश्वरस्यानीश्वरत्वप्रसंग इत्याशंक्याह न चेति कुत इत्यत आह यत इति यतः कारणादेषां दुःखादीनामवश्यंभावितापीश्वरेणैव निर्मिता ऽतो नानीश्वरत्वप्रसंग इत्यर्थः ५७ एवं सप्रपंचमिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धं वक्तुमारभते प्रश्नोत्तराभ्यामिति अनिच्छापूर्वकं च प्रारब्धमस्ति एतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेव गम्यते ज्ञायत इति योजना तदभिधानाय शिष्यमभिमुखीकरोति तच्छृणुष्वेति ५८ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

ननुप्रारब्धकर्मप्राबल्याद्भोगेच्छाभवेद्यदीत्यत्रकर्मवशादिच्छाभवेदित्युक्तंतदनुपपन्नमिच्छाविघा
तिनिविवेकज्ञानेसतितदुत्पत्त्यसंभवादितिशंकते विवेकइति ५१ दोषदर्शनेसत्यपीच्छाजन्मसंभविष्य
तिप्रारब्धस्यनानाप्रकारत्वादितिपरिहरति नैषदोषइति तदेवदर्शयति इच्छेति इच्छाजनकमनिच्छ

विवेकेजाग्रतिसतिदोषदर्शनलक्षणे कथमारब्धकर्मापिभोगेच्छांजनयिष्यति ५१
नैषदोषोयतोनेकविधंप्रारब्धमीक्ष्यते इच्छानिच्छापरेच्छाचप्रारब्धंत्रिविधंस्मृतम् ५२
अपथ्यसेविनश्चोराराजदाररताअपि जानंतएवस्वानर्थमिच्छंत्यारब्धकर्मतः ५३
नचात्रैतद्वारयितुमीश्वरेणापिशक्यते यतईश्वरएवाहगीतायामर्जुनंप्रति ५४

याभोगप्रदंपरेतीच्छयाभोगप्रदंचेतित्रिविधमित्यर्थः ५२ इच्छाप्रारब्धंदर्शयति अपथ्यसेविनइति
५३ अपथ्यसेवादीच्छायाःप्रारब्धफलत्वंकुतोऽवगम्यतइत्याशंक्यापरिहार्यत्वादित्यभिप्रेत्याह नचा
त्रैतदिति अत्रास्मिन्लोके अपथ्यादीच्छंतीत्येतत्कुतइत्यतआह यतइति ५४ ॥ श्रीः ॥

विवेकफलस्य भोगस्य तृप्तिहेतुत्वमनुभवसिद्धमित्याह परिज्ञायेति अयं भोग एतावानेवं प्रयासमध्यऽ
ल्पेवमनुभवपूर्वकश्चेद्दलं तुष्टिहेतुर्हि दृश्यत इत्यर्थः नह्यत्र साहेतोर्भोगस्य विवेकसाहचर्यमात्रेण
कथं तुष्टिकरत्वमित्याशंक्य सहकारिविशेषवशाद्विपरीतकार्यकारित्वं लोके दृष्टमित्याह विज्ञाये
ति अयं चोर इति ज्ञायमानेन सहवर्तमानस्य पुंसः चौरोऽन चोरतामेति किंतु मित्रतामेतीत्यर्थः ४८

परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये विज्ञाय सेवितश्चौरो मैत्रीमेति न चोरताम् ४८
मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः तमेवालब्धविस्तारं क्लिष्टत्वाद्बहु मन्यते ४९
बंधमुक्तो महीपालो ग्राममात्रेण तुष्यति परैरबद्धो नाक्रांतो न राष्ट्रं बहु मन्यते ५०॥

ननु कामनायासक्तत्वान्मनसः कथं स्वल्पभोगेन तृप्तिः स्यादित्याशंक्य निदिध्यासनेन गृहीतस्यातपा
त्याद्भवत्येव तृप्तिरित्याह मनस इति निगृहीतस्य योगाभ्यासेन वशीकृतस्य मनसोऽल्पकोऽपि स्वल्पो
लीलाभोगो लीलानुभावो योऽस्ति अलब्धविस्तारं अप्राप्तबाहुल्यं तमेव भोगं क्लिष्टत्वाद्दोषयुक्ताद्बहु
मन्यते अधिकत्वेन जानातीत्यर्थः ४९ निगृहीतस्य मनसः स्वल्पेनापि भोगेन तृप्तिर्भवतीत्यत्र दृष्टांत
माह बंधमुक्त इति ५०

ननुतत्त्वविदांसंसारनिमित्तकस्तापोऽनुपपन्नःज्ञानवैयर्थ्यापाताइत्याशंक्याह नायमिति अयंक्लेशः
पा।म२ नाद्यापिकर्मनच्छिन्नमित्येवमनुतापकःसंसारतापोनभवतिकिंत्वत्रसंसारेविरक्ततासक्तिराहित्यंतत्तापकत्वाभावेयुक्तिमाह
भ्रांतीति हियस्मात्कारणात्सांसारिकस्तापोभ्रांतिज्ञाननिदानःभ्रांतिज्ञानकारणकः

नायंक्लेशोऽत्रसंसारतापःकिंतुविरक्तता भ्रांतिज्ञाननिदानोहितापःसांसारिकःस्मृतः ४५
विवेकेनपरिक्लिश्यन्नल्पभोगेनतृप्यति अन्यथानंतभोगेपिनैवतृप्यतिकर्हिचित् ४६
नजातुकामःकामानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते ४७ ॥

स्मृतःपूर्वाचार्यैः अयंतुविवेकज्ञानमूलकत्वान्नतथाविधइत्यर्थः ४५ अयंक्लेशोविवेकमूलोऽविवेकमूलोवेतिकुतोऽवगम्यतइत्याशंक्यकामनिवर्तकत्वाद्विवेकमूलइत्याह विवेकेनेति ४६ विवेकिनइवाविवेकिनोपिभोगेनैवतृप्तिःस्यादतोविवेकोऽप्रयोजकइत्याशंक्यभोगस्यतृप्तिहेतुत्वाभावप्रतिपादिकांश्रुतिंपठति नजात्विति ४७ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

एवमितिशब्देनत्वङ्मांसरक्तबाष्पांबुपृथक्कृत्वाविलोचनेसमालोकयरम्यंचेत्किंमुधाव्यपावरिमु
ह्यसीत्येवमादयोग्रह्यंते ४१ विषयदोषदर्शनेसतिभोगेच्छाऽभावेयुक्तिसहितंदृष्टांतमाह क्षुधयेति
स्वयममूढोविवेकीमिष्टान्नभोजनेनध्वस्ताविनष्टातृट्तृष्णाऽऽकांक्षायस्यसः तथोक्तः इदंविषमि

एवमादिषुशास्त्रेषुदोषाःसम्यक्प्रपंचिताः विमर्शन्ननिशंतानिकथंदुःखेषुमज्जति ४१
क्षुधयापीड्यमानोऽपिनविषंह्यत्तुमिच्छति मिष्टान्नध्वस्ततृड्जानन्नामूढस्तज्जिघत्सति ४२
प्रारब्धकर्मप्राबल्याद्भोगेष्विच्छाभवेद्यदि क्लिश्यन्नेवतदप्येषभुंक्तेविष्टिगृहीतवत् ४३
भुंजानेस्तानपिबुधाःश्रद्धावंतःकुटुंबिनः नाद्यापिकर्मनश्छिन्नमितिक्लिश्यंतिसंततम् ४०

त्येवंजानंस्तद्विषंनजिघत्सतिनात्तुमिच्छतीत्यर्थः ४२ ननुप्रारब्धकर्मणःप्राबल्यात्ज्ञानिनोपीच्छाभ
वेदित्याशंक्यतस्यांसत्यामपिप्रीतिपुरःसरंनभुंक्तेइत्याह प्रारब्धेति ४३ कथमेतदवगम्यतइत्याशंक्य
लोकदर्शनादित्याह भुंजानाइति ४४ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

काम्याभावात्कामनाभावः क्वदृष्टइत्याशंक्याह गंधर्वेति मायाविनिर्मिते पत्तनेस्थितंवस्तुकिंचिदपि
इदमैंद्रजालिकनिर्मितमिति जानन्नकामयतेन केवलंकामनाभावः प्रत्युतमन्तुमितिजिहसनजिहा
सतिपरित्यक्तुमिच्छति ३७ दार्ष्टांतिकेयोजयति आपातेति एवमापातरमणीयेषु प्रतीतिमात्रर
म्येषुभोगेषुभुज्यंतइतिभोगाविषयाःस्रक्चंदनादयःतेषुएवंविचारवान् आपातरमणीयत्वानुसंधान

गंधर्वपत्तने किंचिन्नैंद्रजालिकनिर्मितम् जानन्कामयते किंतुजिहासतिहसन्निदम् ३७
आपातरमणीयेषुभोगेष्वेवंविचारवान् नानुरज्यतिकिंत्वेतान्दोषदृष्ट्याजिहासति ३८
अर्थानामर्जनेक्लेशस्तथैवपरिपालने नाशेदुःखंव्ययेदुःखंधिगर्थान्क्लेशकारिणः ३९ ॐ
मांसपांचालिकायास्तुयंत्रलोलेंगपंजरे स्नाय्वस्थिग्रंथिशालिन्याःस्त्रियःकिमिवशोभनम्

वान्नासक्तिंकरोति किंतुदोषदर्शनेनैतान्परित्यक्तुमिच्छति ३८ केतेविषयदोषाइत्यतआह अर्था
नामिति ३९ एवंविषयाणांदुःखहेतुत्वंप्रदर्श्याशोभनत्वंचक्वचिद्दर्शयति मांसेति स्नायवःशिराः अ
स्थीनिप्रसिद्धानिग्रंथयोमांसानिचयरूपाणितंवस्तनादयः एतैःसहितायाःमांसपांचालिकायाः
पुत्तलिकायायोषितोयंत्रलोलेयंत्रवच्चंचलशीलेंगपंजरेंगान्येवपंजरंनीडंतस्मिन्शरीरेकिंशो
भनमिवनकिमपीत्यर्थः ॥ ४० ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

तर्ह्यनाचारेपिप्रवृत्तिःस्यादित्याह अतिप्रसंगइति प्रारब्धवशाद्यथातिप्रसंगोपिस्यादित्याशंक्यांगीक
रोति अस्त्वेवेति ३२ ननुज्ञान्यज्ञानिनोःप्रारब्धकर्मणअवश्यंभोक्तव्यतयासमानेतयोःकुतोवैलक्षण्य
सिद्धिरित्याशंक्याह ज्ञानिनइति ३३ तत्रदृष्टांतमाह मार्गइति ३४ इत्थमुपपादितमात्मानंचेदितिमंत्र
स्यपूर्वार्द्धार्थमनूद्यतत्फलप्रदर्शनपरमुत्तरार्द्धार्थमवतारयति सम्यक्साक्षात्कृतःआ[illegible]त्मा

अतिप्रसंगोमाशंक्यःस्वकर्मवशवर्तिनाम् अस्तुवाकेनशक्येतकर्मवारयितुंवद ३२ ज्ञानिनोऽज्ञा
निनश्चात्रसमेप्रारब्धकर्मणि नक्लेशोज्ञानिनोधैर्यान्मूढःक्लिश्यत्यधैर्यतः ३३ मार्गगंत्रोर्द्वयोः
श्रांतौसमायामप्यदूरताम् जानन्धैर्याद्द्रुतंगच्छेदन्यस्तिष्ठतिदीनधीः ३४ साक्षात्कृतात्मधीः
सम्यगविपर्ययबाधितः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत् ३५ जगन्मिथ्यात्वधीभा
वादाक्षिप्तौकाम्यकामुकौ तयोरभावेसंतापःशाम्येन्निस्नेहदीपवत् ३६

यथासासाक्षात्कृतातादृशीधीर्य
स्यसःसाक्षात्कृतात्मधीः अविपर्ययेणदेहाद्यात्मत्वबुद्ध्याबाधितोनभवतिसविपर्ययबाधितः उभयंहे
तुगर्भंविशेषणं ३५ अस्यमंत्रार्द्धस्यतात्पर्यमाहजगदिति काम्यंकामुकश्चकाम्यकामुकौतावाक्षिप्तौ
निरस्तौ तन्निराकरणेकारणमाह जगन्मिथ्यात्वेति ततःकिमित्यतआह तयोरिति तयोःकाम्यकामु
कयोरभावेसंतापःकामनानिमित्तकःकारणाभावान्निस्नेहदीपवच्छाम्येदित्यर्थः ३६ ॥ श्रीः ॥

तत्वानुसंधानविरोधिवाक्यापरस्य त्याज्यत्वे प्रमाणत्वेन तमेवैकं विजानीथ आत्मानमन्या वाचो विमुंचथ अमृतस्यैष सेतुरिति श्रुतिवाक्यमर्थतः पठति तमेवैकमिति नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदित्येतदपि वाक्यं श्रूयत इत्याह तथेति २८ ननु तत्वानुसंधानातिरिक्तमाहारादि यथा न त्यज्यत एवमितरशास्त्राद्यभ्यासोपि क्रियतामित्याग्रहं कुर्वाणं प्रत्याह आहारादीति २९ ननु तर्हि जनकादीनां

तमेवैकं विजानीथ त्वन्या वाचो विमुंचथ इति श्रुतं तथान्यत्र वाचो विग्लापनं त्विति २८
आहारादि त्यजन्नैव जीवेच्छास्त्रांतरं त्यजन् किं न जीवसि येनैवं करोष्यत्र दुराग्रहम् २९
जनकादेः कथं राज्यमिति चेद्दृढबोधतः तथा तवापि चेत्तर्कं पठ यद्वा कृषिं कुरु ३०
मिथ्यात्ववासनादार्ढ्ये प्रारब्धक्षयकांक्षया अक्लिश्यंतः प्रवर्तंते स्वस्वकर्मानुसारतः ३१

तत्वविदां कथं राज्यपरिपालनादौ प्रवृत्तिरिति शंकते जनकादेरिति दृढापरोक्षज्ञानत्वात्तेषां सा न बाधिकेत्यभिप्रायेण परिहरति दृढेति तर्हि ममापि बोधोस्तीति विवदंतं प्रत्याह तथेति ३० ननु तत्वविदः संसारासारतां जानंतः कुतस्तत्र प्रवर्तयिष्यंते इत्याशंक्य प्रारब्धस्यावश्यंभाविफलत्वाद्भोगेन तत्क्षयाय प्रवृत्तिरित्याह मिथ्यात्वेति ॥ ३१ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

नान्वितिहासादीनामंगीकारे कृष्यादेरपि संप्रसक्तिः स्यादित्याशंक्याह कृषीति २४ कृष्यादीनां तत्वानुसंधानविधातित्वेनात्याज्यत्वे भोजनादेरपि तथात्वात्तदपि त्याज्यमेवेत्याशंक्याह अन्विति कुत इत्यत आह अत्यंतेति तदपि कुतः आशुः पुनः स्मृतेरिति २५ नन्विदानीं विक्षेपाभावेपि तत्वविस्मृतिसद्भावात्पुरुषार्थहानिः स्यादित्याशंक्याह तत्वेति कुतस्तर्हि अनर्थ इत्यत आह किंत्विति विस्मरणे सति विप

कृषिवाणिज्यसेवादौ काव्यतर्कादिकेषु च विक्षिप्यते प्रवृत्त्याधीस्तैस्तत्वस्मृत्यसंभावात् २४
अनुसंदधतैवात्र भोजनादौ प्रवर्तितुम् शक्यतेत्यंतविक्षेपाभावादाशुपुनः स्मृतेः २५
तत्वविस्मृतिमात्रान्नानर्थः किंतु विपर्ययात् विपर्येतुं न कालोस्ति झटिति स्मरतः क्वचित् २६
तत्वस्मृतेरवसरो नास्त्यन्याभ्यासशालिनः प्रत्युताभ्यासघातित्वाद्बलात्तत्वमुपेक्षते २७

र्ययोपि स्यादित्याशंक्याह विपर्येतुमिति २६ ननु भोजनादिप्रवृत्तस्येव तर्काद्यभ्यासप्रवृत्तस्यापि तत्वस्मरणं किं न स्यादित्याशंक्याह तत्वस्मृतेरिति न केवलं तत्वानुसंधानावसराभाव एव किंतु काव्यतर्काद्यभ्यासस्य तत्वाभ्यासविरोधित्वात्तदानीं स्मृतमपि तत्वं बलादुपेक्षत इत्याह प्रत्युतेति २७ ॥श्रीः॥

मनसो दुर्निग्रहत्वे वाशिष्ठवाक्यमपि प्रमाणयति अब्धिपानादिति २१ प्रकृते तद्वैषम्यं दर्शयति कथनादाविति शृंखलाबद्धदेहस्य यथा निर्बंधो न तथा कथनादावित्यर्थः आदिशब्देन तच्चिंतनादिगृह्यते न केवलं निर्बंधाभावः प्रत्युत धियो विनोद इत्याह किंत्विति इतिहासः पूर्ववृत्तकथा आद्या येषां लौकिककथानुकूलयुक्तिदृष्टांतप्रदर्शनादीनां ते अनंताः असंख्याताश्च ते इतिहासाद्याश्चेत्यनंतेतिहासाद्यास्तैर्धियो बुद्धेर्विनोदः क्रीडाविशेषो भवति तत्र दृष्टांतः नाट्यवदिति नट्यक्रियानिरीक्षणमिवेत्यर्थः २२ ननु कथादिभिरप्यनंतदेकपरत्वविघातः स्यादित्याशंक्याह चिदेवेति इतिहासादीनामात्माचिन्मात्ररूपो न देहादिरूपो जगच्च मिथ्येत्येतस्मिन्नेवार्थे पर्यवसानात् न तैरेतदेकपरत्वशब्दाभिधेयस्य निदिध्यासनस्य विक्षेप इत्यर्थः ॥ २३ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

अब्धिपानान्महतः सुमेरून्मूलनादपि अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः २१
कथनादौ न निर्बंधः शृंखलाबद्धदेहवत् किंत्वनंतेतिहासाद्यैर्विनोदो नाट्यवद्धियः २२ ॥
चिदेवात्मा जगन्मिथ्येत्यत्र पर्यवसानतः निदिध्यासनविक्षेपो नेतिहासादिभिर्भवेत् २३

ननु ध्यानस्य ध्येयचिंतामात्रात्मकत्वात्तत्र को निर्बंध इत्याशंक्य ध्याने निर्बंधं दर्शयितुं ध्यानस्वरूपं तावदा
हस्मृतीति धियो वृत्तेः संबंधिनां स्मृतिप्रत्ययानां देवतादिमूर्तिगोचराणां प्रत्ययानां यत्सांतत्यमविच्छिन्नतया
वर्तमानत्वं तदन्यानंतरितं अन्येन विजातीयप्रत्ययेन अव्यवहितं सदा ध्यानमित्युच्यते एवं ध्यानस्वरूपं निरूप्य

स्मृतिप्रत्ययसातत्यमन्यानंतरितं धियः ध्यानं तत्रातिनिर्बंधो मनसश्चंचलात्मनः १९
चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् तस्याहं निग्रहं मन्ये वायोरिव सुदुःकरम् २०

तत्र निर्बंधं दर्शयति तत्रेति सदापर्यटनशीलस्य कातुरगादेरेकत्र स्तंभादौ बंधने यथोपरोधस्तद्वदिति
भावः १९ मनसश्चांचल्यादौ गीतावाक्यं प्रमाणयति चंचलं हीति प्रमाथि प्रमथनशीलं पुरुषस्य
व्याकुलत्वकारणं बलवत्समर्थमनिग्राह्यमित्यर्थः दृढं सत्यसति वा विषये लग्नं ततः उद्धर्तुमश
क्यमित्यर्थः अतस्तस्य मनसो निग्रहो वायोर्निग्रह इव सुदुःकरः २० ॥ श्रीः ॥ श्रीः

जपादेभोजनाद्वैलक्षण्यंदर्शयति नियमेनेति तत्रहेतुमाह अकृताविति भवेत्येवमकरणे प्रत्यवायोऽन्यथाकरणेसनास्तीत्याशंक्याह मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह सवाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधादित्युक्तत्वादितिभावः १६ ननुक्षुद्बाधायाःदेहबाधाहेतुत्वात्तन्निवृत्तयेऽनियमेनापिभोक्तव्यमेवविपरीतभावनयास्तुतथात्वाभावात्तन्निवर्तकध्यानमदृष्ट

नियमेनजपंकुर्यादकृतौप्रत्यवायतः अन्यथाकरणेऽनर्थः स्वरवर्णविपर्ययात् १६
क्षुधेवदेहबाधास्याद्विपरीताचभावना जैयाकेनाप्युपायेननास्त्यत्रानुष्ठितेःक्रमः १७
उपायःपूर्वमेवोक्तस्तच्चिंताकथनादिकः एतदेकपरत्वेपिनिर्वंधोध्यानवन्नहि १८ ॥

फलायानियमेनानुष्ठेयमित्याशंक्याह क्षुधेवेति विपरीतभावनायादुःखहेतुत्वस्यानुभवसिद्धत्वादितिभावः १७ तर्हिसउपायःप्रदर्शनीयइत्याशंक्यपूर्वमेवप्रदर्शितइत्याह उपायइति ननुजपवत्स्याऽमुख्यत्वादिनियमोमाभूत् ध्यानवदेतदेकपरत्वलक्षणैकाग्रतानिर्वंधोस्तीत्याशंक्याह एतदिति १८ ॥

दृष्टफलकत्वान्नात्रनियमः कश्चिदस्तीत्याह अन्यथेति अन्यथानियमंविनेत्यर्थः तत्रहेतुमाह
दृष्टार्थत्वेनेति तत्रदृष्टांतमाह भुक्तिवदिति दृष्टार्थेऽपिभोजनेनियमाः श्रुतिस्मृत्योरुपलभ्यंते
इत्याशंक्याह बुभुक्षुरिति क्षुदपनयनायभोक्तुमिच्छन्पुरुषोजपंकुर्वाणइवनानियमेनभुंक्तेऽपितु
यथाक्षुद्बाधोपशांतिः सत्तथाभोजनंकरोतीत्यर्थः १४ एतदेवप्रपंचयति अश्नातीति अश्नाति

अन्यथेतिविजानीहिदृष्टार्थत्वेनभुक्तिवत् बुभुक्षुर्जपवद्भुंक्तेनकश्चि
न्नियतःक्वचित् १४ अश्नातिवानवाऽश्नातिभुंक्तेवास्वेच्छया
न्यथा येनकेनप्रकारेणक्षुधामपनिनीषति १५ श्रीः ॥

वान्नेसतिकदाचिद्भुंक्तेनवाश्नातितस्मिन्नसतिक्षुद्बाधाविस्मारकद्यूतादिचेष्टयाऽनश्नन्नेवका
लंनयति अन्यथावातिष्ठन्गच्छन्शयानोवास्वेच्छयाभुंक्ते एवंयेनकेनप्रकारेणतात्कालिकीं
क्षुद्बाधामपनेतुमिच्छति अयमभिसंधिः क्षुद्बाधानिवृत्तिलक्षणादृष्टफलात्भोजनमेवकार्यं
नियमास्तुपरलोकहेतवइति ॥ १५ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

उक्तलक्षणं प्रकृते योजयति आत्मेति अयमात्मा वस्तुतो देहादिभ्यो भिन्नः इदं जगच्च मिथ्या एवं सत्यपि तयोरात्मजगतोर्यथाक्रमं देहादिरूपत्वबुद्धिः सत्यत्वबुद्धिश्च या सा विपरीतभावनेत्यर्थः ११ पूर्वमैकाग्र्यात्सा निवर्तत इति समान्यतोक्तमर्थं विशेषाकारेणाह तत्त्वभावनयेति सा देहाद्यात्मत्वजगत्सत्यत्वधीरूपा विपरीता भावना तत्त्वभावनयात्मनो देहातिरिक्तत्वस्य जगतो मिथ्यात्वस्य च भावनया निरंतरं ध्यानेन न

आत्मा देहादिभिन्नोयं मिथ्या चेदं जगत्तयोः देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावना ११
तत्त्वभावनया नश्येत्सा ततो देहातिरिक्तताम् आत्मनो भावयेत्तद्वन्मिथ्यात्वं जगतो निशम् १२
किं मंत्रजपवन्मूर्तिध्यानवच्चात्मभेदधीः जगन्मिथ्यात्वधीश्चात्र व्यावर्त्यास्यादुतान्यथा १३

श्येदत आत्मनो देहाद्यतिरिक्तत्वं देहादेर्जगतो मिथ्यात्वं च सदा भावयेदित्युक्तम् १२ तत्र जपादाविव नियमापेक्षास्ति वा न वेति पृच्छति किं मंत्रजपवदिति आत्मभेदधीः आत्मनो देहादिभ्यो विभिन्नज्ञानं जगतो मिथ्यात्वानुसंधानं च मंत्रजपदेवताध्यानादिवत्किं नियमेनानुष्ठातव्यमुत लौकिकव्यवहारवन्नियममंतरेणापि कर्तुं शक्यत इति ॥ १३ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

पंचदशी

\७१

एवमैकात्म्यप्रतिपादिकां श्रुतिमभिधाय स्मृतिमप्याह अनन्या इति योजना अनन्याः ब्रह्मास्मीति ज्ञानेन मदभिन्नाः संतस्तथैव मां चिंतयंतः पर्युपासते परितः सर्वेष्वपि कालेषु उपासते मद्रूपा एव वर्तंते नित्याभियुक्तानां सदा मच्चित्तानां तेषामहं तादात्म्येनानुसंधीयमानोऽहं योगक्षेममलब्धलाभलब्धपरिरक्षणरूपो योगक्षेमौ वहामि संपादयामीत्यर्थः ८ उदाहृतयोः श्रुतिस्मृत्योस्तात्पर्यमाह इतीति एते श्रुतिस्मृती वि

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ८
ते श्रुतिस्मृती नित्यमात्मन्येकाग्रतां धियः विधत्तो विपरीताया भावनायाः क्षयाय हि ९
यद्यथा वर्तते तस्य तत्त्वं हित्वान्यथात्वधीः विपरीता भावना स्यात्पित्रादावरिधीर्यथा १०

परीतभावनानिवृत्तये आत्मनि सदा चित्तैकाग्र्यं प्रतिपादयत इत्यर्थः ९ ननु देहाद्यात्मत्वबुद्धेर्जगत्सत्यत्वबुद्धेश्चाऽतो विपरीतभावनात्वमित्याशंक्य तल्लक्षणयोगादिति दर्शयितुं तस्या लक्षणमाह यद्यथेति यद्वस्तु भ्रात्रादि यथा येन भ्रात्रादिरूपेण वर्तते तस्य तत्त्वं भ्रात्रादिरूपत्वं परित्यज्यान्यथात्वधीरन्यथात्वस्यारिजातादिरूपत्वस्य धीर्ज्ञानं विपरीतभावना स्यादतस्मिंस्तद्बुद्धिरिति प्राहुः तामुदाहरति पित्रा

ॐ

\७१

श्रीः

नन्वेतत्कुतोऽवगतमित्याशंक्योपासनाविचारस्य वेदांतशास्त्रे कृतत्वादित्याह उपास्तय इति अकृतोपास्ति
कस्य कुतस्तज्जन्मेत्यत आह प्रागिति १०५ ब्रह्माभ्यासश्च कीदृश इत्याकांक्षायामाह, तच्चिंतनमिति १०६
एतदेकपरत्वं विशदयितुं श्रुतिमाह तमेवेति धीरो ब्रह्मचर्यादिसाधनसंपन्नः ब्राह्मणः ब्रह्मभवितुमिच्छुः
मुमुक्षुस्तमेव प्रत्यग्रूपं परमात्मानमेव विज्ञाय संशयाद्यभावो यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञान

उपास्तयोऽत एवात्र ब्रह्मशास्त्रेऽपि चिंतिताः प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् १०५
तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम् एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः १०६
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् १०७

संततिरूपमैकाग्र्यं कुर्वीत संपादयेत् अनात्मगोचरान्बहून् शब्दान्नानुध्यायात् न स्मरेत् ध्यानेनाभिधानम
प्युपलक्ष्यते नाभिदध्यात् अन्यथा शब्दध्यानेन वाग्विग्लापनानुपपत्तेः कुत इत्यपेक्षायामाह वाच इति हि य
स्मात् तदभिधानं अनेन स्मरणमप्युपलक्ष्यते वाच इति मनसोऽप्युपलक्षणं विग्लापनं विग्लापयतीति विग्ला
पनं श्रमहेतुः अयमभिप्रायः इतरशब्दानुसंधाने मनसः श्रमो भवति तदभिधाने तु वाच इति १०७ ॥

एवंविधंश्रवणंकुत्रनिरूपितमित्यतआह समन्वयेति एतच्छ्रवणंसमन्वयाध्यायेप्युक्तंव्यासादिभिरिति शेषः अर्थासंभावनानिवृत्तिहेतुर्मननंतुद्वितीयाध्यायेनिरूपितमित्याह धीस्वास्थ्येति प्रमेयगतानुपपत्तिपरिहारद्वाराबुद्धिस्वास्थ्यकारिभिस्तर्कैर्युक्तिशब्दाभिधेयैरर्थस्यसंभावनासंभावितत्वानुसंधानंमननं

समन्वयाध्यायएतत्सूक्तंधीस्वास्थ्यकारिभिः तर्कैःसंभावनार्थस्यद्वितीयाध्यायईरिता १०२
बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीःक्षणात् पुनःपुनरुदेत्येवंजगत्सत्यत्वधीरपि १०३
विपरीताभावनेयमैकाग्र्यात्सानिवर्तते तत्त्वोपदेशात्प्रागेवभवेदेतदुपासनात् १०४

द्वितीयाध्यायेनिरूपितमित्यर्थः १०२ इदानींविपरीतभावनांतन्निवृत्त्युपायंचदर्शयति बहुजन्मेति विपरीतभावनानिवर्तकंयदैकाग्र्यंतत्कुतोजायतइत्याशंक्याह तत्त्वेति एतदैकाग्र्यंब्रह्मोपदेशात्प्रागेवसगुणब्रह्मोपासनाद्भवेदित्यर्थः १०३ ॥ १०४ ॥ श्रीः ॥ श्रीः ॥ श्रीः

श्रीः

एवंत्रिविधानदार्ढ्यस्यहेतूनुपन्यस्यश्रुतिनानात्वप्रयुक्तादार्ढ्यनिवृत्तयेश्रवणावृत्तिःकर्तव्येत्याह शाखाभे
दादिति यथा शाखाभेदःश्रूयतेबह्वृचैर्हौत्रंक्रियते यजुषाध्वर्यवम् साम्नोद्गीथमिति यथावाकामभेदात्
कारीर्यावृष्टिकामोयजेतशतकृष्णलमायुष्कामइत्यादिकर्मभेदःश्रुतएवंउपनिषत्स्वपिप्रतिपाद्यतत्त्वस्य

शाखाभेदात्कामभेदाच्छ्रुतंकर्मान्यथान्यथा एवमत्रापिमाशंकीत्यतःश्रवणमाचरेत् १००
वेदांतानामशेषाणामादिमध्यावसानतः ब्रह्मात्मन्येवतात्पर्यमितिधीःश्रवणंभवेत् १०१

भेदशंकायांतन्निवारणायश्रवणंपुनःपुनः कर्तव्यमित्यर्थः १०० किंतच्छ्रवणमित्याकांक्षांतल्लक्षण
माह वेदानामिति सर्वासामप्युपनिषदांउपक्रमोपसंहारादिपर्यालोचनायांब्रह्मरूपेप्रत्यगात्मन्येवता
त्पर्यपारंपर्येणपर्यवसानमित्येवंरूपोनिश्चयःश्रवणमित्यर्थः ॥ १०१ ॥ श्रीः ॥ श्रीः ॥

ननु नामरूपयोर्भासमानत्वात्कथं निर्विषयब्रह्मप्रतीतिरित्याशंक्य तदुपायमाह प्रथममिति १०३
सच्चिदानंदे ब्रह्मणि कल्पितनामरूपात्मके प्रपंचे सच्चिदानंदबुद्ध्या गृहीत्वा नामरूपयोर्बुद्धिं न धारयेत्
एवं च सति निर्जगद्ब्रह्म सच्चिदानंदलक्षणं भवतीत्यर्थः १०४ इदानीमध्यायार्थमुपसंहरति

प्रथमं सच्चिदानंदे भासमानेऽथ तावता बुद्धिं नियम्य नैवोर्ध्वं धारयेन्नामरूपयोः
॥ १०३ एवं च निर्जगद्ब्रह्म सच्चिदानंदलक्षणम् अद्वैतानंद एतस्मिन्विश्राम्यंतु ज
नाश्चिरम् १०४ ब्रह्मानंदाभिधे ग्रंथे तृतीयोऽध्याय ईरितः अद्वैतानंद एव
स्याज्जगन्मिथ्यात्वचिंतया १०५ इति अद्वैतानन्दः समाप्तः श्रीरामः

ब्रह्मानंदेति १०५ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिं
करेण श्रीरामकृष्णाख्यविदुषा विरचितेऽद्वैतानंदे नाम तृतीयोऽध्यायः १३ ॥ श्रीः ॥

ननु साक्षिणो व्यवहाराभ्युपगमे विकारित्वं प्रसज्येतेत्याशंक्य कूटो व्यवहरंत्यामपि तत्साक्षिरूपात्मा निर्विकार इ
ति सदृष्टांतमाह प्रवहत्यपीति उदके उपरि प्रवहत्यपि अधःस्थिता प्रौढशिला यथा न प्रचलति एवं कूटो संस

प्रवहत्यपि नीरेऽधःस्थिरा प्रौढशिला यथा नामरूपान्यथात्वेऽपि कूटस्थं ब्रह्म नान्यथा १००
निश्छिद्रे दर्पणे भाति वस्तुगर्भं बृहद्वियत् सच्चिन्मुखे तथा नानाजगद्गर्भमिदं वियत् १०१
अदृष्ट्वा दर्पणं नैव तदंतःस्थेक्षणं यथा अमत्वा सच्चिदानंदं नामरूपमतिः कुतः १०२

रत्यामपि न स्थाणी संसरतीत्यर्थः १०० नन्वखंडे ब्रह्मणि तद्विलक्षणस्य जगतः कथमवस्थानमित्या
शंक्य निश्छिद्रे दर्पणे सावकाशं वस्तु यथा भाति तद्वदित्याह निश्छिद्र इति १०१ नन्वदृश्ये ब्रह्मणि कथं
जगत्प्रतीतिरिति सदृष्टांतमाह अदृष्ट्वेति १०२ श्रीरामकृष्णगोपालहरे श्रीकेशवमाधवकंसारे

इदानीं सर्वजनप्रसिद्धं दृष्टांतांतरमाह सहस्रश इति उपेक्षा कर्तव्येति शेषः ९५ प्रपंचवैचित्र्यदृष्टांत
माह क्षणे इति दार्ष्टांतिकमाह व्यवहार इति ९६ तदेव विवृणोति नबाल्यमिति ९७ द्वैतक्षणिकत्वमु

सहस्रशो मनोराज्ये वर्तमाने सदैव तत् सर्वैरुपेक्ष्यते यद्वदुपेक्षा नाम रूपयोः ९५ ॥
क्षणे क्षणे मनोराज्यं भवत्येवान्यथान्यथा गतं गतं पुनर्नास्ति व्यवहारो बहिस्तथा ९६
न बाल्यं यौवने लभ्यं यौवनं स्थाविरे तथा मृतः पिता पुनर्नास्ति नायात्येव गतं दिनम् ९७
मनोराज्याद्विशेषः कः क्षणध्वंसिनि लौकिके अतोस्मिन्भासमानेपि तत्सत्यत्वधियं त्य-
जेत् ९८ उपेक्षिते लौकिके धीर्निर्विघ्ना ब्रह्मचिंतने नटवत्कृत्रिमास्थायां निर्वहत्येव लौकिकम् ९९

१ संहरति मनोराज्येति क्षणिकत्वसाधने प्रयोजनमाह अतोस्मिन्निति ९७ ननु लौकिकोपेक्षायां
को लाभः इत्याशंक्य ब्रह्मणि धीः स्थिरा भवतीत्याह उपेक्षिते इति तर्हि ज्ञानिनो व्यवहारः कथमित्याशंक्या-
ह नटवदिति ९९ श्रीः .

मायया सृष्टान्यपदार्थान्दर्शयति खानिलाग्नीति ननु पांचभौतिकं न साम्येपि केषांचिच्चेतनत्वं केषांचि त्वे
ज्जडत्वं कुत इत्याशंक्याह प्राणीति प्राणिशरीरेष्वंतःकरणेषु चैतन्यप्रतिबिंबनात्चेतनत्वमितरत्र तदभावा
ज्जडत्वमित्यर्थः ९१ ननु चेतनाचेतनविभागश्चिद्रूपब्रह्मकृत एव किन्नेस्यादित्याशंक्य ब्रह्मणः सर्वोपादान
त्वेन सर्वत्र समत्वान्नैवमित्याह चेतनेति ९२ ब्रह्मणश्चिज्जडसाधारणत्वे हेतुमाह ब्रह्मणीति ब्रह्म

खानिलाग्निजलोर्व्यर्कलोकप्राणिशिलादिकाः विकाराः प्राणिधीष्वंतश्चिच्छायाप्रति
बिंबिता ९१ चेतनाचेतनेष्वेषु सच्चिदानंदलक्षणम् समानं ब्रह्म भिद्येते नामरूपे पृथक्पृथक्
९२ ब्रह्मण्येते नामरूपे पटे चित्रमिवास्थिते उपेक्ष्य नामरूपे द्वे सच्चिदानंदधीर्भवेत् ९३
जलस्थेधोमुखे स्वस्य देहे दृष्टेप्युपेक्ष्य तम् तीरस्थ एव देहे स्वे तात्पर्यं स्याद्यथा तथा ९४

णः सर्वकल्पनाधारत्वात्सर्वगतत्वमित्यर्थः तत्कथमवगम्यत इत्याशंक्य कल्पितनामरूपत्यागेऽधि
ष्ठानं ब्रह्मावगम्यत इत्याह उपेक्ष्येति ९३ उक्तार्थे दृष्टांतमाह जलस्थ इति नीरेऽधोमुखे स्वस्य देहे दृ
श्यमानेपि तत्राहंतां परित्यज्य तीरस्थे स्वदेहे तद्विपरीते ममबुद्धिर्यथेत्यर्थः ॥ ९४ ॥

श्रीः

ननु ब्रह्मण एकस्यानेकाकारजगद्धेतुत्वमनुपपन्नमित्याशंक्य मायासहितस्यैवोपपद्यत इत्याह सच्छक्तीति अनन्तान्कार्यकारिणीत्यर्थः ननु सच्छक्तेः सत्यत्वादनेकहेतुत्वाद्विषमो दृष्टांत इत्याशंक्य दृष्टांतांतरमाह यथाजीवेति ८५ दृष्टांतं विशदयति निद्राशक्तिरिति दार्ष्टांतिकमाह ब्रह्मण्येषेति ८६ दुर्घटकारित्वमेव दर्शय

सच्छक्तिर्यद्ब्रह्मशक्तिरनेकानन्तान्सृजेत् यथाजीवगतानिद्रास्वप्नश्चात्र निदर्शनम् ८५
निद्राशक्तिर्यथाजीवे दुर्घटस्वप्नकारिणी ब्रह्मण्येषा तथा माया सृष्टिस्थित्यंतकारिणी ८६
स्वप्ने वियद्गतिं पश्येत्स्वमूर्धच्छेदनं तथा मुहूर्ते वत्सरौघं च मृतपुत्रादिकं पुनः ८७ ॥
इदं युक्तमिदं नेति व्यवस्था तत्र दुर्लभा यथा यथेक्ष्यते यद्यत्तत्तद्युक्तं तथा तथा ८८
ईदृशो महिमा दृष्टो निद्राशक्तेर्यदा तदा मायाशक्तेरचिंत्योयं महिमेति किमद्भुतम् ८९
शयाने पुरुषे निद्रा स्वप्नं बहुविधं सृजेत् ब्रह्मण्येवं निर्विकारे विकारान्कल्पयत्यसौ ९०

ति स्वप्न इति ८७ स्वप्नस्य दुर्घटत्वे हेतुमाह इदमिति ८८ उक्तमर्थं कैमुतिकन्यायेन स्पष्टयति ईदृश इति ८९ अप्रयत्नमानब्रह्मनिष्ठाया मायायाः जगद्धेतुत्वे दृष्टांतमाह शयानेति ९० ॥ श्रीः

तर्हि प्रतीयमानयोर्नामरूपयोः का गतिरित्याशंक्य कल्पितत्वमेव गतिरित्याह निरस्तत्वेति कल्पितत्वे हेतुः जन्मेति ७९ तत्तर्हि किमित्यत आह सच्चिदानंदेति ८० ब्रह्मस्वानंदाभ्यस्य द्वैतावस्थापूर्वकत्वात्तत्क्षवरणादित्वाद्

निरस्तत्वे नामरूपे द्वे जन्मनाशयुते च ते उपेक्ष्या ब्रह्मणि धीस्तु स्यात्समुद्रे बुद्बुदादिवत् ७९
सच्चिदानंदरूपेऽस्मिन्पूर्णे ब्रह्मणि धीर्हिते स्वयमेवावजानाति नामरूपे शनैः शनैः ८०
यावद्यावदवज्ञा स्यात्तावत्तावत्तदीक्षणम् यावद्यावद्वीक्ष्यते तत्तावत्तावदुभे त्यजेत् ८१
तदभ्यासेन विद्यायां सुस्थितायामयं पुमान् जीवन्नेव भवेन्मुक्तो वपुरस्तु यथा तथा ८२
तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम् एतदेकपरत्वं च तदभ्यासं विदुर्बुधाः ८३
वासनानेककालीना दीर्घकालं निरंतरम् सादरं चाभ्यस्यमाने सर्वथैव निवर्तते ८४

तावज्ञापि कर्तव्या इत्याह यावदिति ८१ उभयाभ्यासस्य फलमाह नेति ८२ इदानीं ब्रह्माभ्यासस्वरूपमाह तच्चिंतनमिति ८३ नन्वनादिकालमारभ्य प्रतिभासमानस्य द्वैतस्य कदाचित्कत्वेन ज्ञानाभ्यासेन कथं निवृत्तिरित्याशंक्य दीर्घकालनैरंतर्यसत्कारसेवितेनाभ्यासेन निवर्तत एवेत्याह वासनेति ८४ ॥ श्रीः

दृष्टांते सिद्धमर्थं दार्ष्टांतिके योजयति आकाशेपीति एवं निजात्मन्युक्तप्रकारेणेत्यर्थः सत्ताभाने तु भवताभ्यु
पगम्येते ऽतो नोपपादनीये त्यर्थः आकाशे प्रतिपादितमर्थं वाय्वादिशरीरांते व्यपुपगंतव्यमित्याह वाय्वादी

आकाशेप्येवमानंदः सत्ताभाने तु संमते वाय्वादिदेहपर्यंतवस्तुष्वेवं विभाव्यताम् ७५
गतिस्पर्शौ वायुरूपं वन्हेर्दाहप्रकाशने जलस्य द्रवता भूमेः काठिन्यं चेति निर्णयः ७६
असाधारणआकाशओषध्यन्नवपुष्वपि एवं विभाज्य मनसा तत्रूपं यथोचितम् ७७
अनेकधा विभिन्नेषु नामरूपेषु चैकधा तिष्ठति सच्चिदानंदाः विसंवादो न कस्यचित ७८

१७

ति ७५ अत्र वाय्वादीनामसाधारणधर्मान्दर्शयति गतिस्पर्शाविति ७६ ॥ ७७ फलितमाह अनेकधेति ७८ श्रीः

भवत्येव प्रकृते किमायातमित्याशंक्य विशेष्यत्वेन प्रतीयमानस्य स्वरूपमभ्युपयमित्याह तादृक्कादेवेति त
स्य सुखस्वरूपत्वमाह औदासीन्येनेति औदासीन्यरूपत्वात्तस्य सुखस्वरूपत्वमित्यर्थः नन्वनुकूलत्वरहित

तादृक्कादेव तत्सत्यमौदासीन्येन तत्सुखम् आनुकूल्यप्रातिकूल्यहीनं यत्तन्निजं सुखम् ७२
आनुकूल्ये हर्षधीः स्यात्प्रातिकूल्ये तु दुःखधीः द्वयाभावे निजानंदो निजं दुःखं तु न क्वचित् ७३
निजानंदे स्थिरे हर्षशोकयोर्व्यत्ययः क्षणात् मनसः क्षणिकत्वेन तयोर्मानसतेष्यताम् ७४

स्य कथं सुखस्वरूपत्वं इत्याशंक्याह आनुकूल्ये इति ७२ तदेवोपपादयति आनुकूल्ये हर्षेति ननु निजानं
दवन्निजदुःखमपि किं न स्यादित्याशंक्य दुःखे निजभावरूपसिद्ध्यभावान्नैवमित्याह निजं दुःखं त्विति ७३ ननु
निजानन्दस्य सदानंदत्वात् सर्वदा हर्ष एव स्यान्न तु शोक इत्याशंक्य तस्य नित्यत्वेऽपि तद्ग्राहिणो मनसः क्षणिकत्वेन मा
नसयोस्तयोरपि क्षणिकत्वमित्याह निजानंदे इति ७४

सदादिरूपत्रयस्याकाशेसत्वेकिंप्रमाणमित्याशंक्यानुभूतिरेवप्रमाणमित्याह घटवदिति घटवदितिदृष्टांत
प्रदर्शनार्थः घटादिषुयथाकालत्रयेपिमृदनुवर्त्तते तथासदादिरूपत्रयंसर्वदानुगतमित्यर्थः नन्ववकाशं
विहायसदादिरूपत्रयंकथमनुभूतमित्याशंक्याह निराकाशेइति ७० तदेवोपपादयति अवकाशेइति पू

घटवत्तेसच्चिदानंदा अनुगच्छंतिसर्वदा निराकाशेसदादीनामनुभूतिर्निजात्मनि ७०
अवकाशेविस्मृतेथतत्रकिंभातितेवद शून्यमेवेतिचेदस्तुनामतादृग्विभाति ७१

र्वादिनस्तोषमनुवदति शून्यमिति अंगीकृत्यपरिहारमाह अस्तुनामेति शब्दतःशून्यमस्तुअर्थतस्त्व
वकाशाभावविशेषणस्यविशेष्यत्वेनप्रतीयमानंकिंचिदस्तीत्यभ्युपगंतव्यमित्याह तादृगिति हिशब्दोलो
केप्रसिद्धिद्योतनार्थः ७१

तन्नामरूपाभ्यामेव व्याक्रियते तस्यार्थमाह अविक्रियेति अविकारिणि ब्रह्मणि वर्त्तमाना सा अनेकधा भूत्
भौतिकप्रपंचरूपेण बहुधा विकारं परिणामं प्राप्नोति मायाब्रह्मणि वर्त्तत इत्यत्र प्रमाणमाह मायांत्विति मायां
पूर्वोक्तां प्रकृतिं प्रक्रियतेऽनयेति प्रकृतिरूपादानकारणं विद्यात् ज्ञानीयात् मायिनं तस्या आश्रयेन तत्कृतं म
हेश्वरं मायानियामकं विद्यादित्यनुवर्तते उभयत्र तुशब्दः परस्परं वैलक्षण्यद्योतनार्थः ६६ इदानीं मायोपदि

अविक्रियब्रह्मनिष्ठा विकारं यात्यनेकधा मायां तु प्रकृतिं विद्यान्मायिनं महेश्वरम् ६६
आद्यो विकार आकाशः सोऽस्ति भात्यपि च प्रियः अवकाशस्तस्य रूपं तन्मिथ्या न तु तत्त्रयम् ६७
न व्यक्तेः पूर्वमस्त्येवं न पश्चाच्चापि नाशतः आदावन्ते च यन्नास्ति वर्त्तमानेऽपि तत्तथा ६८
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अव्यक्तनिधनान्येवेत्याह कृष्णोऽर्जुनं प्रति ६९

तस्य ब्रह्मणः प्रथमं कार्यमाह आद्य इति तस्य कारणगतं रूपत्रयमाह सोऽस्तीति सच्चिदानंदरूप इत्यर्थः
तस्य प्रातिस्विकं रूपमाह अवकाश इति तस्य पूर्वस्माद्रूपत्रयात् वैलक्षण्यमाह तन्मिथ्येति सच्चिदादिरूपत्र
यं वास्तवमित्यर्थः ६७ तस्य च तद्रूपस्य मिथ्यात्वे हेतुमाह नव्यक्तेरिति ननूत्पत्तिविनाशयोर्मध्ये प्रतीयमा
नस्यावकाशस्य रूपं सत्यमित्याशंक्याह आदावंत ६८ उक्तार्थे श्रीकृष्णवाक्यं प्रमाणयति अव्यक्तेति ६९

तत्रैव श्रुत्यंतरमुदाहरति अव्याकृतमिति वृहदारण्यकश्रुतौ तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां एव व्याक्रियतासौ नामायमिदंरूपमिति सृष्टस्य जगतो नामरूपात्मकत्वं दर्शितमित्यर्थः सृष्टेः पूर्वमिदं जगदव्याकृतं अव्यक्तरूपात्मकमभूदूर्ध्वं सृष्ट्यवसरे द्विधा वाच्यवाचकभावेन व्याक्रियत व्यक्तीकृतमित्यर्थः

अव्याकृतं पुरा सृष्टेरूर्ध्वं व्याक्रियते द्विधा अचिंत्यशक्तिर्मायैषा ब्रह्मण्यव्याकृताभिधा ६५

इदानीं तद्धेदं तर्ह्यव्याकृतमासीदित्यत्राव्याकृतशब्दस्यार्थमाह अचिंत्यशक्तिरिति येयं ब्रह्मणि अचिंत्याशक्तिः मायास्ति एषा अव्याकृताभिधा अस्मिन्वाक्येऽव्याकृतशब्देनाधीयत इत्यर्थः ६५ ॥

पं०र्कि

आदिशब्देन विवक्षितानि श्रुत्यंतराणि दर्शयति सद्रूपेति आरुणिपुत्रेणोद्दालकेन छांदोग्यश्रुतौ सदेव सोम्येदमग्र आसीत् इत्यादिना सद्रूपं ब्रह्म निरूपितं तथा च बह्वृचा ऋक्शाखाध्यायिन ऐतरेयोपनिषदि प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्मेति प्रज्ञानरूपत्वं ब्रह्मणो दर्शयन्ति एवं चोदाहृतायां छांदोग्यश्रुतावेव सनत्कुमाराख्यो गुरुर्नारदाख्यशिष्याय भूमात्वेव विजिज्ञासितव्य इत्युपक्रम्य यो वै भूमा तत्सुखमिति भूमशब्दाभिधे-

सद्रूपमारुणिः प्राह प्रज्ञानं ब्रह्म बह्वृचा सनत्कुमार आनंदमेवमन्यत्र गम्यताम् ६३
विचिंत्य सर्वरूपाणि कृत्वा नामानि तिष्ठति अहं व्याकरवाणीमे नामरूपे इति श्रुतेः ६४

यस्य ब्रह्मण आनंदत्वमुक्तवानित्यर्थः उक्तन्यायमन्यत्राप्यतिदिशति एवमन्यत्रेति अन्यत्र तैत्तिरीयकादिश्रुतिषु आनंदो ब्रह्मेति व्यजानात् इत्यादिवाक्यैरानंदरूपत्वादिकमुक्तमिति द्रष्टव्यमिति भावः ६३ सच्चिदानंदेष्विव नामरूपयोरपि श्रुतिं दर्शयति विचिंत्येति सर्वाणि रूपाणि विचिंत्य धीरो नामानि कृत्वाभिवदन्यदास्त इति अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति च श्रुतिद्वये जगन्निष्ठे नामरूपे श्रुत्या दर्शिते इत्यर्थः ६४

द्धिकमराणांसर्वेषांघटादीनांबोधोभवति एवंसर्वोपादानस्यैकस्यब्रह्मण।।५१।। चीत्त ६

इदानीमेकविज्ञानेनसर्वविज्ञानेदृष्टांतप्रदर्शनपरस्ययथासोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्यादिति
वाक्यस्यार्थनिरूपणपुरःसरंदार्ष्टांतिकप्रदर्शनपरस्यउततमादेशमप्राक्ष्योयेनाश्रुतंश्रुतंभवत्यमतंमतमवि
ज्ञातंविज्ञातमितिवाक्यस्यार्थंप्रदर्शयन्प्रकृतेफलितमाह एकमृत्पिंडेति यथाघटशरावाद्युपादानस्यैकस्यमृ
त्पिंडस्यावबोधात्तत्कार्यस्यजगतोबोधोभवतीत्यवगंतव्यमित्यर्थः ६१ ननुब्रह्मजगतोःस्वरूपापरिज्ञाने

एकमृत्पिंडविज्ञानात्सर्वंमृन्मयधीर्यथा तथैवब्रह्मबोधेनजगद्बुद्धिर्विभाव्यताम् ६१
सच्चित्सुखात्मकंब्रह्मनामरूपात्मकंजगत् तापनीयेश्रुतंब्रह्मसच्चिदानंदलक्षणम् ६२

ब्रह्मज्ञानाज्जगतोज्ञानंभवतीत्येवंनावगंतुंशक्यतइत्याशंक्यतदवगमायतदुभयस्वरूपंदर्शयति सच्चि
दिति ब्रह्मणःसच्चिदानंदरूपत्वेकिंप्रमाणमित्याशंक्यतापनीयादिश्रुतयःप्रमाणमित्याह तापनीयेश्रु
तमिति उत्तरस्मिंस्तापनीयआथर्वणिकैःतावद्ब्रह्मेवेदंसर्वंसच्चिदानंदरूपत्वमुक्तमित्यर्थः ६२

अज्ञस्य विस्मयो भवेत् इत्युक्तमेवार्थं प्रपंचयति आरंभीइति आरंभो नाम समवाय्यसमवायिनिमित्ताख्यकारणेभ्यो भिन्नस्य कार्यस्योत्पत्तिस्तां यो वक्ति सोयमारंभीत्युच्यते पूर्वरूपपरित्यागेन रूपांतरप्राप्तिलक्षणं परिणामं यो वक्ति स परिणामीत्युच्यते प्रक्रियाद्वयमजानानो लोकव्यवहारमात्रपरो लौकिक इत्युच्यते एवंचात्र पारणा

सत्यं कार्येषु वस्त्वंशः कारणात्मेति जानतः विस्मयो मास्त्विहाज्ञस्य विस्मयः केन वार्यते ५८
आरंभीपरिणामीच्चलौकिकश्चैककारणे शांते सर्वमतिं श्रुत्वा प्राप्नुवंत्येव विस्मयम् ५९
अद्वैतेभिमुखीकर्तुमेवात्रैकस्य बोधतः सर्वबोधे श्रुतौ नैव नानात्वस्य विवक्षया ६०

मपि कारणस्यैकैकस्य ज्ञानादनेकेषां कार्याणां विज्ञानं भवतीति वाक्यश्रवणाद्विस्मयो भवेदित्यर्थः ५९ ननु यत्राश्रुतमर्थं परित्यज्यैवं व्याख्याने किं कारणमित्याशंक्य श्रुतेस्तत्रतात्पर्याभावादित्याह अद्वैत इति अद्वैतविज्ञाने शिष्यमभिमुखीकर्तुमेव छांदोग्यश्रुतावेकस्य कारणविज्ञानात्सर्वेषां कार्याणां विज्ञानमुक्तं न तु कार्याणामनेकेषां विज्ञानसिद्ध्यर्थमित्यभिप्रायः ॥ ६० ॥ श्रीः श्रीः श्रीः

पंचदशी
६०

ननु कारणज्ञानात्कार्यज्ञानं भवतीत्येतच्छ्रोतृबुद्धेश्चमत्कारहेतुर्भवतीत्यभिप्रायेणोक्तं तदेतन्न संभव
तीति शंकते तर्हीति कारणमृदादिज्ञानात् कार्याणां तन्मृदादिसत्यांशज्ञानं भवतीत्युक्ते मृद्ज्ञानात् मृदो ज्ञान
मित्युक्तं भवति एवं च सति शाब्दत एव चमत्कारो नार्थत इत्यर्थः ५७ ईदृग्विवेकवतां विस्मयाभावेपि

तर्हि कारणविज्ञानात्कार्यज्ञानमितीर्यते मृद्बोधान्मृत्तिकाबुद्धेत्युक्तं स्यात्कोत्र विस्मयः ५७

तद्रहितानां विस्मयः स्यादेवेति परिहरति सत्यमिति कार्येषु घटादिषु विद्यमानो यः सत्यांशः कारणस्य
रूपमेवेति ये जानन्ति तेषामाश्चर्यं माभूत् इतरेषां तु तज्ज्ञानशून्यानां जायमानो विस्मयो न निवारयि
तुं शक्यत इत्यर्थः ५८

१३
श्री:

कार्यस्य सत्यानन्तांशद्वयरूपत्वात्कारणज्ञानात्कार्यगतसत्यांशज्ञानं भवतीत्यभिप्रायेणाह समत्कस्येति समत्कस्याधिष्ठानभूतमत्सहितस्य विकारस्यारोपितस्य घटादिरूपस्य कार्यता कार्यशब्दार्थत्वं लोकप्रसिद्धमित्यर्थः भवत्वेवं एतावता कारणज्ञानात्कार्यज्ञानं न संभवतीति चोद्यस्य कः परिहारो जातः इत्याशंक्य कार्यगतानन्तांशज्ञानाभावेपि तद्गतसत्यांशज्ञानं भवत्येवेति परिहरति वास्तवइति तत्र कार्ये यो वास्तवो मदंशोस्ति अस्य वास्तवांशस्य बो

समत्कस्य विकारस्य कार्यता लोकदर्शिता वास्तवोत्र मदंशोस्य बोधः कारणबोधतः ५५
अनन्तांशो न बोद्धव्यस्तद्बोधानुपयोगतः तत्वज्ञानं पुमर्थं स्यान्नानन्तांशावबोधनम् ५६

धोज्ञानं कारणबोधतः कारणज्ञानात् भवतीत्यर्थः ५५ ननु कार्यगतसत्यांशवदनन्तांशोपि बोद्धव्यः इत्याशंक्य प्रयोजनाभावान्नैवमित्याह अनन्तांश इति प्रयोजनाभावमेव प्रकटयति तत्वज्ञानमिति तत्वस्याबाध्यस्य वस्तुनो ज्ञानं पुमर्थं पुंसो ज्ञातुः पुरुषार्थप्रयोजनं यस्मिंस्तत्पुमर्थमिति बहुव्रीहिः अनन्तांशस्याविकारांशस्यावबोधनं प्रयोजनवन्न भवतीत्यर्थः ५६ ॥ श्रीरामकृष्णगोपालहरे श्रीकेशवमाधवकंसारे ॥

पंचदशी
५२

ननु मृत्सुवर्णयोः किं द्वयोरेव विवर्त्ते दृष्टांतत्वं नेत्याह मृत्सुवर्णेति आरुणस्य पुत्र उद्दालकाख्यः कश्चिदृषिर्य
था सोम्यैकेन मृत्पिंडेनेत्यारभ्य कार्ष्णायसमित्येव सत्यमित्यंतेन तथा वाक्यसंदर्भेण कार्यस्यानृतत्वे मृत्सुवर्णयोरु
पं दृष्टांतत्रयमुक्तवानित्यर्थः किमर्थमेवं दृष्टांतत्रयमुक्तवानित्याशंक्याह॥ अत इति यत एवं बहुषु मृदादिषु का
र्यानृतत्वमुपलब्धं अतो भूतभौतिकेषु रूपेषु सर्वेषु वस्तुषु कार्यानृतत्वं वासितं कुर्यादित्यर्थः ५३ ननु कार्या

मृत्सुवर्णमयश्चेति दृष्टांतत्रयमारुणिः प्राहातो वासयेत्कार्यानृतत्वं सर्ववस्तुषु ५३
कारणज्ञानतः कार्यविज्ञाने सोपि चावदत् सत्यज्ञानेऽनृतज्ञानं कथमत्रोपपद्यते ५४

नृतत्वानुसंधानमपि किमर्थमुक्तमित्याशंक्य कारणज्ञानात्कार्यज्ञानसिद्धयः इत्यभिप्रायेणाह कारणेति
कारणस्य मृदादेर्ज्ञानात्कार्यजातस्य घटादेर्ज्ञानमपि यथा सोम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्यादि
त्यादिवाक्यजातेनोक्तवानित्यर्थः ननु मृत्सुवर्णादिरूपस्य पारमार्थिकस्य कारणस्य विज्ञानात्तद्विलक्षण
स्य घटरुचकादेर्विज्ञानमुपपन्नमिति शंकते सत्येति ५४ श्रीरामकृष्णगोपालहरे ॥

१२
श्रीः

ननु परिणामे दृष्टांतत्वेनाभिहितानां क्षीरमृत्सुवर्णानां मध्ये यदि मृत्सुवर्णयोर्विवर्तदृष्टांतत्वमंगीक्रियते तर्हि
तद्वदेव क्षीरस्यापि तथात्वं स्यादित्याशंक्याह क्षीरेति तर्हि क्षीरवदेवावस्थांतरमापद्यमानयोर्विवर्तदृष्टांतत्वं न भवे
दित्याशंक्याह एतावतेति एतावता क्षीरादेः परिणामित्वेन मृदादीनां मृत्सुवर्णादीनां दृष्टांतत्वं विवर्तदृष्टांतभा
वो न हीयते न नश्यति अयमभिप्रायः क्षीरस्य पूर्वरूपपरित्यागपुरःसरमवस्थांतरापत्तिसद्भावात्परिणामित्व

क्षीरादौ परिणामोऽस्तु पुनस्तद्भाववर्जनात् एतावता मृदादीनां दृष्टांतत्वं न हीयते ५१
आरंभवादिनः कार्यमृदो द्वैगुण्यमापतेत् रूपस्पर्शादयः प्रोक्ताः कार्यकारणयोः पृथक् ५२

मेव मृत्सुवर्णयोरवस्थांतरापत्तिसद्भावेपि पूर्वपरित्यागाभावात् विवर्ततापीति ५१ ननु मृत्सुवर्णयोः
परिणामविवर्ताविवारंभकत्वमपि किं नांगीक्रियत इत्याशंक्याह आरंभवादिन इति आरंभवादिनो मते का
र्यघटादिरूपेण मृदो मृत्तिकाया अस्या द्वैगुण्यं कार्याकारेण कारणाकारेण च द्विगुणत्वमापद्येत तथा च सति गु
रुत्वादिद्वैगुण्यमप्यापद्येतेति भावः कुत इत्याशंक्याह रूपेति रूपस्पर्शादीनां गुणानां कार्यकारणयोर्भेदस्य
तैरेवांगीकृतत्वादिति भावः ५२ ॥ श्रीः ॥ श्रीः ॥ श्रीरामः

घटेमृद्रूपपरित्यागाभावेपि मृत्परिणामता घटस्य किंन स्यादित्यतआह परिणामेपूर्वेति यत्र क्षीरादौ परि-
णामोभ्युपगम्यते तत्र क्षीरादिभावस्य पूर्वरूपस्य त्याग उपलभ्यतइत्यर्थः ननु विवर्ते पूर्वरूपापरित्यागः क्व दृ-
ष्टइत्याशंक्य मृत्सुवर्णयोर्दर्शयतइत्याह मृत्सुवर्णविवर्तयोर्निष्पन्नयोरपि तत्कारणमृत्सुवर्णस्वरूपेण

परिणामे पूर्वरूपं त्यजेत्तत्क्षीररूपवत् मृत्सुवर्णे निवर्तेते घटकुंडल-
योर्नहि ४९ घटेभग्नेनमृद्भावः कपालानामवेक्षणात् मैवं
चूर्णेस्ति मृद्रूपं स्वर्णरूपं त्वतिस्फुटम् ५०

विवर्तेते इति प्रसिद्धमित्यर्थः ४९ ननु
घटस्य मृद्विवर्तत्वमनुपपन्नं घटनाशे पुनर्मृद्भावादर्शनादिति शंकते इति मृद्भावाभावे कारणमाह कपा-
लेति कपालानामपिनाशे मृद्भावोपलब्धिः स्यादिति परिहरति मैवमिति चूर्णत्वेत्रोपादानत्वकारणएवेत्याह सुवर्ण

नन्वारोपितस्यासत्यत्वस्य ज्ञानमात्रान्न पुरुषार्थसिद्धिरित्याशंक्याह ईदृगिति अद्वैतवादस्यानंदाति
रिक्तस्य सर्वस्य मिथ्यात्वनिश्चये सत्याद्वितीयानंदाभिव्यक्तिलक्षणः पुरुषार्थः सिध्यतीत्यभिप्रायः

ईदृग्बोधे पुमर्थत्वं मतमद्वैतवादिनाम् मद्रूप
स्यापरित्यागाद्विवर्तत्वं घटे स्थितम् ४८ श्रीरामः

ननु घटस्य मद्विवर्तत्वे सिद्धे तज्ज्ञानात् घटसत्यत्वबुद्धिर्निवर्तेत न चैतदिदानीं सिद्धमित्याशं
क्याह मद्रूपस्येति ॥ ४८ ॥ श्रीरामकृष्णगोपालहरे ॥ श्रीः ॥

पंचदशी
५७

इष्टापत्तिरितिपरिहरन्ति निवृत्तेति तत्रोपपत्तिमाह यस्मादिति यस्मात्कारणात्तवधारादिविषयासत्यत्वबुद्धिर्नष्टा अतः स निवृत्त एवेत्यर्थः नन्वारोपितरजतादिस्वरूपस्यैवाप्रतीतिरुपलभ्यते न सत्यत्वबुद्ध्यपगम इत्याशंक्य तस्य निरुपाधिभ्रमत्वादस्तु तथात्वं इह तु सोपाधिकभ्रमसत्यत्वबुद्ध्यपगम एव निवृत्तिः स्यादित्यभिप्रायेणाह ईदृगिति अत्र सोपाधिकभ्रमस्थले ईदृगेव सत्यत्वबुद्ध्यपगम

निवृत्त एव यस्मात्तेन तत्सत्यत्वमतिर्गता ईदृग्निवृत्तिरेवात्र बोधजा नत्वभासनम् ४६
पुमानधोमुखो नीरे भातोप्यस्ति न वस्तुतः तटस्थमर्त्यवत्तस्मिन्नैवास्था कस्यचित्क्वचित् ४७

रूपैव बोधजा अधिष्ठानयाथात्म्यज्ञानजन्या निवृत्तिरभ्युपेया न त्वभासनं न स्वरूपाप्रतीतिरूपेत्यर्थः ४६ एवं कर्तृदृष्टमिथ्यात्वमाह पुमानिति जलेऽधोमुखत्वेन प्रतिभासमानोपि पुमान परमार्थतो नास्ति तत्रोपपत्तिमाह तस्येति कस्यचिद्विवेकिनोऽविवेकिनो वा तस्मिन्नधोमुखे पुरुषे तीरस्थपुरुषवद्वसत्यत्वाभिमानः क्वचिद्देशे कालेवा नैवास्तीति ५७

१
श्रीः

धि१

एवंविकारस्यासत्यत्वमुपपाद्येदानीं तदधिष्ठानरूपाया मृदः सत्यत्वमुपपादयति व्यक्तेति व्यक्तकाले स्थितिका
ले ततः पूर्वं व्यक्तोत्पत्तेः पूर्वकाले ऊर्ध्वमपि व्यक्तविनाशोत्तरकालेऽप्येकरूपभाक् एकाकारं सततत्वं तत्त्वेन वा
स्तवरूपेणासह नाशरहितं च यन्मृद्वस्तु तत्सत्यमिति कथ्यते विमतं मृद्वस्तु सत्यं भवितुमर्हति सततत्वादात्म

व्यक्तकाले ततः पूर्वमूर्ध्वमप्येकरूपभाक् सततत्वमविनाशि च सत्यं मृद्वस्तु कथ्यते ४४
व्यक्तं घटो विकारश्चेत्येतैर्नामभिरीरितः अर्थश्चेदनृतः कस्मान्न मृद्बोधे निवर्तते ४५

वदित्यादिर्योज्यम् ४४ ननु घटादेः कार्यजातस्यासत्यत्वे तस्यारोपितरजतादेरिवाधिष्ठानज्ञाननिव
र्त्यतास्यादिति शंकते व्यक्तमिति व्यक्तमित्यादिभिस्त्रिभिः शब्दैरभिधीयमानो योऽर्थः कार्यरूपस्तस्य का
रणासत्यत्वे गीक्तियमारो मृल्लक्षणकारणस्य ज्ञाने किं न तन्निवृत्तिः स्यादित्यर्थः ४५ श्रीः

एवंहेतुत्रयंप्रसाध्येदानीमनुमानरचनाप्रकारंसूचयति निस्तत्त्वादिति व्यक्तस्यघटादिरूपस्यकार्यस्ययत्पृथङ्मृदाकारंरूपमस्तितत्किंचित्किमपिनसत्यंभवति निस्तत्त्वत्वान्निर्गतंतत्त्वंवास्तवंरूपंयस्मात्तन्निस्तत्त्वंतस्यभावोनिस्तत्त्वत्वंतस्मात् तथाविनाशित्वान्मृदादिसत्यामेवनाशप्रतियोगित्वात् वा

निस्तत्त्वत्वाद्विनाशित्वाद्वाचारंभणनामतः व्यक्तस्य
नतुतद्रूपंसत्यंकिंचिन्मृदादिवत् ४३ श्रीरामः ॥

चारंभणनामतोवागिंद्रियजन्यशब्दमात्रात्मकत्वाद्वा त्रिष्वपि हेतुषुमृद्वदितिवैधर्म्यदृष्टांतः अत्रैवंप्रयोगः घटादिरूपःकार्यांसत्योभवितुमर्हतिनिस्तत्त्वत्वाद्यत्सत्यंतन्नभवतिनतन्निस्तत्त्वंयथाघटाद्युपादानंमृदिति केवलव्यतिरेकी एवमितरहेतुद्वयेपियोजनीयम् ४३ ॥ श्रीरामः ॥ ० ॥

व्यक्तशब्दवाच्यं घटादिकं कार्यस्वरूपेणासदेवावभासते तस्योत्पत्तिविनाशावुपलभ्येते तत उत्पत्त्यनंतरं वागिंद्रियजन्यनामात्मकत्वेन व्यवह्रियते च किंच व्यक्तं कार्यरूपेण घटादि तदेव कार्यादभिन्नं नाम नव्यक्तेऽनु र्त्तां शब्दप्रयोक्तृणां मनुष्याणां वदनेष्वनुवर्त्तते ततः किं तत्राह तेन नाम्नानीति व्यक्तं कार्यं तेन वाचा व्यवह्रिय

व्यक्ते नष्टेऽपि नामैतन्नव्यक्तेऽप्यनुवर्तते तेन नाम्ना नि
रूप्यत्वाद्व्यक्तं तद्रूपमुच्यते ४२ श्रीरामः श्रीः

माणेन नाम्ना शब्देन निरूप्यत्वात् तद्रूपं तस्य नाम्नो रूपमेव स्वरूपं यस्य तत् तथा नामात्मकमुच्यते इत्यर्थः अयं भावः विमतो घटो घटशब्दात्मको भवितुमर्हति घटशब्देन व्यवह्रियमाणत्वात् घटशब्दवदिति ४२

शक्तितत्कार्ययोरनृतत्वे तदाधारस्य सत्यत्वे च कारणमाह व्यक्तेति व्यक्तो घटादिलक्षणः कार्यः अव्यक्ता तत्कारणभूता शक्तिस्तयोर्व्यक्ताव्यक्ते तदाधारस्तयोराधारभूता मृत्तिकेत्येते त्रितयमध्यआद्ययोः प्रथमोद्दिष्टयोर्द्वयोः कार्यशक्त्योः संबंधिनोर्योःकालेनयोर्भेदेन भेदस्य विद्यमानत्वात्पर्यायः क्रमेण भवनं तृतीयस्तूभय

व्यक्ताव्यक्ते तदाधार इति त्रिष्वाद्ययोर्द्वयोः पर्यायः कालभेदेन तृतीयस्त्वनुगच्छति ४० निस्तत्वे भासमाने च व्यक्तरुत्पत्तिनाशभाक् तदुत्पत्तौ तस्य नाममवाचा निष्पाद्यते नृभिः ४१ ॥

धारस्तु मृदादिः अनुगच्छति उभयानुवर्तते अयं भावः शक्तिकार्ययोः कदाचित्कत्वादनृतत्वं आरस्य तु कालत्रयानुगामित्वात्सत्यत्वं ४० इदानीं विकारस्यैवासत्यत्वे हेतुत्रयमाह निस्तत्वेति ४१ ॥

पूर्वमनभिव्यक्ता मायाशक्तेः पश्चादभिव्यज्यत इत्येतन्न प्रसिद्धं मायारूपं लभ्यत इत्याह ऐंद्रजालिकेति पुरा मणिमंत्रादिप्रयोगात्पूर्वं ३७ शक्तितत्कार्यस्य घटादेरनृतत्वं शक्त्याधारस्य मृदादेः सत्यत्वमित्येतच्छ्रौतोपपत्त्या चाप्युहितमित्याह एवमिति मायामयत्वेन मायाकार्यत्वेन विकारस्य कार्यरूपस्य घटादेरनृतात्मतामिथ्यात्वं विकाराधाराणां घटादीनामाधारभूताया मृदः सत्यत्वं च वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिरुक्ते

ऐंद्रजालिकनिष्ठापि माया न व्यज्यते पुरा पश्चाद्गंधर्वसेनादिरूपेणाव्यक्तिमाप्नुयात् ३७
एवं मायामयत्वेन विकारस्यानृतात्मताम् विकाराधारमृद्वस्तुसत्यत्वं चाब्रवीच्छ्रुतिः ३८
वाङ्निष्पाद्यं नाममात्रं विकारो नास्य सत्यता स्पर्शादिगुणयुक्ता तु सत्या केवलमृत्तिका ३९

वतीत्यर्थः ३८ इदानीं वाचारंभणमित्याद्युदाहृतं वाक्यमर्थतः पठति वाङ्नीति विकारो मृत्कार्यो घटादिः वाङ्निष्पाद्यं वागिंद्रियोच्चार्यं नाममात्रं नामैवास्य घटादेर्न सत्यता नामातिरेकेण न पारमार्थिकं रूपमस्ति किं तु तदाधारभूता मृदेव सत्येत्यर्थः ३९ ॥ श्रीरामकृष्णगोपालहरे श्रीकेशव माधव कंसारे

उक्तस्यघटव्यवहारस्याविचारमूलत्वंकुतइत्याशंक्याह कुलालव्यापृतेरिति कुलालव्यापारात्पूर्वभावि
नोमृदस्याघटस्यघटत्वेनव्यवहारादविचारमूलत्वंतस्येतिभावः कस्यघटत्वमित्यतआह पश्चादिति कु
६ लालव्यापारानंतरभाविनः पृथुबुध्नोदराकारस्यैवघटशब्दवाच्यत्वमुचितंतदुत्पत्त्यनंतरमेवघटशब्दप्रयो
गदर्शनादितिभावः ३४ ननुपारमार्थिकस्यघटस्यानिर्वचनीयशक्तिकार्यत्वमयुक्तमित्याशंक्यघटस्यापि

कुलालव्यापृतेःपूर्वोयावानंशोसनोघटः पश्चात्तुपृथुबुध्नादिमत्त्वेयुक्ताहिकुंभता ३४
सघटोनमृदोभिन्नोवियोगेसत्यनीक्षणात् नाप्यभिन्नःपुरापिंडदशायामनवेक्षणात् ३५
अनिर्वचनीयएवायंशक्तिवत्तेनशक्तिजः अव्यक्तत्वेशक्तिरुक्ताव्यक्तत्वेघटनामभृत् ३६

पारमार्थिकत्वमसिद्धमित्याह सघटइति घटोमृदःपृथक्कृत्यद्रष्टुमशक्यत्वान्नमृदोभिद्यतेनापिमृदेवापि
१५२ ण्डावस्थायामनुपलभ्यमानत्वात्ततःशक्तिवदनिर्वचनीयोघटः ३५ फलितमाह तेनेति ननुकार्ययोरपिअ
निर्वचनीयत्वेशक्तिःकार्यंचेतिभेदव्यवहारःकुतइत्यतआह अव्यक्तेति ३६ ॥ श्रीः ॥

कारणस्य स्वरूपातिरिक्ताशक्तिर्यद्यस्ति तर्हि कारणस्वरूपमिव नासां कुतोऽभासत इत्याशंक्याह कार्येति मृच्छ
क्तिर्घटादिकार्योत्पत्तेः पूर्वं मृदादिनिर्गच्छन्ती वर्तते अतो नावभासत इत्यर्थः निर्गच्छन्त्येव परिस्फुरदपि न तस्या भिव्य
क्तिः स्यादित्याशंक्यानभिव्यक्तस्यापि नवनीतादेर्मथनादिनेव कुलालादिव्यापारेण तस्या अभिव्यक्तिः स्यादि

कार्योत्पत्तेः पुरा शक्तिर्निगूढाप्यवस्थिता कुलालादिसहायेन विकाराकारतां व्रजेत् ३२
घटत्वादिविकारं तं स्पर्शादिं चापि मृत्तिकाम् एकीकृत्य घटं प्राहुर्विचाराविकला जनाः ३३

त्याह कुलालादीति आदिशब्देन दण्डचक्रादयो गृह्यन्ते ३२ ननु कारणातिरिक्तस्य शक्तिकार्यस्य सत्त्वे का
र्यकारणयोर्भेदेन कुतो ऽवभासत इत्याशंक्य भेदप्रतीतिहेतोर्विचारस्याभावादित्याह घटत्वादीति अविवे
किनो जनाः घटत्व आदिकं रूपं कार्यं शब्दस्पर्शादिगुणरूपं कारणं मृत्तिकां अविचारत एकीकृत्य घटं
इत्याचक्षते ३३ श्रीरामः

कार्येति एषा मायाशक्तिः कार्यात्स्वकार्यभूताज्जगतः आश्रयतः स्वाश्रयात् ब्रह्मणश्च विलक्षणा विपरीतस्वभावा भवेत् मायाशक्तेः कार्यादाश्रयतो वैलक्षण्यं दृष्टान्तेन स्पष्टयति स्फोटांगाराविति वह्निगतशक्तेः कार्यरूपः स्फोट आश्रयरूपोंगारश्च प्रत्यक्षगम्यो शक्तिस्तु कार्यानुमेया अतस्ताभ्यां सा विलक्षणेत्यर्थः २९ उक्तन्यायं मच्छक्तावपि योजयति पृथुबुध्नेति यः पृथुबुध्नोदराकारः पृथुः स्थूलं बुध्नं वर्तुलं उदरं यस्य सः पृथुबुध्नोदरः तथाविध आकारो यस्य सः तथा तादृग्घटः कार्यः शब्दस्पर्शरूपरसगंधाख्यपंचगुणोपेता

कार्यादाश्रयतश्चैषा भवेच्छक्तिर्विलक्षणा स्फोटांगारौ दृश्यमानौ शक्तिस्तत्रानुमीयते २९
पृथुबुध्नोदराकारो घटः कार्योत्रमृत्तिका शब्दादिभिः पंचगुणैर्युता शक्तिस्त्वतद्विधा ३०
न पृथ्वादिर्न शब्दादिः शक्तावस्ति यथा तथा अतएव ह्यचिंत्येयं न निर्वचनमर्हति ३१ ॥

मृत्तिकाश्रयः शक्तिस्त्वतद्विधोभयविधविलक्षणेत्यर्थः ३० वैलक्षण्यमेवाह नपृथ्वादिरिति शक्तौ पृथुत्वादिः कार्यधर्मो नास्ति शब्दादिकः आश्रयधर्मोपि न विद्यते अतो विलक्षणेत्यर्थः तर्हि सा कीदृशीत्यत आह अचिंत्येति यथा तथेत्युक्तमेवार्थं विशदयति अत एव हीति यतः कार्यादाश्रयतश्चेत्थं विलक्षणा अत एवैषा अचिंत्या चिंतितुमशक्या ननु तर्हि अचिंत्यत्वमेव तस्या रूपं स्यादित्याशंक्याह नानिर्वचनमिति भेदेना भेदेनाचिंत्यत्वादिनान्यकेनापि रूपेणानिर्वचनं नार्हतीत्यर्थः ३१ ॥ श्रीः श्रीः

तांश्चैवकथांकथायति बालस्यहीति २२ दृष्टांतसिद्धमर्थंदार्ष्टांतिकेयोजयति इयंसंसारेति २७ वशिष्ठो
क्तिमुपसंहरति इत्यादिभिरिति एवंसद्भावेप्रमाणमुपन्यस्यतस्याअनिर्वचनीयत्वंवक्तुंप्रतिजानीते सैवशक्तिरि

बालस्यहिविनोदायधात्रीवक्तिशुभांकथाम् क्वचित्संतिमहाबाहोराजपुत्रास्त्रयःशुभाः २२
द्वौनजातौतथैकस्तुगर्भएवहिनस्थितः वसंतितेधर्मयुक्ताअत्यंतासतिपत्तने २३ स्वकीयान्
शून्यनगरान्निर्गत्यविमलाशयाः गच्छंतोगगनेवृक्षान्ददृशुःफलशालिनः २४ भविष्य
न्नगरेतत्रराजपुत्रास्त्रयोपिते सुखमद्यस्थिताःपुत्रमृगयाव्यवहारिणः २५ धात्र्यैवंकथि
ताराममबालकाख्यायिकाशुभा निश्चयंसययौबालोनिर्विचारणयाधिया २६ इयंसंसार
रचनाविचारोज्झितचेतसाम् बालकाख्यायिकेवेत्थमवस्थितिमुपागता २७ इत्यादिभिरु
पाख्यानैर्मायाशक्तेःसुविस्तरम् वसिष्ठःकथयामाससैवशक्तिर्निरूप्यते २८ श्रीरामः

ति २८ श्रीरामकृष्णगोपालहरे श्रीकेशवमाधवकंसारे ॥ श्रीः श्रीः श्रीः ॥

पंचदशी इदानीं जगतः कल्पनामात्ररूपतां दर्शयितुं तत्कल्पककस्य मनसो रूपं तावद्दर्शयति स आत्मेति नित्योदितमहावपुः नि
५२ त्यं सदा उदितं प्रकाशमानं महद्देशकालादिपरिच्छेदरहितं वपुः स्वरूपं यस्य स तथा यद्यस्मिन्काले मनाक् ईषत्
मननीं स्वपरावोधनरूपां शक्तिं मायापरिणामरूपां धत्ते धारयति तत्तदा मन इत्युच्यते २० इदानीं कल्पनाप्र
कारमाह आदौ मन इति आदौ प्रथमं शक्त्युल्लासेन मनो भवति तदनु तदनंतरं बंधमोक्षदृष्टी वंद्राकल्पनेभ

स आत्मा सर्वगो राम नित्योदितमहावपुः यन्मनाङ्मननीं शक्तिं धत्ते तन्मन उच्यते २०
आदौ मनस्तदनु मोक्षविबंधदृष्टी पश्चात्प्रपंचरचना भुवनाभिधाना इत्यादिका स्थि
तिरियं हि गता प्रतिष्ठामाख्यायिका सुभग बालजनोदितेव २१ ॥ श्रीः ॥

वतः पश्चादनंतरं बंधदृष्टावेव भुवनाभिधाना भुवनमित्यभिधानं यस्याः भुवनाभिधाना प्रपंचरचना प्रपंचस्य गि ५
रिनदीसरित्समुद्रादेः रचना कल्पनं भवति इत्यादिकाः एवं प्रकाराः इयं जगतः स्थितिः प्रतिष्ठां स्थैर्यं गता प्राप्ता
कल्पितस्यापि वास्तवत्वप्रतीतौ दृष्टांतमाह आख्यायिकेति बालजनाय उदिता उक्ता आख्यायिका कथा यथा श्रीः

त[illegible]वसौ शक्तिः प्रकाशमधिगच्छति अभिव्यक्तिं प्राप्नोति इदानीं तामेवाभिव्यक्तिं प्रपंचयति चिच्छक्तिरिति शरीरेषु देवतिर्यङ्मनुष्यादिलक्षणेषु चिच्छक्तिश्चैतन्यव्यवहारहेतुभूतोपलभ्यते दृश्यते स्पंदशक्तिश्चलनहेतुभूता प्रकाशमधिगच्छति इत्युत्तयानभिव्यक्तिदशायामपि ब्रह्मणि जगत्सत्तादर्शनात्रानभिव्यक्तस्यापि स

स्पंदशक्तिश्च वातेषु दार्ढ्यशक्तिस्तथोपले द्रवशक्तिस्तथांभस्सु दाहशक्तिस्तथानले १६
शून्यशक्तिस्तथाकाशे नाशशक्तिर्विनाशिनि यथांडेन्तर्महासर्पो जगदस्ति तथात्मनि १७
फलपत्रलतागुच्छशाखाविटपमूलवान् तरुबीजे यथा वृक्षस्तथेदं ब्रह्मणि स्थितम् १८
क्वचित्काश्चित्कदाचिच्च तस्मादुद्यन्ति शक्तयः देशकालविचित्रत्वात्क्ष्मातलादिव सालया १९

त्वे दृष्टांतमाह यथेति यथांडेंतर्जलेशयुविचित्रो हिरवस्थितः १७ विचित्रस्यापि तस्य सत्वे दृष्टांतमाह फलेति १८ ननु सर्वासामपि शक्तीनां युगपदेवाभिव्यक्तिः कुतो न स्यादित्याशंक्याह क्वचिदिति क्वचिद्देशविशेषे कदाचित्कालविशेषे काश्चिदुद्यंत्यादयः तासामयुगपद्व्यक्तौ दृष्टांतमाह क्ष्मातलादिति यथा भूमिगतानां सर्वेषां बीजानां मध्ये देशविशेषे कालविशेषे च केषांचिदेव बीजानामंकुरोत्पत्तिर्नान्येषां तद्वदित्यर्थः १९ ॥

अस्य ब्रह्मणः परा उत्कृष्टा जगत्कारणभूता शक्तिर्विविधा श्रूयत इति वाक्यशेषः विविधत्वमेवाह क्रियेति
क्रियाज्ञाने प्रसिद्धे बलमिच्छाशक्तिर्ज्ञानक्रियासाहचर्यात् क्रियादिशक्तय आत्मा स्वरूपं यस्याः सा क्रियाज्ञा
नबलात्मिका १३ इदं वाक्यद्वयं कुत्रत्यमित्यत आह इतीति न केवलं मायाशक्तिः श्रुतिसिद्धा किंतु स्मृतिसि

इति वेदवचः प्राह वशिष्ठश्च तथाब्रवीत् सर्वशक्तिपरं ब्रह्म नित्यमापूर्णमद्वयम् १४
ययोल्लसति शक्त्यासौ प्रकाशमधिगच्छति चिच्छक्तिर्ब्रह्मणो राम शरीरेषूपलभ्यते १५

द्धापीत्याह वशिष्ठ इति यथा श्रुतिर्विचित्रां मायाशक्तिमुक्तवती वशिष्ठोपि तां तथोक्तवान् वाशिष्ठाभिधेयग्रं
थे इति शेषः मायाप्रतिपादकान्वाशिष्ठश्लोकानेव पठति सर्वेति नित्यमापूर्णमद्वयमिति ब्रह्मणः पारमा
र्थिकं रूपमुक्तं सर्वशक्तीति तस्यैव सोपाधिकं रूपं तत्परं ब्रह्म यदा यदा यया यया शक्त्या उल्लसति विकसति
विवर्तत इत्यर्थः १५

नन्वतींद्रियायाः शक्तेः कथं प्रतिबंधोवगंतुं शक्यत इत्याशंक्याह शक्तेरिति अतीन्द्रियापि शक्तिर्यतः कार्यगम्या
अतः अकार्ये सत्यपि कारणे कार्यानुत्पत्तौ सत्यां प्रतिबंधनं प्रतिबंधः अवगम्य इति शेषः उक्तमर्थं दृष्टांतप्रदर्शने
नस्पष्टयति ज्वलत इति लोके स्वरूपेणाप्रज्वलतोग्नेः सकाशाद्दाहादिलक्षणे कार्ये अनुत्पद्यमाने सति मंत्रादिप्र
तिबंधतां मंत्रादीनां अग्निशक्तिप्रतिबंधकत्वं स्यादित्यर्थः १२ इत्थं लौकिकशक्तिं स्वरूपतः प्रमाणतश्चोपन्य
स्येदानीं मायाशक्तिसद्भावे तेध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निरूढामिति श्वेताश्वतरोपनिष

शक्तेः कार्यानुमेयत्वादकार्ये प्रतिबंधनम् ज्वलतोग्नेरदाहे स्यान्मंत्रादिप्रतिबंधता १२
देवात्मशक्तिं स्वगुणैर्निरूढां मुनयोविदन् परास्य शक्तिर्विविधा क्रियाज्ञानबलात्मिका १३

द्वाक्यमर्थतः पठति देवात्मशक्तिमिति मुनयः कालस्वभावादिकारणवादेषु दोषदर्शनवंतो जगत्कारण
जिज्ञासया ध्यानयोगमास्थिताः अधिकारिणो देवात्मशक्तिं देवस्य द्योतमानस्य स्वप्रकाशचिद्रूपस्यात्मनः
प्रत्यगभिन्नस्य ब्रह्मणः शक्तिं मायारूपां स्वगुणैः स्वकार्यभूतैः स्थूलसूक्ष्मशरीरैः निरूढां निरंतरां गूढां आवृतां
अविदन् साक्षात्कृतवंत इत्यर्थः तस्यामेवोपनिषदि स्थितं परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया
चेति वाक्यांतरमर्थतः पठति परास्येति ॥

न्त्वानंदात्मातिरिक्तायामायाया अभ्युपगमे द्वैतापत्तिरित्याशंक्य तस्या अनिर्वचनीयत्वेनान्नतत्त्वंयक्रुम
नरत्ववक्ष्यमाणया लौकिक्या अग्न्यादिगतशक्तेस्तावद्भेदेन वाऽभेदेन वा निर्वक्तुमशक्यत्वं दर्शयति शक्तिरिति
शक्तिरग्न्यादिनिष्ठास्फोटादिजननिका शक्तादग्न्यादिस्वरूपात् पृथक् भेदेन नास्ति कुत इत्यत आह. तद्वदि
ति तद्वत्तया वस्य भेदेनासत्वं दृष्टेर्दर्शनादग्न्यादिस्वरूपातिरेकेणानुलभ्यमानत्वादित्यर्थः नाप्यग्न्यादि

शक्तिः शक्तात्पृथङ्नास्ति तद्वद्दृष्टेर्न चाभिदा प्रतिबंधस्य दृष्टत्वाच्छक्त्यभावे तु कस्य सः ११

स्वरूपमेव शक्तिरित्याह नचाभिदेति अभिदा अभेदोपि न च नैव तत्रापि हेतुमाह प्रतिबंधस्येति मणिमं
त्रादिभिः शक्तिकार्यस्फोटादेः प्रतिदर्शनत्वात् स्वरूपातिरिक्ता शक्तिः एष्टव्येत्यभिप्रायः भवतु प्रतिबंधदर्शनेन श
क्तेर्भेदोपि माभूत् को दोषस्तत्राह शक्तीति प्रत्यक्षसिद्धस्याग्न्यादिस्वरूपस्य प्रतिबंधासम्भवात् तदतिरि
क्तशक्त्यनभ्युपगमेपि प्रतिबंधो निर्विषयः स्यादित्यभिप्रायः ॥ ११ ॥ श्रीः

श्रीः

इदानीं विवर्तलक्षणमाह अवस्थान्तरेति तुशब्दोत्र पूर्वस्मात्पक्षद्वयाद्वैलक्षण्यद्योतनार्थः पूर्वावस्थामपरित्यज्यैवावस्थान्तरभानं विवर्तः उदाहरति रज्जुसर्पवदिति यथा रज्ज्वात्मना सुस्थितस्यैव द्रव्यस्य सर्पात्मनावभासनं ननु विवर्तमानस्य रज्ज्वादेः सांशत्वदर्शनात् निरंशे सोपि न घटत इत्याशंक्य निरवयवत्वे गगनादावपि तद्दर्शनान्नैवमित्याह निरंशेपीति असौ विवर्तो व्योम्नि तलत्वमधोमुखेन्द्रनीलकटाहतुल्यत्वं मालिन्यं नीलवर्णता

अवस्थान्तरभानं तु विवर्तो रज्जुसर्पवत् निरंशेप्यस्त्यसौ व्योम्नि तलमालिन्यकल्पनात् ९
ततो निरंश आनंदे विवर्तो जगदिष्यताम् मायाशक्तिः कल्पितास्यादैन्द्रजालिकशक्तिवत् १०

तयोः कल्पनादाकाशस्वरूपानभिज्ञैरारोप्यमाणत्वादित्यर्थः ९ फलितमाह ततो निरंश इति ततो निरंशेपि विवर्तसंभवाज्जगन्निरंशे आनंदे विवर्तः कल्पितमित्यंगीकार्यमित्यर्थः नन्वद्वितीयआनंदे जगत्कल्पनमनुपपन्नं कल्पकहेतोरभावादित्याशंक्याह मायाशक्तिरिति शक्तेः कल्पत्वं क्व दृष्टमित्यत आह ऐन्द्रजालिकेति यथैन्द्रजालिकनिष्ठाया मणिमन्त्रादिरूपाया मायाशक्तेर्गंधर्वनगरादिकल्पकत्वं तेत्यर्थः १०

तयोरनवकाशत्वमेव दर्शयितुं तावदारंभवादिनोमतमनुवदति आरंभवादिनो वैशिकादयोऽन्यस्मात्कार्यापेक्षयाऽन्यस्मात्कारणादन्यस्य कारणापेक्षयाऽन्यस्य कार्यस्योत्पत्तिमूचिरे उक्तवंतः कुत एवं वदंतीत्यत, आह तंतोरिति निष्पत्तेरुत्पत्तेर्दर्शनादिति शेषः एतावता कथं कार्यकारणभेदसिद्धिरित्यत आह भिन्नाविति

आरंभवादिनोऽन्यस्मादन्यस्योत्पत्तिमूचिरे तंतोः पटस्य निष्पत्तेर्भिन्नौ तंतुपटौ खलु ७
अवस्थांतरतापत्तिरेकस्य परिणामिता स्यात्क्षीरं दधि मृत्कुंभः सुवर्णं कुंडलं यथा ८

विरुद्धपरिणामत्वाद्विरुद्धक्रियावत्त्वाच्चेति भावः ७ इदानीं परिणामस्य रूपमाह अवस्थांतरेति एकस्य वस्तुनः पूर्वावस्थात्यागपुरःसरं अवस्थांतरप्राप्तिः परिणाम इत्यर्थः तमुदाहरति स्यादिति क्षीरमिति यथा क्षीरमृत्सुवर्णादीनां क्षीरादिव्यवहारयोग्यतां परित्यज्य दध्यादिव्यवहारयोग्यतापत्तिः ८ श्रीरामः ॥

२

श्रीः

ननुकुतोनोपादानत्वंकुलालस्यापीत्याशंक्यस्थितिलयाधारस्वरूपोपादानलक्षणाभावादित्याह स्थितिरि
ति हियस्मात्कारणात्तद्घटस्यस्थितिलयौकुलालाधारेनभवतः ततोनोपादानत्वमितिशेषः कुत्रतर्हितावि
त्यतआह दृष्टौताविति घटस्यस्थितिलयौकुलालाधारौनभवतः तदुपादानभूतायांमृद्येवदृष्टौप्रत्यक्षेणो

स्थितिर्लयश्चकुंभस्यकुलालेतौनहिक्वचित् दृष्टौतौमृदितद्वत्स्यादुपादानंतयोःश्रुतेः ५
उपादानंत्रिधाभिन्नंविवर्त्तिपरिणामिच आरंभकंचतत्रांत्यौनभिरंशेवकाशिनौ ६ ॥

पलब्धौभवत्येवंतत्रप्रकृतेकिमायातमित्यतआह तद्वदिति यद्वत्तद्घटस्यमृदुपादानं तद्वज्जगतोप्यानंदउ
पादानंस्यात्तत्रहेतुः तयोःश्रुतिरिति तयोर्जगत्स्थितिलययोःश्रुतेरानंदाद्ध्येवेतिआदिवाक्येआनंदहेतुकत्वश्र
वणादित्यर्थः ५ आनंदस्यस्याभिमतंजगदुपादानत्वंचकंनरवांतरभेदमाह उपादानमिति तत्रविवर्त्तिपरि
शेषयितुंइतरौपक्षौदूषयति तत्रेति अंत्यौआरंभपरिणामपक्षौनिरंशेनिरवयवेब्रह्मणिनावकाशिनौअ
वकाशवंतौनभवतः ॥ ६ ॥ श्रीरामकृष्णगोपालहरे श्रीकेशवमाधवकंसारे ॥

पंचदशी ननूदाहृतश्रुतिवाक्येनात्मनः कारणत्वं प्रतिपन्नं नानंदस्येत्याशंक्य तत्रापि पाठकं तैत्तिरीयमेवानंदाद्ध्येव ख
ल्विमानि भूतानि जायंते इत्यादिवाक्यमर्थतः पठति आनंदेति व्याख्यातं फलितमाह इत्युक्तेति आनंदमनु
४८ मानं सच्चितं विमतं जगदानंदान्न भिद्यते तत्कार्यत्वात् यद्यत्कार्यं तत्ततो न भिद्यते यथा मृत्कार्यं घटादि मृदो न

आनंदाद्ध्येव तज्जातं तिष्ठत्यानंदे एव तत् आनंदे एव लीनं चेत्युक्तानं
दात्कथं पृथक् ३ कुलालाद्घट उत्पन्नो भिन्नश्चेति न शंक्य
ताम् मृद्वदेष उपादानं निमित्तं कुलालवत् ४ ॥ श्रीः

भिद्यत इति ३ कुलालादुत्पन्नस्य घटस्य ततो भेददर्शनात्तस्यानैकांतिकता हेतोरित्याशंक्य कुलालस्य १
निमित्तकारणत्वादिह चानंदस्योपादानत्वस्य समर्थनान्मैवमित्याह कुलालादिति एष आत्मानन्दो मृद्वत्मृ
द्घटस्येवोपादाने उपादानकारणं कुलालवत् कुलाल इव न निमित्तं निमित्तकारणं न भवति ॥ ४ ॥ श्रीः

श्रीमद्गुरवेनमः नन्वानंदस्त्रिविधो ब्रह्मानंदो विद्यासुखम् तथा विषयानंद इति प्रथमाध्याये आनंदत्रयमे
व प्रतिज्ञाय द्वितीयाध्याये तद्व्यतिरिक्तात्मानंदनिरूपणात्तद्विरोधो जायते इत्याशंक्याह योगानंद इति यथाप्र
तिज्ञातस्यैव ब्रह्मानंदस्य योगजन्यसाक्षात्कारविषयत्वेन योगानंदत्वं निरुपाधिकत्वेन निजानंदत्वं च व्यवहृतं
तथा तस्यैव गुणाभिध्यामुख्यात्मविवेचनेनावगम्यत्वविवक्षयात्मानंदत्वमभिहितमितिभावः ननु सजाती
यागौणात्मनः पुत्रभार्यादेर्मिथ्यात्मनो देहादेर्विजातीयादाकाशादेश्च भिन्नस्य सद्वयस्यात्मानन्दस्य ब्रह्मता

योगानंदः पुरोक्तो यः स आत्मानंद इष्यताम् कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेच्छृणु १
आकाशादिस्वदेहांतं तैत्तिरीयश्रुतीरितम् जगन्नास्त्यन्यदानंदादद्वैतब्रह्मता ततः २

ध्यायोक्ताद्वितीययोगानंदरूपता न संभवतीति शंकते कथमिति सजातीयत्वेनाभिमतस्य गौणात्मनः पु
त्रादेर्मिथ्यात्मनो देहादेश्च तैत्तिरीयश्रुत्यभिहितजगदन्तःपातित्वादाकाशादेश्च जगत आत्मानंदातिरेकेणास
न३ त्त्वाच्चाद्वितीयब्रह्मरूपतास्य घटत इति सबहुमानमुत्तरमाह योगेति १ आकाशादीति तस्माद्वाए
तस्मादात्मन आकाशः संभूत इत्यादिकया तैत्तिरीयश्रुत्याभिहितं जगत्स्वकारणभूतात्मानंदव्यतः पृथङ्
नास्ति अतः कारणात्तस्यानंदस्याद्वितीयत्वमित्यभिप्रायः ॥ २ ॥ श्रीः श्रीः

कर्षंतदभावे इत्याशंक्योपरितनेध्यायेतदुपपादयिष्यन्नित्याह विवक्ष्यतेति इत्युक्तमर्थंनिगमयति सर्वम
पीति ८७ ननुद्वैतादर्शनसहितात्मदर्शनवतो योगित्वमेवभविष्यतीतिशंकते सदापश्यन्निति इषाप

विवक्ष्यतेतदस्माभिरद्वैतानंदनामके अध्यायेहितृतीयेतःसर्वमप्यस्तुमंगलम् ८७
सदापश्यन्निजानंदमपश्यन्नखिलंजगत् अर्थाद्योगीतिचेत्तर्हिसंतुष्टोवर्द्धतांभवान् ८८
ब्रह्मानंदाभिधेग्रंथेमंदानुग्रहसिद्धये द्वितीयेऽध्यायएतस्मिन्नात्मानंदोविवेचितः ८९

त्यापरिहरति नहीति ८८ अध्यायतात्पर्यंसंक्षिप्यदर्शयति ब्रह्मानंदेति ८९ इतिश्रीमत्पर
महंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणरामकृष्णाख्यविदुषाविरचितेब्र
ह्मानंदेआत्मानंदोनामद्वितीयोध्यायः ॥ १२ ॥ श्रीः ॥ श्रीः ॥

ननु विवेकिनो व्यवहारदशायां देहाद्युपद्रवकारिषु द्वेषो दृश्यत इत्याशंक्य तदा योगिविवेकिनोः स तुल्य इति परिहरति देहादेरिति प्रतिकूलेषु व्याघ्रवृकादिषु द्वेषकर्तुस्तस्य योगित्वमेव नाभ्युपगम्यते चेदविवेकिता तर्हि तादृशस्याविवेकित्वमपि नाभ्युपगन्तव्यमित्याह द्वेषमिति तादृशो द्वेषकर्ता चेदविवेक्यपि विवेकवानपि न भवती

दर्शन ४ त्यर्थः ८५ ननु विवेकिनो द्वैतमस्ति योगिनस्तु तन्नास्तीति तृतीये विकल्पे योगिनोऽतिशयो भविष्यत्याशंक्य वि

देहादेः प्रतिकूलेषु द्वेषस्तुल्यो द्वयोरपि द्वेषं कुर्वन्न योगी चेदविवेक्यपि तादृशः ८५
द्वैतस्य प्रतिभानं तु व्यवहारे द्वयोः समम् समाधौ नेति चेत्तद्वन्नाद्वैतत्वविवेकिनः ८६

वेकिनस्तु द्वैतदर्शनं किं व्यवहारदशायामुच्यते उतान्यदेति विकल्पाद्येतद्योगिनोऽपि समानमित्याह द्वैतस्येति द्वितीयमाशंकते समाधाविति योगिनः समाधिकाले द्वैतदर्शनं नास्तीत्युच्यते चेदित्यध्याहारः तर्हि विवेकिनोऽपि विवेकदशायां द्वैतादर्शनं तुल्यमिति परिहरति तद्वन्निति योगिनः समाधिदशायामिवाद्वैतत्वविवेकिनोऽद्वैतत्वमिति श्रुतियुक्तिभ्यां विवेचनं कुर्वतोऽपि तस्मिन्काले द्वैतदर्शनं नास्तीत्यर्थः ८६ ॥ श्रीः

ननु विवेकयोगयोरेकमेव चेत्फलं तर्ह्येनयोरन्यतरस्यैव युक्तं शास्त्रेषु प्रतिपादनं नोभयोरित्याशंक्याधिकारिवैचित्र्यादुक्तमुभयप्रतिपादनमित्यभिप्रायेणाह असाध्य इति ८२ नन्वत्यंतायाससमाध्यस्य योगस्य निरायाससुलभाद्विवेकादतिशयो वक्तव्यः इत्याशंक्य सोतिशयः किमपरोक्षज्ञानजनकत्वादुच्यते उत रागद्वेषनिवृत्तिहेतुत्वात् अथवा द्वैतानुपलब्धिकारणत्वादिति विकल्प्य प्रथमे पक्षे फलसाम्यमित्याह

असाध्यः कस्यचिद्योगः कस्यचित्ज्ञाननिश्चयः इत्थं विचार्य मार्गौ द्वौ जगाद परमेश्वरः ८२
योगे कोतिशयस्तेन ज्ञानमुक्तं समं द्वयोः रागद्वेषाद्यभावश्च तुल्यो योगिविवेकिनोः ८३
न प्रीतिर्विषयेष्वस्ति प्रेयानात्मेति जानतः कुतो रागः कुतो द्वेषः प्रातिकूल्यमपश्यतः ८४

योगे कोतिशय इति द्वयोर्विवेकयोगयोरुभयोरपि ज्ञानलक्षणं फलं सममुक्तं यत्सांख्यैरित्यादिना अतस्तत्र योगे कोतिशयः न कोपीत्यर्थः द्वितीयं प्रत्याह रागद्वेषादीति ८३ विवेकिनो रागाद्यभावमुपपादयति न प्रीतिरिति आत्मा प्रियतम इति जानतः पुरुषस्य न तावद्विषयेषु प्रीतिरस्ति अतो न तेषु रागो जायते रागहेतोरानुकूल्यज्ञानस्याभावान्नापि द्वेषः तद्धेतोः प्रातिकूल्यज्ञानस्याप्यभावादित्यर्थः ॥ ८४ ॥ श्रीः

१०
श्रीः

गूढाभिसंधिः शंकते नन्विति ननु केन प्रकारेणात्मनः परमानंदरूपत्वं परप्रेमास्पदत्वहेतुना गौणमिथ्यात्म
रूपेभ्यः प्रियोपस्पदेभ्यो विवेक्तुं विविच्य ज्ञातुं शक्यतां नाम तथापि नायं विवेको मुक्तिसाधनं अपरोक्षज्ञान द्वारा
मुक्तिहेतोर्योगस्यानभिधानात् इति गूढाभिसंधिः गूढाभिसंधिरेवोत्तरमाह ७९ यद्योगेनेति यथा योगस्या
५४ परोक्षज्ञानहेतुत्वमस्ति एवं विवेकस्यापीत्यत्रापि गूढाभिसंधिः इदानीं चोद्यपरिहारयोरुभयोरभिसंधिं प्रकटय

ननु प्रियतमत्वेन परमानंदतात्मनि विवेक्तुं शक्यतामेवं विना योगेन किं भवेत् ७९
यद्योगेन तदेवेति वदामो ज्ञानसिद्धये योगः प्रोक्तो विवेकेन ज्ञानं किं नोपजायते ८०
यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते इति स्मृतं फलैकत्वं योगिनां च विवेकिनाम् ८१

ति ज्ञानेति यथा परोक्षज्ञानसाधनत्वेन योगोभिहितः पूर्वस्मिन्नध्याये एवमस्मिन्नध्यायेभिहितेन गौणमुख्यात्म
विवेकद्वारा कोशपंचकविवेकेनापि ज्ञानमुत्पद्यत एवेत्यर्थः ८० तत्र किं प्रमाणमित्याशंक्याह यत्सांख्यैरिति सां
ख्यैरात्मानात्मविवेकिभिर्यत्स्थानं मोक्षरूपं प्राप्यते तद्योगैर्योगिभिरपि गम्यते प्राप्यत इत्यनेन वचनेन योगिनां
विवेकिनां च फलैकत्वं ज्ञानद्वारा मोक्षलक्षणस्य फलस्यैकत्वमुक्तमित्यर्थः ॥ ८१ ॥ श्रीः

ननु तर्हि चिदानंदयोरैक्यं कुत्रोपलभ्यत इत्याशंक्याह सत्वेति सत्ववृत्तौ शुभकर्मोपस्थापितसत्वगुणपरिणामरूपायां शुद्धवृत्तौ चित्सुखैक्यं चिदानंदयोरैक्यं भासत इति शेषः तत्रोपपत्तिमाह तद्वृत्तेरिति कुतस्त

सत्ववृत्तौ चित्सुखैक्यं तद्वृत्तेर्निर्मलत्वतः रजोवृत्तेस्तु मालिन्यात्सुखां
शोत्र तिरस्कृतः ७७ तिंतिणीफलमत्यम्लं लवणेन युतं यदा
तदाम्लस्य तिरस्कारादीषदम्लं यथा तथा ७२ श्रीरामः ॥

र्हि भेदेनावभासत इत्यत आह रजोवृत्तेरिति ७७ विद्यमानस्यापि तिरस्कारे दृष्टांतमाह तिंतिणीफलमिति यथा तिंतिणीफले लवणयोगादत्यम्लत्वं तिरोहितं तद्वद्रजोवृत्तावानंदस्यापि तिरोभाव इत्यर्थः ७८ ॥

दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं शंकते चिदानंदाविति विलक्षणाभिन्ना इत्यर्थः उक्तं वैलक्षण्यं परिहरति कीत्ति केचिदानंदयोरभेदः किं स्वाभाविक उत औपाधिक इति विकल्पयति तदभेदोपीति तदभेदश्चिदानन्दयोरभेद ऐक्यं साक्षिणापा तत्स्वरूपे वान्यत्र तदुपाधिभूतासु वृत्तिषु वेत्यर्थः ७५ प्रथमे पक्षे दृष्टान्तदार्ष्टान्तिकयोः

चिदानंदौ नैव भिन्नौ गंधाद्यास्तु विलक्षणाः इति चेत्तदभेदोपि साक्षिण्य
न्यत्र वा वद ७५ आद्ये गंधादयोप्येवमभिन्नाः तद्वर्त्तिनः अक्षभे
देन तद्भेदे वृत्तिभेदात्तयोर्भिदा ७६

साम्यमाह आद्ये गंधादय इति आद्ये चिदानंदयोः साक्षिणि भेदाभावपक्षे तद्वर्त्तिनो गंधादयोपि एवं चिदानंदवदेवाभिन्नाः परस्परं भेदरहिताः इतरपरिहारेणैकस्य भेदेन ग्रहीतुमशक्यत्वादिति भावः द्वितीयपक्षेपि साम्यमाह अक्षेति अक्षाणां गंधादिग्राहकाणां घ्राणादींद्रियाणां भेदेन तद्भेदे तेषां गंधादीनां भेदाभ्युपगमे तद्वदेव वृत्तिभेदाच्चिदानंदाभिव्यक्तिहेतूनां राजससात्त्विकवृत्तीनां भेदात्तयोश्चिदानंदयोर्भिदा भेदो भविष्यतीति अर्थः ७६ ॥ श्रीः ॥ श्रीः

नन्वात्मनः परमानंदरूपत्वमनुपपन्नं तथात्वे चैतन्यस्येव तत्स्वरूपभूतस्यानंदस्यापि सर्वासु धीवृत्तिष्वनुवृत्तिः प्रसज्येतेति शंकते चैतन्येति ७२ चिदानंदयोरुभयोरप्यात्मस्वरूपत्वेपि वृत्तिषु चित एवानुवृत्तिर्नानंदस्येति दृष्टांतावष्टंभेन परिहरति मैवमिति यथोष्णप्रकाशात्मकस्य दीपस्य प्रकाश एव गृहादावनुगच्छति नोष्णता एवं चैतन्यस्यैवानुवृत्तिर्नानंदस्येत्यर्थः ७३ ननु चिदानंदयोरभेदे चिदभिव्यंजकधीवृत्ताविवानंदाभि

चैतन्यवत्सुखं चास्य स्वभावश्चेच्चिदात्मनः धीवृत्तिष्वनुवर्तेत सर्वास्वपि चितिर्यथा ७२
मैवमुष्णप्रकाशात्मा दीपस्तस्य प्रभा गृहे व्याप्नोति नोष्णता तद्वच्चितेरेवानुवर्तनम् ७३
गंधरूपरसस्पर्शेष्वपि सत्सु यथा पृथक् एकैको नैकएवार्थो गृह्यते नेतरस्तथा ७४ ॥

व्यक्तिरपि स्यादित्याशंक्य तथा नियमाभावे दृष्टांतमाह गंधेति यथैकद्रव्यवृत्तीनां गंधादीनां चतुर्णां मध्ये ११
घ्राणादिनैकेनेंद्रियेण गंधादिरेकैक एव गुणो गृह्यते नेतरः तथा चिदानंदयोर्मध्ये चित एवावभासनमित्यर्थः ॥ ७४ ॥ श्रीरामकृष्णगोपालहरे श्रीकेशवमाधवकंसारे ॥ श्रीः

श्रीः

व्यतिरेकमुखेनोक्तस्यार्थस्यान्वयमुखेन प्रतिपादकमात्मानमेवप्रियमुपासीत सयआत्मानमेवप्रियमुपासते
नहास्यप्रियंप्रमायुकंभवतीति समनंतरवाक्यमर्थतः पठति यस्त्विति तुशब्दउक्तवैलक्षण्यद्योतनार्थः अ-
नात्मप्रियपुत्रादिनोऽन्योयःशिष्यः आत्मानमेवोत्तमंप्रियंनिरतिशयप्रेमगोचरं सेवतेसदानुस्मरतितस्यशि-
ष्यादेः प्रेयान्प्रियतमत्वेनाभिमतोऽसावात्माप्रतिवाद्यभिमतप्रियमिवनकदाचिद्विनश्यति किंतुसदानंदरू-
पः सन्नवभासतइत्यर्थः ७० इत्थमात्मनः परप्रेमास्पदत्वे हेतुंप्रसाध्येदानींफलितमाह परप्रेमास्पदत्वेनेति

यत्साक्षिणमात्मानंसेवतेप्रियमुत्तमम् तस्यप्रेयानसावात्मा न नश्यति कदाचन ७०
परप्रेमास्पदत्वेनपरमानंदरूपता सुखवृद्धिः प्रीतिवृद्धौसार्वभौमादिषुश्रुता ७१

अत्रायंप्रयोगः आत्मापरमानंदरूपः निरतिशयप्रेमविषयत्वात् यः परमानंदरूपोनभवति सनिरतिशयप्रेम-
विषयोनभवति यथाघटादिरिति केवलव्यतिरेकीपरप्रेमास्पदत्वहेतोरात्मनः परमानंदरूपतासाधने सामर्थ्य-
द्योतनायप्रीतिवृद्धौसुखवृद्धिमुदाहरति सुखवृद्धिरिति यतः सार्वभौमादिहैरण्यगर्भांतेषुपदविशेषेषुयत्रप्री-
तिर्वर्द्धते तत्रसुखाभिवृद्धिरस्तीतितैत्तिरीयबृहदारण्यकश्रुत्योरभिहितं अतः प्रीतेर्निरतिशयत्वेसतिआनंदस्या-
पिनिरतिशयत्वमवगंतुंशक्यइतिभावः ७१ ॥ श्रीः ॥ श्रीः ॥ श्रीः

प्रियं त्वां रोत्स्यतीत्यस्यैव वाक्यस्य प्रतिवादिनं प्रतिशापरूपत्वं प्रकटयति आग्रहादिति आग्रहादुक्तं पुत्रादिप्रियत्वं सर्वथा न त्यजामीत्येवंरूपाद्ब्रह्मविद्द्वेषादनेनोक्तं विघटयिष्यामि इत्येवंरूपात्तद्[illegible]पास्तं पुत्रादीनामेवाप्रियत्वाभिधानरूपं अपरित्यजतः प्रतिवादिनो नरकप्राप्तिस्तथा बहुयोनिषु नरतिर्यगादिषु असंख्येषु अनेकेषु जन्मसु दोषः पुत्रभार्यादिष्विष्टवियोगानिष्टप्राप्तिरूपः प्रोक्तः प्रियं त्वां रोत्स्यतीति वदता ज्ञानिनेति शेषः ॥ ६८ न तु ज्ञानिनोक्तस्यैकस्य वाक्यस्य शिष्यप्रत्युपदेशरूपत्वं वादिनं प्रतिशापरूपत्वं चेति विरुद्धरूपद्व

आग्रहाद्ब्रह्मविद्वेषादप्यसत्यममुंचतः वादिनो नरकः प्रोक्तो दोषश्च बहुयोनिषु ६८
ब्रह्मविद्ब्रह्मरूपत्वादीश्वरस्तेन वाञ्छितम् यद्यत्तत्तथैव स्यात्तच्छिष्यप्रतिवादिनोः ६९

यं कथं घटत इत्याशंक्योत्तरप्रदातुरीश्वररूपत्वात्तस्याभिधानानुसारेणोभयं भविष्यतीति मत्वा तदुपपादकस्येश्वरोऽहं तथैव स्यादिति समनन्तरवाक्यस्य तात्पर्यमाह ब्रह्मविदिति यतो ब्रह्मविदः स्वस्य ब्रह्मत्वानुभवादीश्वरत्वमस्ति अतस्तेन यं यं शिष्यादिकं प्रति यद्यदिष्टमनिष्टं वाभिधीयते तत्तच्छिष्यप्रतिवादिनोस्तस्य ज्ञानिनो यः शिष्यः यश्च प्रतिवादिनस्तयोस्तथैव स्यात् इष्टमनिष्टं वा अवश्यं भवेदित्यर्थः ६९ ॥

दोषविचारप्रकारमेवदर्शयति अलभ्यमानेति एवं पुत्रगतदोषसंकीर्तनं दारादिसर्वविषयदोषोपलक्षणार्थं एवंविविच्येति एवमुक्तेन प्रकारेण पुत्रादौ विषये जाते विविच्य विद्यमान्दोषाननुविभज्य परात्त्यात्तस्मिन्प्रीतिं

अलभ्यमानस्तनयः पितरौ क्लेशयेच्चिरम् लब्धोपि गर्भपातेन प्रसवेन च बाधते
॥ ६४ जातस्यमहरोगादिः कुमारस्य च मूर्खता उपनीतेप्यविद्यत्वमनुद्वाहश्च
पंडिते ६५ यूनश्च परदाराद्दारिद्र्यं च कुटुंबिनः पित्रोर्दुःखस्य नास्त्यंतोध
नी चेन्म्रियते तदा ६६ एवं विविच्य पुत्रादौ प्रीतिं त्यक्त्वा निजात्मनि निश्चित्य पर
मां प्रीतिं वीक्षते तमहर्निशम् ६७

परित्यज्य निजात्मनि प्रत्यगात्मरूपे साक्षिणि परमां निरतिशयां प्रीतिं निश्चित्य तं प्रत्यगात्मानमहर्निशं सर्वदा वीक्षते अनुसंधत्ते इत्यर्थः ६४ ॥ ६५ ॥ ६६ ॥ ६७

उत्तराभिधानप्रकारमाह तस्योत्तरमिति तयोः शिष्यप्रतिवादिनोः संबंधिनस्तस्य वचनस्योत्तरं वचः
प्रत्युत्तररूपं वाक्यं क्रमेण बोधशापौ बोधं शापं च कुर्यादित्यर्थः ॥६२॥ अनयोः प्रतिवचनस्य प्रदानरूपं
तयोरन्यमात्मनः प्रियरूपात्प्रियं त्वां रोत्स्यतीति समनंतरश्रुतिवाक्यमर्थतः पठति प्रियमिति तत्त्ववि
च्छिष्यप्रतिवादिनावुभावपि हे शिष्य हे प्रतिवादिन् प्रियं त्वदभिप्रेतं पुत्रादिरूपं स्वनाशेन त्वां शिष्यप्रति

तस्योत्तरं वचो बोधशापौ कुर्यात्तयोः क्रमात् ॥६२॥ प्रियं त्वां रोत्स्यतीत्ये
वमुत्तरं वक्ति तत्त्ववित् स्वोक्तप्रियस्य दुष्टत्वं शिष्यो वेत्ति विवेकतः ॥६३॥

वादिनं वा रोत्स्यति रोदयिष्यतीत्येवमुक्तेन प्रकारेण उत्तरं प्रतिवचनं वक्ति ब्रवीति इदमेकवचनं शिष्यप्र
तिवादिनोरुभयोः कथमुत्तरं जातमित्याशंक्य शिष्यप्रश्नोत्तरत्वं उपदेशरूपत्वं तावत्तद्योतयति स्वोक्तप्रि
यस्येत्यादिनाधीतेन महानिशमित्यनेन सार्धश्लोकचतुष्टयेन शिष्यः स्वोक्तप्रियस्य स्वेनाभिहितस्य
पुत्रादिरूपस्य प्रीतिविषयस्य विवेकतः वक्ष्यमाणदोषविचारेण दुष्टत्वं वेत्ति अवगच्छति ॥६३॥

प्रीतेस्तारतम्येनानुभवमेव विशदयति वित्तादिति पिंडः अन्नमयो देहः अयं भावः सर्वैः प्राणिभिः पुत्रादिपरिहाराय वित्तव्ययः क्रियते स्वदेहरक्षणाय कदाचित्पुत्रादिरप्युपेक्ष्यते इंद्रियनाशपरिहाराय ताडनादिना देहपीडांगीक्रियते मरणप्रसक्तौ तत्परिहाराय इंद्रियवैकल्यमप्यंगीक्रियते अतएवोत्तरोत्तरमतिशयेन प्रियत्वं सर्वानुभवसिद्धम् आत्मनस्तु निरतिशयप्रेमास्पदत्वं विद्वदनुभवसिद्धमिति ५९ एवमात्मनः प्रियतमत्वे प्रमा

वित्तात्पुत्रः प्रियः पुत्रात्पिंडः पिंडात्तथेंद्रियम् इंद्रियाच्च प्रियः प्राणः प्राणादात्मा परः प्रियः ५९
एवं स्थिते विवादोऽत्र प्रतिबुद्धविमूढयोः श्रुत्योदाहारि तत्रात्मा प्रेयानित्येव निर्णयः ६० ॥
साक्ष्येव दृश्यादन्यस्मात्प्रेयानित्याह तत्त्ववित् प्रेयान्पुत्रादिरेवेमं भोक्तुं साक्षीति मूढधीः ६१ आत्मनोऽन्यं प्रियं ब्रूते शिष्यश्च वाद्यपि ॥ ०

णसिद्धेपि तस्याज्ञानिनो विप्रतिपत्तिनिरसनाय श्रुत्या तद्विप्रतिपत्तिर्दर्शितेत्याह एवमिति तत्र निर्णयमाह तत्रात्मेति आत्मनः प्रियतमत्वस्योपपादितत्वादित्यर्थः ६० तामेव विप्रतिपत्तिमाह साक्ष्येवेति ६१ आत्मातिरिक्तप्रियतमत्ववादिनो विभज्योत्तराभिधानाय तमेव वादिनं विभज्य कथयति आत्मन इति ॥

भवत्त्वेवंश्रुतावभिधानंप्रकृतेकिमायातमित्यतआह श्रौत्याविचारेति श्रुत्यर्थपर्यालोचनरूपयाविचारदृष्ट्या
साक्षिणएवमुख्यमात्मत्वंनेतरस्यप्राणादेरित्यर्थः विचारदृष्ट्येत्यभिहितस्यविचारस्यस्वरूपमाह कोशानिति
अन्नमयादीन्पंचकोशांस्तैत्तिरीयकश्रुत्युक्तप्रकारेणात्मनःपृथक्कृत्यांतःस्थितस्यात्मनोनुभवोविचारइत्य
र्थः ५६ अंतःस्थितस्यवस्तुनोदर्शनप्रकारमेवाह जागरेत्यादिना जाग्रदाद्यवस्थानांमध्येउत्तरोत्तरावस्था

श्रौत्याविचारदृष्ट्यायंसाक्ष्येवात्मानचेतरः कोशान्पंचविविच्यांतर्वस्तुदृष्टिर्विचारणा ५६
जागरस्वप्नसुषुप्तीनामागमापायभासनम् यतोभवत्यसावात्मास्वप्रकाशचिदात्मकः ५७
शेषाःप्राणादिचित्तांता आसन्नास्तारतम्यतः धीजिस्तथान्तरतम्यात्तेषुसर्वैर्विवीक्ष्यते ५८

गमनस्यपूर्वपूर्वावस्थानिवृत्तेश्चावभासनंयतोनित्यचैतन्यरूपात्साक्षिणोभवतिसःस्वप्रकाशचिद्रूपआ
त्मेत्यर्थः ५७ संग्रहेणोक्तमर्थंप्रपंचयति शेषाइति साक्षिव्यतिरिक्ताःप्राणादिसवित्तांतायदृश्यमानायद
र्थाः तारतम्येनात्मनआसन्नाःसमीपवर्तिनोभवंति तत्रोपपत्तिमाह धीजिरिति यथातारतम्यमांतरत्वंत
द्वेवतेषुप्राणादितारतम्यात्धीजितिर्वीक्ष्यतेसर्वैः अपीतिशेषः ॥ ५८ ॥ श्रीः ॥

एतावता ग्रंथसंदर्भेणोपपादितमर्थं बुद्धिसौकर्याय संक्षिप्य कथयति आत्मेति आत्मा प्रत्यगानंदः प्रेयानतिशयेन प्रियः शेषः स्वोपसर्जनभूतः पदार्थः प्रियस्तदन्ययोस्ताभ्यामात्मनस्तच्छेषाभ्यामन्ययोर्व्याघ्रपथिगतत्तृणादिरूपयोर्द्वेष्योपेक्ष्ये यथाक्रमं भवत इति एवं चातुर्विध्येन लोको व्यवस्थितः व्यवस्थां प्राह उक्तप्रकारचतुष्टयातिरिक्तं न किंचिद्विद्यत इत्यभिप्रायः अयमर्थः श्रुत्यभिमतोपीत्याह याज्ञवल्क्येति आत्मादीनां

आत्मा प्रेयान्प्रियः शेषो द्वेष्योपेक्ष्ये तदन्ययोः इति व्यवस्थितो लोको याज्ञवल्क्यमतं च तत् ५४
अन्यत्रापि श्रुतिः प्राह पुत्राद्वित्तात्तथान्यतः सर्वस्मादांतरं तत्त्वं तदेतत्प्रेय इष्यताम् ५५ ॥

प्रियतमत्वादिकं याज्ञवल्क्यस्यापि संमतमित्यर्थः ५४ न केवलं मैत्रेयीब्राह्मण एवात्मनः प्रियतमत्वमुक्तम् किंतु पुरुषविधब्राह्मणेऽपीत्यभिप्रायेण तद्वाक्यार्थं संगृह्णाति अन्यत्रापीति तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वादांतरतरं यदयमात्मेति अनेन वाक्येन पुत्रवित्तादेः सर्वस्मादांतरस्यात्मतत्त्वस्य प्रियतमत्वमीरितमित्यर्थः ५५ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

चातुर्विध्यमेव दर्शयति आत्मेति नन्वात्मादीनां चतुर्णामपि प्रियतमत्वादिकं किं नियतं नेत्याह चतुर्ष्विति अयमेव प्रियतमः अयमेव प्रियः इदमेवोपेक्ष्यं इदमेव द्वेष्यं नान्यदिति नियमो नास्तीत्यर्थः किं तर्हि स्यात्तत्राह किंत्विति तस्मात्तस्मात्कार्यविशेषात् उपकारापकारादिरूपात् तत्तत्प्रियाप्रियाद्विकादिरूपत्वमित्यर्थः ५१ सर्वत्रानियमप्रयोजनाय प्रसिद्धद्वेष्यव्याघ्रे तत्तद्भावं दर्शयति स्यादिति यदा व्याघ्रः स्वभक्षणाय संमुख आगच्छति तदा द्वेष्यो भवति स एव पराङ्मुखो गच्छति चेदुपेक्ष्यो भवति स एव यदि लालनात्स्वानुकूलो भवति तदा विनोदाय

स्याद्व्याघ्रः संमुखो द्वेष्यो ह्युपेक्ष्यस्तु पराङ्मुखः लालनादनुकूलश्चेद्विनोदायेति शेषताम् ५२
व्यक्तीनां नियमो माभूल्लक्षणात्तु व्यवस्थितः आनुकूल्यं प्रातिकूल्यं द्वयाभावश्च लक्षणम् ५३

ति विनोदसाधनं भवतीति शेषतां स्वस्योपकारत्वेन प्रियत्वं भजत इत्यभिप्रायः ५२ नन्वेकस्यैव वस्तुनः प्रियत्वादिधर्मत्रयांगीकारे व्यवहारव्यवस्था न स्यादित्याशंक्याह व्यक्तीनामिति व्यक्तिनियमाभावेऽपि लक्षणवशाद्व्यवस्था भविष्यतीत्यर्थः किं लक्षणमित्याकांक्षायां तल्लक्षणमाह आनुकूल्यमिति अनुकूलत्वं प्रियस्य लक्षणं आवर्तको धर्मः प्रातिकूल्यं द्वेष्यस्य लक्षणमुपेक्ष्यस्यानुकूल्यप्रातिकूल्यरूपद्वयाभावश्च लक्षणमित्यर्थः ५३

फलितमाह तत्रतत्रेति यस्मिन्यस्मिन्व्यवहारे योयमात्मा उचितो भवति तत्रतत्र तस्मिंस्तस्मिन्व्यवहारउचिते उपयोगितया प्रधानभूते आत्मन्येव प्रीतिर्निरतिशायिनी अतिशयवती तच्छेषे तस्यात्मनः शेषशेषभूते नात्मनि आत्मव्यतिरेके वस्तुनि प्रीतिः प्रीतिमात्रं न निरतिशयं प्रेमेत्यर्थः अन्यत्र आत्मतच्छेषाभ्यां अन्यस्मिन्वस्तुनि नोभयमुभयविधमपि प्रेम नास्तीत्यर्थः ४९

तत्रतत्रोचिते प्रीतिरात्मन्येवातिशायिनी अनात्मनि तु तच्छेषे प्रीतिरन्यत्र नोभयम् ४९ उपेक्ष्यं द्वेष्यमित्यन्यद्द्विधा मार्गतृणादिकम् उपेक्ष्यं व्याघ्रसर्पादि द्वेष्यमेवं चतुर्विधम् ५० आत्माशेषउपेक्ष्यं च द्वेष्यं चेति चतुर्ष्वपि न व्यक्तिनियमः किंतु तत्तत्कार्ये तथा तथा ५१

अन्यत्रनोभयमिहितस्यान्यशब्दार्थस्यावांतरभेदमाह उपेक्ष्यमिति अन्यदन्यदित्युच्यमानं वस्तूपेक्ष्यं उपेक्ष्याविषयः द्वेष्यं द्वेष्यविषयश्चेति द्विधा द्विप्रकारं भवति तदुभयमुदाहरति मार्गेति मार्गगतं तृणलोष्ठादिकमुपेक्ष्यं स्वस्योपद्रवहेतुर्व्याघ्रादिकं तत्तु द्वेष्यमित्यर्थः फलितमाह एवमिति ५० ॥ श्रीः

किंच तपसेति यदा तपः कृत्वा स्वर्गं संपादयिष्यामीत्यादिव्यवहारं करोति तदा कर्तृत्वाद्यध्यस्तविज्ञानमयस्यैवा
त्मत्वमुचितं न देहादेरित्यर्थः तदेवोपपादयति अनपेक्ष्येति यतो न देहस्यात्मत्वमुचितं ततो देहभोगपरित्या
गपूर्वकं कृच्छ्रप्रकारकं कृच्छ्रचांद्रायणादिकं चरतीत्यर्थः ४६ किंच मोक्ष्येऽहमिति यदा पुमान्समाधीन्संपा
द्य मुक्तिं प्राप्स्यामीति मतिं करोति तदा गुरुशास्त्राभ्यामाचार्योपदेशाध्यात्मविचारजन्यापरोक्षज्ञानेना
हं कर्तात्मा सच्चिदानंदब्रह्माहमस्मीति चिदात्मानमेव गच्छति· तस्य चिदात्मत्वमेवोचितं न तु तत्र कर्तृताद्यात्म

तपसा स्वर्गमेष्यामीत्यादौ कर्तात्मतोचिता अनपेक्ष्य वपुर्भोगं चरेत्कृच्छ्रादिकं ततः ४६
मोक्ष्येऽहमित्यत्र युक्तं चिदात्मत्वं तदा पुमान् तद्वेत्ति गुरुशास्त्राभ्यां न तु किंचिच्चिकीर्षति ४७
विप्रक्षत्रादयो यद्वद्बृहस्पतिसवादिषु व्यवस्थितास्तथा गौणमिथ्यामुख्या यथोचितम् ४८

त्वमित्यर्थः ४७ उदाहृतानां त्रिविधानामात्मनां व्यवहारविशेषेषु व्यवस्थया प्राधान्यं दर्शयितुमाह
विप्रेति यथा ब्राह्मणो बृहस्पतिसवेन यजेतेत्यत्र ब्राह्मणस्यैवाधिकारो न क्षत्रियवैश्ययोः राजसूयेनेत्यत्र राज्ञ
एवाधिकारो न ब्राह्मणवैश्ययोः वैश्यो वैश्यस्तोमेन यजेतेत्यत्र वैश्यस्यैवाधिकारो नेतरयोः एवं गौणमिथ्या
मुख्यभेदानामात्मनां यथायोगं स्वोचितव्यवहारेषु प्राधान्यमिति भावः ४८ ॥ श्रीः ॥

एतदेव प्रपंचयति मुमुक्षोरित्यादिना श्लोकपंचकेन मुमुक्षोरिति गृहरक्षादौ कर्मविशेषे गौणात्मैव पुत्रभार्यादिरूप एवोपयुज्यते उपयुक्तो भवति उत्तरत्र जिजीविषुंत्यादित्यर्थः मुख्यात्मा साक्षी नोपयुज्यते अविकारित्वान्नापि मिथ्यात्मा तात्तस्य मरणोन्मुखत्वादित्यर्थः फलितमाह पुत्र इति स्पष्टम् ४३ उक्ते गृहरक्षादिव्यवहारे सत्यपि स्वस्मिन्पुत्रादिस्वीकारे दृष्टांतमाह अध्येता वन्हिरिति अयमध्येता वन्हिरित्यस्मिन्प्रयोगे स्वरूपेण विद्यमानो

मुमुक्षोर्गृहरक्षादौ गौणात्मैवोपयुज्यते न मुख्यात्मा न मिथ्यात्मा पुत्रः शेषी भवत्यतः ४३
अध्येता वन्हिरित्यत्र सन्नप्यग्निर्न गृह्यते अयोग्यत्वेन योग्यत्वाद्वटुरेवात्र गृह्यते ४४
कृशोहं पुष्टिमाप्स्यामित्यादौ देहात्मतोचिता न पुत्रं विनियुंक्तेऽसौ पुष्टिहेत्वन्नभक्षणे ४५

प्यग्निर्नाग्निशब्दार्थत्वेनैं गृह्यते योग्यत्वादित्यर्थः ४४ एवं गौणात्मप्राधान्यस्थलमुदाहृत्य मिथ्याप्राधान्यस्थलमुदाहरति कृशोहमिति अहं कृशो जातः अतो अन्नभक्षणादिना पुष्टिं संपादयिष्यामीत्यादौ लोकव्यवहारे अन्नभक्षणयोग्यस्य देहस्यैवात्मत्वं गृहीतुमुचितम् उक्तमर्थं लोकव्यवहारप्रदर्शनेन द्रढयति न पुत्रमिति ४५ गृह्यत्वेन स्याध्येतृत्वायोगात् किंतु अध्येतृत्वयोग्यो वटुर्माणवक एवात्रास्मिन्प्रयोगेऽग्निशब्दार्थत्वेन तुटिः ३

चदशी नभातीति साक्षिणः साक्षिरूपस्यात्मनो गौणात्मनः पुत्रादेरिव कस्मादपि भेदो न भाति मिथ्यात्मनो देहादेरि
व भेदो नास्त्यपि तत्रोभयत्र हेतुरप्रतियोगिन इति हेतुगर्भितं विशेषणम् अप्रतियोगित्वात् यथा पुत्रादेर्देहादेरपि स्व ९२
९८ यं प्रतियोगी विद्यते नैवं स्वस्य वस्तुभूतः कश्चित्प्रतियोग्यस्ति देहादेः सर्वस्यारोपितत्वादिति भावः ४१ ननु भे
दाभावेन साक्षिणो गौणमिथ्यात्मत्वे मा भूतां मुख्यात्मत्वं कुत इत्यत आह सर्वान्तरेति सर्वस्माद्देहपुत्रादेरान्तर
त्वात्सर्वसाक्षिणः प्रतीचः सर्वान्तरत्वेन प्रतीयमानत्वात्तस्यैव साक्षिण एवात्मत्वं मुख्यमनौपचारिकमिष्यते अ

न भाति भेदो नाप्यस्ति साक्षिणोऽप्रतियोगिनः ४१ सर्वान्तरत्वात्तस्यैव मुख्यमात्मत्वमिष्यते ॥
सत्येवं व्यवहारेषु येषु यस्यात्मतोचिता तेषु तस्यैव शेषित्वं सर्वस्यान्यस्य शेषता ४२ ॥

भ्युपगम्यत इत्यर्थः अत्रेदमनुमानं सूचितं विमतः साक्षी मुख्य आत्मा भवितुमर्हति सर्वान्तरत्वात् यो मुख्य आ
त्मा न भवति स सर्वान्तरोऽपि न भवति यथाहंकारादिरिति केवलव्यतिरेकी भवत्वात्मत्रैविध्यं पुत्रादेः शेषित्वाभिधा
नेन किमायातमित्यत आह सत्येवमिति एवमात्मत्रैविध्ये सति येषु लौकिकवैदिकलक्षणेषु पालनपोषणा
ब्रह्मात्मत्वानुसंधानादिषु व्यवहारविशेषेषु यस्य पुत्रादेर्देहादेः साक्षिणो वा आत्मत्वमुचितं भवति तेषु तस्य पु
त्रादेर्देहादेः साक्षिणो शेषित्वं प्रधानत्वं अन्यस्य तद्व्यतिरिक्तस्य शेषता उपसर्जनत्वं भवतीति शेषः ४२ श्रीः

न हि प्रतीतिमात्रेणार्थसिद्धिरित्याशंक्य यत्र यत्र व्यवहारे यस्य यस्यात्मत्वं विवक्ष्यते तस्य तस्यात्मनस्तत्र तत्र प्राधान्यप्रदर्शनायोपाधिभेदेनात्मनस्त्रैविध्यमाह गौणेति गौणात्मा मिथ्यात्मा मुख्यात्मा चेत्येवमात्मा त्रिधा भवति तत्र पुत्रादेर्गौणात्मत्वप्रदर्शनाय लोके गौणप्रयोगमुदाहरति देवदत्त इति अयं देवदत्तः सिंह इति यद्वदत्र सिंहयोः स्फुटत्वात् गौणमौपचारिकं तत्र हेतुमाह एतयोरिति ३९ दार्ष्टान्तिके योजयति पुत्रादेरिति अनंतरं मिथ्यात्मा

गौणमिथ्यामुख्यभेदैरात्मायं भवति त्रिधा देवदत्तस्तु सिंहोऽयमित्यैक्यं गौणमे
तयोः ३९ भेदस्य भासमानत्वात् पुत्रादेरात्मता तथा भेदोऽस्ति पंचकोशेषु
साक्षिणो न तु भात्यसौ ४० मिथ्यात्मतातः कोशानां स्थाणोश्चोरात्मता यथा॥

नं दर्शयति भेदोऽस्तीति पंचकोशेष्वानंदमयाद्यन्नमयांतेषु पंचसु कोशेषु साक्षिणः सकाशाद्विद्यमानोऽपि भेदो नावभासते तस्मात्तेषां मिथ्यात्मत्वमित्यर्थः ४० मिथ्यात्मत्वे दृष्टांतमाह स्थाणोरिति वस्तुतश्चोरादिभिन्नस्य स्थाणोश्चोररूपत्वं यथा मिथ्या तद्वदित्यर्थः ॥ एवं गौणमिथ्यात्मानावुपपाद्येदानीं साक्षिणो मुख्यात्मत्वमुपपादयति ॥ ः

इत्यादीति नकेवलमयंश्रुतिसिद्धार्थः ३६ किंतुलोकप्रसिद्धोपीत्याह लौकिकाइति तदेवोपपादयति स्वस्मिन्निति स्वस्मिन्पित्रादौ एकेनआदिशब्देन भार्यादयो गृह्यंते द्वितीयेन क्षेत्रादयः ३७ फलितमाह मुख्याइति यस्मात्स्वप्रयासे सोपि पुत्रादिजीवनोपायं संपादयति ततस्तस्मात्पुत्रादयो मुख्याः प्रधानभूता इत्यर्थः

इत्यादिश्रुतयः प्राहुः पुत्रभार्यादिशेषताम् ३६ लौकिकान्यपि पुत्रस्य
प्राधान्यमनुमन्वते स्वस्मिन्मृतेपि पुत्रादिर्जीवेद्वित्तादिना यथा ३७
तथैव यत्नं कुरुते मुख्याः पुत्रादयस्ततः बाढमेतावता नात्मा शेषो भव-
ति कस्यचित् ३८

एवं वेदलोकप्रसिद्धिभ्यां दर्शितं पुत्रादिप्राधान्यमंगीकरोति बाढमिति तर्ह्यात्मनः शेषित्वोपपादनं व्याकुप्येदित्याशंक्याह एतावतेति एतावता पुत्रादेः कंचित्प्राधान्यमस्तीत्येतावता ॥ ३८ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

अथानंतरमस्य पितुरयं प्रत्यक्षेणापरिदृश्यमान इतरः पुत्रादन्यो जरसाग्रस्तः पितृरूप आत्मास्य यं कृतकृत्योऽनुष्ठितकृत्यजातः सन् प्रमीयतेऽस्त्यर्थः उक्तार्थस्य दृढीकरणाय पुत्ररहितस्य परलोकाभाव प्रदर्शनपरस्य नापुत्रस्य लोकोस्तीति वाक्यस्यार्थमाह सत्यपीति यतः पुत्रस्य मुख्यमात्मत्वमस्ति अत एवात्मनि स्वस्मिन्सत्यपि स्थितेपि अपुत्रस्य पुत्ररहितस्य पितुर्लौकिकः परलोको नास्तिहि इदं पुराणादिषु प्रसिद्धमित्यर्थः ३४ व्यतिरेकमुखेनोक्तस्यार्थस्यान्वयमुखेन प्रतिपादकस्यानुशिष्टं पुत्रं लोक्यमाहुरिति वाक्यस्यार्थमाह अनुशिष्टमिति

अथास्य तस्यात्मायं कृतकृत्यः प्रमीयते सत्यप्यात्मनि लोकोस्ति नापुत्रस्यात एव हि ३४
अनुशिष्टं पुत्रमेव लोक्यमाहुर्मनीषिणः मनुष्यलोको जय्यः स्यात्पुत्रेणैवेतरेण नो ३५
मुमूर्षुर्मंत्रयेत्पुत्रं त्वं ब्रह्मेत्यादिमंत्रकैः ॥

मनीषिणः शास्त्रार्थाभिज्ञा अनुशिष्टं यस्य मारणे त्वं ब्रह्मेत्यादिमंत्रैः शिक्षितमेव पुत्रं लोक्यं लोकाय हितं परलोकसाधनं आहुरित्यर्थः इदानीमैहिकसुखस्यापि पुत्रहेतुकत्वप्रतिपादनपरं सोयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणेति श्रुतिवाक्यमर्थतः पठति मनुष्येति मनुष्यलोकसुखं पुत्रेणैव जय्यं स्यात्संपाद्यं स्यादितरेण कर्मणा साधनांतरेण नो नैव भवति पुत्ररहितस्य सुखसाधनमपि धनादिकं निर्वेदजनकं भवतीति भावः ३५ अनुशिष्टं पुत्रं लोक्यमिति अत्र पुत्रानुशासनं उक्तं इदानीं तस्यावसरं तन्मंत्रांश्च दर्शयति मुमूर्षुरिति आदिशब्देन त्वं यज्ञस्त्वं लोक इति मंत्रौ गृह्येते एभिस्त्वं ब्रह्मेत्यादिभिस्त्रिभिर्मंत्रैर्मुमूर्षुः पिता मरणावसरे पुत्रं मंत्रयेत पुत्रस्य गुणासंतोऽकवीदित्यर्थः ॥ ४

आदिशब्देन युक्तिश्रुती इत्यादिभिरनुभवयुक्तिश्रुतिलक्षणैः त्रिभिः प्रमाणैरेवमुक्तेन प्रकारेणात्मनिपी
तौसङ्गतायामपि केचिच्छ्रुत्यादितात्पर्यानभिज्ञैः आत्मनः पुत्रभार्यादिशेषत्वं पुत्रादीन्प्रति स्वस्योपसर्ज
नत्वमीरितमभिहितम् इदं कुतोऽवगतमित्यत आह एतदिति एतद्विवक्षयाएवं केचिदीर्यत इत्येतदभिप्र
तीकरणात्मा वै पुत्रनामासि इत्यादिकया श्रुत्या पुत्रस्य मुख्यात्मत्वमीरितमित्यर्थः ३२ किंच तसु

पुत्रभार्यादिशेषत्वमात्मनः केच्चिदीरितम् एतद्विवक्षया पुत्रे मुख्यात्मत्वं श्रुतीरितम् ३२
आत्मा वै पुत्रनामेति तच्चोपनिषदि स्फुटम् सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते ३३

त्रस्य मुख्यात्मत्वं उपनिषदि ऐतरेयोपनिषदि स्फुटं व्यक्तमभिहितमिति शेषः केन वाक्येनेत्याकांक्षा ७
यां तद्वाक्यमर्थतः पठति सोऽस्येति अस्य पितुः स पुरुषे ह्वा अयमादितो गर्भे भवतीति प्रकरणात्पुरुष
देहे गर्भत्वेनोक्तः अयं सोऽग्न एव कुमारं जन्मनोऽग्रेऽधिपाभावतीत्यत्राभिशापेन पालनीयतयाउक्तः पुत्र
रूपः आत्मा पुण्येभ्यः कर्मभ्यः पुण्यकर्मानुष्ठानाय प्रतिधीयते प्रतिनिधित्वेनावस्थाप्यते पित्रेति शेषः ३३ श्रीः

एतदेव दृष्टान्तप्रदर्शनेन स्पष्टयति यथेति लोके यथा पुत्रमित्रात् पुत्रस्य मित्रभूतात् पुत्रद्वारा प्रीतिविषयाद्यस्माद्दत्तादेः सकाशात् पुत्रो देवदत्तादिरव्यवधानेन प्रीतिविषयत्वात्तस्मादतिशयेन प्रियो भवति पितुर्विश्वमित्रादेस्तथात्मनस्य संबंधित्वेन प्रीतिविषयात् सर्वस्मात्स्वयमतिशयेन प्रिय इत्यर्थः एवमात्मनि श्रुतियुक्तिभ्यां उपपादितां निरतिशयां प्रीतिमनुभवप्रदर्शनेन दढयति मा न भूवमिति अहं मा न भूयासमिति न का

सिद्धो यथा पुत्रमित्रात्पुत्रः प्रियतरस्तथा मा न भूवमहं किंतु भूयासं सर्वदेत्यसौ ३० ३० ॥
आशीः सर्वस्य दृष्टेति प्रत्यक्षा प्रीतिरात्मनि इत्यादिभिस्त्रिभिः प्रीतौ सिद्धायामेवमात्मनि ३१

पि मम मासत्वमस्तु सर्वदा भूयासं सदा मम सत्तास्तु इत्येवंरूपा आशीः प्रार्थना सर्वप्राणिजातस्य संबंधिनी दृष्टा सर्वोऽप्ययमेव प्रार्थयते इत्यर्थः ३० फलितमाह प्रत्यक्षेति यत एवं सर्वैः प्रार्थ्यते अत आत्मनि निरतिशया प्रीतिः प्रत्यक्षा सिद्धेत्यर्थः कृतानुकीर्तनपुरःसरं मतान्तरं दूरयितुमनुभाषते इत्यादिभिरिति इतिशब्देनानुभवः परामृश्यते ३१ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ ०

पंचदशी

३५

नं त्यागस्यात्मव्यतिरिक्तदेहविषयत्वान्नैवमिति परिहरति तन्नहीति त्यक्तुमुत्सं योग्यस्योचितस्य दे
हस्यात्मता नास्ति कस्य तर्हि सेत्यत आह त्यक्तुरिति त्यक्तुर्देहत्यागकारिणो देहातिरिक्तस्य जीवस्य सात्मते
त्यर्थः २८ भवतु त्यक्तुरात्मत्वं प्रकृते किमायातमित्यत आह न त्यक्तरीति अतो नात्मनस्त्याज्यत्वमि
त्यभिप्रायः मा भूदात्मनि द्वेषो देहहेतूपलभ्यत एवेत्याशंक्याह त्याज्येति त्याज्यदेहगोचरे द्वेषे सत्य

ततो द्वेषाद्भवेत्त्याज्य आत्मेति यदि तन्न हि त्यक्तुं योग्यस्य देहस्य नात्मता त्यक्तुरेव सा २८
न त्यक्तर्यस्ति स द्वेषस्त्याज्यद्वेषे तु का क्षतिः आत्मार्थत्वेन सर्वस्य प्रीतेश्चात्मा ह्यतिप्रियः २९

पि का क्षतिरित्यात्मनस्त्यागाभाववादिनो ममेति शेषः तदेवं न वा अरे पत्युः कामायेत्यारभ्यात्मनस्तु
कामाय सर्वं प्रियं भवतीत्यंतायाः श्रुतेस्तात्पर्यपर्यालोचनया आत्मनः प्रियतमत्वं प्रसिद्धं युक्तितोपि तद्द
र्शयति आत्मेति सर्वस्य सुखस्य हितस्य तत्साधनजातस्य पतिजायादेरात्मार्थत्वेन स्वस्योपकारत्वे
न प्रीतेश्च प्रियत्वादपि आत्मा उपकार्यः स्वयमतिशयेन प्रियः सिद्धो हि ॥ २९ ॥

६

श्रीः

आत्मनि तु तदभावं दर्शयति नात्मेति अयोग्यत्वादित्यर्थः फलितमाह तस्मिन्निति हानादिविषयाभावे
प्यात्मनस्तृणादिवदुपेक्षाविषयत्वं स्यादिति शंकते हानेति हानं परित्यागः आदानं स्वीकारः उपेक्षा उदासी
न्यं २६ आत्मनो हानाद्यविषयत्ववदुपेक्षाविषयत्वमपि न संभवत्ययोग्यत्वादित्यभिप्रायेण परिह
रति उपेक्षितुरिति उपेक्षितुरुपेक्षाकर्तुर्यो निजात्मा अविनाशिस्वरूपमस्ति तस्य स्वरूपत्वात् स्वस्वरू

नात्मा त्याज्यो न चादेयस्तस्मिन्व्यभिचरेत्कथम् हानादानविहीनेऽस्मिन्नुपेक्षा चेत्तृणादिवत् २६
उपेक्षितुः स्वरूपत्वान्नोपेक्ष्यत्वं निजात्मनः रोगक्रोधाभिभूतानां मुमूर्षा वीक्ष्यते क्वचित् २७

पत्वादिवस्तुव्यतिरिक्ततृणादिवन्नोपेक्ष्यत्वं उपेक्षाविषयत्वं न विद्यत इति शेषः ननु हानविषयत्वमात्म
नो नास्तीत्युक्तमनुपपन्नं द्वेषात्त्याज्यत्वदर्शनादिति शंकते रोगेति यतो मुमूर्षा दृश्यते ततस्त्वात्मनि द्वेषसं
भवात् वृश्चिकादिवदात्मापि त्याज्य इति यत्र युज्यतेति शेषः २७ ॥ श्रीः ॥ ॰

ननु स्वयमेवानुकूलयितव्यः स्यादित्यत आह नैकस्मिन्निति एकस्यैवात्मनो युगपदुपकार्यत्वमु
पकारकत्वं चेति धर्मद्वयं विरुद्धमित्यर्थः ननु अन्नादिवत्सुखसाधनत्वाभावेपि सुखवद्भोक्तृत्वशेषता
स्यादित्याशंक्यात्मनो निरतिशयप्रेमास्पदत्वान्नैवमिति परिहरति सुखेइति वैषयिके विषयजन्ये सुखे
प्रीतिमात्रं प्रीतिरेव न निरतिशया आत्मा तु अतिप्रियो निरतिशयप्रेमविषयः अतो न विषयजन्यसु

अनुकूलयितव्यः स्यान्नैकस्मिन्कर्मकर्तृता सुखे वैषयिके प्रीतिमात्रमात्मा त्वतिप्रियः २४
सुखे व्यभिचरत्येषा नात्मनि व्यभिचारिणी एकं त्यक्त्वान्यदादत्ते सुखे वैषयिकं सदा २५

खतुल्य इत्यर्थः २४ तत्रोभयत्रोपपत्तिमाह सुखेव्यभिचारिणीति सुखे वैषयिके सुखे जायमाना ए
षा प्रीतिर्व्यभिचरति कदाचित्सुखांतरं गच्छति न तस्मिन्नेव नियता वर्तते आत्मनि तु विद्यमाना प्रीति
र्न व्यभिचारिणी विषयांतरगामिनी न भवति अतो निरतिशयासेत्यर्थः सुखगोचरायाः प्रीतेर्व्य
भिचारं दर्शयति एकमिति ॥ २५ ॥ श्रीः ॥ २५ ॥ श्रीः

ननु तर्हि सा प्रीतिरिच्छैवेत्याशंक्य परिहरति प्राप्तेनेति इच्छा तावदप्राप्तसुखादिमात्रविषया इयं तु सर्वविषया प्राप्ते लब्धे सुखादौ नष्टेपि तस्मिन्विषये विद्यमानत्वादिच्छातः इच्छोपाध्यतिरिच्यनेभिधीयते २२ इदानीं सुखसाधनभूतेष्वन्नादिष्वियमित्यपि प्रीतिदर्शनादात्मनोप्यन्नादिवत्सुखसाधनता स्यादिति शंकते सुखेति अन्नपानादयः सुखसाधनत्वोपाधिना यथा प्रियाः दृष्टाः आत्मापि आनुकूल्यात्प्रीयता

सुखसाधनतोपाधेरन्नपानादयः प्रियाः आ
त्मानुकूल्यादन्नादिसमश्चेदसुनाशकः २३ ॥

दन्नादिसमः अन्नपानादिवत्सुखसाधनं स्यादित्यर्थः अत्रेदमनुमानं सूचितं विमतः आत्मा सुखसाधनं भवितुमर्हति प्रियत्वादन्नादिवदिति अन्नादिषु भोग्यत्वमुपाधिरित्यभिप्रायेण परिहरति अमुनेति अत्र लोके अमुना सुखसाधनतया अनुकूलेन अनुकूलयितव्यः कः स्यान्न कोपि स्यात् आत्मातिरिक्तस्य भोक्तुरभावादित्यर्थः २३

पंदशी
८

ननुस्वप्नस्यानंदानुभववासनाजन्यत्वेसतिआनंदः

घेति नकेवलमानंदवासनाव
मास्त्स्येवसुखाद्यनुभवोभवती
ामकेत्रध्यायपंचकात्मकेग्रं

दूर्ध्वंयदेवै
ब्रलानंद
रितम् ३४

ः स्वदृशायोस्वप्रकाशचिद्रूप
ादीनांतेषामप्यत्रप्रदर्शितत्वा
वर्यकिंकरेणश्रीरामकृष्णा
ानंदेनामप्रथमाध्यायः ॥ १ ॥ श्रीः ॥ श्रीः ॥ श्रीः

३०

ननुस्वप्नस्यानंदानुभववासनाजन्यत्वेसतिआनंदःएवभासेतेत्याशंक्याह अविद्येति नकेवलमानंदवासनाव
लादेवस्वप्नोजायतेकिंतुअविद्यावासनाबलादपिअतस्तद्वासनाजन्यत्वात्तत्रास्यैवसुखाद्यनुभवोभवती
त्यर्थः ३३ एतावताग्रंथसंदर्भेणोक्तमर्थंनिगमयति ब्रह्मानंदेति ब्रह्मानंदनामकेअध्यायपंचकात्मकेग्रं

अविद्यावासनाप्यस्तीत्यतस्तद्वासनोत्थिते स्वप्नेमूर्खवदेवै
षसुखंदुःखंचवीक्षते ३३ ब्रह्मानंदाभिधेग्रंथेब्रह्मानंद
प्रकाशकम् योगिप्रत्यक्षमध्यायेप्रथमेऽस्मिन्नुदीरितम् ३४

थेऽस्मिन्प्रथमेध्यायेसुषुप्त्यवस्थायामौदासीन्यकालेपिसमाध्यवस्थायांसुखदुःखदशायांस्वप्रकाशचिद्रूप
ब्रह्मानंदस्यप्रकाशकंयोग्यनुभवरूपंप्रत्यक्षंमुक्तमित्यर्थः इदंचोपलक्षणमागमादीनांतेषामप्यत्रप्रदर्शितत्वा
त् ३४ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणश्रीरामकृष्णा
ख्यविदुषाविरचितेब्रह्मानन्दोनामप्रथमोध्यायः ॥ १ ॥ श्रीः ॥ श्रीः ॥

दार्वंऽस्तीति केन प्रपंचयति भुंजान इति तत्त्ववित् द्विविधपानं भुंजानस्तज्ज्ञन्यं विषपानं दमुपनिषद्वाक्यादवगतं ब्रह्मानंदं च लौ
किकवैदिकावुभौ विषपानंदब्रह्मानंदौ भावाद्यवैदिवज्जानीयादित्यर्थः ३० ननु दुःखानुभवदशायामुद्वेगसति
कथं निजानंदानुभवस्तत्राशंक्याह दुःखेति यतो यस्मात्कारणाद्विवेकी द्विविधलौकिकवैदिकव्यवहारयोरुभयो
रपि वेत्ता अतो दुःखप्राप्तावपि पूर्ववद्ज्ञानदशायामिव न तस्योद्वेगः विवेकेन तदा बाध्यमानत्वात् ततो दुःखानुभवका

भुंजानो विषपानंदं ब्रह्मानंदं च तत्त्ववित् द्विभावाभिज्ञयद्विधावुभौ लौकिकवैदिकौ ३०
दुःखप्राप्तावनुद्वेगो यथापूर्वं मनो हृदि गंगामग्नार्द्धकायस्य पुंसः शीतोष्णधीर्यथा ३१
इत्थं जागरणेतत्त्वविदे ब्रह्मसुखं सदा भाति तद्वासनाजन्यस्वप्नेतद्भासते तथा ३२

ऽपि निजानंदानुसंधानेन विरुध्यत इत्यर्थः युगपदुभयानुसंधाने दृष्टांतमाह गंगेति ३१ फलितमाह इत्थ
मिति सदा सुखदुःखानुभवदशायां तस्मिन्स्थितो चेत्यर्थः नकेवलं जागरण एतज्ज्ञानं किंतु स्वप्नावस्थायामपी
त्याह तद्वासनेति हेतुगर्भं विशेषणं जाग्रद्वासनाजन्यत्वात्स्वप्नस्य तत्रापि तद्ब्रह्मसुखं तथा जाग्रदवस्थायामिव
भासत इत्यर्थः ॥ ३२ ॥

ननु दुःखस्य प्रतिकूलत्वेन तदनुसंधानेच्छाभावेपि वैषयिकसुखस्यानुकूलत्वेन पुरुषैरर्थ्यमानत्वात् तदनुसं
धानेच्छा कुतो न भवेदित्याशंक्य तस्य विषयसंपादनादिक्लेशतीव्रबहिर्मुखत्वापादनेन निजानंदानुसंधानवि
रोधित्वात्तदिच्छापि विवेकिनो न जायत इति दृष्टांतप्रदर्शनपूर्वकमाह अग्नीति धीर्बुद्धिर्देहविमोचनेच्छायां दृ
पं॰४ ढतरा सत्यां तद्विलंबकारणेऽलंकारादौ यथा अग्निप्रवेशे धैर्यस्य बुद्धिरुत्पद्यते एवं वैराग्यादिसाधनसंपन्नस्य

अग्निप्रवेशहेतौ धीः शृंगारे यादृशी तथा धीरस्योदितविषयेऽनुसंधानविरोधिनि २७
अविरोधिसुखे बुद्धिः स्वानंदे च गमागमौ कुर्वन्नास्ते क्रमादेषा काकाक्षिवदितस्ततः २८
एकैव दृष्टिः काकस्य वामदक्षिणनेत्रयोः यात्यायात्येवमानंदद्वये तत्त्वविदो मतिः २९

विवेकिनो बुद्धिरनुसंधानविरोधिनि विषयसुखेपीत्यर्थः २७ माभूद्विषयविरोधिसुखेच्छा अप्रयत्नसौ
लभ्येनाबहिर्मुखत्वहेतौ विषये किं न भवतीत्यत आह अविरोधीति २८ दृष्टांतं विवृणोति एकैव दृष्टिरिति य
था काकस्य दृष्टि[illegible]र्दृश्यतेनयेति दर्शनसाधनं चक्षुरिंद्रियमेकमेव वामदक्षिणनेत्रयोर्गोलकयोः पर्यायेणागम
नागमनं करोति एवं विवेकिनो बुद्धिरप्यानंदद्वय इत्यर्थः २९ ॥ श्रीः ॥ श्रीः ॥

ताभ्यीतिके योजयति एवमिति २३ धीरशब्दार्थमाह धीरत्वमिति इंद्रियाणां विषयाभिमुख्येन पुरःसाक
र्षेण सामर्थ्येपि स्वरूपसुखानुसंधानेच्छया सर्वाणीन्द्रियाणि निरस्कृत्यानन्दानुसंधान एव प्रवर्तमानत्वं धीर
त्वमित्यर्थः २४ विश्रांतिशब्दस्याभिवक्षितमर्थं सदृष्टान्तमाह भारवाहिशिर इति यथा लोके भारं वहन्पुरुषः
श्रमहेतुं शिरसि स्थितं भारं परित्यज्य श्रमरहितो वर्तते तथा संसारव्यापारत्यागे सति श्रमरहितत्वासमिति

धीरत्वमक्षप्राबल्येप्यानंदास्वादवांछया निरस्कृत्याखिलाक्षाणि तच्चिंतायां प्रवर्तनम् २४
भारवाहिशिरोभारं मुक्त्वास्ते विश्रमं गतः संसारव्यापृतित्यागजातद्बुद्धिस्तु विश्रमः २५
विश्रांतिं परमां प्राप्तस्त्वौदासीन्ये यथा तथा सुखदुःखदशायां च निजानन्दैकतत्परः २६

जायमाना या बुद्धिः सा विश्रमशब्देनोच्यत इत्यर्थः २५ इदानीं फलितमाह विश्रांतीति परमां निरतिशयां वि
श्रांतिं उक्तलक्षणां प्राप्तः पुरुषः स्वस्यौदासीन्यदशायां यथा परानंदास्वादने तात्पर्यवान्भवति एवं सुखहेतुप्राप्ति दुःख२
कालेपि तदनुसंधानं परित्यज्य निजानन्दास्वादन एव तात्पर्यवान्भवतीत्यर्थः ॥ २६ ॥ श्रीः ॥

पंचदशी
२८

न्यात्मदर्शनायश्रवणादौप्रवृत्तावपिकेचिदानंदशून्यावहिर्मुखावर्त्तंत इत्याशंक्यश्रद्धादिरहितानांतथात्वे
श्रद्धादिमतांनिश्चयोभवत्येवेत्याह श्रद्धालुरिति व्यसनंसर्वथासंपादयामीत्याग्रहः तद्वान्व्यसनीअत्रसमाधौ
सर्वथाअवश्यंततःकिमित्यत्रआह निश्चितेति तस्मिन्ब्रह्मानंदेसकृदेकदाक्षणिकसमाधौनिश्चितेसति अ

श्रद्धालुर्व्यसनीयोत्रनिश्चिनोत्येवसर्वथा निश्चितेतुसकृत्तस्मिन्विश्वसित्यन्यदाप्ययम् २१
तादृक्पुमानुदासीनकालेप्यानंदवासनाम् उपेक्ष्यमुख्यमानन्दंभावयत्येवतत्परः २२ पर
व्यसनिनीनारीव्यग्रापिगृहकर्मणि तदेवास्वादयत्यंतःपरसंगरसायनम् २३ एवंतत्वे
परेशुद्धेधीरोविश्रांतिमागतः तदेवास्वादयत्यंतर्बहिर्व्यवहरन्नपि २४ श्री: ॥

यंसकृन्निश्चयवानन्यदापितरस्मिन्नपिकालेविश्वसितिआनंदोस्तीतिविश्वासंकरोति २१ ततोपिकिं
तत्राह तादृगिति तादृक्पुमान्श्रद्धादिपुरःसरंसकृन्निश्चयवान्पुरुषऔदासीन्यदशायामपिउपलभ्यमानां
तूष्णींकमानंदवासनामुपेक्ष्यतत्परोमुख्यानन्दंतात्पर्यवानभ्यासात्तमेवभावयति २१ एवंव्यवहारकालेपिनि
त्यानन्दंभावयतीत्यत्रदृष्टांतमाह परेति २२ ॥ २२ ॥ श्री: ॥ ०

२८
श्री:

द्धिधस्यैव तस्य कर्मणा संसारमोक्षयोर्हेतुतां दर्शयति मन इति १८ प्रसन्नात्मात्मनि स्थित्वा सुखमक्षय
मश्नुते इत्युक्तमेवार्थं श्रुतिः स्वयमेव प्रपंचयति समाधीति आत्मनि प्रत्यक्स्वरूपे निवेशितस्य समाधिनि
र्धूतमनस्य समाधिना प्रत्यग्ब्रह्मणोरैक्यगोचरप्रत्यावृत्त्या निर्धूतमलस्य निःशेषेण निवारितरजस्तमो
मलस्य चेतसस्तस्मिन्समाधौ यत्सुखमुत्पद्यते तत्समाध्युत्पन्नं तत्सुखं गिरा वाचा वर्णयितुं न शक्य

मन एव मनुष्याणां कारणं बंधमोक्षयोः बंधाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्
१८ समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् न शक्यते वर्ण
यितुं तदा गिरा स्वयं तदंतःकरणेन गृह्यते १९ यद्यप्यसौ चिरं कालं समाधिर्दुर्लभो
नृणाम् तथापि क्षणिको ब्रह्मानंदं निश्चासयत्यसौ २०

ते अलौकिकसुखत्वादित्यर्थः

किंतु स्वयं तत्स्वरूपभूतं सुखमंतःकरणेनैव गृह्यते १९ नन्वस्यैव समाधेर्दुर्लभत्वात्कथमनेन ब्रह्मानं
दनिश्चयसंभवः इत्याशंक्याह यद्यपीति अस्य समाधेः संततस्यासंभवेपि क्षणिकस्य तस्य संभवात्ते
नैवायमानंदो निश्चेतुं शक्यत इत्यर्थः २० ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ ४

नन्वनादिभवपरंपरोपार्जितसुखदुःखप्रदपुण्यपापकर्मणोः सत्त्वाच्चित्तनैर्मल्येनापि कथमात्मनः संसारनिवृत्तिर्भविष्यतीति आशंक्य चित्तप्रसादोपलक्षितब्रह्मानुसंधानेन सकलकर्मक्षयोपपत्तेर्मैवमिति परिहरति चित्तस्येति हि शब्देन तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवमेवेहास्य सर्वे पाप्मानः प्रदूयंते उपपातकेषु सर्वेषु पातकेषु महत्सु च प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेदित्यादिश्रुतिस्मृतिप्रसिद्धिं द्योतयति ततः किमित्यत आह प्रसन्नेति प्रसन्न आत्मा चेतो यस्य स तथोक्त आत्मनि स्वस्वरूपभूते अद्वितीया

चित्तस्य हि प्रसादेन हंति कर्म शुभाशुभम् प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुते १५
समासक्तं यथा चित्तं जंतोर्विषयगोचरे यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बंधनात् १६

नंदलक्षणे ब्रह्मणि स्थित्वा तदेवाहमिति निश्चयेन दृश्यजातं परिहृत्य चिन्मात्ररूपेण अवस्थायाऽक्षयमविनाशि यत्सुखं स्वस्वरूपभूतं तदश्नुते १५ प्रसन्नात्मात्मनि स्थित्वेत्युक्तमेवार्थं दृष्टांतोक्तिपुरःसरं द्रढयति समासक्तमिति प्राणिनश्चित्तं विषयरूपगोचरे इंद्रियप्रचारभूमौ तस्मिन्यथा स्वभावतः सम्यगासक्तं भवति तद्वच्चित्तं ब्रह्मणि प्रत्यगभिन्ने परमात्मनि यद्येवमासक्तं स्यात्तर्हि कः संसारान्न मुच्येत सर्वोऽपि मुच्येतेत्यर्थः १६ उक्तार्थदार्ढ्याय मनसोऽवांतरभेदमाह मन इति तत्र कारणमाह अशुद्धमिति कामस्योपलक्षितं क्रोधादेरपि १७

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ॥
अशुद्धं कामसंपर्कात् शुद्धं कामविवर्जितं १७

ननु चित्तोपशान्तौ जगन्मिथ्याभवतीत्येतदनुपपन्नं तदुपादानकत्वाभावादित्याशंक्याह चित्तमेवेति यद्यपि स्वरूपेण चित्तोपादानकं जगन्न भवति तथापि तथापितस्य भोग्यत्वं चित्तकारणकमेव हिशब्देनात्र सर्वानुभवं प्रमाणयति सुषुप्त्यादौ चित्तविलये भोग्यादर्शनादिति भावः यतश्चित्तात्मकः संसारः अतस्तच्चित्तमेव प्रयत्नेनाभ्यासवैराग्यादिलक्षणेन शोधयेत् रजस्तमोमलराहित्येनैकाग्र्यं कुर्यात् नन्वात्मनो विमु

चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत् यच्चित्तस्तन्मयो मर्त्यो गुह्यमेतत्सनातनम् १४

क्तये आत्मैव शोधनीयो न चित्तमित्याशंक्याह यच्चित्तमिति मर्त्य इत्युपलक्षणं देहिमात्रस्य यो देही यच्चित्तो यस्मिन्नर्थादौ विषये चित्तवान् भवति स तन्मयस्तदात्मक एतत्साकल्यवैकल्ययोरात्मन्येव समारोपणात् एतत्सनातनं इदमनादिसिद्धं गुह्यं रहस्यं एतदुक्तं भवति स्वभावतः शुद्धस्यात्मनो यत्तच्चित्तसंपर्कादेव संसारित्वं ध्यायतीव लेलायतीवेति श्रुतेः अतश्चित्तस्य शोधनेनात्मनः संसारनिवृत्तिरिति ॥ १४ ॥ ०

नकेवलमयमर्थो गीतायामभिहितः किंतु मैत्रायणीयशाखायामपीत्याह बृहदिति मैत्रायणीयानामने
केयजुःशाखाभेदे शाकायन्यनामा कश्चिदृषिः स्वशिष्यत्वेनोपसन्नस्य बृहद्रथाख्यस्य राजर्षेः ब्रह्मसुखं स
माध्यभिधानपूर्वकं यथा भवति तथोक्तवान् ११ केन प्रकारेणोक्तवानित्याशंक्य तत्प्रतिपादकांस्तदीयान्मं
त्रान्पठति यथेति निरिंधनो दग्धकाष्ठो वन्हिः स्वयोनौ स्वकारणे तेजोमात्रे उपशाम्यति ज्वालादिरूपं विशे
षाकारं परित्यज्य तेजोमात्ररूपेण यथावतिष्ठते तथा तेन प्रकारेण चित्तमंतःकरणमपि वृत्तिक्षयान्निरोध

वृहद्रथस्य राजर्षेः शाकायन्यो मुनिः सुखम् प्राह मैत्राख्यशाखायां समाध्युक्तिपुरःसरम् ११
यथा निरिंधनो वन्हिः स्वयोनावुपशाम्यति तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति १२
स्वयोनावुपशांतस्य मनसः सत्यकामिनः इंद्रियार्थविमूढस्यानृताः कर्मवशानुगाः १३

समाध्यभ्यासेन राजसादिसकलवृत्तिनाशात्स्वकारणे सत्त्वमात्रे उपशाम्यति सत्त्वमात्रावशेषो भवतीत्यर्थः
१२ ततः किमत आह स्वयोनाविति सत्येश्वात्मनि विषये कामो यस्यास्तीति सत्यकामी तस्यात एव स्वयोना
वुपशांतत्वादेव इंद्रियार्थविमूढस्येंद्रियार्थेषु विषयेषु शब्दादिषु विमूढस्य विमुखस्य ज्ञानभूतस्य मनसः
कर्मवशमनुगच्छंतीति कर्मवशानुगाः ससाधनाः सुखादयः अनृताः मायिकत्वेन तेन मिथ्याभूताः स्फुरि
त्यर्थः १३ श्रीः

इदानीमुक्तमर्थमुपसंहरति युंजन्निति विगतकल्मषो विगतपापादिकल्मषो योगांतरायवर्जितो योगी सदात्मानमेवं यथोक्तेन प्रकारेण युंजन्ननुसंदधानः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा संस्पर्शो यस्य सुखस्य तद्ब्रह्मसंस्पर्शं ब्रह्मस्वरूपभूतमिति यावत् अत्यंतमविनश्वरं निरतिशयं सुखमश्नुते प्राप्नोतीत्यर्थः ९ अनि

युंजन्नेवं सदात्मानं योगी विगतकल्मषः सुखेन ब्रह्मसंस्पर्शमत्यं
तं सुखमश्नुते ९ उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिंदुना ॥
मनसो निग्रहस्तद्वद्भवेदपरिखेदतः १० ॥ ० ॥

र्वेदेन क्रियमाणो योगाभ्यासः पर्यंतो भवतीत्येतत्सदृष्टांतमाह उत्सेक इति कुशाग्रेणोद्धृतेनैकेन बिंदुना क्रियमाणा उदधेरुत्सेकः उद्धृत्य बहिःसेचनं परिखेदाभावे सति यद्वत्कालांतरे भवेदेवं तद्वन्मनसो निग्रहोपि श्रमराहित्येन क्रियमाणः कालांतरे सिध्येत् इदं च टिट्टिभोपाख्यानं मनसि निधायोक्तम् १० ॥

किंचयत्रयस्मिन्कालेआत्मनिस्थितोऽयंयोगीआत्यंतिकंअत्यंतमेवभवतीत्यात्यंतिकंअनंतंबुद्धिग्राह्यंइंद्रियनि
रपेक्षतयाबुद्ध्यागृह्यमाणं अतीन्द्रियंइंद्रियगोचरातीतमविषयजनितंयत्रतादृशंसुखंवेत्ति अनुभवति
किंचआत्मनिस्थितोयंयोगीअत्वंतिस्वरूपान्नचलतिनप्रच्यवते ६ किंचयमात्मलाभंलब्ध्वाप्राप्याऽ
परंलाभंलाभांतरंततोधिकंनमन्यते आत्मलाभान्नपरंविद्यतइतिस्मृतेः किंचयस्मिन्नात्मतत्वेस्थि

सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतीन्द्रियम् वेत्तियत्रनचैवायंस्थितश्चलतितत्त्वतः ६
यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः यस्मिन्स्थितोनदुःखेनगुरुणापिविचाल्यते ७
तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितम् सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसः ८

तोगुरुणामहतापिदुःखेनशस्त्रविघातादिलक्षणेनप्रल्हादइवनविचाल्यते ७ इदानीमुपपादितंयोगंनि
गमयति तंविद्यादिति शनैःशनैरित्यादिनायावद्भिर्विशेषणैर्विशिष्टआत्मावस्थाविशेषोयोयोगोयुक्तस्तंदुः
खसंयोगवियोगंदुःखैःसंयोगोदुःखसंयोगस्तेनवियोगस्तंविपरीतलक्षणयायोगसंज्ञितंयोगइत्येवंसंज्ञि
तंविद्याज्जानीयात् एवंविधयोगानुष्ठानेकिंचित्कर्तव्यताविशेषमाह सनिश्चयेनेति सपूर्वोक्तोयोगोनिश्च
याध्यवसायेनानिर्विण्णचेतसानिर्वेदरहितेनचित्तेनयोक्तव्योऽनुष्ठेयः ॥ ८ ॥ श्रीः ॥

योगमभ्यसतोभ्यासवलादात्मन्येव मनःप्रशाम्यति मनःप्रशांतेतो किं भवतीत्यतआह प्रशांतेति प्रशांत रजसंप्रक्षीणरजसंप्रक्षीणामोहादिक्लेशरजसं अत एव प्रशांतमनसंप्रकर्षेण अत्यर्थंशांतंचित्तंयस्यतंमनो यस्यतंब्रह्मभूतंब्रह्मैवेदंसर्वमितिनिश्चयवत्तयाजीवन्मुक्तं अकल्मषं अधर्मादिविवर्जितमेनं योगिनं उत्तमंस्व पत्यसातिशयत्वादिदोषरहितं सुखमुपैति उपगच्छति ॥ संगृहीतार्थप्रपंचनपरान्तद्वीयानेवश्लोका

प्रशांतमनसंह्येनं योगिनंसुखमुत्तमम् उपैति शांतरजसंब्रह्म
भूतमकल्मषम् ॥ यत्रोपरमतेचित्तंनिरुद्धंयोगसेवया ॥ २
यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति ॥ ५ ॥ २

न पठति यत्रोपरमेति चित्तंयत्रयस्मिन्कालेयोगसेवया योगानुष्ठानेनसर्वस्माद्विषयान्निवारितंसदुप रमतेउपरतिंगच्छति किंचयत्रयस्मिन्नेवकाले आत्मनासमाधिपरिशुद्धेनांतःकरणेनात्मानंपरंज्योतिःस्व रूपंपश्यन्नुपलभमानःस्वस्मिन्नेवतुष्यतितुष्टिंभजतेनविषयेष्वित्यर्थः ॥ ५ ॥ श्रीः श्रीः

फलितमाह नद्वैतमिति यस्मिन्काले द्वैतभानं नास्ति निद्रापि नागच्छति तस्मिन्काले उपलभ्यमानं यत्सुखमस्ति स ब्रह्मानंद इत्यर्थः अयं ब्रह्मानंद इति कुतोवगतमित्याशंक्य कृष्णवाक्यादित्याह गीतायां षष्ठाध्याय इति शेषः १०१ तत्र कैः श्लोकैरुक्तमित्याशंक्य तान् श्लोकान्पठत्यर्थक्रमानुसारेण शनैरिति अयमर्थः धृतिगृहीतया धैर्ययुक्तया बुद्ध्या सानुभूतया शनैः शनैः न सहसा उपरमेत् मन उपरतिं कुर्यात्किंप्रयत्नं चेतमित्यत आह आत्मेति मनः आत्मसंस्थं आत्मनि संस्था सम्यक्स्थितिरात्मैवेदं सर्वं न ततोन्यत्किंचिदस्तीत्येवंरूपा यस्य तदात्म

शनैः२

नद्वैतं भासते नापि निद्रा तत्रास्ति यत्सुखम् स ब्रह्मानंद इत्याह भगवानर्जुनं प्रति १०१
शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् १०२
यतो यतो निश्चरति मनश्चंचलमस्थिरम् ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् १०३

संस्थं तथाविधं कृत्वा किंचिदपि न चिंतयेदेष योगस्य परमोवधिः १०२ एतत्संपादने प्रवृत्तो योगी प्रथमं किं कुर्यादित्यत आह यत इति चंचलं स्वभावदोषात् अत एवास्थिरं एकत्र विषयेऽनियतं एवंविधं मनो यदा यदा यतो यतो यस्माद्यस्मात् शब्दादेर्निमित्तान्निश्चरति निर्गच्छति तदा तदा ततस्ततस्तस्मात्तस्माच्छब्दादेः सकाशान्नियम्यैतेषां शब्दादीनां मिथ्यात्वादिदोषदर्शनेनाभासीकृत्य वैराग्यभावनापूर्वकं निरुध्यैतन्मन आत्मन्येव वशं नयेत् श्री॰मंचेश्यतामापास्येत् १०३

भवत्येवं नीरानुमापकत्वं शैत्यस्य प्रकृते किमायात्तमित्याशंक्यानन्दासनानन्दस्यापि मुख्यानन्दानुमापकत्वमायातमित्याह यावदिति अभ्यासयोगतः ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनीति श्रुत्यभिहितनिरोधसमाध्यभ्यासयोगेन यावद्यावदहमादिवृत्तिविलयवशाच्चित्तस्य सूक्ष्मता जायते तावन्निजानन्दाभिव्यक्तिर्भवतीत्यनुमीयते अयमत्र प्रयोगः अहंकारसंकोचविशेषविशिष्टक्षणो द्वितीयादिक्षणः पक्षः सपूर्वस्मात्

यावद्यावदहंकारो विस्मृतोभ्यासयोगतः तावत्तावत्सूक्ष्मदृष्टेर्निजानन्दोनुमीयते
सर्वात्मना विस्मृतः सन्सूक्ष्मतां परमां व्रजेत् अलीनत्वान्न निद्रैषा ततो देहोपि नो पतेत् १००

त्क्षणादधिकनिजानन्दाविर्भाववान् अहंकारसंकोचविशेषयुक्तकालत्वादहंकारसंकोचयुक्ताद्यक्षणवदिति ९९ अहंविस्मरणस्य कोवधिरित्यत आह सर्वेति तर्हि सा निद्रैव स्यादित्यत आह अलीनेति सर्ववृत्तिविलयेप्यन्तःकरणस्वरूपविलयाभावान्नोयं निद्रा सुषुप्तेः कारणात्मनावस्थानं सुषुप्तिरित्याचार्यैरुक्तत्वादित्यर्थः अन्तःकरणविलयाभावे लिंगमाह तत इति यत्र सुप्त्यादावहंकारविलयस्तत्र देहपातो दृष्टः इह तु तदभावादपि लीन इति गम्यते :१०० श्रीः

नन्वौदासीन्येपिभासमानस्यनिजानंदत्वेनतस्यब्रह्मानंदत्वान्मुख्येतिकावासनानंदतानस्यादित्याशंक्याहंका
रसामान्यावृतत्वान्नब्रह्मानंदतेतिपरिहरति अहमस्मीति देवदत्तोहमित्यादिविशेषशून्येनाहमस्मीत्येवंरू
पेणाहंकारसामान्येनावृतत्वान्नायंमुख्यः इत्यर्थः तर्हितस्यकिंरूपतेत्यतआह किंत्वसाविति ९७ मुख्या

अहमस्मीत्यहंकारसामान्याच्छादितत्वतः निजानंदोनमुख्योयंकिंत्वसौतस्यवासना ९७
नीरपूरितभांडस्यबाह्येशैत्यंनतज्जलम् किंतुनीरगुणस्तेननीरसत्तानुमीयते ९८

नंदातिरिक्तवासनानंदसद्भावेदृष्टांतमाह नीरेति जलपूर्णकुंभस्यबहिर्भागेस्पर्शनेनोपलभ्यमानंय
च्छैत्यमस्तितत्केवलंजलंनभवतिद्रवत्वानुपलंभात् किंतर्हितदित्यतआह किंत्विति नीरगुणत्वंकथमव
वगम्यतइत्यतआह तेनेति विमतंघटेउपलभ्यमानंशैत्यंजलमन्यंभवितुमर्हतिशैत्यत्वात् जलेउ
पलभ्यमानशैत्यवदिति ॥ ९८ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः श्रीः

देहतादात्म्याभिमानहेतुकान्यवस्थांतराणि दर्शयति उदासीन इति तत्र सुखित्वदुःखित्वयोः कर्मज
न्यत्वज्ञानाय विशेषणम् तयोः सुखदुःखयोः तद्धेतुकत्वं दर्शयति सुखेति ९४ तयोश्च सुखदुःखयोर्निमित्त
भेदात् द्वैविध्यमाह वाह्येति तदौदासिन्यं कदा स्यादित्यत आह सुखदुःखेति व्यक्तिभेदविवक्षया बहुवचनं

उदासीनः सुखीदुःखीत्यवस्थात्रयमेत्यसौ सुखदुःखे कर्मकार्ये त्वौदासीन्यं स्वभावतः ९४
वाह्यभोगान्मनोराज्यात्सुखदुःखे द्विधा मते सुखदुःखांतरालेषु भवेत्तूष्णीमवस्थितिः ९५
न कापि चिंता मेस्त्यद्य सुखमास इति ब्रुवन् औदासीन्ये निजानंदभानं वक्त्यखिलो जनः ९६

९५ यदर्थं आग्रहाद्युपन्यस्तं तदिदानीं दर्शयति नकापीति सर्वोपि जनः इदानीं मम कापि चिंता गृहादिविष
या नास्ति अतः सुखं यथा भवति तथा तिष्ठामीति वदन् औदासीन्यस्वरूपानंदस्फूर्तिं धत्ते अतो जागरणाव
स्थायामपि निजानंदभानमस्तीत्यवगंतव्यमित्यभिप्रायः ॥ ९६ ॥ श्रीः ॥ श्रीः

विषयानंदस्यद्विद्यानंदोधीयत्रिरूपकः [illegible] त्रिरूपत्वाभिधाने

यान्निजानंदमुख्यानंदात्मा
कारइत्युदाहृतेश्लोकेयोग
तेनापिनिद्रोत्तथास्तियत्सु
प्तधानान्निजानन्दोब्रह्मा
दइत्यम्‌ आनंदोजनय
योजनकत्वेनाभिहितस्य
स्यमुख्यमानंदंभावयत्येव
नंदः पुरोकोयं:स आत्मानं
स्यैवयोगानंदशब्देनाभ्युवा
माकाशादिशरीरांतमित्या
त्तिविवर्त्तएकंत्रैविध्यंसुस्प
नंदस्यब्रह्मानंदश्वासना

जगदाकारः एकस्यैवब्रह्मानंदस्यजगदाकारत्वोपाधिसाहित्यराहि
त्यभेदेनभेदव्यपदेशोपपत्तेः तथाहिब्रह्मानंदनिरूपणावसरआनंदादेवभूतानिजायंतइत्यादिनाजगदाकार

विषयानंदश्च द्विधानंदो धीवृत्तिरूपकः इत्यत्र धीवृत्तिरूपत्वाभिधानेन विवक्षितत्वान्निजानंदमुख्यानंदात्मानंदयोगानंदाद्वैतानंदानंदानां ब्रह्मानंदानतिरिक्तत्वाच्च तथाहि यावद्यावदहंकार इत्युदाहृते श्लोके योगलक्षणोपायगम्यतया योगानंदत्वेन विवक्षितस्य निजानंदस्यैव न द्वैतं भासते नापि निद्रा तत्रास्ति यत्सुखं स ब्रह्मानंद इत्याह भगवानर्जुनं प्रति इत्यस्मिन्नुत्तरश्लोके एव ब्रह्मानन्दत्वाभिधानान्निजानन्दो ब्रह्मानंदान्न भिद्यते तथा मुख्यानन्दोपि ब्रह्मानन्द एव तथा चोक्तं विषयानन्दो वासनानंद इत्यमू आनंदो जनयन्नास्ते ब्रह्मानन्दः स्वयंप्रभः इत्यत्र जन्यत्वेनामुख्यम् तयोर्विषयानंदवासनानंदयोर्जनकत्वेनाभिहितस्य ब्रह्मानन्दस्यैव तादृक्पुमानुदासीनकालेपीत्युदाहृते श्लोके आनंदवासनामुपेक्ष्य मुख्यमानंदं भावयत्येव तत्पर इति मुख्यानंदत्वाभिधानादात्मानन्दाद्वैतानन्दयोश्च ब्रह्मानंदत्वं योगानंदः पुरोक्तो यः स आत्मानंद इष्यतामिति तृतीयाध्यायादौ प्रथमाध्याये योगानंदतया विवक्षितस्य ब्रह्मानंदस्यैव योगानंदशब्देनानुवादपूर्वकं आत्मानंदतामभिधाय कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेदिति प्रश्नपूर्वकमाकाशादिशरीरांतमित्यादिना द्वितीयस्य ब्रह्मत्वप्रतिपादनादवगंतव्यम् तस्माद्ब्रह्मानंदो वासना च प्रतिबिंब इत्युक्तं त्रैविध्यमुपपत्तर्हि नन्वेवं वासनानंदात् ब्रह्मानंदादपीतरम् वेत्ति योगी निजानंदमित्यत्र निजानंदस्य ब्रह्मानंदवासनानंदाभ्यां भेदेन निर्देशो न युज्यत इति न शंकनीयम् एकस्यैव ब्रह्मानंदस्य जगत्कारणत्वोपाधिसाहित्यराहित्यभेदेन भेदव्यपदेशोपपत्तेः तथाहि ब्रह्मानंदनिरूपणावसरे आनंदादेव भूतानि जायंत इत्यादिना जगत्कार

फलितमाह ब्रह्मानंद इति उक्तप्रकारेण स्वप्रकाशात्मा सुषुप्तौ प्रतिभासमानो यो ब्रह्मानंदो यश्च तदूर्ध्वमपि तो विषयानुभवमंतरेण प्रतीयमानो वासनानंदो योप्यभीष्टविषयलाभादंतर्मुखे मनसि प्रतिबिंबितो विषयानंद एतत्त्रितयातिरेकेणास्मिञ्जगति न कश्चिदानंदोस्ति नन्वानंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंद इत्यनेन प्रकारेणानंदत्रैविध्यमुक्तम् इदानीं ब्रह्मानंदो वासना च प्रतिबिंब इति त्रयं तद्विलक्षणमानंदस्य त्रैविध्यमुच्यतेतः पूर्वोत्तरविरोधः किंच यावद्यावदहंकारो विस्मृतोभ्यासयोगतः तावत्तावत्सूक्ष्मदृष्टेर्नि

ब्रह्मानन्दो वासना च प्रतिबिंब इति त्रयम् अंतरेण जगत्यस्मिन्नानंदो नास्ति कश्चन ८८

जानंदोनुमीयते इति तादृक्सुखमात्रुदासीनकालेप्यानंदवासनां उपेक्ष्य मुख्यमानंदं भावयन्नेव तत्पर इति चोक्तो प्रकारद्वयातिरिक्तो निजानंदमुख्यानंदावभिधीयेते योगानंदपुरोक्तः यद्यप्यत्र योगानंदोपि कश्चिदवभासते ब्रह्मानंदाभिधेग्रंथेन तृतीयाध्यायेरितः अद्वैतानंद एव स्यादित्यत्राद्वैतानंदं चान्यमवगच्छामः अतः अंतरेण जगत्यस्मिन्नानंदो नास्ति कश्चनेत्युक्तिर्विरुध्येतेति चेन्मैवं विद्यानंदस्य विषयानन्दवदंतःकरणवृत्तिविशेषत्वेन विषयानंदस्यांतर्भावस्य तथाद्वितीयाध्यायेमंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेदिति आत्मानंदस्ततोऽन्योभिधीयते इति त्रुटिः ३ ॥

द्वितीयेपितद्दृश्यते अर्थेइति व्याकरणाद्युपलक्षणं निगमादेः व्याकरणादिना परोक्षज्ञाने संपादितेपिसं
शयादिनिरासेनापरोक्षीकरणमवशिष्यते तर्हि कदा संपूर्णार्थ्यंस्यानस्येत्याशंक्य तदवधिं दर्शयति स्यादिति
यदा कृतार्थत्वबुद्धिरुत्पद्यते तदा ज्ञानसंपूर्णतावगंतव्येत्यर्थः ८५ एवं प्रासंगिकं परिसमाप्य प्रकृतमेवानुसरति
यत्रयस्मिन् यत्रे यस्मिन्काले तस्मिन्भावादौ विषयानुभवमंतरेण सुखं भवति तत्रतत्र सुखस्य विषयजन्यत्वाभावात्सामा

अर्थे व्याकरणाद्बुद्धे साक्षात्कारोवशिष्यते स्यात्कृतार्थत्वधीर्यावत्तावत्कुरुमुपास्यनोः ८५
आस्तामेतद्यत्रयत्र सुखं स्याद्विषयैर्विना तत्र सर्वत्र विज्ञेयो ब्रह्मानंदस्य वासनाम् ८६
विषयेष्वपि लब्धेषु तदिच्छोपरमे सति अन्तर्मुखमनोवृत्तावानंदः प्रतिबिंबति ८७

न्याहंकारादत्तौत्याद्यवासनानंदत्वमवगंतव्यमित्यर्थः ८६ एवं ब्रह्मानंदवासनानंदौ दर्शयित्वा इदानीमानंदत्रैविध्य
नियमनाय आत्माभिमुखधीवृत्तौ इत्यत्रोक्तमेव विषयानंदं पुनरनुवदति विषयेष्वपीति यदा यदा स्रगादिविषयलाभा
त्तेतदिच्छोपरमोभवति तदामनसंपन्नसुखेसति तस्मिन्नपि स्यात्मानंदः प्रतिबिंबितो भवत्ययं विषयानंद इत्यर्थः ८७

ननुवेदाश्चत्वारइतियोवेदसवेदगतांसंख्यामेववेत्तिनतुवेदानांस्वरूपमितिचोदयति संख्यामिति साम्येन
समाधत्ते नहीति एवंचतुर्वेदाभिज्ञंमन्यइवत्वमप्यशेषंसंपूर्णंयथाभवतितथा ब्रह्मनवेत्सि नैवजानासि ८२
ननुसंख्यातिरिक्तवेदस्वरूपभेदइवस्वगतादिभेदशून्यस्यानन्दरूपेब्रह्मण्यज्ञायमानस्यांशस्याभावात्असं
पूर्णज्ञानित्वोपालंभोनघटतइतिचोदयति अखंडेति ८३ ब्रह्मज्ञानेप्यशेषत्वादिकंस्वीकर्तुंब्रह्मजानामीति

संख्यामेवैषजानातिनतुवेदानशेषतः यदितर्हित्वमप्येवंनाशेषंब्रह्मवेत्सिहि ८२
अखंडैकरसानंदेमायातत्कार्यवर्जिते अशेषत्वमशेषत्ववार्तावसरएवकः ८३
शब्दानेववपस्याहोतेषामर्थंचपश्यसि शब्दपाठोऽर्थबोधस्तेसंपाद्यत्वेनशिष्यते ८४

वक्तुंविकल्प्यपृच्छति शब्दानिति किमखंडैकरसमद्वितीयंसच्चिदानंदरूपमित्यादिशब्दानेवपठसि आहो
अथवातेषांशब्दानामर्थंस्वगतादिभेदशून्यत्वादिकंचपश्यसिनजानासिविकल्पार्थः आद्येपक्षेसावशेषत्वंद
र्शयति शब्दपाठइति ८४ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

चोदयति नन्विति गुरुशुश्रूषादिलभ्यस्य ब्रह्मानंदस्यानुभवस्य न होऽस्य स्थितिमात्रलभ्यत्वे गुरुशुश्रूषादिपूर्वकं श्रव
णादिकं वृथा स्यादित्यर्थः ७८ अयं ब्रह्मानंद इति ज्ञाते सति कृतार्थता भवत्येव तद्वेदनं गुरुशुश्रूषादिकमंतरेण न सं
भवतीत्याह बाढमिति अत्यंतं गंभीरं दुरवगाहमवाङ्मनसगम्यं सर्वसंसर्गवर्जितं सर्वात्मस्वरूपं ब्रह्म गुरुशास्त्रे वि
हाय अन्येन केनाप्युपायेन को जानीयान्न कोपीत्यर्थः ७९ ननु त्वद्वाक्यादेव ब्रह्मानंदं जानतोपि मम न कृता

ननु तस्मींस्थितो ब्रह्मानंदश्चेद्भाति लौकिकाः अलसाश्चरितार्थाः स्युः शास्त्रेण गुरुणा
त्र किम् ७८ बाढं ब्रह्मेति विदुश्चेत्कृतार्थास्तावतैव ते गुरुशास्त्रे विनात्यंतं गंभीरं ब्रह्म वे
त्ति कः ७९ जानाम्यहं त्वदुक्त्याद्य तथापि मे न कृतार्थता अत्राचक्षत्यादृशोदंतं प्राज्ञंमन्य
स्य कस्यचित् ८० चतुर्वेदविदे देयमिति श्रावयन्नयाचत वेदाश्चत्वार इत्येवं वेद्मि मे
दीयतां धनम् ८१

र्थतोपलभ्यत इत्याशंक्यानुवादपूर्वकं सोपहासमुत्तरमाह जानामीति ८० तमे
व वृत्तांतं दर्शयति चतुर्वेदेति कश्चिच्चतुर्वेदविदे कस्मैचिद्दिवहुधनं दातव्यमिति एवंविधं वाक्यं श्रुत्वा वेदाश्च
त्वार इत्यस्मादेव वाक्यादहं वेद्मि अतो मे दीयतामिति वक्ति तद्वन्मयानपीत्यर्थः ८१ ॥ श्रीः ॥

सुप्तोब्रह्मानंदेऽनुभूतइत्यत्रलिंगंत्वाह कंचिदिति प्रबुद्धस्यजागरणंप्राप्तस्यापिकंचित्कालंस्वल्पकालपर्यंतंसु
षुप्तावनुभूतस्यब्रह्मानंदस्यवासनासंस्कारोऽनुगच्छेत् अनुगच्छति कुतएतदवगम्यतइत्यतआह यतइति यतःका
रणात्प्रबोधादेर्निर्विषयोविषयानुभवरहितोपिसुखीतूष्णीमास्तेऽतोऽवगम्यतइत्यर्थः ७५ नहितथैवतूष्णींक
तोनावतिष्ठतइत्यतआह कर्मभिरिति कर्मभिःपूर्वोक्तैश्चोदितःसर्वोपिप्राणीपश्चान्नानाविधानिदुःखान्यनु

कंचित्कालंप्रबुद्धस्यब्रह्मानंदस्यवासना अनुगच्छेद्यतस्तूष्णींमास्तेनिर्विषयःसुखी ७५
कर्मभिःप्रेरितःपश्चान्नानादुःखानिभावयन् शनैर्विस्मरतिब्रह्मानंदमेषोऽखिलोजनः ७६
प्रागूर्ध्वमपिनिद्रायाःपक्षपातोदिनेदिने ब्रह्मानंदेनृणांतेनप्राज्ञोऽस्मिन्विवदेतकः ७७

संदधानःशनैर्ब्रह्मानंदंविस्मरति ७६ इतोब्रह्मानंदेनापिप्रतिपत्तिःकार्येत्याह प्रागूर्ध्वमिति प्रत्यहंमनुष्याणांनि
द्रायाःप्रागूर्ध्वमपिनिद्रारंभेनिद्रावसानेचब्रह्मानंदेस्नेहोस्तियतोनिद्रार्थंमृदुशय्यादिसंपादयंतितदवसानेतंपरि
त्यक्तुमशक्तास्तूष्णीमासतेतेनकारणेनअस्मिन्नानंदेकोबुद्धिमान्विवदेतनकोपीत्यर्थः ७७ ॥ श्रीः

पूर्वोदाहृतश्रुतिवाक्यगतचेतोमुखशब्दार्थमाह अज्ञानेति आनंदभोजने सौषुप्तब्रह्मानंदास्वादने मुखं साध
नं अज्ञानविंविताचित्स्यात् अज्ञानवृत्तौप्रतिविंवितंचैतन्यमेवभवेत् ननु सुषुप्तावानंदमयेन रूपेण जीवेन
ब्रह्मसुखंचेद्भुज्यते तर्हि न परित्यज्याप वहिः कुतो जागरणे दुःखालयमागच्छेदित्यतआह भुक्तमिति

अज्ञानविंविताचित्स्यान्मुखमानंदभोजने भुक्तंब्रह्मसुखंत्य
क्त्वावहिर्यात्यथकर्मणा ७३ कर्मजन्मांतरेभूद्यत्तद्योगाद्बु
ध्यतेपुनः इतिकैवल्यशाखायांकर्मजोबोधईरितः ७४ ॥

पुरापार्जितकर्मपाशबद्धत्वात्तेनप्रेरितोजीवःसाक्षात्कृतमपिब्रह्मानंदंपरित्यज्यापायवहिर्यातिजागरणादिकं
गच्छतीत्यर्थः ७३ एतत्कुतोऽवगम्यतइत्याशंक्यपुनश्चजन्मांतरकर्मयोगात्सएवजीवःस्वपितिप्रबुध्यतइतिकैव
ल्यश्रुतिवाक्यादितिमन्वानस्तद्वाक्यमर्थतः पठतितदभिप्रायमाह कर्मेति ७४ ॥ श्रीः ॥

अथप्रज्ञानघनशब्दार्थमाह प्रज्ञानानीति पुरापूर्वंजाग्रद्दशेप्रज्ञानशब्दवाच्याघटादिगोचरायाबुद्धिवृत्तयोऽभव
न् अथसुषुप्तिकालेघटादिविषयाभावेसतिघनोभवतिचिद्रूपेणैकरूपोभवत् तत्रदृष्टांतमाह घनत्वमिति
७१ प्रज्ञाघनशब्दार्थनिरूपणप्रसंगादागतंकिंचिदाह तद्घनत्वमिति यदिदंवेदंतेषुसाक्षित्वेनाभिधीयमानंप्र

प्रज्ञानानिपुराबुद्धिवृत्तयोऽथघनोभवेत् घनत्वंहिमबिंदूनामु
दग्देशेयथातथा ७१ तद्घनत्वंसाक्षिभावंदुःखाभावंप्रचक्षते
लौकिकास्तार्किकायावद्दुःखवृत्तिविलोपनात् ७२ श्रीः

ज्ञानघनत्वमस्तितदेवलौकिकाःशास्त्रसंस्काररहितास्तार्किकाःवैशेषिकादयःशास्त्रिणश्चदुःखाभावंप्रचक्षते
दुःखाभाइत्याहुःकुतइत्यतआह यावद्दुःखेति यावंतोदुःखवृत्तयःतासांसर्वासांविलयादित्यर्थः ७२

पंचदशी
१७

इदानींसुषुप्तस्थानएकीभूतःप्रज्ञानघनएवानंदमयोह्यानंदभुक्चेतोमुखइतिमांडूक्यादिश्रुतिगतंवाक्यमर्थतः पठति एकीभूतइति सुषुप्तंसुषुप्तिस्तत्रतिष्ठतीतिसुषुप्तिस्थःसुषुप्त्यभिमानीत्यर्थः आनंदमयआनंदप्रचुरआनंदभुक्स्वरूपभूतमानंदंभुंक्तइत्यानंदभुक्चेतोमयवृत्तिभिश्चैतन्यंतन्मयाः तत्प्रचुराश्चित्प्रतिबिंबसहिताइत्यर्थः ताश्चतावद्वृत्तयश्चचेतोमयवृत्तयस्ताभिरानंदभुगिति योजना ६९ तद्व्याख्यातस्यैकीभूतइ

एकीभूतःसुषुप्तस्थःप्रज्ञानघनतांगतः आनंदमयआनंदभुक्चेतोमयवृत्तिभिः ६९
विज्ञानमयमुख्यैर्यैरूपैर्युक्तःपुराधुना सलयेनैकतांप्राप्तोबहुतंडुलपिष्टवत् ७०

तिपदस्यार्थमाह विज्ञानेति यःआत्मापुराजागरणावस्थायांविज्ञानमयमुख्यैःसवायसवायमात्माब्रह्मवि
वी२ ज्ञानमयोमनोमयःप्राणमयश्चक्षुर्मयःश्रोत्रमयःपृथिवीमयः आपोमयोवायुमयःआकाशमयस्तेजोमयःअते
जोमयःकाममयोऽकाममयःक्रोधमयइत्यादिश्रुत्युक्तैरूपैराकारविशेषैर्युक्तोभूत्सएवाधुनालयेनविज्ञानम
यआद्युपाधिलयेनैकतांएकाकारतांप्राप्तोगतोभवति तत्रदृष्टांतमाह बहुतंडुलेति बहुतंडुलजनितपिष्टवदि
त्यर्थः ७० श्रीः

१७
श्रीः

नासैव बुद्धिर्निद्रारूपेण विलीना आनंदमय इत्यभिधीयते ६४ एवमानंदमयस्वरूपं प्रदर्श्य तस्यैव प्रबोधकाले विज्ञानमयरूपेणास्मर्तत्वसिद्ध्यै तदानीं सुखानुभवमुपपादयति अंतर्मुख इति सुखप्रतिबिंबिसहि उरिः २

सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखबिंबिता सैव तद्बिंबसहिता लीनानंदमयस्ततः ६५ अंतर्मुखोय आनंदमयो ब्रह्मसुखं तदा भुंक्ते चिद्बिंबयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः ६६ अज्ञानवृत्तयः सूक्ष्मा विस्पष्टा बुद्धिवृत्तयः इति वेदांतसिद्धांतपारगाः प्रवदंति हि ६७ मांडूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटम् आनंदमयभोक्तृत्वं ब्रह्मानंदे च भोग्यता ६८ ॥

विलीनावस्थ आनंदमय इत्युक्तमेवार्थं स्पष्टीकरोति. सुप्तीति सुप्तेः पूर्वस्मिन्नव्यवहिते क्षणे यांतर्मुखा बुद्धिवृत्तिः स्वरूपभूतसुखप्रतिबिंबयुक्ता भवति तत अनंतरं तत्प्रतिबिंबसहितां तत्सुखधीवृत्तिजनितसंस्कारसहिताज्ञानोपाधिकोय आनंदमयः तदा सुषुप्तौ ब्रह्मसुखं स्वरूपभूतं सुखं चिदाभाससहिताभिरज्ञानादुत्पन्नाभिसुखादिगोचराभिर्वृत्तिभिः सत्त्वपरिणामविशेषैर्भुंक्तेनुभवति ६६ ननु तर्हि जागरण इव तदानीं सुखमनुभवामीत्यभिमानः कुतो न स्यादित्याशंक्याविद्यावृत्तीनां बुद्धिवृत्तिवत्स्पष्टत्वाभावान्नानुभव इत्यभिप्रायेणाह. अज्ञानवृत्तय इति इदं कुतोवगतमित्यत आह इतीति ६७ नन्वानंदमयो ब्रह्मानंदं सूक्ष्माभिरविद्यावृत्तिभिर्भुंक्ते इत्यत्र किं प्रमाणमित्यत आह मांडूक्येति एतच्छब्दार्थमेवाह आनंदेति ६८ ॥ श्रीः ॥ श्रीः

पंचदशी
१५
५

ननु तर्हि सौषुप्तसुखाद्यनुभवकालेऽसत्तो विज्ञानमयस्य प्रबोधे कथं तत्स्मर्तृत्वमित्याशंक्य विलयावस्था
यामपि तत्स्वरूपनाशाभावाद्विलयावस्थोपाधिमदानंदमयरूपेणानुभवितृत्वं विज्ञानशब्दवाच्यघनीभा
वोपाधिमत्त्वेन स्मर्तृत्वं चैकस्य घटत इत्यभिप्रायेणाह विलीनेति यथाग्निसंयोगादिना विलीनं घृतं प

विलीनघृतवत्पश्चात्स्याद्विज्ञानमयो घनः
विलीनावस्थ आनंदमयशब्देन कथ्यते ६४

श्चाच्छैत्यादिसंबंधवशात्घनीभवति एवं जाग्रदादिभोगप्रदस्य कर्मणः क्षयवशान्निद्रारूपेण वि
लीनमंतःकरणं पुनर्भोगप्रदकर्मवशात्प्रबोधे विज्ञानात्मना घनीभवति अतस्तदुपाधिक आत्मापि विज्ञा
नमयो घनः स्यात् स एव पूर्वं विलयावस्थोपाधिकः सन् आनंदमय उच्यते ६४ ॥ श्रीः ॥

१६
श्रीः

ननु सौषुप्तसुखस्य स्वप्रकाशसुखत्वेऽपि ब्रह्मानंदः स्वयं भवेत्तदुपपत्त्योक्तं ब्रह्मस्वरूपत्वं न संभवति मानाभावादि त्याशंक्य विज्ञानमानंदमित्यादिबृहदारण्यकवाक्यस्य सद्भावान्मैवमित्याह ब्रह्मविज्ञानमिति ६२ ननु अनुभवस्मरणयोरेकाधिकरणत्वनियमात्सुखमहमस्वाप्सं न किंचिदवेदिषमिति च सौषुप्तसुखाज्ञानयोर्विज्ञानमयशब्दवाच्येन जीवेन स्मर्यमाणत्वात्तस्य सुखाद्यनुभवितृत्वं वक्तव्यमित्याशंक्य तदुपाधेर्विज्ञानस्याज्ञानकार्यस्याज्ञाने विलीनत्वान्मैवमित्यभिप्रायेणाह यदज्ञानमिति नकिंचिदवेदिषमिति स्मरणस्यचानुपपत्त्याव

ब्रह्मविज्ञानमानंदमिति वाजसनेयिनः पठंत्यतः स्वप्रकाशं सुखं ब्रह्मैव नेतरत् ६२
यदज्ञानं तत्र लीनौ तौ विज्ञानमनोमयौ तयोर्हि विलयावस्था निद्राज्ञानं च सैव हि ६३

गम्यमाने यदज्ञानमस्ति तत्र तस्मिन्नज्ञाने तौ प्रमातृप्रमाणत्वेन प्रसिद्धौ विज्ञानमनोमयौ लीनौ विज्ञानत्वाद्याकारपरित्यज्य कारणरूपेणावस्थितौ अतस्तदुपाधिकस्य नानुभवितृत्वमिति भावः तत्रोपपत्तिमाह योरिति हि यस्मात्तयोर्विज्ञानमनोमययोर्विलयावस्था निद्रेत्युच्यते विज्ञानविरतिः सुषुप्तिरित्यभिधानात्तौ हि निद्रायामेव विलीनाविति वक्तव्यमित्याशंक्याह अज्ञानमिति सैव निद्रा विद्वद्भिरज्ञानमिति व्यवह्रियत इत्यर्थः ६३

नकेवलमयंश्रुतिसिद्धोर्थः किंतुसर्वानुभवसिद्धोपीत्याह सुखमिति सुषुप्तादुत्थितःपुरुषएतावंतंकालंसु
खमस्वाप्सं नकिंचिदवेदिषमित्येवंनिद्राकालीनेसुखाज्ञानेपरामृशति अतोपिसुप्तौसुखमवगम्यते
६० ननुपरामर्शस्याप्रमाणत्वात्कथंतद्बलात्सुखसिद्धिरित्याशंक्यतस्याःप्रामाण्योपपितन्मूलभूतानुभ
वबलात्तत्सिद्धिरित्यभिप्रायेणाह परामर्शइति परामर्शस्मरणज्ञानमनुभूतएवविषयेभवतिनाननु

सुखमस्वाप्समत्राहं नचैवकिंचिदवेदिषम् इतितत्रसुखाज्ञानेपरामृशतिचोत्थितः ६०
परामर्शोनुभूतेस्तीत्यासीत्तदनुभवस्तदा चिदात्मत्वात्स्वतोभातिसुखमज्ञानधीस्ततः ६१

भूतविषयइति अस्माद्धेतोस्तत्रसुप्तौअनुभवआसीदित्यवगम्यते ननुसुप्तौमनःसहितानांज्ञानकरणा
नांविलीनत्वात्कथमनुभवसिद्धिरित्याशंक्यकिंसुखानुभवसाधनंनास्तीत्युच्यते अज्ञानानुभवसाधनंवाना
द्यःस्वप्रकाशचिद्रूपत्वेनसुखस्यकरणानपेक्षत्वान्नद्वितीयःस्वप्रकाशसुखबलादेवतदावरकाज्ञानप्रती
तिसिद्धेरित्यभिप्रेत्याह चिदात्मेति ततःस्वप्रकाशसुखादज्ञानधीरज्ञानस्यप्रतीतिर्भवतीति ६१

जीवसुषुप्तौ ब्रह्मानंदरूपेणावतिष्ठत इत्यत्र युक्तिप्रदर्शनपरतयात्र पितापिता भवतीत्यादिकायाः श्रुतेस्तात्पर्यमाह पितेति अत्र सुषुप्तावाध्यासिकानां पितृत्वादिजीवधर्माणां श्रुत्यैव निवारितत्वात् जीवत्वाप्रतीतेर्ब्रह्मणैवावशिष्यत इत्यर्थः ५७ ननु पितृत्वाद्यभिमानाभावेपि सुखित्वादिसंस्कारः किं न स्यादित्याशंक्य संसारस्य देहाभिमानमूलत्वात्तदभावे अभावः इति मन्वानस्तत्प्रतिपादकं तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति श्रौमनं

पितापि सुप्तावपितेत्यादौ जीवत्ववारणात् सुप्तौ ब्रह्मैव नो जीवः संसारित्वासमीक्षणात् ५७
पितृत्वाद्यभिमानो यः सुखदुःखाकरः स हि तस्मिन्नपगते तीर्णः सर्वान्शोकान्भवत्ययम् ५८
सुषुप्तिकाले सकले विलीने तमसावृतः सुखरूपमुपैतीति ब्रूते ह्याथर्वणीश्रुतिः ५९

तद्वाक्यं तात्पर्यतो व्याचष्टे पितृत्वादीति ५८ ननूदाहृताभिः श्रुतिभिर्न सुखप्राप्तिर्मुख्यतोधीयमानोपलभ्यत इत्याशंक्य तत्राभिधानपरं कैवल्यश्रुतिवाक्यमर्थतः पठति सुषुप्तीति सकले जाग्रदादिलक्षणे प्रपंचे विलीने स्वोपादानभूतायां तमःप्रधानभूतायां प्रकृतौ विलयं गते सति तमसा तमःप्रकृत्या आवृत आच्छादितो जीवः सुखरूपं ब्रह्मोपैतीति तस्याः श्रुतेरर्थः ५९

मेवमेवायंपुरुषःप्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरं ३

भवंत्येतेसुखिनःप्रकृतेकिमायातमित्याशंक्यदर्शितश्रुतिवाक्यस्यतात्पर्यमाह कुमारादीति कुमारादिवत्कु
मारादयोयथानंदभाजः एवमपिसुषुप्तःब्रह्मानंदैकतत्परःब्रह्मानंदैकभागित्यर्थः ब्रह्मानंदैकपरत्वेयुक्तिप्रदर्शि
नपरंयद्यथाप्रिययास्त्रियासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमितिज्योतिर्ब्राह्मणगतंवाक्यमर्थतोऽनुक्रामति
स्त्रीपरिष्वक्तेति यथालोकेप्रिययास्त्रियाऽऽलिंगितःकामीबाह्याभ्यंतरविषयज्ञानशून्यःयथासुखमतिष्ठद्व

कुमारादिवदेवायंब्रह्मानंदैकतत्परः स्त्रीपरिष्वक्तवद्वेदनबाह्यंनापिचांतरम् ५५
बाह्यंरथ्यादिकंवृत्तंगृहकृत्यंयथांतरम् तथाजागरणंबाह्यंनाडीस्थःस्वप्नआंतरः ५६

ति तथासुषुप्तौप्राज्ञेनपरमात्मनैक्यंगतोजीवोबाह्यादिविषयज्ञानाभावात्आनंदरूपएवभवति ५५
तत्रेदृष्टांतरदांतिकवाक्यस्ययोर्बाह्याभ्यंतरशब्दयोर्विवक्षितमर्थंक्रमेणदर्शयति बाह्यमिति वृत्तंवृत्तांतम्
नाडीस्थःजाग्रद्वासनयानाडीमध्येप्रतीयमानःप्रपंचःस्वप्नःइत्युच्यते ॥ ५६ ॥ श्रीः

यथावासार्वभौमोराजाविशारदबुद्धित्वेपिसर्वैर्मानुषानंदैर्युक्तत्वात्प्रार्थनीयाभावेनरागादिरहितआनंदमूर्तिरेवावतिष्ठते ५२ यथावामहाविप्रोमहाब्राह्मणः प्रत्यगभिन्नब्रह्मसाक्षात्कारवानहंकृतकृत्यइत्येवंरूपां विद्यानंदस्यपरमांसीमांजीवन्मुक्तिंप्राप्तःपरमानन्दस्वरूपएवतिष्ठति तथामुग्धोप्यानंदरूपस्तिष्ठतीतिशे

महाराजःसार्वभौमःसंपन्नःसर्वभोगतः मानुषानंदसीमानंप्राप्यानंदैकमूर्तिभाक् ५२
महाविप्रोब्रह्मवेदीकृतकृत्यत्वलक्षणाम् विद्यानंदस्यपरमांकाष्ठांप्राप्यावतिष्ठते ५३
मुग्धबुद्धातिबुद्धानांलोकेसिद्धासुखात्मता उदाहृतानामन्येतुदुःखिनोनसुखात्मकाः ५४

षः ५३ नन्वेतेकुमारादयस्त्रयःएवकिमितिदृष्टांतीकृतानाम्इत्याशंक्यदृष्टांतत्रयोदाहरणतात्पर्यमाह मुग्धेति विवेकशून्यानांमध्येऽतिबालःसुखीविवेकिषुसार्वभौमःअतिविवेकिब्रह्मानंदात्मसाक्षात्कारवानेव इतरेतुसर्वदारागादिमत्त्वाद्दुःखिनइतिनदृष्टांतीकृताइत्यर्थः ॥ ५४ ॥ श्रीः ॥ ५४ ॥

इदानींश्येनदृष्टांतप्रपंचनपरस्यतद्यथास्मिन्नाकाशेश्येनोवासुपर्णोवाविपरिपत्यश्रांतःसंहत्यपक्षौस
ल्लयायैवध्रियतएवायंपुरुषएतस्माअंतायधावतियत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यति
इत्यस्यबृहदारण्यकवाक्यस्यार्थंसंक्षिप्याह श्येनइति यथाऽऽकाशेप्रचरन्श्येनएतन्नामापक्षीगगने
संचारनिमित्तश्रमशापितुंशायनैकार्थंनीडैकलंपटःकुलायैकाभिलाषवान्व्रजेत्शीघ्रंगच्छेत् तद्वदेव

श्येनोवेगेननीडैकलंपटःशयितुंव्रजेत् जीवःसुप्त्यैतथाधावेद्ब्रह्मानंदैकलंपटः ५०
अतिबालस्तनंपीत्वामृदुशय्यागतोहसन् रागद्वेषाद्यनुत्पत्तेरानंदैकस्वभावभाक् ५१

जीवोमनउपाधिकश्चिदाभासोपिब्रह्मानंदैकाभिलाषवान्स्वापायशीघ्रंगच्छेत् हृदयाकाशमितिशेषः
५० सयथाकुमारोवामहाराजोवामहाब्राह्मणोवाऽतिघ्नीमानंदस्यगत्वाशयीतैवमेवैषएतच्छेतइतिकु
मारादिदृष्टांतत्रयप्रदर्शनपरंबालाकिब्राह्मणगतंवाक्यंश्लोकत्रयेणव्याचष्टे अतिबालेति यथास्तनंधयःशि
शुरागलंस्तनंपायित्वामृदुशय्यायांगिनिस्वकीयादिस्थानशयनत्वेनरागादिरहितःसन्सुखमूर्तिरेवावतिष्ठ
ते ॥ ५१ ॥ श्रीः

तत्र तावत्स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बंधनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबंधनं हि सोम्य मन इत्यस्य दृष्टांतदार्ष्टांतिकप्रतिपादनपरस्य छांदोग्यश्रुतिवाक्यस्यार्थं संक्षेपेण दर्शयति श्लोकद्वयेन शकुनिरिति हस्तादौ कस्मिंश्चिदाधारे सूत्रेण बद्धः शकुनिः पक्षी आहारादिग्रहणाय दिक्षु प्राच्यादिषु व्यापारं कृत्वा तत्रावि

शकुनिः सूत्रबद्धः सन्दिक्षु व्यापृत्य विश्रमम् अलब्ध्वा बंधनस्थानं हस्त
स्तंभाद्युपाश्रयेत् ४८ जीवोपाधिर्मनस्तद्वद्धर्माधर्मफलाप्तये
स्वप्ने जाग्रति च भ्रांत्वा क्षीणे कर्मणि लीयते ४९ ॥ श्रीः

श्रमं विश्राम्यतेऽस्मिन्निति विश्रमः आधारः तमलब्ध्वा बंधनस्थानं हस्तादिकमेव यथाऽऽश्रयेत् तथा जीवोपाधिभूतं मनोऽपि पुण्यपापफलयोः सुखदुःखयोरनुभवाय स्वप्नजागरावस्थयोस्तत्र तत्र भ्रांत्वा भोगप्रदे कर्मणि क्षीणे सति सोपादानेऽज्ञाने विलीयते तल्लये च तदुपहितो जीवः परात्मैव भवतीत्यर्थः ४९ ॥

पंचदशी

१२

ततः किमित्यत आह तच्छ्रमस्वेति तस्य त्रिपुटीदर्शनजनितस्य श्रमस्यापनोदाय स एव जीवः परमात्मा
नंदरूपे ब्रह्मणि धावेत् शीघ्रं गच्छेत् गत्वा च तेन ब्रह्मणैक्यं तादात्म्यं गत्वा सता सोम्य तदा संपन्नो भवतीति श्रु

तच्छ्रमस्वापनुत्त्यर्थं जीवो धावेत्परात्मनि तेनैक्यं प्राप्य तत्रत्यो ब्रह्मा
नन्दः स्वयं भवेत् ४६ दृष्टांताः शकुनिः श्येनः कुमारश्च महान्र
पः महाब्राह्मण इत्येते सुप्तानन्द उदीरिताः ४७ ॥ ः

तेः स्वयमपि तत्रत्यः तस्यां सुषुप्तौ स्थितो ब्रह्मानंदो भवेत् ४६ अस्मिन्नुपपादिते सौषुप्ते ब्रह्मानंदे शाकुन्यादयो
बहवो दृष्टांताः श्रुत्युक्ताः विद्यंत इत्याह दृष्टांता इति • शकुन्यादिभिः पंचभिर्दृष्टांतैः सुप्तावानंदोपपादनेन तत्र सु
खं नास्तीति मतं निराकरोति ॥ ४७ ॥ श्रीः ॥ ४७ ॥ श्रीः ॥

१२
श्रीः

संक्षेपेणोक्तमर्थं श्लोकत्रयेण प्रपंचयति जाग्रदित्यादिना जीवो जाग्रद्व्यापृतिभिर्जागरणावस्थायां क्रियमाणैर्व्यापारविशेषैः श्रान्तो विश्रम्यपमद्दुश्चव्याप्तेशायं नंष्ठन्याऽपानंतरं विरोधिनि व्यापारजनिते दुःखेऽपनीते निवारिते सति स्वस्यापि चित्तोऽव्याकुलमनाभ्रत्याश्च व्याप्तो विषये जायमानं सुखमनुभवेत्स्वात्मात्कुर्यात् ॥४५॥ विषयसुखं चकीरस्कृइत्याकांक्षायां तत्स्वरूपं दर्शयन्परे सुखे निमग्नं नानिमित्तत्वेन तदनुभवेऽपि श्रमं दर्शय-

जाग्रद्व्यापृतिभिः श्रान्तो विश्राम्यापविरोधिनि अपनीतस्व
स्यचित्तोऽनुभवेद्विषये सुखम् ॥४५॥ आत्माभिमुखधीवृत्तौ स्वा
नंदः प्रतिबिंबति अनुभूयेन मात्रापि त्रिपुट्याः शांतिमाप्नुयात् ॥४५॥

ति आत्मेति अनागतविषयसंपादनादिना दुःखमनुभूय तन्निवृत्तये मद्दुश्चव्याप्तेशायान स्वबुद्धिरंतर्मुखा भवति तस्यां च बुद्धिवृत्तौ स्वरूपभूतः आनन्दः स्वाभिमुखे दर्पणे मुखमिव प्रतिबिंबति एवं हि विषयानंदः अत्राप्यस्यामपि वेलायां एतेन विषयानन्दमनुभूयाऽनुभवित्रनुभवानुभाव्यलक्षणायास्त्रिपुट्याः श्रमं प्राप्नुयात् ॥४५॥ श्रीः ॥ ४५ ॥ श्रीः ॥ ४५ ॥ श्रीः ॥ ४५ ॥ श्रीः

अर्थापत्तेरन्यथोपपत्तिं शंकते दुःखेति एतच्छय्यादिसाधनसंपादनं दुःखनिवृत्तिफलकं न नियतमिति
परिहरति रोगिणामिति रोगादिदुःखसहितानां निश्चयेन तद्भवतु तद्रहितानां तु निवर्त्यदुःखाभावात्तत्संपादनं सुखा
येवेत्यवगम्यतेत्यर्थः ४१ ननु सौषुप्तसुखस्य शय्यादिसाधनजन्यत्वे आत्मस्वरूपत्वं व्याहन्येतेति शंकते
तर्हीति किं निद्रागमनात्पूर्वकालीनस्य विषयजन्यत्वमुच्यते उत निद्राकालीनस्येति विकल्प्याद्यमंगी

दुःखनाशार्थमेवैतदिति चेद्रोगिणां तथा भवन्त्यरोगिणां त्वेतत्सुखायैवेति निश्चिनु ४१
तर्हि साधनजन्यत्वात्सुखं वैषयिकं भवेत् भवत्येवात्र निद्रायाः पूर्वं शय्याशनादिजम् ४२
निद्रायां तु सुखं यत्तज्जन्यते केन हेतुना सुखाभिमुखधीः पूर्वं पश्चान्मज्जेत्परे सुखे ४३

करोति भवतीति ४२ द्वितीयं निराकरोति निद्रायामिति सुषुप्तौ शय्याद्यनुसंधानाभावात्तज्जन्यत्वं तस्य
न संभवतीति भावः ननु निद्रायामजन्यं सुखं यद्यस्ति तर्हि तद्विषयसुखवत्कुतो नानुभूयत इत्याशंक्यानुभवि
तुस्तदानस्मिन्निमग्नत्वान्न विषयसुखवत्तदनुभव इत्यभिप्रायेणाह सुखेति आदौ निद्रायाः पूर्वस्मिन्का
ले जीवः सुखाभिमुखधीः शय्यादिजन्यसुखाभिमुखा बुद्धिर्यस्य स तथोक्तस्तथाविधो भवति पश्चान्निद्रा
काले परउत्कृष्टे सुखे स्वरूपसुखे मज्जेन्निलीनो भवेत् ॥ ४३ ॥ श्रीः ॥ श्रीः

इदानीं परकीयसुखदुःखाभ्यां स्वकीयसुखदुःखयोर्वैषम्यं दर्शयति स्वकीयेति स्वनिष्ठयोः सुखदुःखयोरनुभवसिद्धत्वान्नानुमेयत्वं यतः ततस्तयोः सुखदुःखयोर्भावः सञ्जातो यथानुभूत्यैव वेद्यः प्रत्यक्षेणावगम्यते तथा तदभावोपि तयोः सुखदुःखयोरभावोपि अन्यतः अन्यस्मात्स्वनुमानादेर्नावगम्यते किंतु प्रत्यक्षेणैवेत्यर्थः ३८ फलितमाह तथेति तथा सति स्वकीयस्य दुःखादेरनुभवगम्यत्वे सति स्वसुप्तौ स्वकी

स्वकीयसुखदुःखे तु नोहनीयेनतस्तयोः भावो वेद्योनुभूत्यैव तदभावोपि नान्यतः ३८
तथा सति स्वसुप्तौ च दुःखाभावोनुभूतितः विरोधिदुःखराहित्यात्सुखं निर्विघ्नमिष्यताम् ३९
महत्तरप्रयासेन मृदुशय्यादिसाधनम् कृतः संपाद्यते सुप्तौ सुखं चेत्तत्र नो भवेत् ४०

यसुषुप्तावपि विद्यमानो दुःखाभावोऽनुभवेनैव सिद्धः ततोपि किं तत्राह विरोधीति सुप्तौ सुखविरोधिनो दुःखस्याभावान्निर्विघ्नं बाधरहितं सुखमिष्यतामभ्युपेयताम् ३९ शय्यादिसुखसाधनसंपादनान्यथानुपपत्त्यापि सुप्तौ सुखमस्तीत्यवगम्यत इत्याह महदिति तत्र तस्यां सुप्तौ सुखं न भवेच्चेन्महत्तरप्रयासेन बहुवित्तव्ययशरीरपीडनादिना मृदुशय्यादिकशिपुमंचादिसाधनं कृतः कस्मात्कारणात्संपाद्यते न कृतोपीत्यर्थः ४०

पंचदशी

१०

ननुयत्रदुःखाभावस्तत्रसुखमित्यस्यव्याप्तेर्लोष्ठादाव्यभिचारइतिशंकते नदुःखेति दुःखाभावमात्रेणसु
न२ खंकल्पयितुंशक्यते लोष्ठशिलादिषुद्वयाभावस्यसुखदुःखयोरभावस्यदर्शनादित्यर्थः दृष्टांतदार्ष्टांतिक
योर्वैषम्यान्मैवमितिपरिहरति विषममिति वचोदृष्टांतवचनंविषमंदार्ष्टांतिकाननुसारीत्यर्थः ३६
दृष्टांतस्याननुकूलत्वमेवोपपादयति सुखेति अन्यनिष्ठयोर्दुःखसुखयोरूहनंयथाक्रमंसुखदैन्यवि

नदुःखाभावमात्रेणसुखंलोष्ठशिलादिषु द्वयाभावस्यदृष्टत्वादिति
चेद्विषमंवचः ३६ सुखदैन्यविकाशाभ्यांपरदुःखसुखोहनम्
दैन्याद्यभावतोलोष्ठेदुःखाद्यूहोनसंभवेत् ३७ ॥ श्रीः

काशाभ्यांलिंगाभ्यांकर्तव्यं अयंदुःखीविषण्णवदनत्वात्संप्रतिपन्नवत् अयंसुखीप्रसन्नवदनत्वात्संप्रतिप
न्नवदित्यर्थः भवत्वेवंलोकेप्रकृतेकिमायातमित्यतआह दैन्यादीति लोष्ठादौसुखदैन्यादिलिंगाभावाद्दुः
खसुखयोरूहनमेवनसंभवति अतस्तत्रदुःखाभावोपिननिश्चेतुंशक्यतइत्यर्थः ॥ ३७ ॥

१०

श्रीः

इत्थं प्रलयस्वरूपांतत्वेनोपाहृतायाः सुषुप्तेरद्वैतत्वं स्वप्रभत्वं च प्रसाध्य तत्र सुखप्रसाधनाय पूर्वं पठिता
माकांक्षामुत्थापयति स्तम्भद्वैतेति सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात्सुखमेव परिशिष्यत इत्याह
अशिवेति सुखदुःखयोः प्रकाशतमसोरिव परस्परविरोधित्वात् दुःखाभावे सुखमेवाभ्युपेयमिति भावः ३४

स्तम्भद्वैतस्वप्रभत्वे च सुषुप्तौ सुखं कथम् अशिवदुःखं तदा नास्ति ततस्ते
शिष्यते सुखम् ३४ अंधः सन्नप्यनंधः स्याद्विद्धोविद्धोपरोग्य
पि अरोगीति श्रुतिः प्राह तच्च सर्वजना विदुः ३५ ॥ श्रीः

सुषुप्तौ दुःखाभावे किं मानमित्याकांक्षायां श्रुत्यनुभवावित्याह अंध इति तस्माद्वा एतं सेतुं तीर्त्वांधः सन्न
नंधो भवति उपतापी सन्ननुपतापी भवति तद्यथापीदं भगवन् शरीरमंधं भवत्यनंधः स भवतीत्यादिश्रुति
र्देहाभिमानप्रयुक्तानंधत्वादीन्दोषान्सुषुप्तौ निवारयति व्याध्यादिना पीड्यमानस्यापि सुषुप्तौ तद्दुःखानुभवो
नास्तीत्येतत्सर्वजनप्रसिद्धं चेत्यर्थः ॥ ३५ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

नुमानमानात्परसुप्तिसिद्धिरिति शंकते निश्चेष्टेति विमतः परः सुप्तो भवितुमर्हति प्राणादिमत्वे सतिनिश्चेष्टत्वान्मद्वदिति अनुमानादित्यर्थः एवं तर्हि तव सुप्तेः स्वप्रकाशत्वं परिशिष्यत इत्याह सिद्धांती उदाहर्तुरिति तदा तर्हि मां प्रति स्वसुषुप्तिमुदाहर्तुर्दृष्टांतीकर्तुस्तेन तव सुप्तेः स्वप्रभत्वं स्वप्रकाशत्वं बलात्सुषुप्त्युदाहरणसामर्थ्यादेव भवेत् ३२ कथं बलात्भवतीत्याशंक्याह नेंद्रियाणीति सुप्तिग्राहकानींद्रियाणि

निश्चेष्टत्वात्परः सुप्तो यथाहमिति चेत्तदा उदाहर्तुः सुषुप्तेस्स्व
प्रभत्वं बलाद्भवेत् ३२ नेन्द्रियाणि न दृष्टांतस्तथाप्यंगीक
रोषि ताम् इदमेव स्वप्रभत्वं यज्ज्ञानं साधनं विना ३३ ॥

न संतीति तेषां स्वकारणे विलीनत्वात् दृष्टांतश्च संप्रतिपन्नो नास्ति परसुप्तेरप्रसिद्धत्वस्योक्तत्वात्तथापि तां सुप्तिमंगीकरोषि एवं च सति साधनैर्विना ज्ञानसाधनमंतरेणापि भानं प्रकाशनमिति यदिदमेव स्वप्रभत्वं सुषुप्त्या इत्यर्थः अत्रायं प्रयोगः विमता सुषुप्तिः स्वप्रकाशा असत्स्वपि ज्ञानसाधनेषु प्रकाशमानत्वात् सांख्याभिमतात्मवत्प्राभाकराभिमतसंवेदनवत् शाक्याभिमतस्यात्मवदित्यर्थः ३३ ॥ श्रीः ॥

प्रथमं पक्षं सोपहासं निराकरोति नानुभूतिरिति अद्वैतसिद्धिर्युक्त्यैवेति यदुक्तं तत्र अनुभूतिस्तावन्नाभ्युपपन्ने युक्तिस्तु दृष्टान्तप्रदर्शनमन्तरेण न किंचित्साधयति अतो न दृष्टान्त इत्युक्तिरयुक्तेति भावः द्वितीयविकल्पमुभयवादिसंप्रतिपन्नो दृष्टान्तो वक्तव्य इत्याह सदृष्टान्तेति २९ तर्हि दृष्टान्ते नाद्वैतं साधयामीति शंकते पूर्ववादि अद्वैत इति प्रलयो द्वैतरहितो भवितुमर्हति द्वैतानुपलब्धिमत्त्वात् यो यो द्वैतानुपलब्धिमान् स स द्वैतरहितः

नानुभूतिस्तु दृष्टान्त इति युक्तिस्तु न शोभते सदृष्टान्तत्वपक्षे तु दृष्टान्तं वद मे मतम् २९
अद्वैतः प्रलयो द्वैतानुपलम्भेन सुप्तिवत् इति चेत्सुप्तिरद्वैतेत्यत्र दृष्टान्तमीरय ३०
दृष्टान्तः परसुप्तिश्चेद्हो ते कौशलं महत् यः स्वसुप्तिं न वेत्त्यस्य परसुप्तौ नु का कथा ३१

यथास्वाप इति नन्वेवं साधयतस्तव स्वसुषुप्तिर्दृष्टान्तः परसुषुप्तिर्वा आद्ये तस्या परं प्रत्यसिद्धत्वेन तत्सिद्धये दृष्टान्तान्तरं वक्तव्यमित्याह ३० ननु तस्याः परसुप्तिरेव दृष्टान्त इति द्वितीयविकल्पमाशंकते दृष्टान्त इति परसुप्तेस्तवाप्रसिद्धत्वेनान्यथा दृष्टान्तीकरणमनुपपन्नमिति सोपहासमाह सिद्धान्ती अहो इति यो भवान्सुप्तेरनुभवगम्यत्वानंगीकारेण स्वसुप्तिमपि न वेत्ति अस्य तव परसुप्तौ का कथा परसुप्तिज्ञानं न भवतीति किमु वक्तव्यमिति भा

नमयाद्वैतमभ्युपगम्यते किंतु त्वदुक्तमद्वैतमनुघृह्यतेऽतोनोक्तसिद्धिरितिशंकते नाभ्युपैमीति विक
ल्पासहत्वादद्वैतानभ्युपगमोऽनुपपन्नः इतिमन्वानः पृच्छति २६ किंशब्दसूचितंविकल्पंदर्शयति कि
मद्वैतमिति तृतीयंपक्षंनिराकरोति नद्वितीयइति तत्रहेतुमाह अनुत्पत्तेरिति द्वैतस्यतदानीमनुत्पन्न

अप्रसिद्धइति द्वैताद्वैतविलक्षणस्यलोकेऽदर्शनादिति भावः द्वितीयंपक्षंनिराकरोति इतित्रुटिः १

नाभ्युपैम्यहमद्वैतंत्वद्वचोनुघृह्वणम् अभीतिश्चेत्तदाब्रूहिकिमासीद्द्वैततःपुरा २६
अद्वैतसिद्धिर्द्वैतेचेन्नानुभूतेपीतिचेद्वद निर्दृष्टांतासदृष्टांतावाकोट्यंतरमत्रनो २७
किमद्वैतमुतद्वैतमन्यावाकोटिरंतिमः अप्रसिद्धोनद्वितीयोनुत्पत्तेःशिष्यतेऽन्तिमः २८

त्वादितिभावः अतःप्रथमःपक्षःपरिशिष्यतइत्याह शिष्यतेइति २७ ननुकेनप्रकारेणाद्वैतंयुक्त्यैव
सिध्यति नचानुभवेनेतिचोदयति अद्वैतेति अद्वैतसिद्धिर्युक्त्यैवेत्युक्तेविकल्पासहत्वादनुपपन्नमितिम
न्वानोयुक्तिंविकल्पयतिसिद्धांती निर्दृष्टांतेति विकल्पस्यान्यतमंनिराकरोति कोटिरिति २८ ॥

वि

द्वैते सुखाभावमंगीकृत्याद्वैते तं आशंकते नन्विति तत्रानुपलब्धिं प्रमाप्रमाणयति अस्ति चेदिति अद्वैते यदि सुखं विद्येत तर्हि विषयसुखादिवदुपलभ्येत नोपलभ्यतेऽतो नास्तीत्यर्थः ननूपलभ्यत एवेत्याशंक्यमानं प्रत्याह तथेति अनुभवस्यानुभवित्रनुभाव्यसापेक्षत्वादद्वैतहानिरिति भावः २३ अद्वैतस्य सुखाधिकरणत्वनिषेधमंगीकरोति सिद्धांती मास्त्विति तत्र हेतुमाह किं तु सुखमद्वैतमिति हि यस्मात्कारणाद्

ननु द्वैते सुखं मा भूदद्वैते व्यस्ति नो सुखम् अस्ति चेदुपलभ्येत तथा च त्रिपुटी भवेत् २३
मास्त्वद्वैते सुखं किं तु सुखमद्वैतमेव हि किं मानमिति चेन्नास्ति मानाकांक्षा स्वयंप्रभे २४
स्वप्रभत्वे भवद्वाक्यं मानं यस्माद्भवानिदम् अद्वैतमभ्युपेत्यास्ति सुखं नास्तीति भाषते २५

द्वैतमेव सुखम् अतः सुखाधिकरणं न भवतीत्यर्थः अद्वैतं सुखमित्यत्र किं प्रमाणमित्याशंकानुवादपूर्वकं तस्य स्वप्रमाणप्रश्न एवानुपपन्न इति आह किं मानमिति २४ ननु स्वप्रकाशकत्वेऽपि किं प्रमाणमित्याशंक्यान्यदीयमेव वचनं प्रमाणमित्याह स्वप्रभेति तदुपपादयति यस्मादिति यतः कारणाद्भवता प्रमाणनैरपेक्ष्येणाद्वैतमभ्युपेत्य सुखमेवास्तीत्युक्तेऽतः स्वप्रभत्वमित्यर्थः ॥ २५ ॥ श्रीः ॥

ननु वेदशास्त्रविषयज्ञानस्य शोकनिवर्त्तकत्वेन प्रसिद्धस्य कथमतिशोकहेतुत्वमित्यत आह वेदाभ्यासीति तापत्रयेणाध्यात्मिकादिलक्षणेन शोकिता शोकोऽस्यास्तीति शोकी तस्य भावस्तत्ता आसीदित्यध्याहारः पश्चात्त्विति तुशब्दो विशेषद्योतनार्थः अभ्यासः पाठावर्त्तनं विस्मारः पठितस्य विस्मरणं भंगः स्वतोधिकेन तिरस्कारः गर्वोन्यदर्शनेन स्वाधिक्यबुद्धिः एतैश्च कारणैः शोकित्वं २० नन्वेवं सर्वज्ञस्यापि नारदस्यातिशोकित्वं जातमिति कुतोवगम्यत इत्याशंक्य सोहं भगवतः शोचामीति तदीयादेव वाक्यादवगतमि

वेदाभ्यासी पुरा तापत्रयमात्रेण शोकिता पश्चात्त्वभ्यासविस्मारभंगगर्वैश्च शोकिता २०
सोहं विद्वन्प्रशोचामि शोकपारं नयात्र माम् इत्युक्तः सुखमेवास्य पारमित्यभ्यधादृषिः २१
सुखं वैषयिकं शोकसहस्रेणावृतत्वतः दुःखमेवेति मत्वाह नाल्पेऽस्ति सुखमित्यसौ २२

त्यभिप्रेत्य तं मां भगवान् शोकस्य पारं तारयत्विति तन्निवृत्तिउपायेनेन पृष्टः सन् सनत्कुमारो भूमशब्दवाच्यं सुखरूपं ब्रह्मैवास्य परमं शोकनिवृत्त्युपाय इति सुखं त्वेव विजिज्ञासितव्यमित्यारभ्योत्तरग्रंथसंदर्भेणोक्तवानित्याह सोहमिति २१ ननु स्रगादिजन्येषु सुखेषु बहुषु सत्सु नाल्पे सुखमस्तीत्युक्तिः अनुपपन्नेति चेन्न तेषां दुःखानुषंगेन विषसंपृक्तान्नवद्दुःखरूपत्वस्य श्रुतिनाभिप्रेतत्वादित्याह सुखमिति २२

फलितमाह त्रयेति ज्ञात्रादित्रयाभावे निर्द्वैतः द्वैतरहितः पूर्ण एवात्मानुभूयते कुत्रानुभूयत इत्यत आह समाधीति विद्वदनुभवप्रदर्शनाय समाधिग्रहणं सर्वानुभवद्योतनाय सुषुप्तिमूर्छयोरुदाहरणं सुषुप्त्याद्युत्थितस्य द्वैतादर्शनस्मरणान्यथानुपपत्त्या निर्द्वैतत्वं तदनुभवितुः सिद्धिरिति भावः भवतु सुषुप्त्यादावद्वैतसिद्धिः प्रकृते किमायातमित्यत आह पूर्ण इति यथा सुषुप्त्यादौ परिच्छेदकाभावात् पूर्णस्तथा सृष्टेः पुरापि तदभावादित्यर्थः १७ अस्तु ब्रह्मणः पूर्णत्वम् आनन्दरूपत्वे किमायातमित्याशंक्यान्वयव्यतिरेकाभ्यां भूम्नः सुखरूपत्वप्रदर्शनपरं यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति वाक्यमर्थतोऽनुक्रामति यो भूमेति यः पूर्णो भूमा स

त्रयाभावे तु निर्द्वैतः पूर्ण एवानुभूयते समाधिसुप्तिमूर्छासु पूर्णः सृष्टेः पुरा तथा १७
यो भूमा तत्सुखं नाल्पे सुखं त्रैधाविभेदिनि सनत्कुमारः प्राहैवं नारदायातिशोकिने १८
सपुराणान्पञ्चवेदान्शास्त्राणि विविधानि च ज्ञात्वाप्यनात्मवित्त्वेन नारदोऽतिशुशोच हि १९

सुखरूप एव अद्वितीये दुःखहेतोरभावात् अल्पे परिच्छिन्ने तस्यैव विवरणं त्रैधाविभेदिनीति हेतुगर्भं विशेषणं सुखं तत्र न विद्यत इत्यर्थः एवं कस्मै केनाभिहितमित्यत आह सनत्कुमार इति नारदस्य शिष्यत्वे कारणमाह अतिशोकिन इति अतिशयितः अधिकः शोकोऽस्यास्तीत्यतिशोकी तस्मै १८ तस्यातिशोकित्वे हेतुमाह सपुराणानीति नारदः पुराणैः सह वर्तन्त इति सपुराणाः पञ्चवेदास्तान् विविधानि च शास्त्राणि विदित्वाप्यात्मज्ञानरहितत्वेनातिशयेन शोकं प्राप्तः १९ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

एवं तैत्तिरीयकश्रुतिपर्यालोचनया ब्रह्मण आनंदरूपत्वं प्रदर्श्य छांदोग्यश्रुतिपर्यालोचनयापि तां दिदर्शयिषुः सनत्कुमारनारदसंवादरूपे सप्तमाध्याये स्थितस्य भूमरूपब्रह्मप्रतिपादकस्य यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेत्यादिवाक्यस्यार्थं संक्षेपेणाह भूतोत्पत्तेरिति भूतानामाकाशादीनां तत्कार्याणां जरायुजांडजादीनां चोत्पत्तेः पूर्वं त्रिपुटीद्वैतवर्जनात् त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानां त्राकाराणां समाहारस्त्रिपुटी सैव द्वैतं तस्य वर्जनमभावः तस्माद्भूमा देशतः कालतो वस्तुतो वा परिच्छेदशू

भूतोत्पत्तेः पुरा भूमा त्रिपुटीद्वैतवर्जनात् ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो १५
विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः ज्ञेयाः शब्दादयो नैतत्त्रयमुत्पत्तितः पुरा १६

न्यः परमात्मा भावानयने द्रव्यानयनमिति न्यायाद्भूमैवासीदित्यध्याहारः तदेव द्वैतवर्जनमुपपादयति ज्ञातृज्ञानेति वक्ष्यमाणज्ञात्रादिरूपा त्रिपुटी प्रलयकाले नास्तीत्येतत्सर्वेषां संमतमिति हिशब्दप्रयोगानस्यायमभिप्रायः १५ इदानीं ज्ञात्रादिस्वरूपं दर्शयति विज्ञानमय इति परमात्मन उत्पन्नो बुद्ध्युपाधिको जीवो विज्ञानमयः ज्ञाता इदं त्रयं कार्यत्वादुत्पत्तेः पुरा ब्रह्मव्यतिरेकेण नास्तीत्यर्थः १६

१ मनोमयः मनसि प्रतिबिंबितं मनोमयशब्दवाच्यं चैतन्यं ज्ञानं शब्दस्पर्शादयो ज्ञेयाः प्रसिद्धाः इति त्रुटिः १

तत्रादौ तावत्तैत्तिरीयकश्रुतिपर्यालोचनेनैषामानंदरूपं ब्रह्मावगम्यत इत्यभिप्रायेण भृगुवल्ल्याऽर्थं संक्षेपेण दर्शयति भृगुरिति भृगुर्नामकः पुत्रः पितुर्वरुणात्स्याद्ब्रह्मलक्षणं यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मे[illegible]त्येवंरूपं श्रुत्वान्नमयादिकोशेषु तल्लक्षणासंभवेन तेषामब्रह्मत्वं निश्चित्यानंदं आनंदमयकोशे पुच्छावयवत्वेन ब्रह्म पुच्छं प्रतिष्ठेति श्रुतम् विवभूतमानंदं ब्रह्मलक्षणयोजनया ब्रह्मत्वेन ज्ञातवानित्यर्थः तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः

भृगुः पुत्रः पितुः श्रुत्वा वरुणाद्ब्रह्मलक्षणं अन्नप्राणमनोबुद्धिस्त्यक्त्वानंदं विजज्ञिवान् १३
आनंदादेव भूतानि जायंते तेन जीवनम् तेषां लयश्च तत्रातो ब्रह्मानंदो न संशयः १४

पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठेति श्रुतेः १३ कथमानंदे तल्लक्षणं योजितवानित्याशंक्य तद्योजनाप्रकारदर्शनपरं आनंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीति वाक्यमर्थतः पठति आनंदादिति स्वात्मधर्मनिमित्तकादानंदादेव भूतानि प्राणिनो जायंते उत्पद्यंते ते न विषयभोगादिनिमित्तकेनानंदेन जीवनं प्राप्नुवंति तेषां प्राणिनां लयश्च तत्र तस्मिन्सुषुप्तिकालीने स्वरूपभूते आनंद एव भवति सुषुप्तावानंदातिरेकेण कस्याप्यनुभवाभावादत आनंदो ब्रह्मैव सर्वानुभवसिद्धत्वान्नात्र संशयः कर्तव्यः इति भावः १४

नन्वियंत्येव वाक्यानि प्रमाणानि नेत्याह इत्यादिश्रुतय इति आदिशब्देन इह चेदवेदीदथ सत्यमस्ति न
चेदिहावेदीन्महती विनष्टिः य एतद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवापियंति तद्यो यो देवानां प्रत्यबुध्यत स
एव तदभवत् निचाय्य तं मृत्युमुखात्प्रमुच्यत इत्याद्याः श्रुतयो गृह्यंते सर्वभूतस्थमात्मानं सर्वभूतानि चात्म
नि संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति तत्रैवात्मविज्ञानाद्विमुक्तिः परमा मतेत्यादिपुरा

इत्यादिश्रुतयो बह्व्यः पुराणैः स्मृतिभिः सह ब्रह्मज्ञानेऽनर्थहानिमानंदं चाप्यघोषयन् ११
आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंद इत्यादौ ब्रह्मानंदो विविच्यते १२

णस्मृतिवचनैः सह प्रमाणानीत्यर्थः उदाहृतानां श्रुतिस्मृतिवाक्यानां सर्वेषां तात्पर्यमाह ब्रह्मज्ञान इति
ननु ब्रह्मानंद इत्यानंदस्य ब्रह्मपदेन विशेषणात् आनंदांतरमस्तीत्यवगम्यते स कतिविधः कीदृशश्चानंद
इत्याकांक्षायां तद्भेददर्शनपूर्वकम् ब्रह्मानंदविवेचनं प्रतिजानीते आनंद इति ब्रह्मानंदो विद्यानंदो विष
यानंद इत्यनेन प्रकारेणानंदस्य त्रैविध्यमवगंतव्यम् तत्रेतरयोरानंदयोर्ब्रह्मानंदमूलत्वादाद्यध्याय
त्रयेण ब्रह्मानंदो विभज्य प्रदर्श्यत इत्यर्थः १२ ॥ श्रीः ॥ श्रीः श्रीः ॥

ननु शोकतरणादिफलं श्रूयत एव तन्नात्मश्रवणे तानि नामधेयानि वृत्तावित्रपरिहारार्थं प्रत्युक्तिदर्शनादित्याशंक्याह तत्परोक्षस्तानिनो तद्भावप्रतिपादनपरमध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति कठश्रुतिवाक्यमर्थतः पठति देवमिति धीरो यदा ब्रह्मसाधनादिसंपन्नो देवं चिदानंदादिलक्षणं मत्वावगम्यात्रैवास्मिन्नेव जन्मनि हर्षशोकौ जहाति एतमेव तमेनं नैयाचिंताकर्माग्निसंभृतेत्युत्कार्ये विशेषप्रदर्शनपरं नैनं कृताकृते न तपत इति याज्ञवल्क्यवाक्यमर्थतः पठति नैनमिति पुण्यं सुकृतं पुण्यं दुष्कृतं च पापं तत्त्वविदस्ता

देवं मत्वा हर्षशोकौ जहात्यत्रैव धीरो यदा नैनं कृताकृ
ते पुण्यपापे तापयतः क्वचित् १० श्रीरामाय नमः

पहेतुर्न भवतीत्युक्तं इदंतु कृतमकृतं वा पुण्यं पापं वा तत्पापविधं तापकं न भवतीत्युच्यत इति विशेषः तथाहि तापानामचित्तविकाराविशेषः पुण्यं कृतं सद्धर्षलक्षणं विकारमुत्पादयति अकृतं विषादं पापं पुनः तद्वैपरीत्येनाकृतं हर्षमुत्पादयति कृतं विषादं तत्त्वविदस्तूभे अप्युभयविधविकारहेतुत्वेन कदाचिन्न तपतः अविक्रियब्रह्मरूपत्वस्यानादित्यभिप्रायः १० ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

स्य ४

ननु कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इत्यादिश्रुतेः कर्मणैव हि संसिद्धिमास्थिता जनकादयः यथान्नं मधु संयुक्तं मधु चान्नेन संयुतम् एवं तपश्च विद्या च संयुक्तं भेषजं महत् इत्यादिस्मृतेश्च केवलस्य ज्ञानसमुच्चितस्य वा कर्मणो मुक्तिहेतुत्वं स्यादित्याशंक्योदाहृतवाक्यस्य स्थूले पक्षाद्यस्य पापनिवृत्तिपरत्वात्संसिद्धिशब्देन च ज्ञानसाधनचित्तशुद्ध्यभिधानात् विद्याशब्देन चोपासनाया विवक्षितत्वान्न कर्मणो मुक्तिसाधनमित्यभिप्रायेण साधनान्तरनिषेधपरं तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्वेताश्वतरवा २

तमेव विद्वानतिमृत्युमेति पन्था न चेतरः ज्ञात्वा देवं पाशहानिः क्षीणैः क्लेशैर्न जन्मभाक्

क्यमर्थतः पठति तमेवेति तं पूर्वोक्तं परमात्मानं विद्वानेव मृत्युं संसारमत्येति अतिक्रामति इतरः समुच्चयरूपः केवलकर्मरूपो वा पन्था मार्गो मोक्षोपायो न च नैव विद्यते ननु दाहतापभृतिष्वन्वयव्यतिरेकाभ्यां मोहिका निवृ निवृत्तिरेव प्राधान्येनावभासते नामुष्मिकीत्याशंक्यामुष्मिकफलस्यापि वस्य भाविजन्मपूर्वकत्वात्तस्य संनिदानस्याभावप्रतिपादकं ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिरिति श्वेताश्वतरवाक्यमर्थतः पठति ज्ञात्वा इति देवं स्वप्रकाशं प्रत्यगभिन्नं ब्रह्म ज्ञात्वा परोक्षतयानुभूय स्थितस्य कामक्रोधादीनां सर्वेषां पाशानां हानिर्भवति तैः पाशशब्दाभिधेयैः रागादिभिः क्लेशैः क्षीणैर्नष्टैः भाविजन्महेतुकर्मारंभायोगा

ध्यतन्न प्राप्नोतीत्यर्थः

५

ननु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि इत्यादिशास्त्रसद्भावादनादौ संसारे बहुजन्मोपार्जितेषु पुण्यापुण्यफलदायेषु कर्मस्वसंख्यातेष्वप्रसिद्धत्वेनानन्ततयाऽनुसंधानायोग्येषु सत्सु कथं तद्विषया चिंता न भवेदित्याशंक्यासनिदानानां तेषां तत्त्वज्ञानेन विनाशितत्वान्न चिंताजनकत्वमित्यभिप्रायेण हृदयग्रंथ्यादिनिवृत्तिपरं मुंडकादिश्रुतिषु स्थितमाम्नायं पठति भिद्यते इति परावरे परमपि हिरण्यगर्भादिकं पदमवरं निकृष्टं यस्मात्तस्मिन्परात्मनि दृष्टे साक्षात्कारवतो हृदयस्य बुद्धेश्चिदात्मनश्चान्योन्याविवेकदृढसंश्लेषरूपा या ग्रंथिरन्योन्याध्यासो भिद्यते विदीर्यते

भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ८

विनश्यतीत्यर्थः सर्वसंशयाः आत्मा देहादिव्यतिरिक्तो न वा व्यतिरिक्तो कर्तृत्वादिधर्मयोगी न वा कर्तृत्वेपि तस्य ब्रह्मणो भेदेस्ति न वा अभेदेपि तत्त्वज्ञानं कर्मादिसहितं मुक्तिसाधनं केवलं चेत्यादयः छिद्यंते द्वैधीक्रियंते तत्त्वतः साक्षात्कृतस्य वस्तुनः संशयविपर्ययविषयत्वादर्शनादिति भावः कर्माणि संचितानि पुण्यापुण्यफललक्षणानि क्षीयंते स्वनिदानाज्ञानविनाशेन विनश्यंतीति ॥ ८ ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥ श्रीः

ननु तत्त्वविदः पापादेर्भयं नास्तीति एतत्कुतोऽवगम्यत इत्याशंक्य तत्र श्रुतिपाठकं एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति वाक्यमर्थतः पठति एतमिति कर्माग्निसंभृता पुण्यपापरूपकर्मैधाग्निः अकरणकरणाभ्यामग्निवत्संतापहेतुत्वात्तेन संभृता संपादिता एषा पुण्यं नाकरवं कस्मात्पापं कृतवान् इत्येवंरूपा चिंता एतमेव तत्त्वविदमेव न तपेत् न संतापयेत् नान्यमविद्वांसं स तु तत्पापचिंतया सदा तप्यत इत्यर्थः ५ पुण्यपापयोस्तापकत्वे हेतुप्रदर्शनपरं स य एवं विद्वानेते आत्मानं स्पृणुते उभे ह्येवैष ए

एतमेव तपेन्नैषा चिंता कर्माग्निसंभृता ५ एवं विद्वान्कर्मणी द्वे हित्वा
त्मानं स्मरेत्सदा कृते च कर्मणी स्वात्मरूपेणैवैष पश्यति ६ ॥

ते आत्मानं स्पृणुत इति वाक्यद्वयमर्थतः पठति एवमिति स यो यः कश्चिदात्मानमुक्तेन प्रकारेण सम्यग्ज्ञात्वायं पुरुषोऽयं ब्रह्मास्मीत्यादित्येवं स एवं स्पृणुते प्रीणयति सदा स्मरेदित्यर्थः यतः पुण्यपापयोर्मिथ्यात्वानुसंधानेन हानं कृतं अतः तद्विषया चिंतैव नास्ति कुतस्तन्निमित्तकः ताप इत्यभिप्रायः किंच एवं विद्वानेते पूर्वोक्ते उभे पुण्यपापरूपे कर्मणी देहेंद्रियादिप्रवृत्त्या जनिते स्वात्मरूपेणैवेदं सर्वं यदयमात्मेत्यादिवाक्योक्तप्रकारेण पश्यति जानातीत्यर्थः अतः स्वात्माभिन्नत्वादप्यतापकत्वमिति भावः ॥ ६ ॥ श्रीः ॥

नेददर्शिनां भयं भवतीत्यनेन दृष्टाकर्तुर्ब्रह्मात्मैकत्वज्ञानरहितानां वाय्वादीनां भयप्रदर्शनपरं भीषास्माद्वातः पवत इत्यादिमंत्रमर्थतः पठति वायुरिति वाय्वादयो जगन्नियामकत्वेन प्रसिद्धाः पंचाधिदेवताश्चातीतजन्मनि धर्ममिष्टापूर्तादिलक्षणं विज्ञानं तेनोपिशानपूर्वकमनुष्ठितवंतोपि अंतरं ब्रह्मण्यब्रह्मलक्षणो भेदं कृत्वाऽस्माद्ब्रह्मलक्षणोभीत्यास्मिन्वाय्वादिजन्मनि चरंति स्वस्वव्यापारेषु सततवर्त्तंते हिशब्देन भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिं

वायुः सूर्यो वह्निरिंद्रो मृत्युर्जन्मांतरेंतरम् कृत्वा धर्मं विज्ञानंत्तो ह्यस्मा
द्भीत्याचरंति हि ४ आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन ॥ ॰

द्रश्च वायुश्च मृत्युर्धावति पंचम इति कठश्रुतौ पूमेनोक्तं प्रसिद्धं दर्शयति ।४ ननु तरति शोकमात्मविदित्यादिषूदाहृतेषु ब्रह्मानंदज्ञानस्यानर्थनिवृत्तिहेतुत्वं स्पष्टं नावभासत इत्याशंक्य तथा प्रतिपरं वाक्यमुदाहरति आनंदमिति राहोः शिर इति भेदव्यपदेशश्चौपचारिकः ब्रह्मणः स्वरूपभूतमानंदं विद्वानपरोक्षतया जानन्पुरुषः कुतश्चन कस्मादपि ऐहिकभयहेतोर्व्याघ्रादेः पारलौकिकभयहेतोः पापादेर्वा न बिभेति भयं न प्राप्नोति ॥ ॰ ॥

पंचदशी
२

एवमन्वयमुखेनैवब्रह्मनिष्ठनिष्ठत्वप्रतिपादनपराणि वाक्यानि प्रदर्श्य अन्वयव्यतिरेकाभ्यां अनर्थनिवृत्ति
प्रदर्शनपरां यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति यदा ह्येवैष ए
तस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवतीति वाक्यद्वयं अर्थतोऽनुक्रामति प्रतिष्ठामिति अस्यायमर्थः यदा
यस्मिन्काले हीति विद्वत्प्रसिद्धिप्रदर्शनपरो निपातः एवेत्ययमेवानर्थनिवृत्त्युपायो नान्य इति नियमार्थः एष
मुमुक्षुरेतस्मिन्विद्वदनुभवगम्ये अदृश्ये इन्द्रियागोचरे अनात्म्ये अनात्मीये स्वरूपतया स्वकीयत्वरहिते अनिरु
क्ते निरुक्तं निर्वचनं शब्देनाभिधानं यत्र नास्ति तदनिरुक्तं तस्मिन् अनिलयने निलीयते तस्मिन्निति निलयनम अ ३

प्रतिष्ठां विन्दते स्वस्मिन्यदा स्यादथ सोऽभयः कुरुतेऽस्मिन्नन्तरं चेदथ तस्य भयं भवेत् ३

धारः स न विद्यते यस्य यस्मिन् स्वमहिम्नि स्थित इत्यर्थः अभयम् अद्वितीयं द्वितीयाद्वै भयं भवतीति श्रुतेर्भयशब्देना
त्र भयहेतुर्भेद इति लक्ष्यते न विद्यते भयं भेदो यथा न भवति तथा प्रतिष्ठां प्रकर्षेण संशयविपर्ययरहित्येन स्थि
तिः ब्रह्माहमस्मीत्येवंरूपावस्थानं प्रतिष्ठां विन्दते गुरूपसत्त्यादिना श्रवणादिकं कृत्वा लभते अथ तदानीमेव स एवंवि
द्वान् अभयं भयरहितं मोक्षाख्यं अद्वितीयं ब्रह्म गतः प्राप्तो भवति ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः यदा यस्मिन्नेव का
लेः एषः पूर्वोक्त एतस्मिन्नदृश्यत्वादिगुणके प्रत्यगभिन्ने ब्रह्मणि उदिति निपातोऽप्यर्थः अरमल्पमप्यं
तरं भेदं उपास्योपासकादिलक्षणं कुरुते पश्यति धातूनामव्ययानां चानेकार्थत्वात् अथ तदानीमेव तस्य भेददर्शिनो भयं संसारप्रयुक्तं दुःखं भवति

२
श्रीः

ब्रह्मज्ञानस्यानिष्टनिवृत्तीष्टप्राप्तिहेतुत्वे बहूनि श्रुतिस्मृतिवाक्यानि प्रमाणानि सन्तीति प्रदर्शयितुकामस्तावद्ब्रह्मविदाप्नोति परं श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयत्विति च वाक्यद्वयमर्थतः पठति ब्रह्मवेत्तीति ब्रह्मवित् परमुत्कृष्टमानन्दरूपं ब्रह्म प्राप्नोतीति आत्मवित् अहमशब्दवाच्यं देशकालवस्तुपरिच्छेदशून्यं आत्मानं वेत्तीत्यात्मवित् शोकं स्वसंस्पृष्टं शोचयतीति शोकस्तमोमूलः संसारस्तं तरतीत्यतिक्रामतीति नन्दृहत्तैत्तिरीयकश्रुतिवाक्ये ब्रह्मज्ञानस्य परप्राप्तिहेतुत्वावभासनेना

ब्रह्मवित्परमाप्नोति शोकं तरति चात्मवित् रसो ब्रह्म रसं लब्ध्वानन्दी भवति नान्यथा २

नंदप्राप्तिहेतुत्वेत्याशंक्याऽऽनंदप्राप्तिहेतुत्वप्रतिपादनपरं रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवतीति तदीयमेव वाक्यमर्थतः पठति रस इति सत्यं ज्ञानमनन्तं ब्रह्म तस्माद्वा एतस्मादात्मन आकाशः संभूत इति प्रकरणाद्धि ब्रह्मात्मशब्दाभ्यामभिहितो य आत्मा स रसः सारः आनन्दरूप इत्यर्थः रसमानन्दरूपं ब्रह्म लब्ध्वा ब्रह्माहमस्मीति ज्ञानेन प्राप्यानन्दी भवतीति अपरिच्छिन्ननिरतिशयसुखवान् भवति उक्तमर्थं व्यतिरेकप्रदर्शनेन द्रढयति नान्यथेति अन्यथा ब्रह्मैकज्ञानं विना यत्साधनान्तरानुष्ठानेन नानन्दी भवतीत्यर्थः ॥ २ ॥ श्रीः ॥

श्रीगुरवे नमः। नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ। ब्रह्मानंदाभिधं ग्रन्थं व्याकुर्वे बोधसिद्धये १ चिकीर्षितस्य ग्रन्थस्य निःप्रत्यूहपरिसमाप्तये परिपंथिकल्मषनिरसनायाऽभिमतदेवतातत्त्वानुसंधानलक्षणं मंगलमाचरन् श्रोतृप्रवृत्तिसिद्धये सप्रयोजनमभिधेयमाविःकुर्वन् ग्रन्थारंभं प्रतिजानीते ब्रह्मानंदमिति निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ये मंदास्तेऽनुकंप्यंते सविशेषनिरूपणैरिति सविशेषब्रह्मरूपाणां देवतानां तत्त्वस्य निर्विशेषब्रह्मरूपत्वाभिधानाद्ब्रह्मणश्चानंदो ब्रह्मेत्यादिश्रुतिभिरानंदरूपताभिधानात् ब्रह्मानंदमित्यानंदरूपस्य ब्रह्मणो वाचकशब्दप्रयोगेण यद्धि मनसा ध्यायति तद्वाचा वदतीति श्रुतिप्रोक्तन्यायेन ब्रह्मानुसंधानलक्षणं मंगलाचरणं सिद्धं ब्रह्मणश्च सर्ववेदांतप्रतिपाद्यत्वात्तत्प्रकरणरूपस्यास्य ग्रन्थस्यापि तदेव

ब्रह्मानंदं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखायते ॥ १ ॥

विषय इति प्रथमशब्दप्रयोगेण विषयश्च सूचितः ऐहिकेति एतद्ग्रन्थेनानिष्टनिवृत्तीष्टप्राप्तिरूपं प्रयोजनद्वयं मुख्यत एवोक्तं ब्रह्मानंदमिति ब्रह्म चासावानंदश्चेति वाच्यवाचकयोरभेदोपचारात् तत्प्रतिपादको ग्रन्थोऽपि ब्रह्मानंदस्तं प्रवक्ष्यामीति तस्मिन्प्रतिपाद्यप्रतिपादकरूपे ब्रह्मानंदे ज्ञातेऽवगते सति ऐहिकामुष्मिकानर्थव्रातं ऐहिकानां इहलोके भवानां देहपुत्रादिष्वहंममाभिमानप्रयुक्तानां आध्यात्मिकादितापानां आमुष्मिकानां अमुष्मिन्परलोके भवानां चैतेषामनर्थानां व्रातः समूहः तं अशेषतः निःशेषं यथा भवति तथा हित्वा परित्यज्य सुखायते सुखरूपे ब्रह्मैव भवति १

स्तो० –
३४५४

श्रीगणेशाय नमः शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये १ यस्य स्मरणमा
त्रेण विघ्नादूरं प्रयांति हि वंदेहं हरंतिवक्रं तं वांछितार्थप्रदायकं २ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ १
क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी ३ चिकीर्षितस्य ग्रंथस्य नि
प्युत्सूहपरिपूर्णाय परमात्मनि पदेनेष्टदेवतातत्त्वानुसंधानलक्षणं मंग
लमाचरन्नस्य ग्रंथस्य वेदांतप्रकरणत्वात्तदीयैरेव विषयादिभिस्तद्वत्ता १
सिद्धिं मनसि निधाय अध्यारोपापवादाभ्यां निष्प्रपं
चं प्रपंच्यत इति न्यायमनुसृत्य परमात्मन्यारोपित
स्य जगतः स्थितिप्रकारं सदृष्टांतं प्रतिजा
नीते   श्रीरामजी ० ११

स्वतइति परः परमात्मा स्वतः माया तत्कार्यरहितश्चिदित्युच्यते मायायोगादंतर्यामी अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति ४ ननु परमात्मनश्चित्रपटस्थानीयत्वे तदाश्रितानि चित्राणि वक्तव्यानीत्यत आह ब्रह्माद्याइति अत्र परमात्मनि उत्तमाधमभावेन वर्तमानं ब्रह्मादि

स्वतश्चिदंतर्यामीतु मायावी सूक्ष्मसृष्टितः सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते परः ४
ब्रह्माद्याः स्तंबपर्यंताः प्राणिनोऽत्र जडा अपि उत्तमाधमभावेन वर्तंते पटचित्रवत् ५
चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक्पृथक् चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः ६

स्तंबपर्यंतं चेतनात्मकं गिरिनद्यादिजडं तं च चित्रस्थानीयमित्यर्थः ब्रह्मादिजगतश्चित्रस्थानीयत्वे कारणं वक्तुं दृष्टांतमाह चित्रेति यथा चित्रे लिखितानां मनुष्यादिशरीराणामेव नानावर्णायेता वस्त्रविशेषा लिखंते ते चै शीताद्यनिवारकत्वाद्वस्त्राभासा एव ६ ॥ ॥

यथेति चित्रपटे यथा वक्ष्यमाणानामवस्थानां चतुष्टयं तथा एवं परमात्मन्यपि वक्ष्यमाणमवस्थाचतुष्टं ज्ञेयमिति १ किं तदित्याकांक्षायां दृष्टांतदार्ष्टांतिकयोरप्यवस्थाचतुष्टयं क्रमेणोपदिशति यथेति धौतो घट्टितो लांछितो रंजित इत्येवं प्रकाराश्चतस्रोऽवस्था यथा चित्रपटे उपलभ्यन्ते तथा परमात्मन्यपि चिदंतर्यामिसूत्रात्माविराट्चे

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं परमात्मनि विज्ञेयं तथावस्थाचतुष्टयं १
यथा धौतो घट्टितश्च लांछितो रंजितः पटः चिदंतर्यामी सूत्रात्मा विराट् चात्मा
तथेर्यते २ स्वतः शुभ्रोऽत्र धौतः स्याद्घट्टितोऽन्नविलेपनात् मष्याकारैर्लांछि
तः स्याद्रंजितो रंगपूरणात् ३

त्यवस्थाचतुष्टयं बोध्यमित्यर्थः २ दृष्टांतस्थितानामवस्थानां स्वरूपं क्रमेण व्युत्पादयति स्वत इति ऽत्र ऽप्रा वस्थासु मध्ये स्वतोऽद्यांतरसंबंधं विना शुभ्रो धौत इत्युच्यते ऽन्नेन लिप्तो घट्टितः मषीमयैराकारैर्युक्तो लांछितः यथायोग्यवर्णैः पूरितो रंजितः स्यात् ३ दार्ष्टांतिके व्युत्पादयति

केयं विद्या तल्लाभोपायश्च क इत्याकांक्षायां विद्यास्वरूपं तल्लाभोपायं च दर्शयति आत्माभासेति चिदाभासस्येत्यर्थः २१ विचाराल्लभ्यते विद्येत्युक्तं कस्य विचाराल्लभ्यते विद्येत्याशंक्याह सदेति ननु परमात्मा विचार्यतां मोक्षावस्थायां फलरूपेणावस्थानात् जीव

आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः इति बोधो भवेद्विद्या लभ्यतेसौ विचारणात् २१
सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः जीवभावजगद्भावबाधे स्वात्मैव शिष्यते २२
नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः २३

जगतोर्विचारः क्वोपयुज्यत इत्याशंक्य तयोरपवादेन परमात्मावशेषणाउपयुज्यत इत्याह जीवभावेति २२ ननु जीवभावजगद्भावबाधे स्वात्मैव शिष्यत इत्युक्तं विचारेण जीवजगतोर्बाधे तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्दस्य विवक्षितमर्थं विपक्षे दंडं चाह नाप्रतीतीति सुषुप्तिमूर्छादौ स्वत एव द्वैताप्रतीत्यभावात्तत्त्वज्ञानं विनापि मुक्तिः स्यादित्यर्थः ३

दार्ष्टांतिकमाह पृथगिति एवं परमात्मन्यारोपितानां देवादीनां शरीराणामेव जीवनामानश्चिदाभासाः प्रत्येकं कल्प्यं ते न पर्वतादी-
नां तेषां तत्र कल्पते कारणमाह बहुधेति अमी जीवा देवतिर्यङ्मनुष्यादिशरीरप्राप्त्या बहुधा संसरंति न परमात्मानस्य निर्वि-

पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनां कल्प्यंते जीवनामानो बहुधा संसरंत्यमी ७ ॥
वह्न्याभासस्थितान्यग्नेन्यहदाधारवह्नमान् वदंत्यज्ञास्तथा जीवसंसारं चिज्जं तं विदुः ८ ॥
चित्रस्थपर्वतादीनां वह्न्याभासो न लिख्यते सृष्टिस्थमृत्तिकादीनां चिदाभासस्तथा नहि ९ ॥
संसारः परमार्थोयं संलग्नः स्वात्मवस्तुनि इति भ्रांतिरविद्या स्याद्विद्ययैषा निवर्त्यते १० ॥ ॥

कारत्वादित्यभिप्रायः ७ ननु सर्वे वादिनो लौकिकाश्चात्मन एव संसार इति विदंति तत्र किं कारणमित्याशंक्याज्ञानमेव कारण-
मिति सदृष्टांतमाह वह्न्याभासेति ८ गिरिनद्यादीनां तु चिदाभासकल्पनाभावे दृष्टांतपुरःसरमाह चित्रस्थेति प्रयोजनाभा-
वादिति भावः ९ एवमात्मन्यारोपितस्य संसारस्य ज्ञाननिवर्त्यत्वमभिधायेतन्मूलभूतामविद्यामाह संसार इति १० ॥

चिदात्मनःपारमार्थिकमेकत्वंनिश्चित्यव्यवहारदशायांप्रतीयमानंचैतन्यभेदमुपदिशति कूटस्थइति एकस्याश्चितश्चातुर्विध्येदृष्टांतमाह घटाकाशेति १८ घटावछिन्नस्यघटाकाशस्यतदनवछिन्नस्यचमहाकाशप्रसिद्धत्वात्तौविहायाप्रसिद्धंजलाकाशंव्युत्पादयति

कूटस्थोब्रह्मजीवेशावित्येवंचिच्चतुर्विधा घटाकाशमहाकाशौजलाकाशाभ्र
खेयथा १८ घटावछिन्नखेनीरंयत्तत्रप्रतिविंवितः साभ्रनक्षत्रऽआकाशोज
लाकाशउदीर्यते १९ महाकाशस्यमध्येयन्मेघमंडलमिक्ष्यते प्रतिविंवतयात
त्रमेघाकाशोजलेस्थितः २०

ऽभ्राकाशेयदुदकंऽभ्रस्तितत्र

घटावछिन्नेतिजलेप्रतिविंवितोऽभ्रनक्षत्रसहितऽआकाशोजलाकाशइत्युच्यते १९ ऽभ्राकाशंव्युत्पादयति महाकाशस्येति तत्रमेघमंडलेयज्जलंतस्मिन्नित्यर्थः २०

स्वात्मैव शिष्यत इत्यनेनापि परमात्मनः सत्यत्वज्ञानमेव विवक्ष्यते न तदतिरिक्तजगद्विस्मृतिर्जीवन्मुक्त्याभावप्रसंगादित्याह
परमात्मेति २४ सदा विचारयेदित्युक्त्यादेहपातपर्यंतं विचारप्रसक्तौ सत्यां तस्यावधिमाह परोक्षाच्चापरोक्षेति विचारजन्या

परमात्मावशेषोपि तत्सत्यत्वविनिश्चयः नजगद्विस्मृतिर्नोचेज्जीवन्मुक्तिर्न
संभवेत् २४ परोक्षाचापरोक्षेति विद्याद्वेधाविचारजा तत्रापरोक्षविद्याप्तौ वि
चारोयंसमाप्यते २५ अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् अहं ब्रह्मेति चे
द्वेद साक्षात्कारः स उच्यते २६ तत्साक्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते येना
यं सर्वसंसारात्सद्य एव विमुच्यते २७

विद्यापरोक्षत्वापरोक्षत्वभेदेन द्वेधेत्युक्तं २५ तयोरुभयोः स्वरूपं क्रमेण दर्शयति अस्ति ब्रह्मेति २६ एवंविधात्मसा
क्षात्कारसाधारणकारणमात्मतत्त्वविवेचनं प्रतिजानीते तत्साक्षात्कारेति येन साक्षात्कारेण पुमान् सद्य एव विमु
च्यते तत्साक्षात्कारसिद्ध्यर्थमिति पूर्वेणान्वयः २७

एवं कूटस्थं व्युत्पाद्य जीवस्य कूटस्थे कल्पितबुद्धिप्रतिबिंबत्वेन तत्वेन तत्पक्षपातित्वात्तं व्युत्पादयति कूटस्थ इति तत्र जीवशब्दाभिधेयत्वे निमित्तमाह प्राणानामिति कूटस्थातिरिक्तजीवकल्पने प्रयोजनं कमित्याशंक्याविकारिणः कूटस्थस्य संसारासंभवात्तन्निर्वाहार्थमंगीकर्तव्य इत्याह संसारेणेति २३ ननु जीवातिरिक्तः कूटस्थोऽस्तीति चेत्किमिति

कूटवन्निर्विकारेण जीवः कूटस्थ उच्यते २२ कूटस्थे कल्पिता बुद्धिस्तत्र चि
त्प्रतिबिंबकः प्राणानां धारणाज्जीवः संसारेण स युज्यते २३ जलव्योम्ना
घटाकाशो यथा सर्वस्तिरोहितः तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते
२४

[illegible] इत्याशंक्य जीवेन तिरोहितत्वादिति सदृष्टांतमाह जलेति नन्वेवं तन्निरोधानं न क्वापि शास्त्रे प्रतिपादितमित्याशंक्य तस्यान्योन्याध्यासशब्देनाभिधानान्मैवमित्याह सोऽन्योन्याध्यास इति उच्यते भाष्यादिष्विति शेषः २४

ननु मेघे जलस्याप्रतीयमानत्वात्तत्र कथं प्रतिबिंबितज्ञानमित्याशंक्याह मेघांशेति मेघस्थमस्तु जलं सप्रत्यक्षे
णानुपलंभेपि वृष्टिलक्षणकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीत्यनुमीयते उदकत्वेनैव लिंगेन विम
तं जलमाकाशप्रतिबिंबवद्भवितुमर्हति जलत्वाद्घटगतजलवदित्यनुमानेन मेघांशरूपे जलेप्याकाशप्रतिबिंबसद्भावो

मेघांशरूपमुदकं तुषाराकारसंस्थितं तत्र खप्रतिबिंबोयं नी
रत्वादनुमीयते २१ अधिष्ठानतया देहद्वयावच्छिन्नचेतनः ।

वगम्यत इत्यर्थः २१ एवं दृष्टांतमुक्तमाकाशचतुष्टयं युक्त्या घटादीति केमथमोद्दिष्टं कूटस्थं युक्त्या दयति अधिष्ठानेति
पंचीकृतापंचीकृतभूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्याकल्पितस्याधारतया वर्तमानत्वेन ताभ्यामवच्छि
न्न आत्मा कूटस्थ इत्युच्यते तत्र कूटस्थशब्दप्रवृत्तिनिमित्तमाह कूटवदिति २ ॥ श्रीगणेशाय नमः ॥॥

पंचदशी॰ नन्वविद्यायास्तत्कृतावरणस्य च सद्भावे किं प्रमाणमित्याशंक्य लोकानुभव एवेत्याह अज्ञानीति विदुषा कूटस्थं किं जानासी-
तिपृष्टोऽज्ञानी तं न जानामीत्यज्ञानमनुभूय वक्ति अयमविद्यानुभवः न केवलमविद्यानुभवमेव वक्ति अपि तु नास्ति
६ न भाति कूटस्थ इति कूटस्थाभावाभाने चानुभूय वदति अयमावरणानुभवः अतः उभयत्रानुभवः प्रमाणमिति भावः ॥

अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यसे न भाति नास्ति कूटस्थ इति वक्ति वदत्यपि २७
स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः इत्यादितर्कजालानि स्वानुभू-
तिर्ग्रसत्यसौ २८ ॥

२७ ननु भवन्मते आत्मनः स्वप्रकाशत्वात्तस्मिन्नविद्या नोपपद्यते तेजस्तिमिरयोरिव विरुद्धस्वभावत्वेन तयोः संबंधा-
नुपपत्तेरविद्याभावे च तत्कृतमावरणं दुर्निरूप्यं स्यात्तदभावे च तन्मूलकस्य विक्षेपस्यासंभवः विक्षेपाभावे च संसा-
नि[illegible]स्यानर्थस्याभावात् ज्ञानवैयर्थ्यं ततः स्यात्तिपादकं शास्त्रमप्रमाणं स्यादित्याशंक्यैतत्सर्वं पूर्वोक्तानुभवबाधित- राम
मित्याह स्वप्रकाश इति नहि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः २८ ६

नन्वागतेऽध्यासम्भवस्य कारणस्याविद्यावज्ञध्येत्याशंक्य जीवकूटस्थयोः संसारदशायां भेदाप्रतीतिरेवाविद्येत्याह

अयं जीवो न कूटस्थं विविनक्ति कदाचन अनादिरविवेकोयं मूला
विद्येति गम्यतां २५ विक्षेपावृत्तिरूपाभ्यां द्विधाऽविद्या व्यवस्थिता न
भाति नास्ति कूटस्थ इत्यापादनमावृतिः २६

अयमिति २५ पूर्वोक्तस्य जीवस्याविद्याकल्पितत्वस्य स्पष्टीकरणाय अविद्यां विभजते विक्षेपेति तत्वेनाभ्यर्हितत्वादावृतिं प्रथमं लक्षयति नभातीति कूटस्थो न भाति न प्रकाशते नास्ति चेति व्यवहारहेतुरावरणमित्यर्थः २६

अविद्यावरणसाधकश्चैतन्यस्यैव तद्विरोधित्वेऽविद्याप्रतीतिर्न स्यादिति भावः तर्हि विद्यायाः को विरोधीत्यत आह विवेकेति विवेकोपनिषद्विचारजन्यं ज्ञानं विवेकस्याविद्याविरोधित्वं कुत्र दृष्टमित्यत आह तत्त्वज्ञानिनीति ३२ एवमविद्यावरणं दर्शयित्वा विक्षेपाध्यासमाह अविद्येति पूर्वोक्ताविद्यावरणवति कूटस्थे प्रत्यगात्मन्यारोपित स्यात् सूक्ष्म

विवेकस्तु विरोध्यस्यास्तत्त्वज्ञानिनि दृश्यते ३२ अविद्यावृतकूटस्थे देहद्वय-
युता चितिः शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि ३३ इदमंशस्य सत्यत्वं
शुक्तिगं रूप्य ईक्ष्यते स्वयंत्वं वस्तुतां चैव विक्षेपे वीक्ष्यतेऽन्यगं ३४ ॥॥॥

शरीरसहितश्चिदाभासो विक्षेपाध्यास इत्यर्थः ३३ अस्य विक्षेपस्याध्यासत्वसिद्धये शुक्तिरजताध्याससाम्यं दर्शयति इदमंशस्येति शुक्तिकायां स्थितं पुरोदेशादिसंबंधित्वमबाध्यत्वं च यथाऽरोपिते रजतेऽवभासते एवं स्वयंत्ववस्तुत्वं च कूटस्थनिष्ठमारोपिते चिदाभासेऽवभास्यते इत्यर्थः ३४ ॥ ॥ ॥ ॥

नन्वनुभवस्य तर्कविरोधेनाभासत्वान्न तेन तत्त्वनिश्चय इत्याशंक्यानुभवप्रामाण्याभ्युपगमे केवलतर्कस्यानिश्चायकत्वं स्पष्टेनैवाभ्युपगतत्वान्न तार्किकस्य तत्त्वनिश्चयः क्वापि स्यादित्याह स्वानुभूताविति २९ ननु अनुभववत्तत्त्वनिश्चायकत्वं तर्कस्याप्य

स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् २९
बुद्ध्यारोहाय तर्कश्चेदपेक्ष्येत तथा सति स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यतां ३० ८५
स्वानुभूतिरविद्यायां मायायां च प्रदर्शिता अतः कूटस्थचैतन्यमविरोधीति तर्क्यतां ३१
तच्चेद्विरोधि केनेयमावृतिर्ह्यनुभूयतां

नुभूयमानस्यार्थस्यासंभावितत्वज्ञानाय तर्कोऽभ्युपेतव्य इत्याशंक्य काममस्तु तर्ह्यनुभवानुसारेणैव तर्को वर्णनीयो न तद्विरोधेनेत्याह बुद्ध्यारोहायेति ३० कोऽसावनुभवो यदनुसारेण तर्को वर्णनीय इत्याशंक्यायं पूर्वोक्तमविद्यादिगोचरमनुभवं स्मारयति स्वानुभूतिरिति फलितमाह अत इति ३१ तमेव तर्कमभिनयाय दर्शयति तच्चेदिति ८८ ८८८

ननुस्वयमहंशब्दयोरेकार्थत्वात्कथं दृष्टान्तदार्ष्टान्तिकयोः साम्यमित्याशंक्येदंरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वस्योभयत्र साम्यान्नैवमित्याह इदंत्वरूप्यते इति तेन स्वयमहंशब्दयोर्नैकार्थत्वमित्यर्थः ३८ स्वयंशब्दार्थस्य सामान्यरूपत्वं स्पष्टीकर्तुं लौकिकप्रयोगं तावद्दर्शयति देवदत्त इति ३९ भवत्वेवं प्रयोगः लोकेक

इदंत्वरूप्यतेभिन्नेस्वत्वाहंतेतथेष्यतां सामान्यंचविशेषश्चह्युभयत्रापिगम्यते ३८
देवदत्तःस्वयंगच्छेत्त्वंवीक्षस्वस्वयंतथा अहंस्वयंनशक्नोमीत्येवंलोकेप्रयुज्यते ३९
इदंरूप्यमिदंवस्त्रमितियद्वदिदंतथा असौत्वमहमित्येषस्वयमित्यभिगम्यते ४०
अहंत्वाद्भिद्यतांस्वत्वंकूटस्थेतेनकिंतव स्वयंशब्दार्थएवैषकूटस्थइतिमेभवेत् ४१

थमेतावतास्वयंशब्दार्थसामान्यरूपत्वमित्याशंक्येदंशब्दार्थवदित्याह इदंरूप्यमिति यथारूप्यवस्त्रादौसर्वत्रेदंशब्दस्यप्रयुज्यमानत्वात्तदर्थस्यसामान्यरूपत्वंतथासौत्वमहमित्यादौसर्वत्रस्वयंशब्दप्रयोगात्तदर्थस्यापिसामान्यरूपत्वमवगम्यतेत्यर्थः ४० भवतुस्वयमहंशब्दयोर्लोकेभेदस्तावताकूटस्थात्मनिकिमायातमितिपृच्छति अहंत्वादिति॥ सामान्यरूपःस्वयंशब्दार्थएवकूटस्थइतीदमायातमित्याह स्वयंशब्दार्थेति ४१ ॥ ॥ ॥

एवं सामा॰ ऽप्रतीतिमुभयत्र प्रदर्श्य विविशेषांशाप्रतीतिसाम्यं दर्शयति नीलेति साम्यान्तरं दर्शयति ३५ आरोपित
स्येति द्वाभ्यां तत्र शुक्तिस्थले आरोपितपदार्थस्य रूप्यं नाम रूप्यमिति नाम यथा एवं कूटस्थे कल्पितचिदाभासरूपविक्षेपस्य पूर्वोक्तः

नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितं असंगानंदताद्येवं कूटस्थे
पि तिरोहितं ३५ आरोपितस्य दृष्टांते रूप्यं नाम यथा तथा कूटस्थाध्यस्त
विक्षेपनामाहमिति निश्चयः ३६ इदमंशं स्वतः पश्यन् रूप्यमित्यभि
मन्यते तथा स्वं च स्वतः पश्यन्नहमित्यभिमन्यते ३७ ८। ८।।।

स्याहमिति नामेत्यर्थः ३६ ननु दृष्टांते पुरोवर्तिनि शुक्तिशकले इंद्रियसन्निकर्षे जाते सति रूप्यमिदमिति तदतिरि
क्तरजताभिमान उपपद्यते नैवं दार्ष्टांतिके आत्मातिरिक्तवस्त्वभिमान इत्याशंक्यापि स्वप्रकाशतया स्वविदा
त्मन्यवभासमाने तदतिरिक्तोऽहमित्यभिमान उपलभ्यते अतो न वैषम्यमित्यभिप्रायेणाह इदमंशमिति ३७ ८।।

नन्वघटादिष्वप्यात्मचैतन्यस्य सत्त्वे चेतनाचेतनविभागो निर्निमित्तकः स्यादित्याशंक्य चेतनाचेतनविभागस्य चिदाभाससत्त्वासत्त्वलक्षणकारणसद्भावान्मैवमिति परिहरति चेतनेति ८५ ननु चेतनाचेतनविभागस्य चिदाभाससत्त्वासत्त्वप्रयुक्तत्वाभ्युपगमेऽचेतनेष्वात्मसत्त्वाभ्युपगमो निष्प्रयोजनः स्यादित्याशंक्य चेतनाचेतनविभागहेतुत्वे

चेतनाचेतनभिदा कूटस्थात्मकृता नहि किंतु बुद्धिकृताऽभासकृतैवेत्यवगम्यतां
८५ यथा चेतनऽआभासः कूटस्थे भ्रांतिकल्पितः अचेतनो घटादिश्च तथा तत्रैव कल्पि
तः ८६ तत्तेदंतेपि स्वत्वमिव त्वंमहमादिषु सर्वत्रानुगते तेन तयोरप्यात्मतेति
चेत् ८७

कूटस्थस्यानभ्युपगमत्वेऽप्यचेतनकल्पनाधिष्ठानत्वेन कूटस्थोऽभ्युपगंतव्य इत्यभिप्रायेण घटादेस्तत्र कल्पितत्वं दृष्टांतमाह यथा चेतन इति ८६ सत्त्वात्मत्वयोरेकत्वेऽतिप्रसंगं शंकते तत्तेदंतेपीति त्वमहमादिषु सर्वेष्वनुगतस्य स्वत्वस्येव सर्वत्रानुगतयोस्तत्तेदंतयोरप्यात्मस्वरूपता किं न स्यादिति भावः ८७ ८८ ८८।

ग
८

ननु स्वत्वरूपो धर्मोऽन्यत्वं निवारयति न कूटस्थं बोधयतीति शंक्यते अन्यत्ववारकमिति स्वयंशब्दार्थस्य कूटस्थस्यै
वात्मत्वात्स्वत्वेनान्यवारणमिष्टमेवेति परिहरति अन्यवारणं कूटस्थस्येति ४२ ननु स्वयमात्मशब्दयोर्भिन्नप्रवृ
त्तियोर्गवाश्वादिशब्दयोरिवैकार्थ्याभावात्कथं स्वयंशब्दार्थस्य कूटस्थस्यात्मत्वमित्याशंक्य हस्तकरादिशब्दवदे

अन्यत्ववारकं स्वत्वमिति चेदन्यवारणं कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत्
४२ स्वयमात्मेति पर्यायौ तेन लोके तयोः सह प्रयोगो नास्त्यतः स्वत्वमात्मत्वं चान्यवा
रकं ४३ घटः स्वयं न जानातीत्येवं स्वत्वं घटादिषु अचेतनेषु दृष्टं चे दृश्यतामात्मसत्वतः
~~चेतिचेत्तं ४४~~ ४४

कार्थत्वोपपत्तेर्नैवमिति परिहरति स्वयमात्मेतीति पर्यायत्वे सहप्रयोगाभावे हेतुमाह तेन लोकेति फलितमाह
स्वत्वमिति ४३ ननु घटादिष्वचेतनेष्वपि स्वयंशब्दप्रयोगदर्शनात्स्वयंत्वात्मत्वयोरेकत्वं न घटत इति शंकते
घटेति घटादिष्वपि स्फुरणस्वरूपेणात्मचैतन्यस्य सत्वात्तेष्वपि स्वयंशब्दप्रयोगो न विरुध्यत इत्याह दृश्यतामिति ४४

भवत्वेवं लोके प्रसक्ते किमायातमित्यत आह अन्यतायाऽइति अन्यत्वप्रतियोगि स्वयंशब्दार्थे कूटस्थत्वं त्वंताप्रतियोग्यहंशब्दार्थश्चिदाभासः कूटस्थे कल्पितइत्यर्थः ५० ननूक्तप्रकारेण जीवकूटस्थयोर्भेदसत्त्वेपि सर्वेऽस्यं किमिति न जानंतीत्याशंक्याह अहंतेति बुद्धिसाक्षिणः कूटस्थस्य बुद्ध्या प्रत्यक्षीकर्त्तुमशक्यत्वादहं स्वयमिति प्र

अन्यतायाः प्रतिद्वंद्वी स्वयं कूटस्थ इष्यतां त्वंतायाः प्रतियोग्येषोऽहमित्या
त्मनि कल्पितः ५० अहंतास्वत्वयोर्भेदे रूपतोऽन्येदंतयोरिव स्पष्टेपि मोहमा
पन्ना एकत्वं प्रतिपेदिरे ५१ तादात्म्याध्यास एवात्र पूर्वोक्ताविद्यया कृतः अ
विद्यायां निवृत्तायां तत्कार्यं विनिवर्त्तते ५२

तिभासमानयोर्जीवकूटस्थयोर्भिन्नयोरेकत्वं प्रतिपन्ना इत्यर्थः ५१ नन्वनयोर्जीवकूटस्थयोरेकत्वभ्रमस्य किं कारणमित्यपेक्षायामाह तादात्म्येति अत्रास्मिन्ग्रंथेऽनादिरविवेकोयमित्युक्तयाऽविद्ययेत्यर्थः यतोऽविद्याकार्यत्वमस्यातोऽविद्यानिवर्त्तकज्ञानेनैव तन्निवृत्तिरित्याह अविद्यायामिति ५२ ५२ ॥ ॥ ॥ ॥ ५.५

तदेतयोरात्मत्वाधिकरणवृत्तित्वादात्मत्वं न संभवतीत्याह तेऽप्यात्मत्वेऽपीति तन्नेदं ते स्वत्वमिवव्यधिपित्वमस्मादिष्वनुग
ते त। [illegible]गितेष्वनुवर्त्तमानेऽप्यात्मत्वेऽप्यनुगते तदात्मत्वमिदमात्मत्वमित्यादिव्यवहारसंभवादतस्तयोरात्मत्वाधिकरणवृत्तित्वादा
त्मत्वस्वरूपता न संभाव्यते तत्र दृष्टान्तः सम्यक्त्वादेरिति आत्मत्वं सम्यगात्मत्वं असम्यगिति व्यवहारवशादात्मत्वेऽप्यनुवर्त्तमा

तं

तेऽप्यात्मत्वेऽप्यनुगते तन्नेदं तेनत्तयोः आत्मत्वं नैव संभाव्यं सम्यक्त्वा
देर्यथा तथा ४८ तन्नेदं ते स्वतान्यत्वे त्वंताहंते परस्परं प्रतिद्वंद्वितया
लोके प्रसिद्धे नास्ति संशयः ४९

नयोः सम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः ४८ एवं प्रासंगिकं परिसमाप्य फलितप्रदर्शनाय लोकव्यवहारसिद्धमर्थमनुवद
ति तन्नेदं ते इति तत्राप्रतियोगित्वमिदंतायास्तदिदमिति स्वत्वप्रतियोगित्वमन्यत्वस्य स्वयमन्य इति त्वंताप्रतियोगित्वम
हंतायास्त्वमहमिति लोके प्रसिद्धं प्रतिद्वंद्वित्वेन प्रयोगदर्शनाव्यसिद्धमिति भावः ४९ ॥ ॥ ॥

ननु ज्ञानिभिः कार्यस्य क्षणमात्रमवस्थानमंगीकृतं तेन चिरकालमित्याशंक्याह तन्तूनामिति संसारस्यानादिकालमारभ्यानु वृत्तत्वात्तत्संस्कारवशेन कुलालचक्रभ्रमवच्चिरकालानुवृत्तिर्न विरुध्यत इति भावः ५५ ननु ज्ञानि कैर्ययाऽयुक्तम

तंतूनां दिनसंख्यानां तैस्तादृक्क्षण ईरितः भ्रमस्यासंख्यकालस्य योग्यः क्षण
इहेष्यतां ५५ विनाक्षोदक्षमं मानं तैर्वृथा परिकल्प्यते श्रुतियुक्त्यनुभूतिभ्यो वद
तां किंनु दुःशकं ५६

भिहितं तदुक्तवतापीत्याशंक्य स्वोक्तो ततो वैषम्यं दर्शयति विनेति क्षोदक्षमं विचारसहं मानं विना प्रमाणमंतरे णेत्यर्थः ५६ तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति श्रुति ऋभ्वमादिदृष्टांतो युक्तिः स्वानुभूतिर्विद्वदनुभवः एतेभ्यः प्रमाणेभ्यः किं वक्तुमशक्यमित्यभिप्रायः प्रकृतमनुसरति ,, ,, ॥

नन्वध्यासस्याविद्याकार्यत्वात्तन्निवृत्त्या निवृत्तिरित्येतदनुपपन्नं ब्रह्मात्मैकत्वविद्यायामुत्पन्नायामप्यविद्याकार्यस्य देहादे
रु[illegible]वद्भासमानत्वादित्यत आह अविद्यावृतीति अविद्यैककार्ययोरावृत्तितादात्म्ययोर्विद्ययैव विनिवृत्तिः कर्मसहितोऽ

अविद्यावृत्तितादात्म्ये विद्ययैव विनश्यतः विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ५३

उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्षते इत्याहुस्तार्किकास्तद्वदस्माकं किं न संभवेत ५४

विद्याजन्यस्य तु विक्षेपस्वरूपस्य कर्मावसानपर्यन्तमवस्थानमित्यविरोध इति भावः ५३ ननु प्रारब्धकर्मणो निमित्त
मात्रत्वात्तस्य भावमात्रेणोपादाने विनष्टेऽपि कथं कार्यानुवृत्तिरित्याशङ्क्य शास्त्रान्तरसिद्धदृष्टान्तेन तदनुवृत्तिं संभावयति
" उपादान इति ५४ ५

प्रत्यक्षैकप्रमाणवादिनोपि परव्यामोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमुदाहरन्तीत्याह श्रौतीकृत्येति कोश
मन्नमयमिति शब्देनान्नमयकोशप्रतिपादकं स वा एष पुरुषोऽन्नरसमयः इत्यादिवाक्यं लक्ष्यते विरोचनस्य सिद्धान्तमिति

श्रौतीकृत्य स्वपक्षं ते कोशमन्नमयं तथा विरोच
नस्य सिद्धान्तं प्रमाणं प्रतिजज्ञिरे ६२ जीवात्मनिर्ग
मे देहमरणस्यात्र दर्शनात् देहातिरिक्त एवात्मेत्या
हुर्लौकायतिकाः परे ६२ ॥ श्रीकृष्णाय नमः ॥ ॥

तत्सिद्धान्तप्रतिपादकमात्मैव ब्रह्म मन्नमय इत्यादिवाक्यं लक्ष्यते एतद्वाक्यद्वयं प्रमाणत्वेन प्रतिजानन्त एव न तु प
पौरिवि[illegible]भाः प्रकरणविरोधादिति भावः ६२ अस्मिन्मते दोषप्रदर्शनपुरःसरं मतान्तरमुत्थापयति जीवात्मेति
६२ कीदृशो देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यत इत्याकांक्षायामाह ॥ ॥ ॥ ॥

आस्तामिति स्वयमहंशब्दार्थयोः कूटस्थपरिणामिनोरेकत्वं भ्रांत्या सिद्धं ५७ ननु कूटस्थजीवयोरेकत्वं भ्रांतिसिद्धं चेदिदं भ्रांतिरिति केपि कुतो न जानंतीत्याशंक्य श्रुतितात्पर्यपर्यालोचनस्याल्पत्वादित्याह भ्राम्यंत इति ५८ ननु श्रुत्यर्थप्रवक्तारोपि

आस्तां दुस्तार्किकैः साकं विवादः प्रकृतं ब्रुवे स्वाहमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ५७
भ्राम्यंते पंडितंमन्याः सर्वे लौकिकतैर्थिकाः अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्तिमाश्रिताः ५८
पूर्वापरपरामर्शविकलास्तत्र केचन वाक्याभासान्स्वस्वपक्षे योजयंत्यप्यलज्जया ५९ कू-
टस्थादिशरीरांतसंघातस्यात्मतां जगुः लोकायताः पामराश्च प्रत्यक्षाभाससमाश्रिताः ६० श्री

केचिदित्थं कुतो न जानंतीत्याशंक्य तेषां साकल्येन श्रुत्यर्थपर्यालोचनाभावादित्याह पूर्वापरेति ५९ तत्र तावत्प्रत्यक्षैकप्रमाणाभ्युपगमेनातिस्थूलत्वाल्लोकायतादिपक्षं प्रथमतोनुभाषते कूटस्थादीति प्रत्यक्षसिद्धत्वेन देहादेरात्मत्वं पारमार्थिकं स्यादित्याशंक्योक्तं प्रत्याक्षाभासमिति ६० ० ० ० ० ०९

प्राणेति प्राणस्तथा तस्मिन्सुप्ते जागर्तीत्यादिना प्राणजागरणं श्रुतं तत्प्राणोपूर्यत्न उदत्ति ९ तदुक्थममभवत्तदेतदुक्थमिति प्राणस्य श्रैष्ठ्यादिकं श्रूयते अन्योंतर आत्मा प्राणमय इत्यादिना प्राणमयकोशः प्रपंचितः आदिशब्देन

प्राणो जागर्ति सुप्तेपि प्राणश्रैष्ठ्यादिकं श्रुतं कोशः प्राणमयः सम्यक् विस्तरेण प्रपंचितः
६६ मन आत्मेति मन्यंत उपासनपरा जनाः प्राणस्याभोक्तृता स्पष्टा भोक्तृत्वं मनसस्ततः
६७ मन एव मनुष्याणां कारणं बंधमोक्षयोः श्रुतो मनोमयः कोशस्तेनात्मेतीरितं म
नः ६८

प्राणसंवादप्रवेशादिकं गृह्यते ६६ प्राणादन्यांतरस्य मनस आत्मत्ववादिनो मतं दर्शयति मन आत्मेतीति प्राणस्यानात्मत्वे युक्तिमाह प्राणस्येति ६७ मनस आत्मत्वे युक्तिप्रतिपादिकां श्रुतिमाह मन एवेति तस्माद्वा एतस्मात्प्राणमयादन्योंतर आत्मा मनोमय इति श्रुत्यंतरं दर्शयति श्रुतादिति फलितमाह तेनेति ६८

प्रत्य[illegible]नेति अहंबधिरोऽहंपश्यामीत्यादिप्रयोगदर्शनाद्देहातिरिक्ताहंबुद्धिगम्यानींद्रियाण्यात्मेत्यर्थः ६३ नन्विंद्रियाणामचेतनानां कथमात्मत्वमित्याशंक्य श्रुतिष्विंद्रियसंवादश्रवणाच्चैतन्यत्वमसिद्धमित्याह वागादी

“प्रत्यक्षत्वेनाभिमताऽहंधीर्देहातिरेकिणं
“गमयेदिंद्रियात्मानं वच्मीत्यादिप्रयोगतः ६३ वागादीनामिंद्रियाणां कलहःश्रुतिषुश्रु
तः तेन चैतन्यमेतेषामात्मत्वं तत एव हि ६४ है[illegible]र्भाः प्राणात्मवादिनस्त्वेवमूचि
रे चक्षुराद्यक्षलोपेपि प्राणसत्वेन जीवति ६५

नामिति चेतनस्यैवात्मलक्षणत्वाच्चेतनानामिंद्रियाणामात्मत्वमुचितमित्याह आत्मत्वमिति ६४ मतांतरमुत्थापयति हैरण्यगर्भा इति ६५ प्राणस्यात्मत्वे श्रौतलिंगानीति दर्शयति “ “ “

विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह विज्ञानमयेति तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयः विज्ञानं यज्ञं तनुते कर्माणि तनुते इत्यादिवाक्यं विज्ञानस्यात्मत्वं प्रतिपादकमिति भावः ७३ बौद्धावान्तरभेदस्य शून्यवादिनो मतं दर्शयति विज्ञानमिति ७४ तत्र श्रुतिमाह असदेवेदमिति शून्यस्यैव तद्रूपत्वे प्रतीयमानस्य जगतः इत्यत आह ज्ञानेति ७५

विज्ञानमयकोशोऽयं जीव इत्यागमा जगुः सर्वसंसार एतस्य जन्मनाशसुखादिकः ७३
विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत् अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः
७४ असदेवेदमित्यादाविदमेव श्रुतं ततः ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रान्तिप्रकल्पितं ७५
निरधिष्ठानविभ्रान्तेरभावादात्मनोऽस्तिता शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते ७६

तदेतन्मतं दूषयति निरधिष्ठानेति निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्रमस्यानुपपत्तेर्जगत्कल्पनाधिष्ठानस्यात्मनः सत्ताभ्युपगन्तव्या किंच शून्यवादिनोऽपि शून्यसाक्षित्वेनावश्यमात्माभ्युपगन्तव्यः अन्यथा तस्यानभ्युपगमे शून्यस्योक्तिः शून्यमित्यभिमानं ते बौद्धस्य ते तव मतेन न सिद्ध्येदिति भावः ७६ ॥ श्रीराधाकृष्णायनमः॥

मनसोणंतरस्यविज्ञानस्यात्मवादिनोबौद्धस्यमतंदर्शयति विज्ञानमिति विज्ञानस्यांतरत्वेयुक्तिमाह यतेति ६९ विज्ञानमनःशब्दवाच्यस्यांतःकरणस्यैकत्वात्कथंमनोविज्ञानयोःकार्यकारणभावइत्याशंक्य तमुपपादयितुंतयोर्भेदंना

विज्ञानमात्मेत्यपरआहुःक्षणिकवादिनः यतोविज्ञानमूलत्वंमनसोगम्यतेस्फुटं ६९
अहंवृत्तिरिदंवृत्तिरित्यंतःकरणंद्विधा विज्ञानंस्यादहंवृत्तिरिदंवृत्तिर्मनोभवेत् ७०
अहंप्रत्ययबीजत्वमिदंवृत्तेरितिस्फुटं अविदित्वास्वमात्मानंबाह्यंवेत्तिनतुक्वचित् ७१
क्षणेक्षणेजन्मनाशावहंवृत्तेर्मितौयतः विज्ञानंक्षणिकंतेनस्वप्रकाशंस्वतोमितेः ७२

दर्शयति अहंवृत्तिरिति ७० तयोःकार्यकारणभावमाह अहंप्रत्ययबीजत्वमिति तदेवोपपादयति अविदित्वेति अहंवृत्त्युदयाभावेइदंवृत्त्यनुदयादनयोःकार्यकारणभावइत्यर्थः ७१ तस्यविज्ञानस्यक्षणिकत्वेनुभवंप्रमाणयति क्षणेक्षणइति क्षणिकत्वमुपपाद्यस्वप्रकाशत्वमुपपादयति स्वप्रकाशमिति स्वेनैवप्रमितत्वादित्यर्थः ७२ ८८ ॥

श्रुत्यंतरमुदाहरति वालाग्रेति ८१ मध्यमपरिमाणवादिदिगंबरमतं दर्शयति दिगंबरा इति तत्रोपपत्तिमाह आपादेति सएषइह प्रविष्ट आनखाग्रेभ्य इति श्रुतिर्मध्यमपरिमाणमित्याह आनखाग्रेति ८२ ननु मध्यमपरिमाणत्वेक्ष्म त्तिमिश्रो नाडीप्रचारो न घटत इत्याशंक्याह सूक्ष्मनाडीति यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशो न देहस्य केवल

वालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेय इति चाह परा श्रुतिः
दिगंबरा मध्यमत्वमाहुरापादमस्तकं चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ८२
सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत् स्थूलदेहस्य हस्ताभ्यां कंचुकप्रतिमोकवत्
८३ न्यूनाधिकशरीरेषु प्रवेशोपि गमागमैः आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितं ८४

प्रवेशस्तद्वदात्मावयवानां सूक्ष्माणां नाडीषु प्रचारेणात्मनोपि प्रचार उपचर्यत इत्यर्थः ८३ नन्वात्मनो नियतमध्यमपरिमाणत्वे कथमवशान्यूनाधिकशरीरप्रवेशो न घटत इत्याशंक्यावयवागमापायाभ्यामात्मनो नियतमध्यमपरिमाणत्वाद्देहवदुभयं न विरुध्यत इत्याह न्यूनाधिकेति फलितमाह तेनेति ८४ ५ ५

कस्तर्हीत्येतत आह अन्येति तस्माद्धा एतस्माद्विज्ञानमयादन्योंतरआत्मानंदमय अस्तीत्येवोपलब्धव्यस्तत्त्वभावेनेति सद्भावादानंदमयआत्माप्युपगंतव्यइतिवैदिकदर्शनंवैदिकसिद्धांतः ७७ एवमात्मस्वरूपेविप्रतिपत्तिंप्रदर्श्य तत्परिमाणविशेषेपिवादिप्रतिपत्तिंदर्शयति अणुरिति ७८ अणुत्ववादिनस्तावद्दर्शयति अणुमिति

अन्योविज्ञानमयतःआनंदमयोंतर अस्तीत्येवोपलब्धव्यइतिवैदिक ॥
दर्शनं ७७ अणुर्महान्मध्यमोवेत्येवंतत्रापिवादिनः वहुधाविवदंतेहि ॥
श्रुतियुक्तिसमाश्रयात् ७८ अणुंवदंत्यांतरात्मा:सूक्ष्मनाडीप्रचारतः रोमाःस
हस्रभागेनतल्यासप्रचरत्ययं ७९ अणोरणीयेषोणुःसूक्ष्मतरंत्विति अणुत्व
माहुःश्रुतयःशतशोथसहस्रशः ८०

अणुत्वाभिधानेहेतुमाह सूक्ष्मेति तदुपपादयति रोमाग्रइति नाडीष्वितिशेषः सूक्ष्मासुनाडीषुसंचारोणुत्वमंतरेणनचरतेइत्यभिप्रायः ७९ अणुत्वेकिंप्रमाणमित्यआह अणोरिति अणोरणीयान्महतोमहीयानेषोणुरात्मचेतसावेदितव्यः सूक्ष्मात्सूक्ष्मतरंनित्यमित्यादिश्रुतयइत्यर्थः ८० ॥ ॥ ॥

प्राभाकरा इति तत्प्रक्रियामनुभाषते आकाशवद्द्रव्यमिति आत्मा द्रव्यं भवितुमर्हति गुणवत्त्वादाकाशवदित्यनुमानं सूचितं आत्मनः पृथिव्यादिभ्यो भेदसाधकं विशेषगुणं दर्शयति शब्दवदिति आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वाद्यत्पृथिव्यादिभ्यो न भिद्यते तत् ज्ञानगुणकमपि न भवति यथा पृथिव्यादीत्यनुमानं द्रष्टव्यं ८८ तस्य

प्राभाकरास्तार्किकाश्च प्राहुरस्याचिदात्मतां आकाशवत् द्रव्यमात्मा शब्दवत्तद्गुणश्चि
तिः ८८ इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ सुखासुखे तत्संस्काराश्च तस्यैते गुणाश्चितिवदी
रिताः ८९ आत्मनो मनसा योगे स्वादृष्टवशतो गुणाः जायंतेऽथ प्रलीयंते सुषुप्तेऽदृष्टसं
क्षयात् ९० चितिमत्त्वाच्चेतनोऽयमिच्छाद्वेषप्रयत्नवान् स्याद्धर्माधर्मयोः कर्त्ता भोक्ता दुः
खादिमत्त्वतः ९१

विशेषगुणान्तराण्याह इच्छेति तत्संस्कारा भावना ८९ एषां गुणानामुत्पत्तिविनाशकारणमाह आत्मन इति स्वादृष्टवशात् आत्मनो मनसा योग इत्यन्वयः ९० आत्मनोऽचिद्रूपत्वे कथं चेतनाभ्युपगम इत्याशंक्य चितिमत्त्वादित्याह चितिमत्त्वादिति आत्मनश्चेतनत्वे हेत्वंतरमाह इच्छेति तस्यैव बद्धत्वलक्षणमाह स्यादिति ९१

आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसंगेनैतद्दूषयति सांशश्चेति [illegible]त्र को दोषस्तत्राह तथा सतीति कृतयोः पापपापयोर्भोगमंतरेण नाशः अकृतयोरकस्मात्फलदातृत्वं अकृताभ्यागमः एतद्दोषद्वयमात्मनो ।

सांशश्चेद्घटवन्नाशो भवत्येव तथा सति कृतनाशाकृताभ्यागमयोः को वारको
भवेत् ८५ तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः आकाशवत्सर्वगतो
निरंशः श्रुतिसंमतः ८६ इत्युक्त्वा तद्विशेषे तु बहुधा कलहं ययुः अचि
द्रूपोऽथ चिद्रूपश्चिदचिद्रूप इत्यपि ८७

नित्यत्वाभ्युपगमे भवेदिति भावः ८५ अतः पारिशेष्यादात्मनो विभुत्वं सिद्धमित्याह तस्मादिति तत्र प्रमाणमाह आकाशवदिति आकाशवत्सर्वगतश्च नित्यः निष्कलं निष्क्रियमित्याद्यागमः प्रमाणमित्यर्थः ८६ ए॰ वात्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वं निश्चेतुं तावद्वादिविप्रतिपत्तिं दर्शयति इत्युक्त्वेति अचिद्रूपत्ववादिनोर

र्शयति ८

पं०टी

१७

अस्यैवात्मनश्चिदचिद्रूपत्वं भाट्टा वर्णयंतीत्याह जडमिति भाट्टाऽप्यात्मनो जडमप्यहं चैतन्यमत्येस्य जहित्याः चिज्जडोभयात्मकतां वर्णयंति चैतन्योत्प्रेक्षायां कारणमाह चिदुत्प्रेक्षेति उत्थितस्मृतेश्चिदुत्प्रेक्षा भवतीति

अहंचैतन्यमत्युत्प्रेक्ष्या द्व्यबोधस्वरूपताऽऽत्मनो ब्रुवते भाट्टाश्चिदुत्प्रेक्षो
त्थितस्मृतेः ७५ जडो भूत्वा तदास्वाप्समिति जाड्यस्मृतिस्तदा विना जाड्या
नुभूतिं न कथंचिदुपपद्यते ७६

चित्रदी०

राम

१७

योजना सुषुप्तेरुत्थितस्य जायमानात्स्मरणात्तैरुक्तचैतन्यस्योत्प्रेक्षा भवतीत्यर्थः ७५ चिदुत्प्रेक्षाप्रकारमेव प्रपंचयति जडो भूत्वेति तदा सुषुप्तिकाले जडो भूत्वाऽस्वाप्समित्येवंरूपा जाड्यस्मृतिरुत्थितस्य प्रबुद्धस्य जायमाना सुषुप्तिकालीनजाड्यानुभवमंतरेणानुपपद्यमाना तदानीतनजाड्यानुभवं कल्पयतीति भावः ७६ ॥

नन्वात्मनो विभुत्वे लोकांतरगमनादिकं कथं घटेत इत्याशंक्याभिमतदेहे कर्मवशादिच्छाद्युत्पत्तौ सत्यामत्रात्मनो ५
त्रगमनादिव्यवहारऽवकर्मवशाल्लोकांतरे देहांतरोत्पत्तौ तत्रावच्छिन्नात्मप्रदेशे स्वभावाद्युत्पत्तिवशात्तत्रात्मनो ग॰
गौ मनादिव्यवहार इत्यौपचारिकमात्मनो गमनादिकमित्यभिप्रेत्याह यथा त्वकर्मवशेतेति साद्धेन ५२ आत्मनः॰

यथात्र कर्मवशतः कादाचित्कं सुखादिकं तथा लोकांतरे देहे कर्मणेच्छादि जन्यते ५२
एवं सर्वगतस्यापि संभवेतां गमागमौ कर्मकांडः समस्तोऽत्र प्रमाणमिति ते ऽवदन् ५३ आनं-
दमयकोशो यः सुषुप्तौ परिशिष्यते अस्पष्टचित्स आत्मैषां पूर्वकोशोऽस्य ते गुणा ५४ ॥

कर्तृत्वादिधर्मवत्त्वे किं प्रमाणमित्यत आह कर्मकांडेति ५३ नन्वन्यो विज्ञानमयत आनंदमय आंतर इत्यत्रा-
नंदमयस्यात्मत्वमुक्तमिदानीमिच्छादिमानन्यप्रतिपाद्यतेऽतः पूर्वोत्तरविरोध इत्याशंक्याह आनंदमयेति सुषु-
प्तावस्पष्टचिद्ध आनंदमयः कोशः परिशिष्यते स पूर्वकोशः ओतेषु पंचकोशेषु प्रथमगण्यानां प्राणमाकरादीनामात्माऽस्य
स्यात्मनस्तु पूर्वोक्तात्मानारयोगाद इत्यर्थः ५४ ॥

सुषुप्तौ चैतन्यलोपाभावे प्रमाणमाह दृष्टेरिति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादिति श्रुतेर्द्रष्टुरात्मनः स्वरूपभूताया दृष्टेर्लोपो न विद्यते विनाशरहितस्वभावत्वात् अन्यथा लोपवादिनोपि निःसाक्षिकस्य वक्तुमशक्यत्वात् सुषुप्तौ चैतन्यलोपाभावः श्रूयते ततोपि प्रमाणादयमात्मा खद्योतवत् स्फुरणास्फुरणाभ्यां युक्तो भवतीत्यर्थः ९

द्रष्टुर्दृष्टेरलोपश्च अतः सुप्तौ न तत्क्षयः अप्रकाशप्रकाशाभ्यामात्मा खद्योतवद्युतः ८७
निरंशस्योभयात्मत्वं न कथंचिद्भविष्यते तेन चिद्रूप एवात्मेत्याहुः सांख्या विवेकिनः ८८
जडांशः प्रकृते रूपं विकारि त्रिगुणं च तत् चितो भोगापवर्गार्थं प्रकृतिः सा प्रवर्तते ८ ८९

अस्मिन्नारम्भमते दूषणाभिधानपुरःसरं सांख्यमतमुत्थापयति निरंशस्येति जडांशस्तर्हि का गतिरित्याशंक्याह जडांश इति तत्प्रकृतिरूपं सत्त्वरजस्तमोगुणात्मकं प्रकृतिकल्पनायाः प्रयोजनमाह चित इति चितः पुरुषस्येति यावत् ८८ ५

नन्वितोऽसंगत्वेन प्रकृतिपुरुषयोरत्यंतविविक्तत्वात्प्रकृतिप्रवृत्त्या कथं पुरुषस्य भोगापवर्गावित्याशंक्य तयोर्विवेकस्याग्रहणात्पुरुषे भोगापवर्गौ व्यवह्रियेते इत्याह ॥ असंगाया इति तार्किकादिभिरिव सांख्ययोगा

॥ असंगायाश्चितेर्बंधमोक्षौ भेदाग्रहान्मतौ बंधमुक्तिव्यवस्थार्थं पूर्वेषामिव चिद्भिदा १०० महतः परमव्यक्तमिति प्रकृतिरुच्यते श्रुतावसंगता तद्वदसंगो हीत्यतः स्फुटा १०१ चित्संनिधौ प्रवृत्तायाः प्रकृतेर्हि नियामकं ईश्वरं ब्रुवते योगाः स जीवेभ्यः परः श्रुतः १०२ श्रीराधाकृष्णाय नमः ५

त्मभेदोंगीक्रियत इत्याह बंधमुक्तीति १०० प्रकृतिसद्भावे पुरुषस्यासंगत्वे च श्रुतिमुदाहरति महत इति एवं जीवविषयां वादिविप्रतिपत्तिं प्रदर्श्य ईश्वरविषयां तां प्रदर्शयितुमीश्वरस्वरूपं तावत्स्थापयति चित्संनिधाविति १०२ ननु प्रकृतिपुरुषातिरिक्तेश्वरकल्पनमप्रमाणमित्याशंक्याह स जीवेभ्य इति १०३

नामेवेश्वरसद्भावप्रतीपादिकां श्रुतिं पठति प्रधानेति प्रधानं गुणसाम्यावस्थारूपं क्षेत्रज्ञा जीवास्तेषां पतिः गुणाः सत्वादयस्तेषामीशो नियामक इत्यर्थः न केवलमियमेव श्रुतिरीश्वरप्रतिपादिकां तयोभिन्नालगामर्वीत्याह अपारणकेति ३ तामेव वादिविप्रतिपत्तिं प्रतिजानीते अप्रज्ञावीति प्रज्ञामनति क्रमस्य यथाप्रज्ञं ४ इदानीं पतंजलिनो-

प्रधानक्षेत्रज्ञपतिर्गुणेश इति हि श्रुतिः अपारणकैः संभवेमेणाहंतयो-
स्युपपादितः ३ अत्रापि कलहायंते वादिनः स्वस्वयुक्तिभिः वाक्यान्य-
पि यथाप्रज्ञं दाक्षीयोगा हरंति हि ४ क्लेशकर्मविपाकैस्तदाशयैरप्यसं-
युतः पुंविशेषो भवेदीशो जीववत्सोऽप्यसंगचित् ५

क्तमीश्वरप्रतिपादिकं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इत्येतत्सूत्रमर्थतः पठति क्लेशेति क्लेशा अविद्यादयः अविद्याऽस्मितारागद्वेषाभिनिवेशाः पंचकर्माणि कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामिति सूत्रितानि सति मूले तद्विपाको जात्यायुर्भोगा इत्युक्ताः कर्मविपाकाः फलविशेषास्तदाशयास्तेषां संस्कारास्तैः क्लेशादिभिरसंस्पृष्टः पुरुषविशेष ईश्वरो भवतीति सोपि जीवव-

नन्वसंगचिद्रूपत्वे कथं नियंतृत्वमित्यत आह तथापीति ईश्वरस्य नियंतृत्वानभ्युपगमे दोषमाह अव्यवस्थाविति ६ असंगस्येश्वरस्य नियंतृत्वं निष्प्रमाणकमित्याशंक्याह भीषेति तन्नियंतृत्वं श्रुतं ननु श्रुतमप्ययुक्तं कथं अंगीक्रियत इत्यत आह युक्तमपीति जीवधर्मस्य क्लेशादेरभावादुपपन्नं चेत्यर्थः ७ ननु जीवा अप्यसंगचिद्रूपाः क्लेशादिरहि-

तथापि पुंविशेषत्वाद्घटतेऽस्य नियंतृता अव्यवस्थौ बंधमोक्षावापतेतामिहा-
न्यथा ६ भीषास्मादित्येवमादावसंगस्य परात्मनः श्रुतं तद्युक्तमप्यस्य क्लेशक-
र्माद्यसंगमात् ७ जीवानामप्यसंगत्वात्क्लेशादिर्न ह्यथापि तु विवेकाग्रहतः क्ले-
शकर्मादि प्रागुदीरितं ८ नित्यज्ञानप्रयत्नेच्छागुणानीशस्य मन्वते असंगस्य नि-
यंतृत्वमयुक्तमिति तार्किकाः ९

ता एव तथा चेश्वरे को विशेष इत्याशंक्य जीवानां स्वतः क्लेशादिरहितत्वेऽपि बुद्ध्या सह विवेकाग्रहात्क्लेशादिरस्तीति पूर्वोक्तं स्मारयति जीवानामिति तार्किकास्त्वसंगस्य नियामकत्वमसहमाना जीवविलक्षणत्वाज्ज्ञानादिगुणत्रयं नियमं स्वीकुर्वंत इत्याह ८ नित्यज्ञानेति ९

पंच २०

२०

केवललिंगशरीरस्य स्थूलशरीरं विहायानुपलभ्यमानत्वात् स्थूलशरीरसमष्ट्यभिमानी विराडे वैश्वर इत्याह स्थूलदेहं
विनेति तत्सद्भावे प्रमाणमाह सहस्रशीर्षेति श्रुतेर्वाक्यमिति शेषः विश्वरूपस्य चिंतकाः विराडुपासकाः २४ ५

स्थूलदेहं विना लिंगदेहो न क्वापि दृश्यते वैराजो देहे देशोऽनंतः सर्वतोमस्तकादिमान् २३
सहस्रशीर्षेत्येवं च विश्वतश्चक्षुरित्यपि श्रुतमित्याहुरनिशं विश्वरूपस्य चिंतकाः २४
सर्वतः पाणिपादत्वे क्षित्यादेरपि चेशता ततश्च तस्मै वैराटे यावेशो ने नरः पुमान् २५
पुत्रार्थी तमुपासीना एवमाहुः प्रजापतिः प्रजाः सृजते त्यादिश्रुतिं चोदाहरंत्यमी २६ वि
ष्णोर्नाभेः समुद्भूतो वेधाः कमलजस्ततः विष्णुरेवेश इत्याहुर्लोके भागवता जनाः २७

पंच
२०

अत्रापि दोषदृष्ट्या देवतांतरमालंबंत इत्याह सर्वत इति हे २५ एवं कैस्च्यते इत्यत आह पुत्रार्थिमिति प्रजापतिः प्रजा
[illegible]जते त्यादिवाक्यं तत्र प्रमाणमित्याहुरित्याह प्रजापतिरिति २६ भागवतमाह विष्णोरिति २७ ८ ५

नन्विच्छादिगुणकस्य कथं जीवाद्वैलक्षण्यमित्याशंक्य गुणानां नित्यत्वादेवेति परिहरन्ति पुंविशेषत्वमिति गुणानां नित्यत्वे प्रमाणमाह सत्येति २० तत्रापि दोषप्रसङ्गाद्वा पक्षांतरमाह नित्येति तस्य हिरण्यगर्भस्य किंरूपमित्यत आह

पुंविशेषत्वमप्यस्य गुणैरेव न चान्यथा सत्यकामः सत्यसंकल्प इत्यादिश्रुतिजैर्गुणैः २०
उद्गीथब्राह्मणे तस्य दृष्टिरेव सदा भवेत् हिरण्यगर्भ ईशोऽतो लिंगदेहेन संयुतः २१
नित्यज्ञानादिमत्त्वेऽस्य महात्म्यमतिविश्रुतं लिंगसत्त्वेपि जीवत्वं नास्य कर्माद्यभावतः २२

लिंगदेहेनेति मायोपाधिकः परमात्मा लिंगशरीरसमष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यते इत्यर्थः हिरण्यगर्भस्येश्वरत्वे किं प्रमाणमित्यत आह उद्गीथेति ननु लिंगशरीरयोगे जीवः स्यादित्याशंक्याविद्याकामकर्माभावान्न जीव इत्याह लिंगसत्त्वेपीति २२ श्रीरामाय नमः ५

तामेवप्रतिपत्तिंद्रढयितुंतदनुकूलांश्रुतिंपठति मायांत्विति मायामेवप्रकृतिंजगदुपादानकारणंविद्याज्जानीयात् मायि॰
पंचदशी॰ नंतुमायोपाधिकमंतर्यामिणमेवमहेश्वरंमायाधिष्ठातारंनिमित्तकारणंजानीयात् अस्यमायिनोमहेश्वरस्यावयवभूतैः

२१

मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं अस्यावयवभूतैस्तुव्याप्तंसर्वमिदं
जगत् २३ इतिश्रुत्यनुसारेणयुक्तोनिर्णयईश्वरे तथासत्यविरोधःस्यात्स्था
वरेश्वरवादिनां २४

अंशरूपैश्चराचरात्मकैर्जीवैःकृत्स्नमिदंजगद्व्याप्तमित्यस्याःश्रुतेरर्थः २३ एतच्छ्रुत्यनुसारेणेश्वरविषयोनिर्णयोयुक्तइत्याह॰ राम
इतीति कुतोयुक्तइत्याशंक्यसर्वेश्वराविरुद्धत्वादित्याह सर्वेषामपीश्वरत्वाभ्युपगमान्नकेनापिविरोधइतिभावः २४ २१

शैव.सौमतमाह शिवस्येति १८ गाणपत्यमतमाह पुरत्रयमिति १९ उक्तन्यायमन्यत्राप्यतिदिशति एवमिति अंन्येभैरवमतान्ता
दु[illegible]सकाः अन्यथा अन्यथा वर्णने कारणमाह स्वस्वेति तत्तत्प्रमाणानि संनीतिदर्शयति मंत्रेति २० एवंकतिमतानीत्याशंक्या

॥ शिवस्यपादावन्वेष्टुंशार्ङ्गिणाशक्तस्ततःशिवः ईशोऽन्विष्णुरित्याहुः शैवा आगममानिनः १८ पुरत्रयंसादयि
तुंविघ्नेशंसोऽप्यपूजयत् विनायकंप्राहुरीशंगाणपत्यमतेरताः १९ एवमन्येः स्वस्वपक्षाभिमानेनान्यथाऽन्य
था मंत्रार्थवादकल्पादीनाश्रित्यप्रतिपेदिरे २० अन्तर्यामिणमारभ्य स्थावरांतेशवादिनः संत्यश्वत्थार्कवंशा
देः कुलदैवत्वदर्शनात् २१ तत्वनिश्चयकामेनन्यायागमविचारिणां एकैवप्रतिपत्तिःस्यात्साप्यत्रस्फुटमुच्य
ते २२

संख्यानीत्याह अंतर्यामिणमिति स्थावरेशवादो न क्वापि दृष्टचरइत्याशंक्याह अश्वत्थार्केति २१ ननु एवं मतभेदे कस्योपादेयत्वं
कस्य वा हेयत्वमित्याकांक्षायामाह तत्वनिश्चयेति तत्वनिश्चयकामेनं तत्वनिश्चयेच्छया न्यायागमयो विचारणशीलानां पुरुषा
णांप्रतिपत्तिरेकैवस्यात् साकीदृशीत्यत आह साप्यत्रेति २२ ॥ ८२ ॥ ५

जडशब्दस्यार्थमाह अविवेकादिति मोहशब्दस्यार्थमाह यत्रेति २७ उक्तप्रकारेण सर्वानुभवसिद्धत्वेन लक्षणमात्रं त्रयं सिद्धमित्याह इत्थमिति एतज्जाड्यमोहलक्षणं तमोरूपत्वं नन्वेवं मायायाः सर्वानुभवसिद्धत्वे घटादिवत् ज्ञानेनानिवर्त्यत्वं स्यादित्याशंक्याह युक्तीति तत्राक्षरश्लोकानिर्वचनीयत्वार्थः २८ अनिर्वाच्यं सत्त्वेनासत्त्वेन सदसत्त्वेन वा निर्वक्तुमशक्यं तत्र किं

अविवेकात्मघटादीनां यत्स्वरूपं जडं हि तत् यत्र कुंठीभवेद्बुद्धिः स मोह इति लौकिकाः २७
इत्थं लौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतेः २८
नासदासीद्विभातत्वान्नो सदासीच्च बाधनात् विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः २९

प्रमाणमित्यत आह नासदिति अस्याः श्रुतेरभिप्रायमाह बाधनान्नेह नानास्ति किंचनेति श्रुत्या निषेधादित्यर्थः स॰ दसद्रूपत्वं तु विरुद्धत्वादयुक्तमिति श्रुत्योपेक्षितं एवं युक्तिदृष्ट्याऽनिर्वचनीयत्वं प्रदर्श्य तत्तुच्छमितिरूपमस्याइति॰ श्रुतिविद्वदनुभवेन स्यात्तुच्छत्वं दर्शयतीत्याह विद्येति तुच्छत्वे हेतुमाह तस्याइति २९ ५ ५

ननुजगत्प्रकृतिभूतायामायायाः किंरूपमित्यत आह मायाचेयमिति कुत इत्यत आह तापनीयेति मायाच तमोरूपेति तापनीयोपनिषदि तमोरूपत्वस्याभिधानादित्यर्थः २५ मायायास्तमोरूपत्वे किंप्रमाणमित्याकांक्षायामनुभूतेरितिश्रुतिरे

मायाचेयंतमोरूपातापनीयेतदीरणात् अनुभूतिंतत्रमानंप्रतिजज्ञेश्रुतिः
स्वयं २५ जडंमोहात्मकंतच्चेत्यनुभावयतिश्रुतिः आबालगोपस्पष्टत्वादा
नंत्यंतस्यसाब्रवीत् २६

वाऽनुभवः प्रमाणमितिप्रतिजानीत इत्याह अनुभूतिमिति तत्रमायायास्तमोरूपत्वे कोसावनुभव इत्याकांक्षायां तः देतज्जडंमोहात्मकमितिश्रुतिरेवाऽनुभवंस्पष्टयतीत्याह जडमिति आनंत्यमितिश्रुत्यासर्वानुभवसिद्धत्वमच्यते इत्याह आबालेति २६

नन्वात्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्याह कूटस्थमिति ननु कूटस्थत्वाविघातेन जगदादिस्वरूपत्वापादनं दुर्घटमित्याशंक्य मायाया दुर्घटैकविधायित्वान्नेदमाश्चर्यकारणमित्याह दुर्घटेति अन्यथा मायात्वमेव भज्येतेति भा

कूटस्थमनयाकृत्याः करोति जगदादिकं दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ३४
द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि मायायां दुर्घटत्वं च स्वतः सिध्यति नान्यतः ३५
न वेत्ति लोको यावत्तं साक्षात्तावच्चमत्कृतिं धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति ३६॥

वः ३४ मायाया दुर्घटकारित्वस्वभावत्वे दृष्टान्तमाह द्रवत्वमिति उदकादीनां द्रवत्वादि यथा स्वाभाविकं तद्वन्मायाया दुर्घटकारित्वमित्यर्थः ननु मायाया दुर्घटकारित्वमाश्चर्यकारणं न भवतीत्युक्तमनुपपन्नं लोके मायायाश्चमत्कारहेतुत्वदर्शनादित्याशंक्य मायातस्याः प्रयोक्तृसाक्षात्कारपर्यन्तमेव तस्याश्चर्यकारणत्वं नोपरिष्टादित्याह न वेत्ती ३६

अगादितमयीमपसंहरति तुच्छेति ३० श्रौतबोधेन तुच्छा कालत्रयेऽप्यसत्तीयौक्तिकबोधेनानिर्वचनीया लौकिक
बोधेन वास्तवी चेत्येवं त्रिधा माया ज्ञेयेत्यर्थः अस्य सत्त्वमसत्त्वं च दर्शयतीति श्रुतेरर्थमस्याः कृत्यमाह अस्येति
एकस्या एव मायायाः जगत्सत्त्वासत्त्वप्रदर्शकत्वे दृष्टांतमाह प्रसारणादिति ३१ स्वतंत्रास्वतंत्रेति अस्या मायायाः

तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः
अस्य सत्त्वमसत्त्वं च जगतो दर्शयत्यसौ प्रसारणाच्च संकोचाद्यथा चित्रपटस्तथा ३१ अस्वतं-
त्रा हि माया स्यादप्रतीतेर्विना चितिं स्वतंत्रापि तथैव स्यादसंगस्यान्यथा कृते ३२ कूटस्थासं-
गमात्मानं जगत्त्वेन करोति सा चिदाभासस्वरूपेण जीवेशावपि निर्ममे ३३

स्वातंत्र्यास्वातंत्र्ये दर्शिते ततोभयत्रोपपत्तिमाह अस्वतंत्रेति स्वभासकचैतन्यं विहायाप्रकाशनादस्वतंत्रा असंगस्या-
त्मनोऽन्यथाकरणात्स्वतंत्रापीत्यर्थः ३२ अन्यथाकरणमेव स्पष्टयति कूटस्थासंगमिति जीवेशावाभासेन करोतीत्युक्-
तं जीवेश्वरविभागं करोतीत्याह चिदाभासेति ३३ ॥ ॥ ॥

तस्यापिकिंलक्षणमित्यतआह नर्निरूपयितुमिति ४२ दृष्टांतेनसिद्धंलक्षणंदार्ष्टांतिकेयोजयति स्पष्टमिति जग
तोऽशक्यनिरूपणत्वंकथमित्याशंक्यतद्दर्शयति निरूपयितुमिति ४३ अशक्यनिरूपणत्वमेवोदाहरणेनस्पष्ट

ननिरूपयितुंशक्याविस्पष्टंभासतेचया सामायेतींद्रजालादौलोकाःसंप्रतिपेदिरे ४२
स्पष्टंभातिजगच्चेदमशक्यंतन्निरूपणं मायामयंजगत्तस्मादीक्षस्वापक्षपाततः ४३
निरूपयितुमारब्धेनिखिलैरपिपंडितैः अज्ञानंपुरतस्तेषांभातिकक्षासुकासुचित्
देहेंद्रियादयोभावावीर्येणोत्पादिताःकथं कथंवातत्रचैतन्यमित्युक्तेतेकिमुत्तरं ४४
वीर्यस्यैषस्वभावश्चेत्कथंतद्विदितंत्वया अन्वयव्यतिरेकौयौभग्नौतौवंध्यवीर्यतः ४५

यतिदेहेंद्रियेति स्वभाववादीशंक्यःते वीर्यस्येति सिद्धांतीपृच्छति कथंतदिति अन्वयव्यतिरेकाभ्यांजानामी
त्याशंक्याप्यभावान्नैवमित्याह व्यर्थवीर्यतः वंध्यायांचतत्रवीर्यस्यव्यर्थत्वाद्व्याप्तिर्नघटतेयत्रवीर्यंतत्रतत्र देहादिकंइति अन्वयोपि ४५

किंच जगत्सत्यत्ववादिनां नैयायिकादीनां तु एवंविधानि चोद्यानि कर्त्तव्यानि न मायावादिनं प्रतीत्याह प्रसरंतीति ३७ माया वादिनं प्रति चोद्यकरणेऽतिप्रसंगमाह चोद्येपीति तर्हि किं कर्त्तव्यमित्यत आह परिहार्यमिति ३८ उक्तमेवार्थं प्रपंचय

प्रसरंति हि चोद्यानि जगद्वस्तुत्ववादिषु न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ३७
चोद्येपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां ३८
विस्मयैकशरीरायां मायायां चोद्यरूपतः अन्वेष्टव्यः परिहारो बुद्धिमद्भिः प्रयत्नतः ३९
मायात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु लोके प्रसिद्धमायाया लक्षणं यत्तदीक्ष्यतां ४०

ति विस्मयेति ३९ मायात्वनिश्चये तत्परिहारान्वेषणमुचितं स्यात्तच्चेदानीं सिद्धमिति शंकते मायात्वमिति मायाया लक्षणमज्ञात्वा मायात्वं निश्चीयतामित्यभिप्रायेणाह तर्हीति किं लक्षणमित्यत आह लोकेति ४० ८८ ८९

उक्तार्थे सांप्रदायिकानां वाक्यं संवादयति अचिंत्या इति ५० ननु भवत्वेवं जगतोऽचिंत्यरचनात्वं मायायां किमा-
यातमित्यत आह अचिंत्यरचनेति अचिंत्यरचनाशक्तिमद्बीजं कारणं सैव मायेत्यर्थः नन्वेवंविधं कारणं

अचिंत्याः खलु ये भावा न तांस्तर्केषु योजयेत् अचिंत्यरचनारूपं मनसा-
पि जगत् खलु ५० अचिंत्यरचनाशक्तिबीजं मायेति निश्चिनु मायाबी-
जं तदेवैकं सुषुप्तावनुभूयते ५१ जाग्रत्स्वप्नजगत्तत्र लीनं बीज इव द्रु-
मः तस्मादशेषजगतो वासनास्तत्र संस्थिताः ५२ श्रीराधाकृष्णाय नमः

दृष्टमित्यत आह मायेति ५१ कथं तस्याः जगद्बीजत्वमित्यत आह जाग्रदिति ततः किमित्यत
आह तस्मादिति यतो जगत्कारणं मायाऽतोऽशेषजगद्वासनास्तत्र मायायां तिष्ठंतीत्यर्थः ५२ ॥ ॥

एवंपुनःपुनःपृष्टेसतिकिमपिनजानामीत्येवोत्तरंदेयमितिफलितमाह नजानामीति ४६ उक्तानिर्वचनीयत्वदृढं

नजानामिकिमप्येतदित्यंतेशरणंतव अतएवमहांतोस्यप्रवदंतींद्रजालतां ४६
एतस्मात्किमिवेंद्रजालमपरंयद्गर्भवासस्थितंरेतश्चेततिहस्तमस्तकपदंप्रोद्भूत
नानांकुरं पर्यायेणशिशुत्वयौवनजरावेषैरनेकैर्वृतं पश्यत्यत्तिशृणोतिजिघ्रति
तथा गच्छत्यथागच्छति ४७ देहवद्वटधानादौसुविचार्यविलोक्यतां क्वधानाक्वच
वावृक्षस्तस्मान्मायेतिनिश्चिनु ४८ निरुक्तावभिमानंयेदधतेतार्किकादयः हर्ष
मिश्रादिभिस्तेतुखंडनादौसुशिक्षिताः ४९

मतिंदर्शयति एतस्मादिति ४७ नकेवलंदेहस्यैकस्यैवदुर्निरूपत्वंकिंतुवटवृक्षादेरपीत्याह देहवदिति ४८ नन्वस्माभिर्निर्वक्तुमशक्यत्वेपिउदयनादिभिराचार्यैर्निरूप्यतइत्याशंक्याह निरुक्तावभिमानमिति ४९ ॥ ॥

एवंजीवेश्वरयोर्मायिकत्वंश्रुत्युक्तमुपपादितमुपसंहरति मायाभासेनेति ननुजीवेशयोर्मायिकत्वेसमानेकथमवांतरभेदसिद्धिरित्याशंक्यस्वस्वोपाधिमत्त्वेनमेघाकाशजलाकाशयोरिवतत्सिद्धिरित्याह

मायाभासेनजीवेशौकरोतीतिश्रुतौश्रुतं मेघाकाशजलाकाशाविवतौसुव्यव
स्थितौ ५५ मेघवद्वर्त्ततेमायामेघस्थिततुषारवत् धीवासनाश्चिदाभासःतुषार
स्थखवत्स्थितः ५६ मायाधीनश्चिदाभासःश्रुतोमायीमहेश्वरः अंतर्यामीचस
र्वज्ञोजगद्योनिःसएवहि ५७

मेघाकाशेति ५५ ईशस्यमेघाकाशसाम्यंस्फुटीकरोति मेघवदिति ५६ मायाप्रतिबिंबस्येश्वरत्वेकिंप्रमाणमित्याशंक्यश्रुतिरेवेत्याह मायाधीनेति नकेवलमीश्वरत्वमस्यश्रुतंकिंत्वपितु अंतर्यामित्वादिकमपिधर्मजातंश्रुतमस्तीत्याह अंतर्यामीति ५७ " " " "

ततोपिकिंतत्रआह यावुद्धिवासनाइति अन्नतास्यप्रतिविंवोस्तिचेत्कुतोनानुभूयतइत्याशंक्यास्पष्टत्वादित्याह । ऽधेति तर्हिकुतस्तत्सिद्धिरित्याह अनुमीयतामिति ५३ ननुमेघांशोदकस्यास्पष्टाकाशप्रतिविंववत्त्वेपितज्ञातीयस्यघटोदकस्यस्पष्टाकाशप्रतिविंववतः सत्त्वान्मेघाकाशानुमानंघटतेइह तथाविधदृष्टांताभावात्क

यावुद्धिवासनास्तासुचैतन्यंप्रतिविंबति मेघाकाशवदस्पष्टश्चिदाभासोऽनुमीयतां
साभासमेवतद्वीजंधीरूपेणप्ररोहति अतोवुद्धौचिदाभासोविस्पष्टंप्रतिभासते ५४

थमनुमानोदयइत्याशंक्यातथापितथाविधदृष्टांतसंपादनायाह साभासमिति चिदाभासविशिष्टंतदेवाज्ञानंवुद्धिरूपेणपरिणमानंविस्पष्टंचिदाभासवद्भवतीतिभावः एवंचेदमनुमानं अत्रस्फुटितंभवति विमतावुद्धिवासनाश्चित्प्रतिविंबवत्योभवितुमर्हंतिवद्भवध्याविशेषत्वात् वुद्धिवृत्तिवदिति ५४ ॥ ॥ ॥

ईदानिं सर्वज्ञत्वमुपादयति अशेषेति तत्र सौषुप्ते ऽज्ञाने कारणभूते कार्यभूतानां सर्वप्राणिबुद्धीनां वासनाः निवसंति ताभिर्वासनाभिः सर्वजगत्क्रोडीकृतं विषयीकृतं तेन सर्वबुद्धिवासनावदज्ञानोपाधिकत्वेन सर्वे

अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ
ईरितः ६२ वासनानां परोक्षत्वात्सर्वज्ञत्वं न हीक्ष्यते सर्वबुद्धिषु तद्दृष्ट्वा वा
वासनास्वनुमीयतां ६२

ज्ञत्वं उच्यते इत्यर्थः ६२ ननु यदि सर्वज्ञत्वमस्ति तर्हि तत्कुतो नानुभूयत इत्याशंक्य तदुपाधीनां वासनानां परोक्षत्वान्नानुभव इत्याह कथं तर्हि तदवगम इत्याशंक्याह वासनानामिति सर्वबुद्धिष्विति सर्वबुद्धिनिष्ठं सर्वज्ञत्वं तत्कारणभूतवासनागतसर्वज्ञत्वपुरःसरं भवितुमर्हति कार्यनिष्ठधर्मविशेषत्वात्परगततद्रूपादिवदित्यर्थः ६२ श्रीगणेशाय नमः ॥ ॥ ॥

ननु धीवासनाप्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रुतिं दर्शयति सौषुप्तमिति
सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवेत्यादिका श्रुतिर्धीवासनाप्रतिबिंबरूपस्यानंदमयस्येश्वरत्वादिकं प्रति
पादयतीत्यर्थः ५८ नन्वानंदमयस्य सर्वज्ञत्वादिकमननुभवविरुद्धमित्याशंक्याह सर्वज्ञत्वादिके इति कुतर्कस्यत्र

सौषुप्तमानंदमयं प्रक्रम्यैव श्रुतिर्जगौ एष सर्वेश्वर इति सोयं वेदोक्त ईश्वरः
सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यतां श्रौतार्थस्यावितर्क्यत्वान्मायायां सर्व
संभवात् ५९ ॥ अयं यत्सृजते विश्वं तदन्यथयितुं पुमान् न कोपि शक्तस्तेनायं
सर्वेश्वर इतिश्रुतः ६०

ऽपाह श्रौतेति इतोपि न विप्रतिपत्तिः कार्येत्याह मायायामिति ५९ नन्वनुकूलयुक्त्यभावे श्रुतिरपि ग्रावप्ल
ववाक्यवदर्थवादः स्यादित्याशंक्य श्रुतिप्रामाण्यसिद्धये सर्वेश्वरत्वादिकमुपपादयति ॥ अयमिति ॥ अयमानंद
मयो यज्जागरादिविश्वं सृजति तद्ब्रह्मकेनापि अन्यथा कर्तुं शक्यते तेनायं सर्वेश्वर इत्यर्थः ६०

नन्वपादानतया सर्वत्रायमवस्थितश्चेत्किमिति सर्वत्रनोपलभ्यतइत्याशंक्य सर्वांतरत्वादित्याह परादपीति अत्रेदमनुमानं आंतरत्वतारतम्यं क्वचिद्विश्रांतं तारतम्यत्वादणुत्वतारतम्यवदिति ९६ नन्वांतरत्वेप्यश्वा-दिवदंतर्यामिणोदर्शनंकिंनस्यादित्याशंक्य तेषामिव बाह्यत्वाभावाद्दृश्यतइत्यभिप्रायेणाहविश्रांतरत्वेति

परादप्यांतरस्तस्मात्सतोरप्यंशुरांतरः आंतरत्वस्य विश्रांतिर्यत्रासावनुमीयतां ९६
विश्रांतरत्वकक्षाणां दर्शनेप्ययमांतरः नवीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ९७
पटरूपेण संस्थानात्पटस्तंतोर्वपुर्यथा सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ९८

कुतस्तर्हि तन्निर्णय इत्याशंक्याह तत इति अ[illegible]ति चेतनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तिर्युक्तिः श्रुतिस्त्वसान्तरतैव ९७ यस्य सर्वाणि भूतानि शरीरमित्यस्यार्थमाह पटरूपेणेति पटरूपेणावस्थितस्य तंतोः पटः शरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः ९८

सर्वज्ञत्वमुपपाद्यैषोंतर्यामीत्ति श्रुत्युक्तमंतर्यामित्वमुपपादयत्ति विज्ञानमयेत्ति अन्यत्रपृथिव्यादौत्तिष्ठन्यमयत्ति
यतस्तेनेत्यन्वयः ६३ अस्मिन्नर्थेंतर्यामिब्राह्मणोक्तत्वंप्रमाणमित्तिदर्शयितुंतदेकदेशमाहूतंयोविज्ञानेतिष्ठन्नित्या

विज्ञानमयमुख्येषु कोशेष्वन्यत्रचैवहि अंतस्त्तिष्ठन्यमयत्तित्तेनांतर्यामितांव्रजेत् ६३
बुद्धौत्तिष्ठन्नांतरोस्याधियानीक्ष्यश्चधीवपुः धियमंतर्यमयत्तीत्येवंवेदेनघोषित्तं ६४
तंतत्परेस्थित्तोयद्वदुपादानतयातथा सर्वोपादानरूपत्वात्सर्वत्रायमवस्थित्तः ६५

दिवाक्यमर्थत्तोनुक्रामत्ति बुद्धावित्ति ६४ इदानीमंतर्यामिब्राह्मणस्यप्रत्तिपर्यायव्याख्यानेग्रंथबाहुल्यभयात् व्याख्यान
स्यसर्वपर्यायसंचारित्वसिद्धयेयःसर्वेषुभूतेष्वित्तिपर्यायंव्याचक्षाणोयःसर्वेषुभूतेषुत्तिष्ठन्नित्यस्यार्थंसदृष्टां
तमाह तंतत्परइत्ति ६५ ॥

ननूपादानतया सर्वत्रायमवस्थितस्तस्येक्षि किमिति सर्वैर्नोपलभ्यत इत्याशंक्य सर्वांतरत्वादित्याह पटादपीति अत्रेदमनुमानं अंतरत्वतारतम्यं क्वचिद्विश्रांतं तारतम्यत्वादणुत्वतारतम्यवदिति ९६ नन्वांतरत्वे पश्वादिवदंतर्यामिणो दर्शनं किं न स्यादित्याशंक्य तेषामिव बाह्यत्वाभावान्न दृश्यत इत्यभिप्रायेणाह द्वित्र्यांतरत्वेति कु

पटादप्यांतरस्तंतुस्तंतोरप्यंशुरांतरः आंतरत्वस्य विश्रांतिर्यत्रासावनुमीयतां ९६
द्वित्र्यांतरत्वकक्ष्याणां दर्शनेप्ययमांतरः न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ९७
पटरूपेण संस्थानात्पटस्तंतोर्वपुर्यथा सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ९८

चेतनस्य १

तस्तर्हि तन्निर्णय इत्यत आह तत इति अपटरूपेणोत्तिष्ठेव तन्नाधिष्ठानमंतरेणाप्यवस्थानुपपत्तिर्युक्तिः श्रुतिस्तूदाहृतैव ९७ यस्य सर्वाणि भूतानि शरीरमित्याद्याथमाह पटरूपेणेति पटरूपेणावस्थितस्य तंतोः पटः शरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः ९८

सर्वज्ञत्वमपपाद्यैषांतर्यामीति अत्युक्तामंतर्यामित्वमुपपादयति विज्ञानमयेति अन्य उपस्थित्यादीति ॐन्यमयतिय
तस्तेः॰ तात्त्वयः ६३ अस्मिन्नर्थेंतर्यामिब्राह्मणं कार्त्स्न्येप्रमाणमिति दर्शयितुं तत्तदंशारे पाठयति योविज्ञानेति ॐस्थित्या
दिवा अमथ्येतो अक्रामति बुद्धाविति ६४ इदानीमंतर्यामिब्राह्मणस्यप्रतिपर्यायव्याख्यानेनयवाक्यभागात्र ।

विज्ञानमयमस्त्येषु कोशेष्वन्यत्रैवहि ॥ अंतस्तिष्ठन्नयमयतितेनांतर्यामितोदु
जेत ६३ बुद्धेति ॐज्ञानंतमोस्याधियानीह्यपञ्चधी वपुः धियमंतर्यमयतीत्येवंवेदे
नघोषितं ६४ तंततःपरेस्मितोयद्दुपादानतयातथा सर्वोपादानरूपत्वात्सर्वेष्वागम

ॐ
[illegible]
[illegible]

व्याख्यानस्यसर्वपर्यायसंचारित्वसिद्धयेयः सर्वेषुभूतेष्विति पर्यायं व्याचक्षाणोयः सर्वेषुभूतेषुतिष्ठन्नित्यस्या
र्थंसदृष्टांतमाह तंततःपरइति ६५

सर्वभूतानीति तेच हृदयपुंडरीके स्थिताः ननु तेषां कुतो हृद्यवस्थानमित्याशंक्य हृदयं तद्धियो विज्ञानमयाकारेण परिणामादित्याह तदुपादानेति ७२ यंत्रारूढानीत्यत्र यंत्रारोहणाख्ययोरर्थमाह देहादीति भ्रामयन्निति पदे प्रकृत्य

सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः तदुपादानभूतेशस्तत्र विक्रियते खलु ७२
देहादिपंजरं यंत्रं तदारोहोभिमानिता विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ७३
विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत् ७४
अंतर्यमयतीत्युक्त्यायमेवार्थः श्रुतौ श्रुतः पृथिव्यादिषु सर्वेत्र न्यायोयं योज्यतां धिया ७५
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः केनापि देवेन हृदि स्थितेन यथा
नियुक्तोस्मि तथा करोमि ७६ ॥

र्थमाह विहितेति ७३ इदानीं चरितभ्रमयमायापदयोरर्थमाह विज्ञानमयेति ७४ श्रौतमंतर्यमयतीति पदस्याप्ययमेवार्थ इत्याह अंतर्यमयतीति उक्त्याख्यानं पर्यायांतरेष्वतिदिशति पृथिव्यादिष्विति ७५ प्रवृत्तिजातस्य सर्वेश्वराधीनत्वे वचनांतरमुदाहरति जानामि धर्ममिति ७६ ॥ ॥

थैः संकोचितं भूतानां तन्तोरीयमयतीति वाक्यस्य तात्पर्यं सदृष्टान्तमाह श्लोकद्वयेन तन्तोरिति तन्तसंकोचादिभावर संकोचा
दि यथा भवति ६९ एवं पृथिव्यादिस्वरूपादानत्वेनावस्थितं तत्वात्मीयं यया यया वासनया यथा यथा घटादिकार्यस्वरूपेण विक्रि

तन्तोः संकोचविस्तारौ चलनादौ पटो यथा अवश्यमेव भवति न स्यात्तंत्रे परे मनाक् ६९
तथा तत्वात्मकं यत्र यया वासनया यथा विक्रियते तथावश्यं भवत्येव न संशयः ७०
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ७१

यते तथा तत्तत्कार्यं जातं तथा तथावश्यं भवतीति भावः ७० एवं संतत्यामिप्रतिपादितं कोऽस्ति सपत्न्यप्रसक्तिसपु
पन्यस्यति ईश्वर इति ७१ सर्वभूतानामिति पदस्यार्थमाह श्रीराम श्रीराम श्रीरामचंद्राय नमः ५५१

श्रुत्यापीश्वरस्य भीतिहेतुत्वमुक्तमित्याह आज्ञाया इति ईश्वरस्य भीतिहेतुत्वं किमर्थमुक्तमित्याशंक्य सर्वेश्वरत्वस्यांतर्यामित्वतः पार्थक्यसिद्धय इति मत्वाह सर्वेश्वरत्वमिति ८० बहिरंतश्चेश्वर एव नियामक इत्यत्र श्रुतिद्वयमाह एतस्य वा इति ८१ क्रमप्राप्तस्यैव योनित्वस्यार्थमाह जगद्योनिरिति प्रतिज्ञातार्थे प्रभवाप्ययौ हि भू

आज्ञायाः भीतिहेतुत्वं भीषास्मादिति हि श्रुतं सर्वेश्वरत्वमेतत्स्यादंतर्यामित्वतः पृथक् ८०
एतस्य वा अक्षरस्य प्रशासन इति श्रुतिः अंतः प्रविष्टः शास्ताऽयं जनानामिति च श्रुतिः ८१
जगद्योनिर्भवेदेष प्रभवाप्ययकृत्वतः आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ ८२

तानामिति वाक्यं हेतुत्वेन योजयति प्रभवेति प्रभवाप्ययावुत्पत्तिप्रलयौ तत्कर्तृत्वाज्जगद्योनिरित्यर्थः । उत्पत्तिप्रलयशब्दयोर्विवक्षितमर्थमाह आविर्भावेति उत्पत्तिप्रलयावाविर्भावतिरोभावौ मतावितियोजना ८२ ॥

ननुपरतन्त्रेश्वराधीनत्वेपुरुषप्रयत्नोव्यर्थःस्यादित्याशंक्यपुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमितिपरिहरतिनार्थइ
ति अर्थःप्रयोजनंपुरुषकारःपुरुषप्रयत्नः ७७ ननुपुरुषप्रयत्नस्यापीश्वररूपत्वेयमयति स्वामयतीतिप्रति
पादितमंतर्यामिप्रेरणंवृथास्यादित्याशंक्यतद्बोधेनस्वात्मासंगत्वाज्ञानलक्षणफलस्यसत्वान्नैवमितिपरिह

नार्थःपुरुषकारेणेत्येवमाशंक्यतांयतः ईशःपुरुषकारस्यरूपेणापिविवर्तते ७७
ईदृग्बोधेनेश्वरस्यप्रवृत्तिर्मैववार्यतां तथापीशस्यबोधेनस्वात्मासंगत्वधीर्जनिः ७८
तावतामुक्तिरित्याहुःश्रुतयःस्मृतयस्तथा श्रुतिस्मृतीममैवाज्ञेऽत्यपीश्वरभाषितं ७९

रतिईदृगिति ईदृग्बोधेनेशस्यपुरुषकारादिरूपेणाऽवस्थानज्ञानेनप्रवृत्तिः ऽअंतर्यामिरूपेणप्रेरणं ७८ आ
त्मनोऽसंगत्वज्ञानेनापिकंप्रयोजनमित्यतआह तावतेतिश्रुतिस्मृत्युदितत्वान्नातिलंघनीयत्वेस्मृतिंदर्शयति
श्रुतिस्मृती श्रुतिस्मृतीममैवाज्ञेयस्तेउल्लंघ्यवर्तते ऽआज्ञाछेदीममद्वेषीरौरवंनरकंव्रजेत ७९ ॥ ॥

नन्वेकएवेश्वरः कथंचेतनाचेतनजगदुपादानंभविष्यतीत्याशंक्योपाधिप्राधान्येनाचेतनोपादानंचित्प्राधान्येनचेतनोपादानंचभविष्यतीत्याह अचेतनानामिति ९७ ननुमायाविनईश्वरस्यजगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मनएवतदभिधानादितिशंकते द्वाभ्यां तमःप्रधानः तमोगुणप्रधानमायोपाधिकः क्षे

अचेतनानांहेतुःस्याज्जाड्यांशेनेश्वरस्तथा चिदाभासांशतस्त्वेषजीवानांकार
णंभवेत् ९७ तमःप्रधानःक्षेत्राणांचित्प्रधानश्चिदात्मनां परःकारणतामेति
भावनाज्ञानकर्मभिः ९८

त्राणांशरीरादीनांचित्प्रधानःशुद्धचेतनांश्चिदात्मनांचिदाभासानांभावनाज्ञानकर्मभिः भावनासंस्कारःज्ञानंदेवताध्यानादि कर्मपुण्यपापलक्षणं तैर्निमित्तभूतैरित्यर्थः ९८ ५ ५५

आविर्भावकारित्वं सदृष्टांतमुपपादयति आविर्भावयतीति यथा संकुचितचित्रपटः स्वस्य प्रसारणेन स्वनि-
ष्ठानि चित्राण्याविर्भावयति एवमीशोपीत्यर्थः ८३ तस्यैव पटस्य प्रकारांतरं दर्शयति पुनरिति तिरोभावतोत स
एव पटः संकुचितचित्राणि यथा तिरोभावयति तद्वदित्यर्थः ८४ आविर्भावतिरोभावयोर्दृष्टांतांतराणि

आविर्भावयति स्वस्मिन्विलीनं सकलं जगत् प्राणिकर्मवशादेष पटो यद्वत्प्रसारितः ८३
पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत् प्राणिकर्मक्षयवशात्संकोचितपटो यथा ८४
रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने तूष्णींभावनोद्यंद्वहृष्टयाविभो ८५
आविर्भावतिरोभावशालित्वेन हि तथा आरंभपरिणामादिचोद्यानां नात्रसंभवः ८६

दर्शयति रात्रिघस्राविति घस्रोऽहः ८५ जगदीश्वरस्य जग-
द्योनित्वं किमारंभकत्वेन किं वा तदाकारपरिणामित्वेन नाद्यः अद्वितीयस्याद्वितीयारंभकत्वायोगात् न द्विती-
यः निरवयवत्वस्य परिणामासंभवादित्याशंक्य विवर्त्तवादाश्रयणान्नायं दोष इति परिहरति आविर्भावेति ८६

एवमन्योन्याध्यासप्रसिद्धमीश्वरब्रह्मणोरेकत्वं पूर्वोदाहृतघट्टितपटदृष्टांतप्रमाणेन दृढयति अन्योन्येति २३ भ्रांत्यैकत्वापत्तौ दृष्टांतमभिधायापातदर्शिनां भेदाप्रतीतौ पूर्वोक्तमेव दृष्टांतं संदर्शयति २४ मेघाकाशेति ऐक्यं पश्यंति न भेद

अन्योन्याध्यासरूपोसावन्नलिप्तपटो यथा घट्टितेनैकतामेति तद्भ्रांत्यैकतां गतः २३
मेघाकाशमहाकाशौ विविच्येते न पामरैः तद्वद्ब्रह्मेशयोरैक्यं पश्यंत्यापातदर्शिनः २४
उपक्रमादिभिर्लिंगैस्तात्पर्यस्य विचारणात् असंगं ब्रह्म मायावी सृजत्येष महेश्वरः २५ ५

मित्यर्थः २४ कुतस्तर्हि ब्रह्मेशयोर्भेदावगतिरित्यत आह उपक्रमादिभिरिति उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इत्युक्तैः षड्विधैर्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्माऽसंगं मायावी स्रष्टेत्येवं गम्यत इति शेष २५

इतीति त्वंपदार्थ इव तत्पदार्थेऽप्यधिष्ठानारोपयोरन्योन्याध्यासस्य विवक्षितत्वान्नैवमिति परिहरन्ति १९ अन्योन्याध्यासमि
ति २० ननु सुरेश्वराचार्यैरीश्वरब्रह्मणोरन्योन्याध्यासः सिद्धवत्कृत्य व्यवहृत इति कुतोवगम्यत इत्याशंक्य श्रुत्यर्थपर्या
लोचनवशादिति दर्शयितुं श्रुतिमर्थतः पठति सत्यमिति २१ भवत्वेषा श्रुतिरनया कथमन्योन्याध्यासावगतिरित्यत

इति वार्त्तिककारेण जडचेतनहेतुता परमात्मन एवोक्ता नेश्वरस्येति चेच्छृणु १९ अन्योन्याध्या
समत्रापि जीवकूटस्थयोरिव ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः २० सत्यं ज्ञानमनंतं
यद्ब्रह्म तस्मात्समुत्थिताः खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः २१ आपातदृष्टितस्तत्र
ब्रह्मणो भाति हेतुता हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते २२ ॥ ॥

आह आपातेति तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य निर्गुणस्य ब्रह्मणो जगत्कारणत्वं जगत्कारणस्य मायाधीनचिदाभासस्य
च सत्यत्वमापाततः प्रतीयमानमन्योन्याध्यासमंतरेण न घटत इति भावः २२ ॥ श्री ॥ ॥ ॥

श्रुतावुपक्रमोपसंहारैकरूप्यदर्शनेनोक्तं ब्रह्मणोऽसंगत्वं स्पष्टयति सत्यमिति अतोऽसंगत्वनिर्णयो भवतीति शेष २६ मायाविन ईश्वरस्य स्रष्टृत्वं जीवस्य तत्र च बद्धत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति मायीति अस्मान्मायी सृजते विश्वमे

सत्यं ज्ञानमनंतं चेत्युपक्रम्योपसंहृतं यतो वाचो निवर्त्तंत इत्यसंगत्वनिर्णयः २६
मायी सृजति विश्वं सन्निरुद्धस्तत्र मायया अन्य इत्युपमावृत्ते श्रुतिस्तेनेश्वरः सृजेत् २७
आनंदमय ईशोयं बहुः स्यामित्यवैक्षत हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नो यथा भवेत् २८

तत्रस्मिंश्चान्यो मायया संनिरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं दर्शयतीत्यर्थः २७ एवंमानंदमयस्येश्वरस्य जगत्कारणत्वं प्रतीपाद्य तस्माज्जगदुत्पत्तिप्रकारमाह आनंदमयेति ईक्षित्वा च हिरण्यगर्भरूपोऽभूदित्यन्वयः तत्र दृष्टांतमाह सुप्तिरिति २८ " " " " " ।।।।।।।।।

तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादौ क्रमेण सृष्टिश्रवणादिदं सर्वमसृजतेति युगपच्छ्रवणाच्च कस्योपादेयत्वं कस्य वा हेयत्वमित्याकांक्षायां श्रुतियुक्त्यपेतत्वादुभयं साध्वित्याह क्रमेणेति एषा जगत्सृष्टिर्द्विविधश्रुतिसद्भावात्क्रमेण युगपच्च यथाश्रुति ज्ञेयेति योजना तत्रोपपत्तिः द्विविधस्वप्नदर्शनादिति लोके क्रमयुक्त-

क्रमेण युगपच्चैषा सृष्टिर्ज्ञेया यथाश्रुति द्विविधश्रुतिसद्भावाद्द्विविधस्वप्नदर्शनात्
२२ सूत्रात्मा सूक्ष्मदेहाख्यः सर्वजीवघनात्मकः सर्वाहंमानधारित्वात्क्रियाज्ञानादिश-
क्तिमान् २००

स्य अक्रमयुक्तस्य च स्वप्नपदार्थजातस्य दर्शनादिति भावः ०० हिरण्यगर्भस्य स्वरूपं निरूपयति सूत्रात्मेति सूत्रात्मा पटे सूत्रमिव जगत्यनुस्यूतः परमात्मा स्वरूपं यस्य स सूक्ष्मदेह इत्याख्या यस्य स तथाविधः सर्वजीवघनात्मकः सर्वेषां जीवानां लिङ्गशरीरोपाधिकानां घनात्मकः समष्टिस्वरूपः तत्र हेतुः सर्वाहंमानेति सर्वेषु व्यष्टिलिङ्गशरीरेष्वहमभिमानवत्त्वादिति भावः इच्छाज्ञानक्रियाशक्तिमांश्च २००

हिरण्यगर्भावस्थायां जातस्फूर्तीनां दृष्टांतमाह प्रत्यूष इति प्रत्यूष उषःकालः १ एवं लोकप्रसिद्धं दृष्टांतमौग्ध्याय यथाधौतद्
त्तिपूर्वीज्ञसंस्कारैर्निहितं लांछितं पदं दृष्टांतयति सर्वत इति यथा घट्टितः पटो मषीमयैराकारविशेषैर्लांछितो भव

प्रत्यूषे वा प्रदोषे वा मनोमंदे तमस्यथं लोको भाति यथा तद्वदस्पष्टं जगदीक्ष्यते १
सर्वतो लांछितो मष्या यथा स्याद्घट्टितः पटः सूक्ष्माकारैस्तथेशस्य वपुः सर्वत्र लांछितं २
सस्यं वा शाकजातं वा सर्वतोंऽकुरितं यथा कोमलं तद्वदेवैष पेलवो जगदंकुरः ३
आतपाभातलोको वा परितो वा वर्णपूरितः सस्यं वा फलितं यद्वत्तथा स्पष्टवपुर्विराट् ४

ति तथा मायिन ईश्वरस्य वपुरपंचीकृतसूक्ष्मभूतकार्यैर्लिंगशरीरैर्लांछितमित्यर्थः २ दृढ्यारोहाय वैभवाद्दृष्टांतांतर
माह सस्यं वेति ३ एवं सूत्रात्मस्वरूपं विशदीकृत्य तस्यैवावस्थाभेदे पंचीकृतकार्योपाधिकं विराजं दृष्टांतद्वयेन
विशदयति आतपेति सूर्योदयानंतरमातपेन प्रकाशितो लोक आतपाभातलोक ४ '' '' ''

तत्सद्भावे प्रमाणमाह विश्वरूपेति विश्वरूपाध्यायादौ कीदृग्रूपमुद्दिष्टमित्याकांक्षायां ब्रह्मादिस्तंबपर्यंतं जग
द्रूपमुद्दिष्टमित्याह धात्रादीति ५ एतावता प्रकृते किमायातमित्याशंक्य

विश्वरूपाध्याय एष उक्तः सूक्तेपि पौरुषे धात्रादिस्तंबपर्यंतानेतस्यावयवान्वि
दुः ५ ईशसूत्रविराड्वेधाविष्णुरुद्रेंद्रवन्हयः विघ्नभैरवमैरालमारिकायक्षराक्ष
साः ६ विप्रक्षत्रियविट्शूद्रा गवाश्वमृगपक्षिणः अश्वत्थवटचूताद्या यवव्रीहि
तृणादयः ७ जलपाषाणमृत्काष्ठवास्याकुद्दालकादयः ईश्वराः सर्व एवैते पूजिताः
फलदायिनः ८

तर्यामिप्रभृतिकुद्दालकादिपर्यंतं वस्तुजातं प्रत्येकमी
श्वरत्वेन पूज्यतामित्याह ईशेत्यादिश्लोकत्रयेण ६

ननु द्वैतनिवृत्तिलक्षणाया मुक्तेः स्वप्नदृष्टान्तेन तत्त्वबोधसाध्यत्वाभिधानमनुपपन्नं ज्ञाननिवर्त्यस्य द्वैतस्य स्वप्नतुल्यत्वाभावादित्याशंक्यान्यथा ग्रहणरूपत्वेन अस्य स्वप्नतुल्यत्वमस्त्येव त्रयमेतज्जाग्रत्सुषुप्तं स्वप्नं मायामात्रमिति श्रुत्याभिहितत्वादेवमित्याह अद्वितीयेति ईशजीवादिरूपेण वर्त्तमानं चेतनाचेतनात्मकं यदखिलं जगत्स्वप्नोयमद्वितीयब्रह्मतत्त्वे स्वप्न इति योजना ११ नन्वीशजीवयोः ब्रह्माभिन्नयोः कथं जगदन्तःपातित्वमित्याशंक्य त

अद्वितीयब्रह्मतत्त्वे स्वप्नोयमखिलं जगत् ईशजीवादिरूपेण चेतनाचेतनात्मकं ११
आनंदमयविज्ञानमयावीश्वरजीवकौ मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं १२
ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः १३

योर्मायाकल्पितत्वेन जगदन्तःपातित्वमित्याह आनंदमयेति १२ ताभ्यां सर्वं प्रकल्पितमित्युक्तं तत्र केन किं यत्कल्पितमित्याकांक्षायामाह ईक्षणादीति स ईक्षत लोकान्नु सृजा इत्यादिकया द्वारा प्रापद्यतेत्यंतया श्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्तृका तस्य त्रय आवसथा इत्यादिकया स एतमेव पुरुषं ब्रह्म ततममपश्यदित्यंतया प्रतिपादितः

संसारो जीवकल्पितः १३

तं यथा यथोपासते तत्तदेवतीति श्रुतिस्तत्तत्पूजातत्तत्फलसद्भावे प्रमाणमित्याह यथायथेति ननु सर्वेषामीश्वरत्वे फलवैषम्यं कुत इत्याशंक्य पूजानामधिष्ठानानां पूजानामश्वादीनां च सात्त्विकादिभेदेन वैषम्यमित्याह फ

यथायथोपासते तं फलमीयुस्तथा तथा फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः ९

मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा १०

लोत्कर्षेति ९ सांसारिकफलसिद्धिरेवं भवतु मुक्तिः कस्योपासनाद्भवतीत्याशंक्य ज्ञानव्यतिरेकेण न कोनापि भवतीत्याह मुक्तिरिति तत्र दृष्टांतमाह स्वप्नबोधमिति स्वजागरणमंतरेण स्वनिद्राकल्पितस्वप्नो यथा न निवर्त्तते तथा ब्रह्मतत्त्वज्ञानमंतरेण तदज्ञानकल्पितस्वसंसारो न निवर्त्तत इति भावः १० श्री ५०५

ननु तेषां ब्रह्मविद्याभावेपि द्वैतविद्याप्रयुक्त उत्तमाधमभावो दृश्यतेऽत उत्तमत्वप्रयुक्तं सुखं केषांचित्स्यादित्याशंक्य तस्य मुमुक्षुभिरनादरणीयत्वं दृष्टांतेनाह उत्तमाधमेति १८ जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावाच्च मुमुक्षुभिस्तत्र मतिर्न निवेशनीयेत्युपसंहरति तस्मादिति तर्हि किं कर्तव्यमित्याशंक्य श्रुतिविचारेण ब्रह्मबोध एव कर्तव्य इत्याह १९

उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेन किं स्वप्नस्थराज्यभिक्षाभ्यां न बद्धः स्पृश्यते खलु १८
तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः कार्या किंतु ब्रह्मतत्त्वं विचार्यं बुध्यतां च तत् १९
पूर्वपक्षतया तौ चेत्तत्त्वनिर्णयहेतुतां प्राप्नुतोऽस्तु निमज्जस्व तयोर्नैतावता वशः २०

किंत्विति १९ ननु ब्रह्मतत्त्वनिश्चयाय तयोः स्वरूपं हेयत्वेन ज्ञातव्यमित्याशंक्य तथात्वे जीवेशवादयोरेवं बुद्धिर्न परिसमापनीयेत्याह पूर्वपक्षतयेति एतावता पूर्वपक्षतया तत्त्वनिर्णयहेतुत्वसंभवेन तयोर्जीवेशवादयोरेवावशो विवेकज्ञानशून्यो न निमज्जस्वेति योजना २०

ननुब्रह्मणएवपारमार्थिकत्वेवादिनांजीवेश्वरतत्त्वविषयाविप्रतिपत्तिः कुतइत्याशंक्यभ्रान्तिसिद्धतत्त्वज्ञानशून्यत्वादित्याह अद्वितीयमिति २४ जीवेश्वरविषयायावादिविप्रतिपत्तेस्तत्त्वज्ञानमूलत्वेतथाविधतत्त्वेनतेबोधनीयाइत्याशंक्यवृथाश्रमत्वान्नेत्याह ज्ञात्वेति २५ ईश्वरेजीवेचभ्रान्त्याविप्रतिपन्नान्वादिनोविभज्यदर्शयति

अद्वितीयंब्रह्मतत्त्वमसंगंतन्नजानते जीवेशयोर्मायिकयोर्वृथैवकलहंययुः
२४ ज्ञात्वासदातत्त्वनिष्ठाननुमोदामहेवयं अनुशोचामएवान्यान्नभ्रान्तैर्विवदा
महे २५ तृणार्चकादियोगान्ताईश्वरभ्रान्तिमाश्रिताः लोकायतादिसांख्यान्ताजीव
विभ्रान्तिमाश्रिताः २६ अद्वितीयब्रह्मतत्त्वंनजानंतियदातदा भ्रान्ताएवाखिलास्तेषां
क्वमुक्तिः क्वेहवासुखं २७

तृणार्चकादीति २६ कुतोभ्रांतत्वंतेषामित्यतआह अद्वितीयेति ततःकिं तत्राह तेषामिति परिगृहीतपक्षप्रतिपादनाभिनिवेशेनचित्तविश्रान्त्यभावान्नैहिकमपिसुखंतेषामित्याह क्वेहवासुखमिति २७ " " " "

तो हि पदार्थशोधनं किमर्थमित्यत आह अनादीति अत्र मायाशब्देन स्वाश्रयव्यामोहिकाऽविद्या लक्ष्यते तया विपरीत
ज्ञानं प्राप्ताः कर्तृत्वादिमत्त्वं जीवस्य सर्वज्ञत्वादिगुणयोगित्वं चेश्वरस्य पारमार्थिकं मन्यंते अतस्तन्निवृत्त्यर्थ

अनादिमायया भ्रांता जीवेशौ सुविलक्षणौ मन्यंते तद्व्युदासाय केवलं शोधनं तयोः २३
अत एवात्र दृष्टांतो योग्यः प्राक्सम्यगीरितः घटाकाशमहाकाशजलाकाशाभ्रखात्मकः २४
जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः आधारौ तु घटाकाशमहाकाशौ सुनिर्मलौ २५

मेव शोधनं क्रियत इत्यर्थः २३ पदार्थशोधनप्रकारमेव दि
दर्शयिषुस्तदुपायत्वेन पूर्वोक्तं दृष्टांतं स्मारयति
अत एवेति यतः पदार्थशोधनं कर्तव्यमत एवेत्यर्थः २४ पदार्थशोधनप्रकारमाह जलाभ्रेति ये जलाकाशाभ्रखे
ते जलाभ्रोपाध्यधीनत्वादपारमार्थिके तयोराधारभूतौ घटाकाशमहाकाशौ सुनिर्मलौ जलाभ्रोपाधिनिरपेक्षाका
शाभेदाभिन्नावित्यर्थः २५

ननु सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेन भवद्भिरप्युपादेयत्वान्न तयोः पूर्वपक्षत्वमिति शंकते असंगचिदिति सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेपि तयोर्वास्तवभेदस्यैतैरंगीकारान्नायमस्मत्सिद्धांत इत्यत आह न

असंगचितवपुर्जीवः सांख्योक्तस्तादृगीश्वरः योगोक्तस्तत्वमोरर्थौ शुद्धौ ताविति चेच्छृणु २१
न तत्वमोरुभावर्थावस्मत्सिद्धांततां गतौ अद्वैतबोधनायैव सा कक्षा काचिदिष्यते २२ ॥॥

तत्वमोरिति तत्वंपदयोरुभावर्थावस्मत्सिद्धांततत्वं न गताविति योजना ननु कूटस्थब्रह्मशब्दाभ्यां शुद्धौ तत्वंपदार्थौ भवद्भिरपि मुख्यौ निरूपितावित्याशंक्याह अद्वैतबोधनायैवेति लोकप्रसिद्धभेदनिरासद्वारा तदैक्यप्रतिपादनायैव तौ भेदेनाभ्युदितौ न तु तयोर्भेदः प्रतिपाद्यत इति भावः २२

पंचदशी अभिसंधिमाविष्करोति यथेति जीवतोर्विशेष्यविशेषणाकारेणाभासमानयोः ३० असंभवमेव स्पष्टयति अ चित्रदी०
३६ वश्यमिति फलितमाह कोऽस्येति ३१ संगनियमनयोरविवेककार्यत्वाद्विवेकज्ञानेन चाविवेकनिवृत्तौ कुतः पु

यथा स्वप्नादिनित्यत्वं दुःसंपाद्यं तथात्मनः असंगत्वं न संभाव्यं जीवतोर्जगदीशयोः ३०
अवश्यं प्रकृतिः संगं पुरेवापादयेत्तथा नियच्छत्येतमीशोऽपि कोऽस्य मोक्षस्तथा सति ३१
अविवेककृतः संगो नियमश्चेति चेत्तदा बलादापतितो मायावादः सांख्यस्य दुर्मतेः ३२

नः संगाद्युत्पत्तिरिति शंकते अविवेकेति एवं सत्यपसिद्धांतापात इति परिहरति बलादिति अयं भावः अवि राम
वेको नाम किं विवेकाभावः किं वा तदन्यः उत तद्विरोधी नाद्यः अभावमात्रस्य भावकार्यजनकत्वायोगान्न द्वि ३८
तीयः विवेकादन्यस्य घटादेः संगहेतुत्वादर्शनात् तृतीये तु तस्य भावरूपाज्ञानत्वमेवेति मायावादप्रसंग इति ३२

दार्ष्टान्तिकमाह एवमिति २६ ननु पदार्थद्वयशोधनकक्षोपयोगित्वेनापि सांख्ययोगमतद्वयमङ्गीकार्यमिति चेदत्यल्प-
मिदमुच्यते इतरेषामपि शास्त्राणां तत्तत्कक्षोपयोगित्वेनास्माभिरभ्युपेयत्वादित्याह एतदिति २७ कुतस्तर्हि सांख्य-

एवमानन्दविज्ञानमयौ मायाधियौ विभो तदधिष्ठानकूटस्थब्रह्मणी तत्त्वनिर्मले २६ एतत्क-
क्षोपयोगेन सांख्ययोगौ मतौ यदि देहोऽन्नमयकक्षत्वादात्मत्वेनाभ्युपेयतां २७ ऽआत्मभेदोऽज्ञ-
गत्सत्यमीशोऽन्य इति चेद्वयं त्यज्यते तैस्तदा सांख्ययोगावेदान्तसंगतिः २८ जीवासंगत्वमात्रे-
ण कृतार्था इति चेत्तदा स्वकुंदनादिनित्यत्वमात्रेणापि कृतार्थता २९

योगयोर्वेदान्तविरोधित्वमित्याशंक्य जीवभेदजगत्सत्यत्वेश्वरताटस्थ्यलक्षणांशा इत्याह ऽआत्मभेद इति २८ ननु जी-
वस्यासंगत्वमात्रस्यैवमस्ति सिद्धिः किमद्वैतबोधेनेत्याशंक्याद्वैतज्ञानमन्तरेणासंगत्वादिकं न संभाव्यत इत्यभिसंधिं
हृदि निधायोत्तरमाह जीव इति ॥२९॥

एवंजीवेश्वरादिभेदस्यमायामयत्वमुपपादितमुपसंहरति मायाख्याया इति ३६ ननुजीवेश्वरयोर्मायिकत्वेनतद्भेदस्यमिथ्यात्वेपिकूटस्थब्रह्मणोः पारमार्थिकत्वेनतद्भेदोपिपारमार्थिकः स्यादित्याशंक्यभेदप्रयोजकस्यस्वरूपवैलक्षण्यस्याभावान्नैवमितिपरिहरति कूटस्थेति नाममात्राद्भेदप्रतीतावपिवस्तुतोभेदाभावेदृष्टांतंपूर्वोक्तंस्मारय

मायाख्यायाः कामधेनोर्वत्सौजीवेश्वरावुभौ यथेच्छंपिबतांद्वैतंतत्त्वंत्वद्वैतमेवहि ३६
कूटस्थब्रह्मणोर्भेदोनाममात्रादृतेनहि घटाकाशमहाकाशौवियुज्येतेनहिक्वचित् ३७
यदद्वैतंश्रुतंसृष्टेः प्राक्तदेवाद्यचोपरि मुक्तावपिवृथामायाभ्रामयत्यखिलान्जनान् ३८

ति घटाकाशेति ३७ एवंभेदस्यमिथ्यात्वसमर्थनेनकिंफलमित्यतआह यदद्वैतमिति सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयंब्रह्मेतिश्रुतौ यदद्वितीयंब्रह्मप्रतिपादितंतदेवकालत्रयेप्यबाध्यत्वेनवास्तवंनभेदइतिभावः कुतस्तर्हिसर्वैर्भेदेऽभिनिवेशःक्रियतइत्यतआह वृथामायेति तत्त्वज्ञानरहितत्वादभिनिवेशंकुर्वंतीति भावः ३८

मद्वैताभ्युपगमे बंधमोक्षव्यवस्थानुपपत्तेरात्मभेदोंगीकर्त्तव्य इति चोदयति बंधमोक्षेति। एकस्यात्मनो माययाबं
धमोक्षव्यवस्थोपपत्तेर्मैवमिति परिहरति नयत इति ३३ मायापि कथं व्यवस्थापयेदित्याशंक्य तस्य दुर्घटकारि
त्वस्वाभाव्यादित्याह दुर्घटमिति बंधस्याविद्यकत्वेपि मोक्षो वास्तवोभ्युपेतव्य इत्याशंक्य श्रुतिविरोधान्नैवमि

बंधमोक्षव्यवस्थार्थमात्मनानात्वमिष्यतां इति चेन्न यतो माया व्यवस्थापयितुं क्ष
मा ३३ दुर्घटं घटयामीति विस्पष्टं किं पश्यसि वास्तवौ बंधमोक्षौ तु श्रुतिर्न सहते
तरां ३४ न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थ
ता ३५

त्याह वास्तवाविति न सहते तरामिति न सहते तरां नैव सहत इत्यर्थः बंधमिव मोक्षमपि वास्तवं न सहत इति भा
वः ३४ मोक्षादेर्वास्तवत्वप्रतिषेधिकां श्रुतिं पठति न निरोध इति निरोधो नाशः उत्पत्तिर्देहसंबंधः बद्धः सुखदुः
खादिधर्मवान् साधकः श्रवणाद्यनुष्ठाता मुमुक्षुः साधनचतुष्टयसंपन्नः मुक्तः निवृत्ताविद्यः इत्येतत्सर्वं वस्त
तो नास्तीत्यर्थः ३५

अद्वैतंभातीत्युक्तिःशाब्दजएवनानुभवतोऽतोनतन्निश्चयइतिशंकते नाद्वैतमिति अनुभवागोचरत्वमसिद्धमितिपरिहरति नचिद्रूपेणेति घटःस्फुरतिपटःस्फुरतिघटादिष्वनुस्यूतरूपेणभानादित्यर्थः ननुचिद्रूपत्वस्यभानेपितत्कार्त्स्न्येननप्रतीयतइतिशंकते अशेषेणेति साकल्येनभानाभावोद्वैतेपिसमानइत्याह द्वैतंकि

नाद्वैतमपरोक्षंचेन्नचिद्रूपेणभासनात् अशेषेणनभातंचेद्द्वैतंकिंभासतेखिलं ४२
दिङ्मात्रेणविभानंतुद्वयोरपिसमंखलु द्वैतसिद्धिवदद्वैतसिद्धिस्तेतावतानकिं ४३

मिति ४२ एवंदोषसाम्यमभिधायपरिहारसाम्यमाह दिङ्मात्रेणेति दिङ्मात्रेणैकदेशेन द्वयोर्द्वैताद्वैतयोरित्यर्थः एतावताकथंपरिहारसाम्यमित्याशंक्याह द्वैतसिद्धिवदिति तेतवपक्षेतावतैकदेशस्फूर्तिप्रतीतिसद्भावेन द्वैतसिद्धिवद्द्वैतनिश्चयइवाद्वैतसिद्धिरद्वैतनिश्चयोपिकिंनभवतिकिंतुभवत्येवेत्यर्थः ४३

ननुप्रपंचस्यमायामयत्वंतत्वस्याद्वितीयत्वंचयेवर्णयंतितेपिसंसरंतोदृश्यंतेऽतस्तत्वज्ञानेनकिंप्रयोजनमितिशंक
ते येवदंतीति कर्मवशात्केषांचिद्व्यवहारेसत्यपिपूर्ववदभिनिवेशाभावान्नैवमितिपरिहरति नयथेति ३९
ज्ञानिनांभ्रांत्यभावंदर्शयितुमज्ञानिनांनिश्चयंतावदाह ऐहिकेति इहलोकेभवःऐहिकःपुत्रकलत्रादिपोषण

येवदंतीत्यमीतेपिभ्राम्यंतेविषयाश्चकिं नयथापूर्वमेतेषामत्रभ्रांतेरदर्शनात् ३९
ऐहिकामुष्मिकःसर्वःसंसारोवास्तवस्ततः नभातिनास्तिचाद्वैतमित्यज्ञानिविनिश्च
यः ४० ज्ञानिनांविपरीतोस्मान्निश्चयःसम्यगीष्यते स्वस्वनिश्चयतोवद्धोमुक्तोऽहंवेति
मन्यते ४१

रूपः अमुष्मिन्परलोकेभवःआमुष्मिकः स्वर्गसुखाद्यनुभवरूपः ४० तत्वज्ञविनिश्चयस्यातोवैलक्षण्यंदर्श
यति ज्ञानिनामिति अद्वैतंपारमार्थिकंभातिचसंसारस्त्वपारमार्थिकइतिनिश्चयइत्यर्थः ततःकिमित्या
शंक्यस्वस्वनिश्चयानुसारेणफलंभवतीत्याह स्वस्वेति ४१ ॥ ॥ ॥ ॥

नन्वेवमद्वैतनिश्चये कृतेऽपि पुनः पुनर्द्वैतसत्यत्वं पूर्ववासनया भातीत्याशंक्य तन्निवृत्तये पुनः पुनर्मिथ्यात्वं विचारयेदित्याह
पुनर्द्वैतस्येति । आवृत्तिरसकृदुपदेशादिति चतुर्थाध्याये व्यासेनात्मनः श्रवणाद्यावृत्तेन स्वविहितत्वादिति भावः ५७
कियंतं कालमित्थं विचारणीयमित्याशंक्य तत्रापरोक्षविद्याप्तौ विचारोऽयं समाप्यत इति विचारकालावधेः सत्त्वादद्वैते

पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं तथा पुनः परिशीलय को वात्र प्रयासस्तेन ते वद ५७
कियंतं कालमिति चेत्खेदोऽयं द्वैत इष्यतां अद्वैते तन्न युक्तोऽयं सर्वानर्थनिवारणात् ५८
क्षुत्पिपासादयो दृष्टा यथापूर्वं मयीति चेत् मच्छब्दवाच्योऽहंकारस्तस्यैते नेति को वदेत् ५९

तद्विचारेऽयं खेदो युक्तः इत्याह कियंतमिति ५८ नन्वेवमद्वैतात्मतत्त्वापरोक्षज्ञानवत्यपि मयि क्षुत्पिपासाद्यनर्थस्य परिदृ
श्यमानत्वादनर्थनिवारकत्वमात्मज्ञानस्यासिद्धमिति शंक्यते क्षुत्पिपासादय इति किं मच्छब्दवाच्योऽहंकारे दृश्यते उ
त मच्छब्दलक्षिते चिदात्मनीति विकल्प्याद्यमंगीकरोति मच्छब्दवाच्य इति न द्वितीयः तस्यासंगत्वादविषयत्वाच्चेति
३ किं तद्द्वैतप्रतिभास एव न युक्तः बहिरेव द्रष्टव्यः ५९ ९

पूर्ववादिप्रकारांतरेणाद्वैतासिद्धिं शंकते अद्वैतं द्वैतरहितं तयोः परस्परविरोधात्तथा एवं सति द्वैतप्रतीतावद्वैतं स-
न संभवतीत्यर्थः ननु तर्हि द्वैतस्याप्यद्वैतविरोधित्वाद्द्वैतप्रतिभाससमाने द्वैतस्यासिद्धिरिति चोद्यं समानमित्याशं-
क्याह पूर्ववादी चिज्ज्ञानं त्विति भवन्मते चिदुपपत्तिरेव द्वैतप्रतीतित्वात्तस्याश्च द्वैतविरोधित्वाभावान्नोभयोः सा-

द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदं चिज्ज्ञानं त्वविरोधं स्याद्द्वैतस्यातोऽसमे उभे ४४
एवं तर्हि श्रुत्या द्वैतमसन्मायामयत्वतः तेन वास्तवमद्वैतं परिशेषाद्विभासते ॥ ४५
अचिंत्यरचनारूपं मायैव सकलं जगत् इति निश्चित्य वस्तुत्वमद्वैते परिशिष्यतां ४६

म्यमिति भावः ४४ प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावान्न वास्तवाद्वैतविघातित्वमिति परि अचिंत्येति सिद्धान्ती एवमि- हरति
ति प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः ४५ परिशेषप्रकारमेव दर्शयति अचिंत्येति न चिंत्या-
अचिंत्या रचनारूपं यस्य तत्तथाविधं सकलं जगन्मायैव मिथ्यैवेत्यनेन प्रकारेणानिर्वचनीयत्वान्मिथ्यात्वं द्वैतस्य निश्चि-
त्य वास्तवमद्वैतमेव परिशिष्यतामित्यर्थः ४६ ॥ ॥ ॥

नन्वचिंत्यरचनात्वंमिथ्यापदार्थलक्षणमुक्तंचिदात्मन्यतिव्याप्तमितिशंकते चिद्रूपीति प्रागभावयुतत्वेसत्यचिंत्यरचनात्वंमिथ्यात्वलक्षणमितिविवक्षुरचिंत्यरचनात्वमात्मनोंगीकरोति तर्ह्यस्त्विति एवमंगीकारेऽपसिद्धांत एवापद्यतेदित्याशंक्यपरिहरति नोवयमिति तत्रहेतुमाह नित्यत्वेति वयंचितिंह्यचिंत्यरचनांनोब्रूमइतियोजना ५३ चितेर्नित्यत्वंकुतइत्याशंक्यप्रागभावानुभवाभावादित्याहप्रागभावइति यतश्चितेःप्रागभावोनानुभू

चिद्रूपेप्यचिंत्यरचनायदितर्ह्यस्तुनोवयं चितिंह्यचिंत्यरचनांब्रू
मोनित्यत्वकारणात् ५३ प्रागभावोनानुभूतश्चितेर्नित्याततश्चितिः

ततस्ततोनित्येतितियोजना इदमत्राकूतं चितेःप्रागभावोस्ती तिवदन्वक्तव्यः चित्प्रागभावः किंचितानुभूयते उतान्येननान्येन तस्यजडत्वेनानुभवितृत्वाभावात् चितानुभूयत इत्यपिपक्षेकिंचिदंतरेणोतस्वेनैवनाद्यः ग्रहेतवाद्चिदंतरस्यैवाभावात् तत्स्वीकारेपिचित्प्रतियोगिकस्याभावस्य विग्रहणमंतेणग्रहीतमशक्यत्वात् तस्यापिग्रह्यमाणत्वेघटादिवदचित्वापत्तेः नापिद्वितीयः स्वाभावस्यस्वेनग्रहीतुमशक्यत्वादिति ॥

वस्ततस्तत्प्रतीत्यभावेपि भ्रांत्या तत्प्रसक्तिः स्यादिति शंकते चिद्रूपेपीति एवं तर्हि हेतोरध्यासस्य निवृत्तये सदा विवेकः क्रियतामित्याह माध्यासमिति ५० अनादिवासनावशात्पुनःपुनरध्यासागमने तन्निवृत्तये विवेक एवावर्तनीयो नो

चिद्रूपेपि प्रसज्येयं तादात्म्याध्यासतो यदि माध्यासं कुरु किं तत्त्वविवेकं कुरु सर्वदा ५०
झटित्यध्यास आयाति दृढवासनयेति चेत् आवर्तयेद्विवेकं च दृढं वासयितुं सदा ५१
विवेके द्वैतमिथ्यात्वं युक्त्यैवेति न भण्यतां अचिंत्यरचनात्वस्यानुभूतिर्हि स्वसाक्षिकी ५२

पायांतरमित्याह झटितीति ५१ ननु विचारेणाद्वैतस्य मायामयत्वं युक्त्यैव सिध्यति नानुभवत इत्याशंक्याचिंत्यरचना॰
~~पायांतरमित्याह झटितीति~~ त्वलक्षणमिथ्यात्वानुभवस्य स्वसाक्षिकत्वान्नैवमिति परिहरति विवेकइति ५२ ८८५

एवं च सत्यद्वैतस्यापरोक्षत्वं नास्तीति वदतो व्याघातश्च स्यादित्याह चित्प्रत्यक्षेति चिद्रूपेणाभासमानादित्यभिहितयुक्ति समुच्चयार्थश्चशब्दः अद्वैतमपरोक्षं नेत्येतत्कथं न व्याहतं चेति योजना ५६ एवं वेदान्तार्थं जानतामपि पुरुषाणां केषांचिदत्र विश्वासः कुतो न जायत इति पृच्छति इत्थमिति सम्यग्विचारस्याकृतत्वादिति विवक्षुः प्रतिवंदीमाहेति

चित्प्रत्यक्षा ततोऽन्यस्य मिथ्यात्वं चानुभूयते नाद्वैतमपरोक्षं चेत्येतन्न व्याहतं कथं ५६
इत्थं ज्ञात्वाप्यसंतुष्टाः केचित्कुत इतीर्यतां चार्वाकादेः प्रबुद्धस्याप्यात्मा देहः कुतो वद ५७
सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत्तथा असंतुष्टाश्च शास्त्रार्थं त्वानत्वेक्षंतु विशेषतः ५८
यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः

चार्वाकादेरिति आदिशब्देन पाषण्डा गृह्यंते प्रबुद्धस्योहापोहकुशलस्य ५७ प्रतिवंदीमोचनं शंकते सम्यगिति साम्येन समाधत्ते तथेति धीदोषादित्यनुषज्यते तस्मादसंतुष्टा एव शास्त्रार्थः ५८ इत्थं तत्त्वं विचार्य तज्जन्यतत्त्वज्ञानफलं विचारयितुं तत्प्रतिपादकां श्रुतिं पठति यदेति अथ मर्त्योऽमृतो भवत्यत्र ॥ ॥ ॥

ननु चैतन्यस्य प्रमात्रादिभेदरूपत्वात्तदभावस्यचैतन्येनैवानुभवितुमशक्यत्वात्स्वनुभवितृं तत्प्रागभावस्य चैतन्यं वेदेव चैतन्यस्या
पि नित्यत्वापत्तिरित्याशंक्यानुभवितृं तत्प्रागभावोऽसिद्ध इति परिहरति चैतन्येति जाग्रदादिचैतन्याभावस्य सुषुप्तौ साक्षिणानु
भूयमानत्वान्मनसः साक्षी सर्वस्य साक्षीति श्रुतेश्चेति भावः ५४ एवं च प्रागभावयुतत्वे सत्यचिंत्यरचनात्वस्य मिथ्यात्वलक्ष

चैतन्यस्य प्रागभावस्तच्चैतन्येनानुभूयते ५४ प्रागभावयुतं द्वैतं रच्यते
हि घटादिवत् तथापि रचनाचिंत्या मिथ्या तेनेंद्रजालवत् ५५

णस्य सद्भावात् द्वैतं मिथ्यात्वं सिद्धमित्याह प्रागभावेति प्रागभावयुतमिति हेतुगर्भितं विशेषणं द्वैतं प्रागभावयुतत्वाद्घटा॰
दिवद्रच्यते हि तथापि रच्यमानत्वे सत्यचिंत्यरचनात्वेनेंद्रजालवदिंद्रजालिकप्रासादवन्मिथ्येत्यर्थः चितिस्तावत्स्वप्र॰
काशत्वेन नित्यापरोक्षावभासते चिद्व्यतिरिक्तस्य च मिथ्यात्वं तयैव चितानुभूयत इति दर्शितं ५५ ॥श्री ॥ ॥

वाक्यशेषत इत्यनेन वाक्येनेत्यर्थः ६० ननु लोके कामशब्देनेच्छाभेदा एवोच्यतेऽतः कथं तस्य ग्रंथित्वेन व्याख्यानमित्याशंक्याध्यासमूलस्यैवेच्छाविशेषस्य कामशब्दवाच्यत्वं नेच्छामात्रस्येत्याह अहंकारेति ६१ नन्वध्यासमूलस्यैव कामस्य त्याज्यत्वे सतीतरोऽभ्युपेतव्यः स्यादित्याशंक्याबाधकत्वादभ्युपपन्नमेवेत्याह अप्रवेश्येति अहंकारं चिदात्मानम-

अहंकारचिदात्मानावेकीकृत्याविवेकतः इदं मे स्यादिदं मे स्यादितीच्छाः कामशब्दिता ६१ अप्रवेश्य चिदात्मानं पृथक्पश्यंस्त्वहंकृतिं इच्छंस्तु कोटिवस्तूनि न बाधो ग्रंथिभेदतः ६२ ग्रंथिभेदेपि संभाव्या इच्छाः प्रारब्धदोषतः बुद्ध्वापि पापबाहुल्यादसंतोषो यथा तव ६३

प्रवेश्य तादात्म्याध्यासमानंतभोग्येत्यर्थः ६२ नन्वध्यासाभावे कामानामनुदय एव स्यादित्याशंक्यारब्धकर्मवशात्तेषां धर्मामुत्पत्तिः संभवतीत्याह ग्रंथिभेदेपीति तत्र दृष्टांतमाह बुद्ध्वापीति ६३ अध्यासाभावेऽहंकारगतेच्छादेरबाधकत्वं दृष्टांतद्वयप्रदर्शनेन विशदयति अहंकारेति यथा देहगतव्याध्यादिभिरहंकारसाक्षिणो बाधो नास्ति देहसंबंधरहितत्वात्तथा वृक्षादिगतैर्जन्मादि ८

ब्रह्म समश्नुतेऽस्यस्यांत ब्रह्मोन्नगार्हेऽस्य मुमुक्षोर्हृदि श्रिता ये कामास्तादात्म्याध्यासमूला इच्छादयः संति ते सर्वे यदा यस्मिन्
काले प्रमुच्यंते तत्त्वज्ञानेनाध्यासनिवृत्तौ निवर्त्तंते अथ तदानीमेव मर्त्यः पूर्वदेहतादात्म्याध्यासेन मरणशीलः पुरुषः अ-
मृतः भवति अध्यासाभावेन तद्रहितो भवति = तत्र ब्रह्म समश्नुत इति अत्रास्मिन्नेव देहे ब्रह्म सत्यादिलक्षणं समश्नुते स-

इति श्रौतं फलं दृष्टं नेति चेद्दृष्टमेव तत् ५९ यदा सर्वे प्रभिद्यंते हृदयग्रंथयस्त्वि-
ति कामानां ग्रंथिरूपेण व्याख्यातो वाक्यशेषतः ६०

म्यगाप्नोतीत्यस्याः श्रुतेरर्थः श्रुत्या प्रतिपादितं फलं कामनिवृत्त्यादिलक्षणं नानुभवसिद्धं किं तु शास्त्रमेवेति शंकते इति श्रौ-
तमिति समनंतरश्रुतिवाक्यतात्पर्यालोचनया तस्य दृष्टत्वं सिध्यतीत्यभिप्रायेण परिहरति दृष्टमेव तदिति ५९
तस्य दृष्टत्वस्य स्पष्टीकरणाय तद्वाक्यमुदाहृत्य तस्यार्थमाह यदा सर्वे इति अनेन वाक्यशेषेण कामप्रमोकस्य ग्रं-
थिभेदत्वेन व्याख्यातत्वाद्ग्रंथिभेदस्य चाहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्यानुभवसिद्धत्वाज्ज्ञापत्यस-
तेतिभावः

ज्ञानिनो ग्रंथिभिच्छून्यत्वे गीतावाक्यं प्रमाणयति न द्वेष्टीति संप्रवृत्तानि प्राप्तानि दुःखानि न द्वेष्टि निवृत्तानि सुखानि न कां
क्षति उदासीनवद्वर्तत इत्यर्थः ग्रंथिभिदा ग्रंथिभेदः ६९ इदं वाक्यमौदासीन्यविधिपरं न तु ग्रंथिभेदे प्रमाणमिति शं

न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति उदासीनवदासीन इति ग्रंथिभिदोच्यते ६९
औदासीन्यं विधेयं चेद्वच्छब्दव्यर्थता तदा न शक्ता अस्य देहाद्या इति चेद्रोग एव सः ७०
तत्त्वबोधं क्षयं व्याधिं मन्यंते ये महाधियः तेषां प्रज्ञातिविशदा किं तेषां दुःशकं वद ७१

कते औदासीन्यमिति विधिपरत्वे वच्छब्दो व्यर्थः स्यादिति परिहरति वच्छब्देति ज्ञानिदेहादेरकार्यक्षमत्वादप्रवृत्तिर्न
तु ग्रंथिभेदादित्याशंक्याह सति न शक्ता इति ७० भवतु को दोषस्तत्राह तत्त्वबोधमिति दुःशकमसाध्यमित्यर्थः ७१

भिरेवमध्यासनिवृत्तावहंकारगतेच्छादिभिरपि तिभावः ६४ चिदात्मनोऽसंगत्वस्यैकरूपत्वात्पूर्वमपि कामादिबाधोनास्ती
तिशंकते ग्रंथिभेदादिति एवंविधबोधस्यैवग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वादिदं बोधमस्मदुक्तमित्याह

अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किंभवेत् ६४
ग्रंथिभेदात्पुराप्येवमितिचेत्तन्नविस्मर अयमेवग्रंथिभेदस्तवतेनकृतीभवान् ६५ नैवं
जानंतिमूढाश्चेत्सोयंग्रंथिर्नचापरः ग्रंथितद्भेदमात्रेणवैषम्यंमूढबुद्धयोः ६६ प्रवृत्तौ
वानिवृत्तौवादेहेंद्रियमनोधियां नकिंचिदपिवैषम्यमस्त्यज्ञानिविबुद्धयोः ६७ व्रात्यश्रो
त्रिययोर्वेदपाठपाठकृताभिदा नाहारादावस्तिभेदः सोयंन्यायोत्रयोज्यतां ६८ ॥ श्री ५

तन्नविस्मरेति ६५ एवंविधज्ञानाभावएवग्रंथिरित्याह नैवमिति ननुज्ञानिनोपीच्छाद्युपरमेज्ञान्यज्ञानिनोः कुतो वैल
क्षण्यमित्याशंक्यग्रंथिभेदाभेदातिरेकेणनकुतोपीत्याह ग्रंथितद्भेदेति ६६ कारणांतराभावमेवविशदयति प्रवृत्तावि
ति ६७ उक्तार्थेदृष्टांतमाह व्रात्येति ६८ ॥ ॥ ॥ ५

दशी
४६

संगोपि कुतस्त्याज्य इत्यत आह संगाद्धीति ७४ ननु तर्हि मानससंगा एव त्याज्यत्वेनः संगस्वरूपाणां बहिर्वैव-
हारवतां संगित्वादिकं जनैः कथमुच्यते इत्याशंक्य शास्त्रहृत्तात्पर्यज्ञानमूर्खा अन्यत्वादित्याह अज्ञात्वेति ५

संगाद्धि बाध्यते लोके निःसंगः सुखमश्नुते तेन संगः परित्याज्यः सर्वे
दा सुखमिच्छता ७४ अज्ञात्वा शास्त्रहृदयं मूढो वदत्यन्यथान्यथा मूर्खा
णां निरीयत्वात्ता समक्षसिद्धांत उच्यते ७५ वैराग्यबोधोपरमाः सहाया
स्ते परस्परं प्रायेण सह वर्त्तंते वियुज्यंते क्वचित्क्वचित् ७६ ॥ ॥॥॥

राम
४६

अतो मूढव्यवहारो नात्र विचारणीय इत्या-
ह मूर्खाणामिति तर्हि किमनुसंधेयमित्याकांक्षायां शास्त्रहृदयमित्याह अस्मत्सिद्धांतं इति ७५ कोसावि-
त्यत आह वैराग्येति ७६

नन्वस्यानेव परिहारोयं ज्ञानिनां प्रवृत्त्यभावस्य पुराणसिद्धत्वादिति शंकते भरतादेरितीति श्रुतिमजानानश्चोदयतीति परिहरति जक्षन्निति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति श्रौतं वाक्यं किं नाश्रौषीरित्यर्थः जक्षन्भक्षयन् जक्ष भक्षहसनयोरिति धातोः क्रीडन्स्वेच्छया विहरन् रममाणः स्त्र्यादिभिः

भरतादेरप्रवृत्तिः पुराणोक्तेति चेत्तदा जक्षत्क्रीडन्रतिं विंद
न्नित्यश्रौषीर्न किं श्रुतिं ७२ नह्याहारादि संत्यज्य भरताद्याः स्थि
ताः क्वचित् काष्ठपाषाणवत्किंतु संगभीता उदासते ७३ ५

नोपजनं स्मरन्निदं स्वशरीरमित्युपजनं जनानां समीपे वर्त्तमानमिदं स्वशरीरं न स्मरन् ज्ञानानुसंधान इत्यर्थः श्लोके रतिं विंदन्निति श्रौतस्य रममाण इति पदस्य व्याख्यानं ७३ ननु तर्हि पुराणस्य का गतिरित्याशंक्य पुराणमप्यौदासीन्यबोधनपरं न प्रवृत्त्यभावपरमित्यभिप्रेत्याह नह्याहारादिति ७४ श्रीरामायनमः ८८ ५

उपरतेः फलानि दर्शयति यमादिरिति आदिशब्देन नियमादयोऽन्त्यं धीनिरोधश्चित्तवृत्तिनिरोधलक्षणो योगः वि३दी१०
८० किमेतेषां समं प्राधान्यमुत नेत्याशंक्याह तत्त्वबोध इति तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्य

यमादिधीनिरोधान्तव्यवहारस्य संक्षयः स्युर्हेत्वाद्या उपरते
रित्यसंकर ईरितः ८० तत्त्वबोधः प्रधानं स्यात्साक्षान्मोक्ष॰
प्रदत्वतः बोधोपकारिणावेतौ वैराग्योपरमावुभौ ८१ ॥८॥

सम

४०

तेऽयनायेति श्रुतेरित्यर्थः इतरयोस्तूपकारित्वं ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवा
भिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति॰
श्रुतिभ्यामवगम्यते ८१

वैराग्यादीनामन्योन्यापतिहारेण व्याख्यानदर्शनादभेदाशंकायां तद्धेतत्वादीनां भेदाद्भेदोऽवगंतव्य इत्याह हे
तुस्वरूपेति ७७ तत्र वैराग्यहेत्वादित्रयं दर्शयति दोषदृष्टिरिति ७८ इदानीं तत्त्वबोधस्य कारणादीनि दर्श
यति श्रवणादीनि आदिशब्देन मनननिदिध्यासने गृह्येते आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इ

हेतुस्वरूपकार्याणि भिन्नान्येषामसंकरः यथावदवगंतव्यः शास्त्रार्थं प्रवि
विच्यता ७७ दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता असाधारणहेत्वा
द्या वैराग्यस्य त्रयोऽप्यमी ७८ श्रवणादित्रयं तद्वत्तत्त्वमिथ्याविवेचनं पुन
र्ग्रंथेरनुदयो बोधस्यैते त्रयो मताः ७९

इत्यात्मदर्शनसाधनत्वेन श्रवणादिविधाना
च्छ्रवणादेर्ज्ञानहेतुत्वं तत्त्वमिथ्याविवेचनं कूटस्थस्याहंकारादेश्चभेदज्ञानं ग्रंथेरनुदयोऽन्योन्याध्यासानुत्प
त्तिः ७९

वैराग्योपरत्योस्तु प्रतिवंधो जीवन्मुक्तिसुखं न सिध्यतीत्याह पूर्णे वोध इति ८४ इदानीं वैराग्यादीनामवधिं दर्शयति व्रह्मलोकेति ८५ सुप्तिवदिति ऽअवांतरतारतम्यं तु स्ववुध्या निश्चेयमित्याह दिशेति ८६ ननु त

पूर्णे वोधे तदन्यौ द्वौ प्रतिवद्धौ यदा तदा मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति ८४ व्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः देहात्मवत्परात्मत्वदार्ढ्ये वोधः समाप्यते ८५ सुप्तिवद्विस्मृतिः सीमा भवेदुपरमस्य हि दिशानया विनिश्चेयं तारतम्यमवांतरं ८६ ऽप्रारब्धकर्मनानात्वाद्वुद्धानामन्यथान्यथा वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पंडितैः ८७

त्ववोधवतामपि रागादिमत्त्वेन वैषम्योपलंभात् ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यत इत्याशंक्य रागादेर्व्याध्यादिवदारब्धकर्मफलत्वान्मुक्तिप्रतिवंधकत्वमसिद्धमतो न शास्त्रार्थे विप्रतिपत्तव्यमित्याह ऽप्रारब्धकर्मनानात्वादिति. ८७ ॥ ॥

प्रायेण सहवर्त्तन्ते वियुज्यन्ते कश्चित्कश्चिदित्युक्तं तत्र कारणमाह त्रयोपीति अनेकजन्मार्जितपुण्यपुञ्जपाकेन त्रया
णां सहभावो भवति अन्यथा तत्प्रतिबंधकपापानुसारेण पुरुषविशेषे कालविशेषेण कस्यचित्प्रतिबंधो भवती

त्रयोप्यत्यंतपक्वाश्चेन्महतस्तपसः फलं दुरितेन क्वचित्किंचित्कदाचि
त्प्रतिबध्यते ८२ वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते यस्य तस्य न मोक्षो
स्ति पुण्यलोकस्तपोबलात् ८३

तिभावः ८२ तत्रापि तत्त्वज्ञानप्रतिबंधे मोक्षो नास्तीत्याह वैराग्येति तर्हि वैराग्यादिसंपादनं निष्फलमित्याशंक्या
ह प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायत इति भगवद्वचनात्पुण्य
लोकप्राप्तिर्भवतीत्याह पुण्यलोकस्तपोबलादिति ८३

किं तर्हि प्रतिपत्तव्यमित्यत आह स्वस्वेति सर्वेषां ब्रह्माहमस्मीति ज्ञानमेकाकारं निरवद्यं ब्रह्मरूपेणाव
स्थानं च समानमिति भावः ८८ प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति ८९ अनेनाभ्यासफलमाह ९०५

स्वस्वकर्मानुसारेण वर्तन्तां ते यथा तथा । अविशिष्टः सर्वबोधः समाना
मुक्तिरिति स्थितिः ८८ जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितं मायया तदु
पेक्ष्यैव चैतन्ये परिशिष्यतां ८९ चित्रदीपमिमं नित्यं येनुसंधत्ते बुधाः प
श्यंतोपि जगच्चित्रं ते न मुह्यंति पूर्ववत् ९० इति चित्रदीपः स
माप्तः

चित्रदीपमिति २९० इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यश्रीचरणशि
ष्येण रामकृष्णाख्यविदुषा विरचिते तात्पर्यबोधिनीनामके चित्रदीपव्याख्यानं समाप्तं ॥ १८८९ ॥